NOTICES

OF

SANSKRIT MSS.

BY

RÁJENDRALÁLA MITRA, LL. D., C. I. E.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, of the Physical Class of the Imperial Academy of Sciences, Vienna, of the Italian Institute for the Advancement of Knowledge, of the American Oriental Society, and of the Bombay Branch of the Royal Asiatic Society: Corresponding Member of the German Oriental Society, of the Royal Academy of Science, Hungary, and of the Ethnological Society of Berlin; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c. &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME X, PART I.

FOR THE YEAR 1888-89.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS.
1890.

INDEX TO VOLUME X, PART I.

NOTICES OF SANSKRIT MSS.

No. 3241. **विधानमाला ।** Substance, country-made paper, 10 × 6½ inches. Folia, 159. Lines, 16 on a page. Extent, 5,883 ślokas. Character, Nágara. Date, Sk. 1765. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Vidhána-málá. Accounts of a large number of rites, principally expiatory, for different kinds of faults, omissions and accidents. By Nṛisiñha Bhaṭṭa.

Contents. Propriety of the name of the work. Its object. The real nature of what is good and desiderated. Nature of works which should be always performed. Menses. Evils resulting from the first manifestation of the menses under particular circumstances. Expiations for the same. Expiations for abnormal births. Ditto for twins. Ditto for births under certain specified Nakshatras. * * * * Means for promoting the secretion of milk during confinement. Rites for curing illness in infants from various causes. Preservation of the fœtus in the first month of its life, and so on during succeeding months of its gestation. Rites for promoting conception in barren women. Endemic and epidemic diseases. Epizootics among cattle, among horses, among elephants, among camels, among asses. Propiation of Nakshatras. Ditto adverse planets. Rules for the rebuilding of a house after it has been burnt down. Ceremonies to avert evils from improper plucking of plants. Expiation of evils arising from the fall of a lizard on different parts of the body. Initiation in the art of war. Paralysing of enemies. Expiation for roaring of clouds at dawn during certain rites. Marriage of an Arka tree. The festivals of Vasantapujá. Illumination in the month Kártika. The Holi festival. The putting on of the Brahmanical cord. The reading of the Chandí section of the Márkaṇḍeya Puráṇa. Miscegenation. Digging of the earth. Aversion of evils arising from cattle crying at improper times. Duties enjoined on the death of Brahmacharis, lepers, Yatis, and on death arising from falls from precipices. The formal recitation of the Mahábhárata, the Rámáyaṇa, the Kás'íkhaṇḍa, &c. Worship of the nine planets. Expiations for inauspicious sights. The fast of Kapiláshashṭhí. Departures for mountains. The rite

of Brahmakurcha. In auspicious sight. Rites to conquer death. Planting of trees. Adoption of sons. Avoidance of scandals and falsehoods. Preventions of diseases. The Vṛishotsarga sacrifice. Sacrifice to Náráyaṇa. Ditto to Nágas. Sacrifice for passage across the styx. Good and bad Nakshatras for funeral rites. Means of propitiating planets. Cure for snake-bites. Initiations in mantras. Dedication of houses. Worship of tutelary gods. Propitiation of Budha, Sukra and other planets. Breaking down of carriages. Consecration of flags. The ceremony of Túlápurasha. Altars. Cure of such diseases which proceed from the mother of a child.

Beginning. यो धान्वन्तरशास्त्रमर्मचतुरः कारुण्यरत्नाकरः
सौजन्यामृतपूर्णमानससरिच्छ्रीशम्भुचिन्तः सदा ।
भूपालादिकलालनीयचरणद्वन्द्वस्य सूनुर्हरे-
र्भूविस्तारियशाः सदा जयति स श्रीविश्वनाथः सुधीः ॥
प्रणम्य लम्बोदरमुत्तमानां सन्तोषदां सर्व्वपुराणदृष्टां ।
धर्म्मार्थकामव्यवहारसिद्ध्यै करोमि शुद्धार्थविधानमालाम् ॥

बिधानमालेति ग्रन्थनामधेयं। तच्चान्वर्थकं विधानानां मालेव माला परम्परेति। बिधानं विधिः इत्यादि ।

End. वैराटे विषयेऽस्ति चन्दनगिरेर्गव्यूतिमात्रं पुरो
देव्याः प्राक् सुमनोहरा(रे)वसुमतीतीरेऽग्रहारं महत् ।
तत्र ज्यातिकुलोद्भवो गुणनिधिः श्रीमान् नृसिंहो द्विज-
श्चक्रे शास्त्रमिदं नृणामुपकृतं सन्धाय चित्ते निजे ॥
विधानमाला ग्रथिता मयाद्य गुणानुसन्धानविराजमाना ।
प्रमेयसारैः सुरभिः पवित्रां कुर्व्वन्तु कण्ठेषु निजेषु धीराः॥

Colophon. इति श्रीनृसिंहभट्टविरचितायां (?) विधानमालाख्यग्रन्थः सम्पूर्णः ॥
शाके १७६५ ।

विषयः । विधानमालाशब्दसमर्थनं। प्रयोजनादिस्वरूपनिर्णयः। इष्ट्यादिस्वरूपकथनं। नित्यकाम्यादिकर्म्मलक्षणं । तत्र प्रथमतः पुष्पवतीविधानकथनं । तत्र प्रथमर्त्तौ रजोदोषनिमित्तविघ्नहरादिविधानकथनं । अथ विकृतजननशान्तिविधानं । यमलसन्तानोत्पत्तिविधानकथनं । पितृनक्षत्रतुल्यनक्षत्रजन्मनि ज्येष्ठभ्रातृनक्षत्रसमाननक्षत्रजनने च शिशोः शान्तिविधानं । मूलानक्षत्रजन्मनिमित्तशान्तिविधानं । आश्लेषविधानं । गण्डान्तविधानं । सूतिकास्तन्यवर्द्धनविधानं । बालग्रहपीड़ोपशमनविधानं । एवं वायसक्षेत्रपालादिग्रहपीड़ाविधानं । अथ बालरक्षाविधानं । तत्र क्रमेण प्रथमादिमासे गर्भरक्षार्थं विधानकथनं । जातस्य बालस्य रक्षाविधानं । अथ बन्ध्या-

नामपि गर्भजननाय अभिषेकादिविधानं। देशायुद्भवजलपीड़ाशान्तिविधानं। जनमारभयशान्तिविधानं। गोमारशान्तिविधानं। एवं अश्वशान्तिविधानं। गजशान्तिविधानं। करभशान्तिविधानं। एवं खरादिशान्तिविधानं। अथ नक्षत्रविशेषशान्तिविधानं। ग्रहारिष्टनिवारणविधानं। अग्निदग्धगृहादिपुनःसंस्कारविधिः। तरुप्ररोहादिविध्वंसशान्तिकथनं। कपोतशान्तिविधानं। पल्लीपतनादिविधानं। रणदीक्षादिविधिकथनं। रिपुस्तम्भनादिविधानं। व्रतबन्धकाले प्रदोषगर्ज्जितादिविधानं। अर्कहृक्षादिविवाहविधानं। वसन्तपूजाविधानं। कार्त्तिकदीपोत्सवादिविधिः। होलिकादिविधिकथनं। पवित्रारोपणादिविधानं। चण्डीपाठादिविधानं। अथ सङ्कीर्णविधानं। भूमिभेदनविधानादिकथनं। गोवृतादिविघ्नहरणविधानं। ब्रह्मचारिनिधनविधानं। कुष्ठिमरणादिविधानं। यतिमरणभृगुपतनादिविधानं। भारतश्रवणादिविधानं। रामायणकाशीखण्डादिश्रवणविधानं। नवग्रहमखविधानं। विरुद्धदर्शनादिशान्तिविधानं। कपिलाषष्ठीविधानं। शैलयात्राविधानं। ब्रह्मकूर्चादिविधानं। ऊर्द्धदण्डोद्यमविघ्नहरविधानं। मृत्युञ्जयविधानं। वृक्षारोपणादिविधानं। दत्तकपुत्रग्रहणविधानं। अन्तवार्त्तापरीहारविधानं। सर्व्वगदनिवारणविधिकथनं। वृषोत्सर्गविधानं। नारायणबलिविधानं। नागबलिविधानं। वैतरणीदानविधानं। प्रेतकर्म्मणि दुष्टादुष्टनक्षत्रविधानं। ग्रहदोषहरविधानं। सर्पदष्टापमृत्युहरणविधानं। मन्त्रस्वीकारविधानं। प्रासादोद्यापनविधानं। वास्तुपूजनादिविधानं। बुधशान्तिविधानं। शुक्रादिशान्तिविधानं। शकटभेदादिविधानं। केतुपूजादिविधानं। तुलापुरुषादिविधानं। सर्व्वविधहोमकुण्डनिर्म्माणविधानं। मातृरजाहरविधानकथनञ्च। इति शम्।

No. 3242 विष्णुयागपद्धतिः। Substance, country-made paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 32. Lines, 10 on a page. Extent, 720 ślokas. Character, Nágara. Date, Sm. 1830. Place of deposit. Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Vishṇuyága-paddhati. Rituals for a rite for the gratification of Vishṇu. The object of the rite is prayer for progeny. The details of the rite varies according to the caste of the performer. By Anantadeva, son of A'padeva.

Beginning. सहस्रशीर्षादिविधौ य उक्तः पुमान् जगज्जन्मनि वीजभूतः।
वेदैः प्रणम्यामुममुष्य तुष्ट्यै वक्ष्येऽत्र तद्दैवतयज्ञभेदान्॥
ऋग्विधाने।
शुक्ले पक्षे शुभे वारे सुनक्षत्रे सुगोचरे।
द्वादश्यां पुत्रकामाय यज्ञं कुर्वीत वैष्णवं॥

दम्पत्योरुपवासः स्यादेकादश्यां सुरालये ।
अग्निषोड़शभिः सम्यगर्चयित्वा जनार्द्दनम् ॥ इत्यादि ।

End. दक्षिणोत्सर्गादिपरमेश्वरार्पणान्तं पूर्व्ववदिति चतुर्थवर्णाधिकारिको वैष्णव-यागप्रयोगः ।

———————————————।

मानावैष्णवयज्ञानां सप्रमाणं निरूपणं ।
अकारीत्यमनन्तेन तेन तुष्यतु यज्ञभुक् ॥

Colophon. इति श्रीमद्वापदेवसुतानन्तदेवविदुषा कृतौ विष्णुयागपद्धतिः समाप्ता ।

संवत् १८७० ।

विषयः । अत्र वैष्णवधर्म्मावलम्बिपुत्रकामेन यथोक्तविधिना वैष्णवयागः कर्त्तव्य इतिनिरूपणपूर्व्वकं ब्राह्मणादीनां क्रमेण तत्तद्व्रतेतिकर्त्तव्यतानिरूपणं । प्रयोगकथनञ्च ॥ इति शम् ।

No 3243. वेदपारायणाङ्गहोमविधिः । Substance, country-made paper, $10\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 10. Lines, 12 on a page. Extent, 367 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Vedapáráyanáñga-homa-vidhi. Rules for the performance of a homa rite preparatory to the reading of the Vedas with a vow. By Bálakṛishṇa. The colophon is wrong.

Beginnign. नत्वोमामाधवौ देवौ ब्रह्मणे च स्वयम्भुवे ।
ऋग्वेदमन्त्रदृग्भ्यश्च शौनकादिभ्य एव च ॥
ऋग्विधानादिकं दृष्ट्वा ऋग्वेदे देवताक्रमं ।
बालकृष्णश्रोत्रियोऽत्र वक्ष्ये होमविधानकं ॥

अथ पारायणहोमविधिमाह । तत्रादौ शरीरशुद्धिमाह ऋग्विधाने । इत्यादि ।

End. जातवेदसमग्निं स्वर्य्यं भावदृत्तं संज्ञानं । सू० ४९ ऋ० २१ ।

Colophon. इति चतुःषष्टितमोऽध्यायः ॥

विषयः । वेदपारायणार्थमादौ होमादिविधितत्प्रयोगकथनं । ऋचां देवताक्रमकथनञ्च ।

No. 3244. सत्कर्म्माध्वप्रदर्शनी वा वह्वृचकर्म्मप्रयोगकारिका। Substance, country-made paper, 12×4¼ inches. Folia, 44. Lines, 10 on a page. Extent, 1,155 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Satkarmádhva-pradarśaní ALIAS **Vahvṛichakarma-prayoga-káriká.** Memorial verses giving directions for the performance of Ṛig Vedic rites and ceremonies. The rules paraphrased are of S'ákala, but the paraphrast withholds his own name.

Beginning. शाकलोऽहं प्रयोगञ्च वच्म्ये वह्वृचकर्म्मणां।
कारिकायामनुक्तं यत् तदेव हि समन्वकं॥
आचार्य्यस्य च वै यावत् सत्कर्म्माध्वप्रदर्शनी।
प्रोच्यते कारिकेतीह सद्भिश्चैव तु लौकिके॥ इत्यादि।

End. नग्नप्रच्छादनं चात्र वदन्त्येके महर्षयः।
अथवा विषमत्वात् किं कुर्य्यादादि + + विदुः॥
(अतः परं खण्डितत्वात् परिशेषवाक्यं नास्ति।)

विषयः। ऋग्वेदिनां व्रतबन्धादिकर्म्मसु प्रत्येकं विशेषेणेतिकर्त्तव्यतादिनिरूपणं। अत्र क्रमेण उपनयनविवाहगर्भाधानादिषु विधिनिरूपणञ्च।

No. 3245. विध्यपराधप्रायश्चित्तलघुवृत्तिः। Substance, country-made paper, 9×4 inches. Folia, 17. Lines, 9 on a page. Extent, 287 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Vidhyaparádha-práyaśchitta-laghu-vṛitti. Exposition of the rules relating to expiations for errors and defects in the performance of rites. By Kṛishṇa Bhaṭṭa.

Beginning. अथ विध्यपराधे प्रायश्चित्तिः। विहितस्याकरणेऽन्यथा वा प्रायश्चित्तिः कर्त्तव्या। अपराधे सति तदर्थतया विहितमस्ति चेत् तदेव कर्त्तव्यं। इत्यादि।

End. इति संकल्प्य। तथा सूर्य्यस्य। उद्वयमुदुत्यं चित्रमिति तिस्र आज्याहुती-र्जुहुयादिति समाप्तानि विध्यपराधे प्रायश्चित्तानि॥

वेदवेदाङ्गपारज्ञकृष्णभट्टस्य सूनुना।
नानाशाखीयभाष्याणि (?) लघुवृत्तिः प्रकाशिता॥
श्रीयज्ञपुरुषार्पणमस्तु।

विषयः। अग्निहोत्रादिषु सति विध्यपराधे तत्र तत्र श्रौतप्रायश्चित्तविधिकथनपूर्व्वकं तत्तद्व्याख्यानम्।

No. 3246. विवेकदीपकः। Substance, country-made paper, $11\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 216. Lines, 11 on a page. Extent, 6,385 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Viveka-dípaka. Rituals for the performance of the sixteen great acts of beneficence enjoined in the S'ástras. By Dámodara. The codex is incomplete.

Beginning. आदितः सप्त पत्राणि खण्डितानि। ——— दानानां प्रमाणनिर्णय-प्रयोगपद्धतौ च कर्त्तव्यायां प्रथमं प्राधान्येन तुलापुरुषादिषोड़शमहादाननिर्णयः कर्त्तव्यः।

End. जलं दत्त्वा ददस्वेति तैरुक्ते देयद्रव्यमभिषिच्य कुशादीन्यादाय विष्णुं संस्मृत्य आद्येत्यादिना पुण्योपचयहेतुदेशकालानुस्मृति—इतः परं खण्डितं।

विषयः। तुलापुरुषादियोड़शमहादानविधितत्प्रयोगादिकथनं।

No. 3247. वटोद्यापनविधिः। Substance, country-made paper, 9×4 inches. Folia, 18. Lines, 9 on a page. Extent, 306 ślokas. Character, Nágara. Date, Sk. 1699. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Vaṭodyápana-vidhi. Rules for the dedication of a Vaṭa tree according to the ordinances of Baudháyana.

Beginning. अथ वटोद्यापनविधिर्लिख्यते। तत्र कालः, महाशौनकः। स्थापनादष्टमे वर्षे दशमे द्वादशेऽपि वा। ततः कालत्रये शस्ते कुर्य्यादुद्यापनक्रियां। इत्यादि।

End. दीनानाथांश्चान्नादिना सन्तोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहः सन्तुष्टो भुञ्जीत—इति।

Colophon. इति बोधायनोक्तवटोद्यापनविधिः। शाके १६९९।

विषयः। बौधायनोक्तप्रकारेण वटवृक्षप्रतिष्ठाविधिकथनं। तत्प्रयोगकथनञ्च।

No. 3248. वशीकरणस्तोत्रम् । Substance, country-made paper, $7\frac{1}{2} \times 4$ inches. Folia, 3. Lines, 7 on a page. Extent, 25 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Vaśíkaraṇa-stotra. A hymn in praise of the goddess Váráhí for the purpose of bringing the creation under one's control. It is apparently an extract from some Tantra or other.

Beginning. अस्य श्रीवश्यवाराहीस्तोत्रमन्त्रस्य अजः ऋषिः शिरसि गायत्री छन्दोमुखे वशीकरणवाराही देवता इति हृदये क्रौं वीजं इति गुह्ये ऐं शक्तिः पादयोः क्लीं कीलकं नाभौ इत्यादि ।

End. तस्मादवश्यं वाराहि जगत् सर्व्वं वशीकुरु ।
वश्यस्तोत्रमिदं देव्यास्त्रिसन्ध्यं यः पठेन्नरः ॥
सोऽभीष्टवश + भक्त्या रामो (?) राज्यमथापि वा ।

Colophon. इति वशीकरणस्तोत्रं सम्पूर्णम् ।

विषयः । जगद्वशीकरणोपायरूपवाराहीस्तुतिकीर्त्तनम् ।

No. 3249. वामनजयन्तीव्रतविधिः । Substance, country-made paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 12. Lines, 10 on a page. Extent, 226 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Vámanajayantí-vrata-vidhi. Rituals for the performance of the fast called *Vámanajayantí-vrata.* It is performed on the 12th of the waxing moon in the month of S'rávaṇa. It is an extract from the latter portion of Bhavishya Puráṇa.

Beginning. अथ श्रवणद्वादश्यां वामनपूजा लिख्यते । मासपक्षाद्युल्लिख्य मम इह जन्मनि जन्मान्तरे च समस्तपापक्षयपूर्व्वकविष्णुलोकप्राप्त्यर्थं श्रवणद्वादशीव्रताङ्गत्वेन—इत्यादि ।

End. भूमौ यथेच्छया राजन् सर्व्वत्रैष विधिः स्मृतः ।
एवं व्रते कृते ब्रह्मन् यत् पुण्यं तन्निबोध मे ॥

Colophon. इति श्रीभविष्योत्तरपुराणे वामनजयन्तीव्रतोद्यापनं सम्पूर्णम् ।

विषयः । श्रवणद्वादश्यां वामनजयन्तीव्रतविधिकथनं । तत्र तत्प्रयोगकथनं । उद्यापनविधिकथनञ्च ।

No. 3250. **विधुरौपासनम् ।** Substance, country-made paper, 12 × 3 inches. Folia, 2. Lines, 10 on a page. Extent, 33 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Vidhuraupásana. Rules for the performance of sacrifices by a widower who is in a condition to marry again. The work is especially devoted to the A'dhána rites, and the rite of cremation.

Beginning. श्रीगणेशाय नमः ।

विधुरकल्पोक्तविधिना विधुराग्ने पुनरुत्पावयिष्यामः । स्थण्डिले उल्लिख्य व्याहृतिभिः प्रणवेण श्रोत्रियागाराद्ग्निमादाय—इत्यादि ।

End. साग्निकं सधवाञ्चैव दहेदौपासनाग्निना ।

विधुरं विधवां ब्रह्मचारिणञ्च कुशाग्निना ॥

Colophon. इति विधुरौपासनम् ।

विषयः । मृतपत्नीकस्य विवाहासमर्थस्य साग्निकस्य विधुरौपासनविधिनाऽग्निमाधाय होमादिकर्त्तव्यतानिरूपणम् । तत्प्रयोगकथनञ्च । एवं पुनराधानविधिकथनं । दाहादिविधिकथनञ्च ।

No 3251. **यतिसन्ध्याविधिः ।** Substance, country-made paper, $10 \times 5\frac{1}{2}$ inches. Folia, 13. Lines, 8 on a page. Extent, 188 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Yati-sandhyá-vidhi. Rules for diurnal religious duties, prayers and worship for Yatis. Anonymous.

Beginning. श्रीगणेशाय नमः ।

अथ यतिशौचविधिः ।

उत्तिष्ठ (?) देवगन्धर्वा ऋषयश्च तपोधनाः ।

गच्छन्तु पितरः सर्व्वे करिष्येऽमनलोचनं (?) ॥ इत्यादि ।

End. ॐ गुरुभ्यो नमः, परमेष्ठिगुरुभ्यो नमः, परात्परगुरुभ्यो नमः । अस्मद्गुरुचरणारविन्देभ्यो नमः । इति शम् ।

विषयः । यतीनां शौचादिरिधिकथनं । दण्डप्रचालनादिविधिकथनं । चौरविधिकथनं । सन्ध्याविधिकथनं । तत्र पृथिवीप्रार्थना । प्राणप्रतिष्ठा । हृदयादिन्यासकथनं । समाधिविधितत्-

प्रकारकीर्त्तनं ॥ सगुणध्यानप्रकारादिकथनं । निर्गुणध्यानविधिकथनं । मानसोपचारपूजाविधि-कथनं । नमस्कारविधिकथनञ्च । इति शम् ।

No. 3252. वृषाकपिशस्त्रम् । Substance, country-made paper, $8\frac{1}{2} \times 4$ inches. Folia, 8. Lines, 9 on a page. Extent, 207 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Vṛishákapi-śastra. Explanations of certain Sáma mantras relating to a rite called Vṛishákapi-śastra.

Beginning. अथ वृषाकपिशस्त्रमाह्मणाच्छंसिनः । हिं भूर्भुवः स्वरों ३ अध्वर्य्यो शोशों सावों ३ । इत्यादि ।

End. उतो॰ योमिन्द्रः॰ नः । सखा॰ नातो । विः । उकथ॰ ये॰ हे वृहस्पते युवमिन्द्रश्च वस्व इति यज्यो ॥

Colophon. इति वृषाकपिशस्त्रं समाप्तम् ।

विषयः । वृषाकपिशस्त्राभिधानसामकथनं ।

No. 3253. यतिसन्ध्यावार्त्तिकम् । Substance, country-made paper, $9\frac{1}{4} \times 4$ inches. Folia, 6. Lines, 8—9 on a page. Extent, 87 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Correct.

Yatisandhyá-vártika. Gloss on a work of S'añkara A'chárya on the diurnal religious duties of Yatis.

Beginning. ॐ श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥
शङ्करं शङ्कराचार्य्यं केशवं वादरायणं ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
ओङ्कारः सर्व्ववेदानां सारस्तत्त्वप्रकाशकः । इत्यादि ।

End. समभ्यस्य इहामुत्र भोगानासक्तधीः सुधीः ।
रागद्वेषादिरहितः स्वात्मानं चिन्तयेत् सदा ॥

Colophon. इति श्रीमच्छङ्कराचार्य्यभगवत्पूज्यपादशिष्यसुरेश्वराचार्य्यविरचितं यतिसन्ध्या-वार्त्तिकं समाप्तम् ।

विषयः । शङ्कराचार्य्यकृतयतिसन्ध्याभिधानप्रकरणस्य व्याख्यानम् ।

No. 3254. **यतिसंस्कारः ।** Substance, country-made paper, 12 × 5 inches. Folia, 5. Lines, 9 on a page. Extent, 75 ślokas. Character, Nágara. Date, Sk. 1750. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Yatisañskára. Rules for the funeral rites for Yatis, by sons who are not Yatis.

Beginning. अथ यतिपार्व्वणप्रायश्चित्तविधिप्रारम्भः । कर्त्ता स्नात्वा नित्यकर्म्म निर्वर्त्य ब्राह्मणानाहूय स्वगृहे पुण्याहं वाचयित्वा पार्व्वणश्राद्धे प्रतिसांवत्सरिकवत् ब्राह्मणान् निमन्त्रयेत् ॥ इत्यादि ।

End. भिक्षोः प्रतिसांवत्सरसिद्धिदिवसप्रयुक्ताराधनाख्यमुद्दिश्य युष्मदनुज्ञयाद्य-करिष्ये । इति संकल्प्य भिक्षोराराधनाख्ये कर्म्मणि क्षणः कर्त्तव्य इति ब्राह्मणान् क्षणं दत्वा प्रति-सांवत्सरिकवत् सर्व्वं कुर्य्यात् ॥

Colophon. इति यतिसंस्कारः समाप्तः । शके १७५० । ज्यैष्ठकृष्ण ११ रविवार ।

विषयः। यतेर्मरणे तत्पुत्रेण एकादशाहे पार्व्वणः कर्त्तव्यः । अपि च द्वादशेऽह्नि नारायण-बलिश्च देय इति तत्प्रयोगादिकथनं ।

No. 3255. **महानिसीहसुयक्खंधं, (महानिशीथश्रुतस्कन्धम् ।)** Substance, country-made paper, 13 × 6 inches. Folia, 69. Lines, 17 on a page. Extent, 3,930 ślokas. Character, Nágara. Date, Sm. 1575. Place of deposit, Váluchara, Jiyáganja, Pancháyatapañsála. Appearance, decayed. Prose and verse. Incorrect.

Mahánisíha-suya-kkhandha. Mahániśítha-śrutaskanadh. An exposition of the conduct of Jain Munis.

Beginning. ॐ नमो अरहंताणं ।

सुयं मे आउसं तेणं भगवया एवमक्खावं। इह खलु छउमत्थसंजमकिरियाए वट्टमाणे जेणं केइसा ऊवासाऊणी वा । सेणं इमेणं परमत्थतत्तसारस + यत्थपसाहगसुमहयातिसय एव वरमहानिसी-हसुयक्खंधसुयाणुसारेणं तिविहंतिविहेणं ॥ इत्यादि ।

End. दारिद्दरंद परिकसं+इडवित्तगो । किं वडणा एगं तेण अक्खयधुवमा-सय निरुवम अणंत मोक्खं मोक्खं परिवसे छत्तिवेमे ॥

Colophon. इति महानिसीहसुयक्खंधं समत्तं ॥

विषयः । जैनमुनीनां विस्तरेण आचारादिनिरूपणम् ।

No. 3256. चतुःशरणसूत्रम्। Substance, country-made paper, 12 × 5 inches. Folia, 7. Lines, 5 on a page. Extent, 88 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyatapañsála. Appearance, old. Prose. Correct.

Chatuhśaraṇa-sútra. On the four essentials of Jain emancipation, *viz.*, austerity, merit, conduct and mental abstraction, each called a Virya.

Beginning. सावज्ज जोगविरइ उक्कित्तणगुणवउस्र पड़िवत्ती ।
खलिस्स निंदणावण तिगित्थं गुणधारणावेव ॥
चारित्तस्स विसोही कीरइ सामाइ एणकिलइ इयं।
सावजेस्र रजोगाण वज्जणा सेवणत्तणउ ॥
दंसणयारविसोही चउवीसायत्थएण किज्जइस्र ।
स्रचभूस्रगुण कित्तण सुवेणं जिणवरिंदाणं ॥

End. स्रथ जीवपमायमहारि वीरभद्दं तमेस्रमजभायणं ।
काए सुतिसं उभमं उ कारणं निव्वुइ सुहाणं ॥

Colophon. इति चतुःशरणसूत्रं समाप्तं ।

विषयः । जन्मजरामरणरूपव्याधिना विप्रहतानां जीवानां विरतिप्रमुखोत्तरोत्तरगुणपरिपोषणेन धारणारूपप्रत्याख्यानोदयात् विशुद्धिकरवीर्य्याचारादीनामभ्युदयो भवति । स्रथ ते दानशील-तप-भावनारूपधर्म्मचतुष्टयप्रतिपत्त्या कृतकृत्या भवन्तीतिनिरूपणम् । तथा चारित्रतपोवीर्य्याचारादीनां स्वरूपादिनिरूपणं । वीर्य्यञ्च तपोवीर्य्य-गुणवीर्य्य-चारित्रवीर्य्य-समाधिवीर्य्य-स्रात्मवीर्य्यभेदेन पञ्चविधमितिनिरूपणं । स्रथ चतुर्णामर्हत्सिद्धसाधुधर्म्माणां शरणमेव विधेयमिति निर्णयः । तत्र प्रत्येकमितिकर्त्तव्यतानिरूपणञ्च । इति शं ।

No. 3257. चतुःशरणटीका । Substance, country-made paper, 12 × 5 inches. 9. Lines, 12 on a page. Extent, 340 ślokas. Character, Nágara, Date, ? Place of deposit, Váluchara, Pancháyatapañsála. Appearance. fresh. Prose. Generally correct.

Chatuhśaraṇa-ṭiká. A gloss on the work described in the next preceding No. Anonymous.

Beginning. ॐनमो वीतरागाय ।

इदमध्ययनं परमपदप्राप्तिवीजभूतत्वात् श्रेयोभूतं । स्रतस्तदारम्भे प्रत्यक्तन्मङ्गलरूपसामायकाद्यावश्यकार्थकथनं । इत्यादि ।

End. इह लोकेऽपि च कटुविपाकत्वाच धर्म्म+दौ परिणामे च रस एव । एवं-विधो धर्म्मो मम शरणं भवतु ॥

Colophon. इति चतुःशरणटीका समाप्ता ।

विषयः । जैनचतुःशरणसूत्रस्य व्याख्यानम् ।

No. 3258. आउरपच्चक्खाणम् । Substance, country-made paper, 12 × 5 inches. Folia, 7. Lines, 7 on a page. Extent, 94 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyatapañsála. Appearance, decayed. Prose. Generally correct.

A'urapachcha-kkháṇa. On the various sins and defects which are irimcal to the four essentials of emancipation noticed in No. 3256.

Beginning. देसक्क देसविरउं सम्मदिठी मरिज्जओ जीवो ।
तं हवइ बालपंडिउ मरणं जिणसासणे भणियं ॥
पंचय अणुव्वयाइं सत्तसुसिक्खाउ देसजइ धम्मं ।
सव्वेणव देसेणव तेणज उत्तो इदेसजइ ॥ इत्यादि ।

End. धीरो जरमरणवित्त धीरो विन्नाणणाणसंपन्नो ।
लोगस्सुज्जो यगरो दिसउक्खयं सव्वदुक्खाणं ॥

Colophon. इति श्रीआउरपच्चक्खाणं समाप्तं ।

विषयः । जीवघात-मृषावाद अदत्तादान-परदारपरायणानां विविधवैषयिकध्यानपरम्पराकथनपूर्व्वकं मिथ्यादर्शनादिपरिणामपरिश्रमाय सम्यग्ज्ञानचारित्रदर्शनपरिशोधनेन कृतकृत्यतानिरूपणम् ।

No. 3259. जम्बूद्वीपप्रज्ञप्तिरत्नमञ्जूषा । Substance, country-made paper, 14 × 6 inches. Folia, 388. Lines, 15 on a page. Extent, 19,592 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyatapañsála. Appearance, fresh. Prose and verse. Generally correct. Sanskrit.

Jambudvípaprajṇapti-ratna-manjúshá. A commentary on the Jain text called *Jambudvípaprajṇapti.* By S'ánti Chandra Gani. Vide No. 2569 [VIII, p. 22]. 319. 320.

Beginning. जयति जिनः सिद्धार्थः सिद्धार्थनरेन्द्रनन्दनो विजयी ।

अनुपद्दतज्ञानव + सुरेन्द्रशतसेव्यमानो ज्ञः ॥
सर्वानु(?) योगसिद्धान् हद्धान् प्रणिदध्महे महिम ऋद्धान् ।
प्रवचनकाञ्चननिकषान् सुधीन् श्रीगन्धहस्तिमुखान् ॥

— — — — — —।

इह तावद्विकटभवाटवीपर्य्यटनसमापतितशारीराद्यनेकदुःखार्द्दितो देही अकामनिर्जरायोगतः स्वभावतः सञ्जातकर्म्मलाघवसञ्जिहासया कर्म्मकर्म्मप्रागभावासमानाधिकरणकर्म्मचयलक्षणं परमपदमाकाङ्क्षति ॥ इत्यादि ।

End. अत्र च ग्रन्थपर्य्यवसाने श्रीमन्महावीरनामकथनं चरममङ्गलमिति ॥

Colophon. इति स्वधर्म्मदेशनारससमुल्लसितजगज्ज + जाताभयप्रदानव्रतप्रवर्त्तितसुरात्राणसाहिश्रीअकवरराजाधिराजकश्रीमत्तपागच्छाधिराजश्रीहीरविजयसुरीश्वरपदपद्मोपासनाप्रवणमहोपाध्यायश्रीसकलचन्द्रगणिशिष्योपाध्यायश्रीशान्तिचन्द्रगणिसमुन्मीलितायां जम्बूद्वीपप्रज्ञप्तिरत्नमञ्जूषायां ज्योतिष्काराधिकारवर्णनो नाम सप्तमो वक्षस्कारः समाप्तः। तत्समाप्तौ च समाप्तेयं श्रीजम्बूद्वीपप्रज्ञप्त्युपाङ्गवृत्तिः ॥

विषयः। जम्बूद्वीपप्रज्ञप्त्यभिधानजैनसूत्रस्य व्याख्यानम् ।

No. 3260. ओघनिर्युक्तिसूत्रम् । Substance, country-made paper, 13 × $5\frac{3}{4}$ inches. Folia, 59. Lines, 9, on a page. Extent, 1,261 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchâyatapañsála. Appearance, fresh. Verse. Generally correct.

Oghaniryukti-sútra. On the purification of conduct and the avoidance of accidents thereto. By Bhadraváhua Svámí.

Beginning. अरिहंते वंदित्ता चउदसपुव्वीतहे वदसपुव्वी ।
इक्कारसंगसुत्तच्छधारए सव्वसाह्न्य ॥
ओहेणओ निज्जुत्तिं वुत्यचं चरणकरणाणुउं गाउं ।
अप्पक्खरं महत्यं अणुंगहत्यं सुविहिमाणं ॥
ओहे पिंडसमासे संखेवा + वज्झणिए ग + ।
निज्जुत्तत्तिअत्या जंवद्दा + ण निज्जुत्ती ॥ इत्यादि ।

End. एसो अणुग्गहत्या फुड़विअड़विसुद्धवंजणाइत्ता ।
इक्कारसहिं सएहिं स + अहिएहिं + गहिया ॥

Colophon. इति श्रीओघनिर्य्युक्तिसूत्रं समाप्तं ॥

विषयः । अथ आवश्यकानुयोगस्य चत्वारि अनुयोगद्वाराणि उपक्रमो निःक्षेपोऽनुगमो नयश्चेति । तत्र निर्युक्त्यनुगमः सूत्रानुगमश्चेति अनुगमो द्विविधः । अथ उपोद्घातः, निःक्षेपः, सूत्रस्पर्शश्चेति निर्य्युक्त्यनुगमस्य त्रिविधत्वं । अत्र सन्दर्भोऽस्मिन् उपोद्घातनिर्य्युक्त्यनुगमे निरूपितः । अथ चरणादिव्रतानां करणादिरूपपिण्डविशुद्ध्यादीनां निरूपणमुखेन जैनसाधूनां ब्रह्मचर्य्यादिगुप्तिमभिधाय सम्यग्ज्ञानदर्शनचारित्राणां परिग्रहोऽवश्यमेव कर्त्तव्य इति निरूपणम् ।

No. 3261. ओघनिर्युक्तिटीका । Substance, country-made paper, 16×4 inches. Folia, 140. Lines, 13 on a page. Extent, 7,962 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyatapañsála. Appearance, old. Prose. Correct.

Oghaniryukti-ṭíká. A commentary of the work noticed under the next preceding No. By Droṇa A'chárya.

Beginning, अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः सिद्धेभ्यः क्षतघनकर्म्मबन्धनेभ्यः
आचार्य्यश्रुतधरसर्व्वसंयतेभ्यः सिद्धधीः सततमहं नमस्करोमि ॥

प्रक्रान्तोऽसाव + + + नु + + मध्ययनमनुवर्त्तते । तस्य च चत्वार्य्यनुयोगद्वाराणि भवन्ति । तद्यथा । उपक्रमो निःक्षेपोऽनुगमो नय इति । एतेषां चाध्ययनादौ उपन्यासे इत्यत्र क्रमोपन्यासे प्रयोजक + + + निःक्षेपावुक्तौ । अधुनानुगमावसरः । इत्यादि ।

End. अङ्गीकृत्य सर्व्वाङ्गीकरणे पुनरष्टभिरेवोत्कृष्टतो भवेत् । सेवर्त्तिकासंहनने सिध्यतीति सुगमा ॥

Colophon. ओघनिर्युक्तिटीका समाप्ता । कृतिरियं द्रोणाचार्य्यस्येति । शुभं भवतु ।

विषयः । ओघनिर्युक्त्यभिधानजैनसूत्रस्य वाख्यानम् ।

No. 3262. पिण्डनिर्युक्तिवृत्तिः । Substance, country-made paper, 14 × $5\frac{3}{4}$ inches. Folia, 86. Lines, 17 on a page. Extent, 7,036 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyatapañsála. Appearance, decayed. Prose. Generally correct. Sanskrit.

Piṇḍaniryukti-vṛitti. A gloss on Bhadraváhu's work on the rules regarding food and the sins committed by neglect thereof. By Malaya Giri.

Beginning. ॐनमो वीतरागाय ।

जयति जिनवर्द्धमानः परहितनिरतो विधूतकर्म्मरजाः ।
मुक्तिपथचरणपोषकनिरवद्याहारविधिदेशी ॥

नत्वा गुरुपदकमलं गुरूपदेशेन पिण्डनिर्युक्तिं ।
विवृणोमि समासेन स्पष्टं शिष्यावबोधाय ॥

भाह निर्युक्तयो न स्वतन्त्रशास्त्ररूपाः । किन्तु तत्तत्सूत्रपरतन्त्रास्तथा तद्व्युत्पत्त्याश्रयणात् । तथा हि सूत्रोपात्ता अर्थाः स्वरूपेण सम्बद्धा अपि शिष्यान् प्रति निर्युज्यन्ते । इत्यादि ।

End. व्याख्याता यैरेषा विषमपदापि सुललितवचोभिः ।
अनुपकृतपरोपकृतो + विवक्षतस्तान् नमस्कुर्वे ॥
इमाश्च पिण्डनिर्युक्तिमतिगम्भीरां विवृण्वता कुशलं ।
यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः ॥

Colophon. इति पिण्डनिर्युक्तिविवृतिः समाप्ता ।

विषयः । भद्रबाहुस्वामिकृतपिण्डनिर्युक्तिनामकजैनसूत्रस्य व्याख्यानम् ।

No. 3263. शिष्यहिता, वा आवश्यकवृहद्वृत्तिः । Substance, country-made paper, 16 × 5 inches. Folia, 317. Lines, 17 on a page. Extent, 15,444 ślokas. Character, Nágara. Date, Sm. 1620. Place of deposit, Válughara, Pancháyatapausála. Appearance, decayed. Prose and verse. Correct. Sanskrit.

Sishyahitá alias A'vaśyaka-vṛihat-vṛitti. A commentrary on the *Ávasyaksútra*. By Haribhadra Suri.

Beginning. प्रणिपत्य जिनवरेन्द्रवीरश्रुतदेवतागुरून् साधून् ।
आवश्यकस्य + + + + + वक्ष्ये ॥
यद्यपि मया तथान्यैः कृतास्य विवृतिस्तथापि संक्षेपात् ।
तद्रुचि सत्वानुग्रहहेतोः क्रियते प्रयासोऽयं ॥

इहावश्यकप्रारम्भप्रयासोऽयुक्तः प्रयोजनादिरहितत्वात् कण्टकशाखामर्द्दनवदित्येवमाद्याशङ्काप-नोदाय प्रयोजनादि पूर्वं प्रदर्श्यत इति । उक्तञ्च ।
प्रेक्षावतां प्रवृत्त्यर्थं फलादित्रितयं स्फुटं ।
मङ्गलं चैव शास्त्रादौ वाच्यमिष्टार्थसिद्धय इति ।
अतः प्रयोजनमभिधेयं सम्बन्धो मङ्गलञ्च यथावसरं प्रदर्श्यत इति ।

End. भावनिःक्षेपमिच्छन्तीतिगाथार्थः । शिष्यहितायां प्रत्याख्यानविवरणं समाप्तं ।
व्याख्यायाध्ययनमिदं यदवाप्तमिह शुभं मया पुण्यं ।
शुद्धं प्रत्याख्यानं लभतां भव्यो जनस्तेन ॥

समाप्ता चेयं शिष्यहिता नाम आवश्यकटीका। कृतिर्गिरां वराचार्य्यजिनभटनिगदानुसारिणो विद्याधरकुलतिलकाचार्य्यजिनदत्तशिष्यस्य धर्म्मतेजो+णी महत्तरा + + + तराचार्य्यहरि-भद्रस्य ॥

Colophon. स्वस्तिश्रीविक्रमार्कसमयातीतसंवत् १६१० ।

विषयः। जैनावश्यकसूत्रस्य व्याख्यानम् ।

No. 3264. आवश्यकलघुवृत्तिः। Substance, country-made paper, 12 × 6 inches. Folia, 491. Lines, 13 on a page. Extent, 13,138 ślokas. Character, Nágara. Date, Sm. 1914. Place of deposit, Váluchara, Pancháyatapañsála. Appearance, new. Prose and verse. Generally correct. Sanskrit.

A'vaśyaka-laghuvṛítti. An exposition of the A'vasyaka-sútra. By Telaka A'chárya. It is called *laghu* or brief in contradistinction to next preceding work which is called *vṛihat,* or great, but the difference of in the bulk of the two works is trifling, the great numbers 15,444 sloks in the laghu one 13,138.

Beginning. देवः श्रीनाभिसूनुर्जनयतु स शिवान्यंशदेशे मदीये

खेलन्ती कुन्तलाली विलसदलिकुलप्रोज्वलांशालते स्म ॥

सञ्जाते संयमश्रीपरिणयनविधौ माङ्गलिक्ये त्रिलोकी

लक्ष्म्या दूर्व्वाङ्कुराणां ततिरिव पतितोदस्तहस्तद्वयाग्रात् ॥

विश्वाहङ्कारम+समितिकृतिरतिस्वक्र + + ङ्कपाणि-

प्रोद्यद्गीर्व्वाणशाली व्यपगतविषमास्त्रारिदोर्द्दण्डकण्डुः ।

भक्तिप्राग्भारनम्रक्षितिपतिपटलीमौलिकोटीरकोटी ॥

शाणाकोणाग्रलेखोल्लिखितनखशिखः पातु वीरस्त्रिलोकीम् ।

— — — — — — — ।

तद्व्यदावश्यकमहं विवरीतुं मतिं व्यधां ।

गङ्गां तरीतुमारब्धसद्दोष्णीके (?) न कृष्णवत् ॥

महाशास्त्रस्य चामुष्य महाकविविनिर्म्मिते ।

गम्भीरार्थे महत्यौ स्तसूर्णिदृत्तिश्च यद्यपि ॥

तथाप्यत्यल्पधीहेतोरल्पधीरप्यहं पुनः ।

रचयिष्याम्यमूं वृत्तिमुत्तानार्थां लघीयसीम् ॥

— — — — — ।

इहायं शास्त्रवेधसां सुमेधसां शास्त्रसन्दर्भे + + संरम्भविधिः। यथा सर्व्वाण्यपि शास्त्राणि मङ्गलाभिधेयसम्बन्धप्रयोजनप्रतिपादनपूर्व्वाण्येव प्रवर्त्तन्ते ॥ इत्यादि।

End. यथाख्यातचारित्रिण एव महोदयपदावाप्तिरिति शं।

इति श्रीश्रीतिलकाचार्य्यविरचितायामावश्यकलघुवृत्तौ प्रत्याख्यानाध्ययनं समाप्तं।

— — — — — — —।

वृत्तिं रचयता चैतां सुकृतं यन्मयार्ज्जितं।
भवे भवेऽहं तेन स्यां श्रुताराधनतत्परः॥
शतद्वादशकेऽब्दानां गते विक्रमभूभुजः।
संवत्सरे षण्णवतौ वृत्तिरेषा विनिर्म्ममे॥
शिष्या नः शस्य (स्वच्छ) चारित्राः सर्व्वशास्त्राब्धिपारगाः।
अस्यां साहायकं चक्रुः श्रीपद्मप्रभसूरयः॥
शिष्योऽस्माकमिमां वृत्तिमखिन्नशास्त्रतत्त्ववित्।
अलिखं प्रथमादर्शे यशस्तिलकपण्डितः॥
स सपादत्रिशत्यस्यां श्लोके द्विषट्सहस्रिका।
प्रत्यक्षरेण संख्यानादिति निश्चितवानहं॥
यावद्विजयते तीर्थं श्रीमद्वीरजिनेशितुः।
तावदेषा मरालीव खेलतां कृतिमानसं॥

Colophon. इति श्रीआवश्यकलघुवृत्तिः सम्पूर्णा। संवत् १९१४।

विषयः। जैनावश्यकसूत्रस्य व्याख्यानम्।

No. 3265. प्रवचनसारबालाबोधः। Substance, country-made paper, 14 × 5½ inches. Folia, 242. Lines, 15 on a page. Extent, 10,166 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyatapañsála. Appearance, fresh. Prose. Incorrect. Gujráṭibháshá.

Pravachanasára-bálábodha. A translation of the Jain *Pravachanasára* in the Guzráṭi dialect. By Lakshmídhara.

Beginning. श्रीमन्नाभेयादीन् नत्वा हत्वा च सारदं चित्ते।
प्रवचनसारोद्धारे करोमि बालबोधमहम्॥

शास्त्रनीआदिइ अभीष्टदेवतानइं मांगलिक्यभणी नमस्कारिकरिव उअनइ अभिधेयसंबन्धप्रयोजनअधिकारी तेपिण कहिवाएहवो शिष्टसमयपालिवा भणि—इत्यादि।

End. उपलचणझंतो भणवीत उचीतवीतो सांभलावीतउ । इति गाथार्थः । द्विवे प्रशस्तिलिखो ॥

विनिहितदोषः सततं भव्यव्रतचारिजातकृतबोधः ।
गोभिः सकलपदार्थप्रकटयिता जयति वीररविः ॥
श्रीमत्सागरचन्द्रसूरय इतिख्याताः चितौ वीधनाः
पञ्चानां परमेष्ठितामिह च ये प्राप्तास्तृतीये पदे ।
दत्तं श्रीजिनभद्रसूरिसुगुरो सूरे पदं यैरभूत्
तेषां शुद्धगुणान्वये विजयिनो यत्ता इमे जग्मिरे ॥
— — — — —।
वाचंयमजननि करे कोटीरसमाः समागमार्थज्ञाः ।
तच्छिष्यपद्ममन्दिरगणिरर्थप्रदीपमिमम् ॥
बालावबोधमकरोद्विबुधबोधये निजर्षचिद्धी ।
यदशुद्धमत्र किञ्चित् तज्ज्ञैः शोध्यं घृणावद्भिः ॥
— — — — — — ।
वर्षे शशिवाणरसाचिद्दग्जमाने सद्दःषितपचे ।
लच्मीघरो वारे गुरो च पूर्णीकृतो ग्रन्थः ॥

Colophon. इति श्रीप्रवचनसारबालावबोधः सम्पूर्णः ।

विषयः। जैनप्रवचनसाराभिधानप्रकरणस्य गुर्ज्जरभाषया व्याख्यानम् ।

No. 3266. प्रवचनसारोद्धारसूत्रम् । Substance, country-made paper, 14 × 5½ inches. Folia, 110. Lines, 7 on a page. Extent, 2,289 ślokas. Character, Nágara. Date, Sṃ. 1680. Place of deposit, Válucbara, Panchây-atapañsála. Appearance, fresh. Verse. Correct. Ardha-mágadhidialut.

Pravachanasára Sútra. A text book of the Jain system of religion, giving details of the theory, the philosophy, cosmogony, the cause of suffering pain in this world, the means of overcoming that pain, &c., &c. It is called a Sútra and therefore the author's name is not known. A gloss on this work occurs under No. 2726, Vol. VIII, page 178.

Beginning. नमिउण जुगाइ जिणं वोत्थं भव्वाणजणाणनिमित्तं ।
पवयणसारुद्धारं गुरुवयसा समासेणं ॥

चिइवंदण वंदणयं पड़िकमणं पच्चक्खाणमुस्सग्गो ।
चउवीस समहियसयं गिहिपड़िकमणाइ आरणं ॥
भरहम्मिभूअसंपइ भविस्सतित्थं कराणनामाइं ।
परवयम्मि वितोइं जिणाणसंपइ भविस्साणं ॥ इत्यादि ।

End. पवयणसारुद्धारो रइओ सपरावरोहकज्जम्मि ।
जं किंचि इह अजुत्तं वहुस्सुआतं विसोहंतु ॥
जावजयइ भुवनत्तयमेअं रविससिसुमेरुगिरिजुत्तं ।
परयण सारुद्धारो ता नंदतु वहुपढ़िज्जंतो ॥

Colophon. इति प्रवचनसारुद्धारे सूत्रम् । संवत् १९८० ।

विषयः । जैनशास्त्रसारसङ्ग्रहेण निर्म्मितोऽयं प्रबन्धः । तत्र चैत्यवन्दनादिविधिकथनं । गुरु-वन्दनादिविधिकथनं । प्रतिक्रमणविधिकथनं । श्रावकादीनां कर्त्तव्यादिनिरूपणं । वर्त्तमानानां भविष्यताञ्च तीर्थङ्कराणां निरूपणं । प्रथमगणधरनिरूपणं । तीर्थङ्कराणां छत्यनिरूपणं । तीर्थङ्कराणां जनकजनन्यादिकथनं । साधुनिरूपणं । साध्वीनिरूपणं । वादिनिरूपणं । अवधिपणिनिरूपणं । केवलिनिरूपणं । मनःपर्य्यायज्ञानिनिरूपणं । श्रावकनिरूपणं । श्राविकानिरूपणं । देवीनिरूपणं । निर्व्वाणगमनस्थानादिनिरूपणं । आशातनादिनिरूपणं । दोषादिनिरूपणं । दीक्षाविषयादिचिन्तनं । भाविजिनेश्वरजीवादिनिरूपणं । तेषां देहवर्णाहारादिनिरूपणं । गृहलिङ्गि-साधुलिङ्गयादिनिरूपणं । स्त्रीवेदि-पुरुषवेदि-नपुंसकवेद्यादिनिरूपणं । सिद्धान्तस्वरूपादिकथनं । तीर्थङ्करप्रतिमादिविधिकथनं । स्थविरकल्पादिकथनं । जिनकल्पादिसाधुसंख्या कथनं । आचार्य्यगुणादिकथनं । विनयावलीकथनं । चरणकरणादिनिरूपणं । परीहारविशुद्ध्यादिनिरूपणं । पञ्चविंशतिभावनानिरूपणं । महाव्रतादिनिरूपणं । दिनमासादिनिरूपणं । स्थितिकल्पादिनिरूपणं । पाञ्च-चैत्यादिनिरूपणं । अवग्रहणभेदनिरूपणं । दशस्थानकादिनिरूपणं । उपशमश्रेणिकादिनिरूपणं । पिण्डविशुद्ध्यादिकथनं । यतीनां भिक्षादिविधिकथनं । यतिप्रायश्चित्तकथनं । सामाचारिकथनं । जातकल्पकथनं । अजातकल्पादिकथनं । क्षेत्रविषयादिकथनं । मार्गविषयादिकथनं । दुःखशय्यासुखशय्यादिकथनं । व्यवहारपञ्चकादिकथनं । निशाजागरणादिविधिकथनं । भोजनादिविधिकथनं । संलेखनादिविधिकथनं । संज्ञादिनिरूपणं । जीवयोन्यादिकथनं । चतुर्विंशतिध्यानकथनं । अवसर्पिण्यादिनिरूपणं । द्रव्यक्षेत्रकालादिनिरूपणं । पुद्गलपरावर्त्तादिनिरूपणं । कर्म्मभूमिकथनं । अकर्म्मभूमिकथनं । प्राणातिपातनादिकथनं । अष्टादशभेदब्रह्मचर्य्यनिरूपणं । नरकादिनिरूपणं । उत्पत्तिमरणादिचिन्तनं । लेश्यादिकथनं । अवधिज्ञानादिनिरूपणं । स्थित्यादिकथनं । एकेन्द्रियादिजीवकथनं । भवनपति-व्यन्तर-ज्योतिष-विमानादिकथनं । मोक्षपतिकथनं । बलदेववासुदेवप्रतिवासुदेवादिकथाकीर्त्तनं । पुण्यप्रकृतिनिरूपणं । पापप्रकृतिनिरूपणं । भावषट्ककथनं । उपयोगद्वादशका-

दिकथनं । यागावल्लीकथनं । परलोककथनं । पर्य्याप्तिद्वारादिकथनं । भयस्थानादिकथनं । गुणत्र-तादिकथनं । गर्भसञ्चारादिकालादिकथनं । गर्भस्थस्य जीवस्य आहारादिकथनं । मानोन्मानादि-विधिकथनं । अन्तर्द्वीपसमुद्रादिकथनं । मोक्षावस्थाकथनं । मुद्रादिकथनं । दण्डकादिस्तोमकथनञ्च ।

No. 3267. पादारविन्दशतकम् । Substance, country-made paper, 13 × 5 inches. Folia, 8. Lines, 8 on a page. Extent, 152 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Ghaṭṭu Bábu. Appearance, old. Verse. Correct.

Pádáravinda-śataka. A hymn to the goddess Kámákshyá. By Múkakavi Sárbabhauma.

Beginning. महिम्नः पन्थानं मदनपरिपन्थिप्रणयिनि
प्रभुर्निर्णेतुं ते भवति यतमानोऽपि कतमः ।
तथापि श्रीकाञ्चीविहृतिरसिके कोऽपि मनसो
विपाकस्तत्पादस्तुतिविधिषु जल्पाकयति माम् ॥
गलग्राही पौरन्दरपुरवनीपल्लवरुचां
धृतप्राथम्यानामरुणमहसामादिमगुरुः ।
समिन्धे बन्धूकस्तवकसहयुध्वा दिशि दिशि
प्रसर्पन् कामाक्ष्याश्चरणकिरणानामरुणिमा ॥
मरालीनां यानाभ्यसनकलनामूलगुरवे
दरिद्राणां त्राणव्यतिकरसुरोद्यानतरवे ।
तमस्काण्डप्रौढ़िप्रकटनतिरस्कारपटवे
जनोऽयं कामाक्ष्याश्चरणनलिनाय स्पृहयते ॥ इत्यादि ।

End. इदं यः कामाक्ष्याश्चरणनलिनस्तोत्रशतकं
जपेन्नित्यं भक्त्या निखिलजगदाह्लादजनकम् ।
स विश्वेषां वन्द्यः सकलकविलोकैकतिलक-
श्चिरं भुक्त्वा भोगान् परिणमति चिद्रूपकलया ॥

Colophon. इति श्रीमूककविसार्वभौमकृतौ पादारविन्दशतकं समाप्तम् ।

विषयः । कामाक्ष्याः स्तुतिव्याजेन तच्चरणमात्रवर्णनम् ।

No. 3268. मन्दस्मितशतकम् । Substance, country-made paper, 13 × 5 inches. Folia, 9. Lines, 9 on a page. Extent, 202 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Ghaṭṭu Bábu. Appearance, decayed. Verse. Correct.

Mandasmita-śataka. A hymn in a hundred stanzas, in praise of a smile of the goddess Kámákshyá. By Múkakavi Sárvabhauma.

Beginning. बध्नीमो वयमञ्जलिं प्रतिदिनं बन्धच्छिदे देहिनां
कन्दर्पागममूलतन्त्रगुरवे कल्याणकेलीभुवे ।
कामाच्या घनसारपुञ्जरजसे कामद्रुहश्चक्षुषां
मन्दारस्तवकप्रभामदजुषे मन्दस्मितज्योतिषे ॥
सध्रीचे नवमल्लिकासुमनसां नासाग्रमुक्तामणे-
राचार्य्याय मृणालकाण्डमहसां नैसर्गिकाय द्विषे ।
स्वर्धुन्या सहयुध्वने हिमरुचेरर्द्धासनाध्यासिने
कामाच्याः स्मितमञ्जरीधवलिमाद्वैताय तस्मै नमः ॥
कर्पूरद्युतिचातुरीमतितरामल्पीयसीं कुर्वती
दौर्भाग्योदयमेव संविदधती दोषाकरीणां त्विषाम् ।
चुल्लानेव मनोज्ञमल्लिनिकरान् फुल्लानपि व्यञ्जती
कामाच्या मृदुलस्मितांशुलहरी कामप्रसूरस्तु मे ॥ इत्यादि ।

End. क्रीड़ालोलकृपासरोरुहमुखी सौधाङ्गणेभ्यः कवि-
श्रेणीवाक्परिपाटिकामृतझरी सूतीगृहेभ्यः शिवे ।
निर्वाणाङ्कुरसार्वभौमपदवीसिंहासनेभ्यस्तव
श्रीकामाक्षि मनोज्ञमन्दहसितज्योतिष्कणेभ्यो नमः ॥

Colophon. इति श्रीमूककविसार्वभौमकृतौ मन्दस्मितशतकं समाप्तम् ॥

विषयः । कामाच्याः स्तुतिव्याजेन तस्या मृदुहासमात्रवर्णनम् ।

No. 3269. कटाक्षशतकम् । Substance, country-made paper, 13 × 5 inches. Folia, 8. Lines, 8 on a page. Extent, 156 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Ghaṭṭu Bábu. Appearance, decayed. Verse. Correct.

Kaṭáksha-śataka. A hundred stanzas in praise of a glance of the goddess Kámákshyá. By Múkakavi Sárvabhauma.

Beginning. मोहान्धकारनिवहं विनिहन्तुमीड़े
मूकात्मनामपि महाकवितावदान्यान् ।

श्रीकाञ्चिदेशशिशिरीकृतिजागरूका-
नेकाम्रनाथतरुणीकरुणावलोकान् ॥ १ ॥
मातर्जयन्ति ममताग्रहमोक्षणानि
माहेन्द्रनीलरुचिशिक्षणदक्षिणानि ।
कामाक्षि कल्पितजगत्त्रयरक्षणानि
त्वद्वीक्षणानि वरदानविचक्षणानि ॥ २ ॥
आनङ्गतन्त्रविधिदर्शितकौशलाना-
मानन्दमन्दपरिघूर्णनमन्थराणाम् ।
तारल्यमम्ब तव ताडितकर्णसीम्नां
कामाक्षि खेलति कटाक्षनिरीक्षणानाम् ॥ ३ ॥ इत्यादि

End. अत्यन्तशीतलमनर्गलकर्मपाक
काकोलहारि सुलभं सुमनोभिरेतत् ।
पीयूषमेव तव वीक्षणमम्ब किन्तु
कामाक्षि नीलमिदमित्ययमेव भेदः ॥ १०० ॥

Colophon. इति श्रीमूककविसार्वभौमकृतौ कटाक्षशतकं समाप्तम् ।

विषयः । कामाक्ष्याः स्तुतिव्याजेन तत्कटाक्षमात्रवर्णनम् ।

No 3270. आराधनाभगवती । Substance, country-made paper, 13 × 6 inches. Folia, 19. Lines, 17 on a page. Extent, 1,200 ślokas. Character, Nágara. Date, ? Place of deposit, Válucbara, Pancháyata-pañsála. Appearance, decayed. Prose and verse. Incorrect. Half Mágadhi.

A'rádhaná-bhagavatí. On the different means of worshipping in a Jaina temple. Anonymous.

Beginning. सियनरिंद देविंद वंदियं वंदियं जिणं वीरं ।
भीमं भवक्खववहणं प + ताराहणं वुत्थं ॥
वत्तीसादारहिं भणित्त + वगस्स उत्तम + विहीस + ।
एवग्रमंदिरसहणे + + + + सोवाण + तिव्व ॥
आराहणाए दारे वुत्थं संलेहणा तहतपरिक्खा ।
निज्जामयजोगत्तं अगीयअसंविनिज्जरणा ॥ इत्यादि ।

End. कस्सामयप्पसमणं लब्धिनिवादप्पभूयमिह विवुहा ।
अजरामरएयहेउं सेवह आराहणाअमयं॥

Colophon. इति आराधनाभगवती समाप्ता ।

विषयः । संलेखनानिर्स्तरणाख्यानालापनचतुःशरणाराधनादिद्वात्रिंशद्द्वारनिरूपणं । तत्र तत्र प्रत्येकं फलकीर्त्तनञ्च ।

No. 3271. उपदेशशतकम् । Substance, country-made paper, 12 × 5 inches. Folia, 8. Lines, 9 on a page. Extent, 171 ślokas. Character, Nágara. Date, ? Place of deposit, Zillá Murshidábád, Jañgipura, a Brahmachárí at the A'khádá at that place. Appearance, new. Verse. Incorrect.

Upadeś-śaataka. A century of advice for the benefit of Jains, with appropriate illustrative anecdotes. By Gumáni Kavi.

Beginning. विषु देवेषु महान्तं भृगुर्बुभुत्सुः परीक्ष्य हरिमेकम् ।
मेनेऽधिकं महिम्ना सेव्यः सर्व्वोत्तमो विष्णुः ॥
रुक्माङ्गदः स्वपुत्रं निहत्य खड्गेन रोहिणीवचसा ।
सत्यां ररक्ष वाचं न सङ्कटेऽपि त्यजेद्धर्म्मम् ॥
निर्व्वासितो हितेप्सुर्विभीषणो रावणेन लङ्कायाः ।
तन्नाशहेतुरासीन्नहि निजबन्धुर्विबोद्धव्यः ॥ इत्यादि ।

End. स्फुटमार्य्याशतगदितान् पृथक्प्रमाणीकृतानुदाहरणैः ।
शतमेतानुपदेशान् विभावयन् भावयेत् सिद्धिम् ॥
कुतुकाय कोविदानां मूढमतीनां महोपकाराय ।
निरमात् कविर्गुमानिः शतोपदेशप्रबन्धममुम् ॥

Colophon. इति श्रीगुमानिकविविरचितमुपदेशशतकं समाप्तम् ।

विषयः । सोदाहरणशतोपदेशकथनम् ।

No. 3272. सेव्यसेवकोपदेशः । Substance, country-made paper, 13 × 5 inches. Folia, 7. Lines, 6 on a page. Extent, 99 ślokas. Character, Nágara. Date, ? Place of deposit, Zillá Murshidábad, Jañgipura, a Brahmachárí at the A'khádá at that place. Appearance, old. Verse. Correct.

Sevyasevakopadeśa. A variety of maxims on Jain duties. By Vyásadása *alias* Kshemendra Mahákavi.

Beginning. विभूषणाय महते तृष्णातिमिरहारिणे ।
नमः सन्तोषरत्नाय सेवाविषविनाशिने ॥

उत्सृज्य निजकार्य्याणि सद्भिर्वाष्पाकुलेक्षणम् ।
सेव्य-सेवकसेवानां क्रियतामनुशासनम् ॥
दर्पादेकः परो लोभाद्द्वावन्धौ सेव्य-सेवकौ ।
धनोष्मदैन्यविकृतौ सुखे कः कस्य पश्यति ॥
दुर्वारलोभमोहान्धो यदि न स्यादयं जनः ।
कः क्रूरक्रोधविधुरं सहेत धनिनां सुखम् ॥
यः पृथ्वीमपि दर्पान्धो न पश्यति पुरःस्थिताम् ।
स दैन्यलघुतां यातं कथं सेवकमिष्यते ॥ इत्यादि ।

End. वृत्त्या जीवति लोकः सेवावृत्तिर्निजैव केषाञ्चित् ।
अस्थाने तीव्रतरा निन्द्या तु तदर्थिनां सेवा ॥
विद्वज्जनाराधनतत्परेण सन्तोषसेवारसनिर्भरेण ।
क्षेमेन्द्रनाम्ना सुधियां सदैव सुखाय सेवावसरः कृतोऽयम् ॥

Colophon. इति श्रीव्यासदासापराख्यमहाकविक्षेमेन्द्रकृतौ सेव्यसेवकोपदेशः समाप्तः ।

विषयः । सेव्यसेवकयोः कर्त्तव्याकर्त्तव्यकथनपूर्व्वकं सेवावृत्तेर्नितरां निकृष्टत्वनिरूपणम् । सन्तोष-एव सेव्य इति सप्रपञ्चप्रपञ्चनं । इति शम् ।

No 3273. सुवृत्ततिलकम् । Substance, country-made paper, 13 × 5 inches. Folia, 18. Lines, 6 on a page. Extent, 255 ślokas. Character, Nágara. Date, ? Place of deposit, Zillá Murshidábád, Jaṅgipura Brahmachárí at the A'khaḍá at that place. Appearance, decayed. Prose and verse. Correct.

Suvṛitta-tilaka. A Sanskrit work on versification, giving the pecularities of each of the different metres, and the subject to which it is most appropriate. By Vyásadása *alias* Kshemendra, son of Prakáśendra.

Beginning. गणपतिगुरोर्वक्रचूडाशशाङ्ककलाङ्कुरः
स्फुटफणिफणारत्नच्छायाच्छटाच्छुरणारुणः ।
गिरिपतिसुतासंसक्तेर्ष्याविलासकचग्रह-
च्युतनखशिखालेखाकान्तस्तनोतु सुखानि वः ॥
स्वच्छन्दलघुरूपाय त्रिजगद्गुरवे नमः ।
स्पष्टवामनवृत्ताय मायाचक्राय चक्रिणे ॥
नमश्छन्दोनिधानाय सुवृत्ताचारवेधसे ।
तपःसत्यनिवासाय व्यासायामिततेजसे ॥

क्षेमेन्द्रेण सुशिष्याणां सरस्वत्याः प्रसाधनम् ।
सुवृत्ततिलकं वर्णरुचिरं क्रियते मुखे ॥
दृष्ट्वा च्छन्दांसि सौन्दर्य्यं विचार्य्यार्य्यप्रियः कृतः ।
प्रसिद्धकाव्यकर्म्मण्यवृत्तानामेष सङ्ग्रहः ॥ इत्यादि ।

End. इत्यारुरुक्षोः प्रथमोपयुक्तं प्रवृत्तवाचश्च विवेककारि ।
महाकवेरप्यतिसूक्ष्मतत्त्वविचारहर्षप्रदमेतदुक्तम् ॥
इत्यौचित्यप्रचुररचनाविश्रुतश्राव्यवृत्त-
व्यक्तिः शक्तिप्रहतवचसां दर्शिता सङ्ग्रहेण ।
क्षेमेन्द्रेण प्रणयिविपदां हर्त्तुराश्चर्य्यकर्त्तु-
र्भूभर्त्तुर्भुवनजयिनोऽनन्तराजस्य राज्ये ॥

Colophon. इति श्रीप्रकाशेन्द्रात्मजव्यासदासापरनामश्रीक्षेमेन्द्रकृते सुवृत्ततिलके वृत्तविनियोगो नाम तृतीयो विन्यासः ॥

विषयः। महाकविनिबन्धेषु प्राचुर्य्येण उपलभ्यमानानां वृत्तानां लक्षणादिकथनपूर्व्वकं प्रत्येकं यतिविभागादिकथनं । छन्दसां गुणादिविवेचनम् । रसविशेषे भावविशेषे च छन्दोविशेषनियमनञ्च ।

No. 3274. रसिकरङ्गदा। Substance, country-made paper, 16 × 5 inches. Folia, 155. Lines, 12 on a page. Extent, 6,698 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Sítánátha Nyáyaratna. Appearance, new. Prose. Correct.

Rasika-rañgadá. A gloss on the 'Padyávalí' or miscellaneous poems of Rúpa Gośvámi. By Vírchandra Gośvámi, son of Kiśorímohana Gośvámi.

Beginning. सच्चिदानन्दरूपं तं गुरुं भागवतप्रियं ।
परिवारगणैर्जुष्टं किशोरीमोहनं भजे ॥
श्रीगौरकरुणाप्रेमसिन्धुमग्नहृदे सदा ।
नमाम्यहं प्रयत्नेन रूपगोस्वामिने सते ॥
या रम्या निखिलाघसंघशमनी श्रीवातिथिं सङ्गता
यास्वाद्या रसिकैः सुखाब्धिजननी धिक् कार्य्यमुक्तिस्पृहां ।
या ध्याता हृदये व्रजेन्द्रतनुजप्रेमामृतस्यन्दिनी
सा जीयात् हरिभक्तिवृन्दमहिता धन्येह पद्यावली ॥

छात्राणां सुखबोधार्थं सतां संक्षेपतो मया ।
पद्यावलीक्रमव्याख्या यथामति वितन्यते ॥

श्रीयुक्तवृन्दारकवृन्दमहेन्द्रराधामाधवपदारविन्दनिमग्नमानसभक्तसन्दोहानन्दकः परमरसिकवरः कविकुलमुकुटमणिः सोऽयं ग्रन्थकारः निखिलभक्तिरसिकानां पद्यवृन्दोत्थापनेन श्रीकृष्णगुणलीला-वर्णने सदाचारं दर्शयन् आधुनिकतज्ज्ञान् हर्षयंश्च संक्षेपतो भक्तिरसमयं ग्रन्थमारभते पद्याव-लीति । इत्यादि ।

End. नित्यत्वमायातमिति ज्ञेयं ॥
ग्रन्थस्य प्रतिपाद्यो यः श्रीराधामाधवः प्रभुः ।
स्फुरत्यन्तः स मे नित्यं दत्त्वा भक्तिरसामृतं ॥
भुवने वित्तनामा यो ग्रन्थवस्तुप्रकाशकः ।
स आचार्य्यः श्रीलरघुनन्दनो मेऽस्तु भूतये ॥
करुणावरुणागाराः सुधियः सन्तु उत्सुकाः ॥
पश्यन्त्वेतां मम श्रान्तिसाफल्यायाभिनौमि तान् ।
मनोभ्रान्तिवशादत्र ये दोषा लिखिता मया ॥
तान् शोधयन्तु ते सन्तः करुणाभरतो विदः ॥
भक्तिमार्गप्रकाशार्थं यो जातो भगवत्कुले ।
जनकं तं सदा नौमि किशोरीमोहनं प्रभुं ॥

Colophon. इति श्रीभगवन्नित्यानन्दवंशावतंसश्रीमत्किशोरीमोहनगोस्वामितनयश्रीवीर-चन्द्रगोस्वामिविरचिता रसिकरङ्गदा नाम श्रीपद्यावलीटीका सम्पूर्णा । समाप्तश्चायं ग्रन्थः ।

विषयः । रूपगोस्वामिगुम्फितपद्यावल्या व्याख्यानम् ।

No. 3275. प्राणाभरणम्, संक्षिप्तव्याख्यासहितम् । Substance, country-made paper, 14 × 5 inches. Folia, 14. Lines, 14 on a page. Extent, 559 ślokas. Character, Nágara. Date, ? Place of deposit, Zilla Murshidábád, at the A'khḍá at Jañgipura, with a Brahmachárí. Appearance, new. Verse. Incorrect.

Práṇábharaṇa. An eulogium on Rájá Práṇanáráyṇa of Kámarúp, with a commentary by the author. By Jagannátha Paṇḍitarája.

Beginning. विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः ।

आस्ते धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधरमाधुरीमधरयन् वाचां विलासो मम ॥

विद्वांस इति प्रायदर्शनाभिप्रायमेतत् । तेन सहृदयैर्न मनागपि विमनायितव्यम् । भावध्व-
निश्चायम् । उत्तरार्द्धप्रतिपाद्यार्थालम्बनाया एतत्पद्यप्रयोगानुभवायाः कविगतचिन्तायाः प्राधान्ये-
नाभिव्यक्तेः । अनुपात्तोभयनिमित्तकव्यतिरेकः स्फुटोऽलङ्कारः । कामालसत्वं वामाविशेषणमधर-
माधुरीप्रकर्षकम् ।

End. दोर्दण्डद्वयकुण्डलीकृतलसत्कोदण्डचण्डाशुग-
ध्वस्तोद्दण्डविपक्षमण्डलमिह त्वां वीक्ष्य मध्येरणम् ।
वल्गद्गाण्डिवमुक्तकाण्डवलयज्वालावलीताण्डव-
भ्रश्यत्खाण्डवरुष्टपाण्डवमहो को न क्षितीशः स्मरेत् ॥

अत्र स्मरणालङ्कारः । भाव इति तु न भ्रमितव्यम् । सादृश्यमूलकातन्मूलकत्वाभ्यां भावत्वाल-
ङ्कारत्वयोरिह व्यवस्थितेः शब्दवेद्यत्वाच्च ॥

Colophon. इति पण्डितराजश्रीजगन्नाथविरचितं प्राणाभरणं तत्कृतयैव टीकया समेतं
समाप्तम् ॥

विषयः । कामरूपदेशाधिपस्य प्राणनारायणस्य स्तुतिव्याजेन तद्यशोवर्णनादिकम् ॥

No. 3276. नेमिदूतम् । Substance, country-made paper, 12 × 5½ inches. Folia, 20. Lines, 8 on a page. Extent, 342 ślokas. Character, Nágara. Date, Sm. 1602. Place of deposit, Váluchara, Ghaṭṭu Bábu. Appearance, decayed. Verse. Incorrect.

Nemidúta. An imitation of the Meghadúta of Kálidása. In it the wife of Nemi, the Jin, sends a message to him who is engaged in deep meditation on the Rámagiri Hill. By Bikrama, son of Sáñgaṇa.

Beginning. प्राणित्राणप्रवणहृदयो बन्धुवर्गं समग्रं
हित्वा भोगान् सह परिजनैरुग्रसेनात्मजाञ्च ।
श्रीमान्नेमिर्विषयविमुखो मोक्षकामश्चकार
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु ॥
सा तत्रोच्चैः शिखरिणि समासीनमेनं मुनीशं
नासान्यस्तानिमिषनयनं ध्याननिर्धूतदोषम् ।
योगासक्तं सजलजलदश्यामलं राजपुत्री
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥

उद्गीर्ण्येनं श्रमसुखरतं मेदुराम्भोदनादै-
र्न्वत्यत्केकिव्रजमथ नगं प्रोन्मिषन्नीपपुष्पम् ।
सा शोकार्त्ता चितितलमगात् स्यान्न दुःखं हि नार्य्याः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ इत्यादि ।

End. तद्दुःखार्थं प्रवरकवितुः कालिदासस्य काव्या-
दन्त्यं पादं सुपदरचितान्मेघदूताद्गृहीत्वा ।
श्रीमन्नेमेश्चरितविशदं साङ्गणस्याङ्गजन्मा
चक्रे काव्यं बुधजनमनःप्रीतये विक्रमाख्यः ॥

Colophon. इति साङ्गणसूनुश्रीविक्रमविरचितं नेमिदूतं सम्पूर्णम् ॥

विषयः । सञ्जातनिर्व्वेदस्य नेमिजिनेन्द्रस्य विषयवासनापरीहारेण निर्व्वाणपदाभिलाषिणो रामगिरौ समाधिमास्थाय स्थितस्य पुरतस्तत्पत्न्या राजीमत्याः स्वयं दौत्यवर्णनरूपमेतत् मेघदूत-काव्यस्य प्रत्येकं श्लोकानामन्तिमपादमाकलय्यावशिष्टपादपूरणेन च विरचितमिति ज्ञेयम् ।

No. 3277. करुणालहरी । Substance, country-made paper, 14 × 5 inches. Folia, 6. Lines, 7 on a page. Extent, 100 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Ghaṭṭu Bábu. Appearance, new. Verse. Incorrect.

Karuṇálaharí. An eulogium on the personal beauty of S'rí Krishṇa. By Jagannátha Paṇḍitrája.

Beginning. विषीदता नाथ विषानलोपमे विषादभूमौ भवसागरे विभो ।
परं प्रतीकारमपश्यताधुना मयायमात्मा भवते निवेदितः ॥
भवानलज्वालविलुप्तचेतनः शरण्य तेऽङ्घ्रिं शरणं भयादियाम् ।
विभाव्य भूयोऽपि दयासुधाम्बुधे विधेहि हे नाथ यथायथेच्छसि ॥
विहाय संसारमहामरुस्थलीमलीकदेहादिमिलन्मरीचिकाम् ।
मनोमृगो मे करुणामृताम्बुधे विगाढुमीश त्वयि गाढमीहते ॥ इत्यादि ।

End. सुरस्रोतस्विन्याः पुलिनमधितिष्ठन्नयनयो-
र्विधायान्तर्मुद्रामथ सपदि विद्राव्य विषयान् ।
विधूतान्तर्ध्वान्तो मधुरमधुरायां चिति कदा
निमग्नः स्यां कस्याञ्चन नवनभस्याम्बुदरुचि ॥

Colophon. इति पण्डितराजश्रीजगन्नाथविरचिता करुणालहरी सम्पूर्णा ।

विषयः । स्तुतिव्याजेन भगवतः श्रीकृष्णस्य रूपवर्णनादिकम् ।

No. 3278. दानकेलिव्याख्या । Substance, country-made paper, 15 × 6 inches. Folia, 38. Lines, 13 on a page. Extent, 1,698 ślokas. Character, Bengali. Date, ? Place of deposit, Váluchara, Jagadánanda Gośvámí. Appearance, decayed. Prose. Correct.

Dánakeli-vyákhyá. A gloss on Rúpa Gosvámi's play entitled Dánakeli-kaumudí. By Jíva Gosvámi.

Beginning. दानकेलिकलौ लुप्तधर्म्ममर्य्यादयोर्भजे ।
राधामाधवयोः कामलोभदम्भमदान्वतं ॥

अथ सोऽयं रसिकमुकुटमणिः अभिनीतविदग्धमाधवादिनाटकार्थरत्नो यत्नोरीकृतराधामाधवलीलाविलासाविरामरामणीयकपीयूषपरिवेषणव्रतः परमभागवतान् अनुरागिणः प्रियसुहृदोऽनुरञ्जयन्नखिलकविमण्डलाखण्डलः श्रीरूपनामा अन्ततरङ्गिणीमिव दानकेलिकौमुदीं नाम भाणिकां निर्म्मिमाणः प्रारब्धनान्दीमुपश्लोकयन् मङ्गलमाचरति । अन्तः स्मेरतयेति । माधवेन पथि पुरोऽग्रत एव रुद्धाया राधाया दृष्टिर्वो युष्माकं श्रियं प्रेमसम्पत्तिं क्रियात् कुरोतु ॥ इत्यादि ।

End. तस्य प्रियसुहृदः श्रीराधाकुण्डवासिनः श्रीरघुनाथदासस्य इत्यर्थः ॥
दानकेलिकलेरन्ते राधामाधयोर्युगं ।
कामलोभमदाक्रान्तमेकाकारमहं भजे ॥

Colophon. इति श्रीदानकेलिव्याख्या समाप्ता ।
गोविन्दस्य कृपां वन्दे यस्योद्गमनमात्रतः ।
लीलास्फूर्त्तिः सदा भूयात् रूपेण सह मोदते ॥
ग्रथिता सुमनःसुखदा यस्य निदेशेन भाणिकास्रगियं ।
तस्य मम प्रियसुहृदः कुण्डतटीं चणमलङ्कुरुतां ॥
गते मनुशते शाके चन्द्रस्वरसमन्विते ॥
नन्दीश्वरे निवसता भाणिकेयं विनिर्म्मिता ॥

अतः परं भाणिकालक्षणं वर्त्तते ॥

विषयः । रूपगोस्वामिकृतदानकेलिकौमुदीनामकभाणिकाया व्याख्यानम् ।

No. 3279. भावविलासः। Substance, country-made paper, 15 × 5 inches. Folia, 18. Lines, 8 on a page. Extent, 297 ślokas. Character, Nágara. Date, ? Place of deposit, Zilla Murshidábád, with a Brahmachárí, Jañgipura at the Akhḍá. Appearance, new. Verse. Correct.

Bháva-vilása. An eulogium on Bhava Siñha, king of Jayapura. By Rudra Kavi, son of Vidyávilása.

Beginning. यः फल्गूकृतफाल्गुनो रणभुवि प्रौढप्रतापानल-
ज्वालाभिः प्रतिपक्षपक्षविपिनश्रेणीर्ददाह क्षणात्।
योऽभूद्भूसुरभूरुहोऽत्र भगवद्दासो निवासः श्रियां
तस्मादाविरभूत् प्रभूतमहिमा श्रीमानसिंहो नृपः॥
सङ्ग्रामोद्दामधामप्रतिभटघटनाकण्ठरक्तोपरक्ता
येनाकीर्य्य स्वसेनास्वतुरुदधिजलैः क्षालिता खड्गधारा।
गाढ़ं शस्त्राभिघातादरिमदकरिणां दानमाच्छिद्य सद्यो
हस्ते न्यस्तञ्च येन क्षपितरिपुकुले दक्षिणे दक्षिणेन॥
— — — — — — — ।
श्रीमाञ्छ्रीमानसिंहक्षितिपतिजलधेरुद्गतो भावसिंहः
पूर्णः पीयूषभानुर्विलसति किरणध्वस्तदैन्यान्धकारः।
स्फारस्फारासुधाराचलसुरतटिनीहंसहारानुकाराः
कीर्त्तिज्योत्स्नाः पिबन्ति प्रतिदिशमनिशं यस्य विद्वच्चकोराः॥ इत्यादि।

End. सद्गुणानां समुद्रेण रुद्रेण ग्रथिता गुणैः।
कण्ठस्था स्लोकमालेयं केषां न कुरुते श्रियम्॥
विद्याविलासपुत्रस्य न्यायवाचस्पतेरियम्।
काव्यालापविदग्धानां मुदं निर्म्मातु निर्म्मितिः॥

Colophon. इति विद्याविलाससूनुन्यायवाचस्पतिश्रीरुद्रकविकृतो भावविलासः समाप्तः॥

विषयः। जयपुराधीशस्य भावसिंहस्य यशोवर्णनमुखेन प्रास्ताविकस्लोककीर्त्तनम्।

No. 3280. अन्योक्तिमुक्तालता। Substance, country-made paper, 13 × 5 inches. Folia, 12. Lines, 8 on a page. Extent, 264 ślokas. Character, Nágara. Date, ? Place of deposit, Zilla Murshidábád, Jañgipura, Brahmachárí at the Akhḍá at that place. Appearance, decayed. Verse. Incorrect.

Anyokti-muktálatá. A collection of double intendres in verse. By S'ambhu, who styles himself a Mahákavi.

Beginning. मानं मुञ्च विपश्चिपश्चमरवन्यङ्कारपारङ्गमा
मा भूवन् कलकण्ठकण्ठकुहरे कुण्ठक्रमास्ते गिरः ।
प्राप्तः पञ्चशरप्रपञ्चशरणं यद्भृङ्गभङ्गीगुरु-
र्बन्धूकप्रियबान्धवो धवलितश्यामाधवो माधवः ॥
हेलाक्रान्तहरिन्ति कुन्तलवधूवेणीहरिन्ति स्फुटं
भिन्दन्नेष तमांसि लोचनसुधाव+सखीवल्लभः ।
पश्योद्गच्छति हारिकीरतरुणीहारानुकारैः करै-
रोङ्कारं कुरुकैरवाकरनिजोन्मेषेषु योग्यः चणः ॥
सत्यं सन्ति कियन्ति सन्ति न सखे रत्नानि रत्नाकरे
सञ्जातस्तु स वस्तुतः स्तुतिकथापात्रं परं कौस्तुभः ।
यो जातः स्मरकेलिलोलकमलासोल्लासदोःकन्दली-
लीलालिङ्गनभाजनं भगवतो वक्षःस्थले शार्ङ्गिणः ॥ इत्यादि ।

End. या लक्ष्मीः स्मरकार्मुके स्फुरति च बाले प्रवाले रुचि-
र्या नीलाम्बुरुहच्छदे मृदुमरुत्प्रेङ्खोलिते विभ्रमः ।
या कान्तिः कनकाम्बुजेऽपि सकलं द्रष्टुं तदेकत्र चे-
च्चेतः कान्दलिताद्भुतं तव सखे पश्याननं सुभ्रुवः ॥

Colophon. इति महाकविश्रीशम्भुकृतान्योक्तिमुक्तालता समाप्ता ।

विषयः । अन्यार्थप्रतिपादकप्रास्ताविकश्लोककथनम् ।

No. 3281. श्राद्धदिनकृत्यटीका । Substance, country-made paper, 13 × 5 inches. Folia, 79. Lines, 9 on a page. Extent, 1,854 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyatapausála. Appearance, fresh. Prose. Incorrect. Sanskrit.

S'raddhadina Kritya Tíká. A gloss on a Jain work entitled S'ráddhadina Kritya. It treats of the duties enjoined on Jain laymen, on S'ráddhadays. Anonymous.

Beginning. श्रीवीरं नत्वा श्राद्धानां दिनकृत्यं वक्ष्ये इत्युक्तिलेशः । नमस्कारश्चतुर्द्धा द्रव्यनामभावतः । (?) पालकादीनां भावतो न द्रव्यतः । उत्तरं सुराणां । न द्रव्यतो न भावतः कपिलादीनां । द्रव्यतो भावतश्च सम्यग्दृष्टेरुपयुक्तस्य सुशब्दवचनस्य सुप्रणिहितपात्रमार्जनादीनकुर्वतः। तत्र विघ्नव्रातोपशान्तये एकान्तिकाव्यभिचारिभावमङ्गलरूपेण तुर्य्यनमस्कारेण प्रणमति । इत्यादि ।

End. इत्येतत् करुणया स्वपुण्येन परोपकारं चिकीर्षुराह कारुण्य इति । निगदसिद्धं सर्व्वोपसञ्जिहीर्षुराह अथाणेति ।

Colophon. इति श्राद्धदिनकृत्यटीका सम्पूर्णा ।

विषयः । जैनश्राद्धकृत्यप्रकरणस्य व्याख्यानम् । जैनगृहस्थानां श्राद्धसंज्ञेति ज्ञेयम् । तथा तेषां श्रावकत्वमपि विद्वज्जनेषु प्रसिद्धम् ।

No. 3282. **तत्त्वदीपिका** । Substance, country-made paper, 12 × 5 inches. Folia, 80. Lines, 23 on a page. Extent, 643 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchńyata-pausála. Appearance, fresh. Prose. Incorrect. Sanskrit.

Tattvadípiká. A gloss on a treatise called Dvátriñśika which treats of the element of Jain religion. Anonymous.

Beginning. ऐन्द्रवृन्दवनितां (?) श्रियामलं यामलं जिनपतिं समाश्रितां ।

योगिनोऽपि विनमन्ति भारती परती मम ददातु सा सदा ॥ (?) ॥

श्रेयोभूतानेकशास्त्रार्थसङ्गृहं मनसि कृत्वा द्वात्रिंशिकाप्रकरणमारभमाणो ग्रन्थकारो दानधर्म्मप्राधान्येन परममङ्गलरूपत्वाद्दादौ तद्‌द्वात्रिंशिकामाह । + + + अनुकम्पासमन्वितमनुकम्पापूर्व्वकं दानं । इत्यादि ।

End. अनेकान्तप्रणयितया जगदुद्दिधीर्षावतां सिताम्बरसाधूनां परमानन्द + + यामह्योदयमीमांसया वयं परमेणोत्कृष्टेन आनन्देन पीनाः पुष्टाः स्मः । शिष्टा द्वात्रिंशिकासज्जनगुणवर्णनमयी ग्रन्थचिन्ता । + + मङ्गलरूपा स्पष्टा ॥

प्रतापार्के येषां स्फुरति विहिताकव्वरमनः-
सरोजप्रोल्लासे भवति कुमतध्वान्तविलयः ।
विरेजुः सूरीन्द्रास्त इह जयिनो हीरविजया
दयावल्लीवृद्धौ जलदधारायितगिरः ॥

— — — — — — ।

यशोविजयनाम्ना तच्चरणाम्भोजसेविना ।
द्वात्रिंशिकानां विवृतिश्चक्रे तत्त्वार्थदीपिका ॥

— — — — — ।

अधीत्य सुगुरोरेनां सुदृढं भावयन्ति ये ।
ते लभन्ते श्रुतार्थज्ञाः परमानन्दसम्पदं ॥

Colophon. इति भद्रम् ।

विषयः । जैनद्वात्रिंशिकाप्रकरणस्य व्याख्यानम् ।

No. 3283. उपदेशमालाविवरणम् । Substance, country-made paper, 14 × 6 inches. Folia, 24. Lines, 12 on a page. Extent, 972 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, new. Prose. Incorrect. Sanskrit. Few Half Mágadhí.

Upadeśamálá-vivaraṇa. A commentary on the Upadeśamálá, a collection of tales illustrating Jain principles of morality and religion. By Dharmadása Gaṇi. The Manuscript is incomplete : the text has been noticed under No. 2687, Vol. VIII, p. 142.

Beginning. श्रेयस्करं कामितदानदक्षं प्रणम्य वीरं जितकर्मलक्षं ।
पदार्थमात्रस्फुटदर्शनेनोपदेशमालां विवृणोमि किञ्चित् ॥
यद्यप्यनेकाःकिल सन्ति टीकास्तथाप्यनिन्द्या क्रियते मयैषा।
सति प्रकाशेऽपि विधोर्जगत्यां न युज्यते किं भवने प्रदीपः ॥
श्रीधर्म्मदासेन किलात्मसूनोः प्रबोधनार्थं विदधे सुबोधः।
ग्रन्थो बहूनामुपकारकारी भव्यात्मनां भावितसर्व्वभावः ॥
पूर्व्वं तदङ्गजातस्य रणसिंहस्य कथ्यते ।
चरित्रं चारुचरितं कर्म्मक्षयविधानकं ॥

अत्र रणसिंहोदाहरणं लिख्यते। जम्बूद्वीपे भरते सच्छं विजयपुरं पुरमस्ति। तत्र विजयसेनो नृपः । तद्गृहे अजयाविजयानाम्न्यौ द्वे राज्ञ्यौ । इत्यादि ।

End. इत्यननुक्रमेण पठ्यमाना पाठ्यमानेयमस्य यावद्विजयते । इदमुपदेशमालाप्रकरणं स्वपुत्रप्रतिबोधार्थमित्थं विचारितं श्रीधर्म्मगणिना । — — — — — — अधुना तु, नमिऊण जिणवरिंदेत्यादिसूत्रार्थः प्रस्तूयते ।

Colophon. इत्युपदेशमालायां प्रथमतो रणसिंहनृपस्य मूलसम्बन्धः ॥

विषयः । सकलजैनोपदेशमालाप्रकरणस्य व्याख्यानम् । अत्र तावत् टीकाया उपोद्घातमात्रं वर्त्तते ।

No. 3284. उपदेशमालावचूरिः । Substance, country-made paper, 13 × 6 inches. Folia, 18. Lines, 17 on a page. Extent, 1,430 ślokas. Character. Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála, Appearance, decayed. Prose. Generally correct. Sanskrit.

Upadeśamálá-avachúri. An abridgement of the lessons taught in the Upadeśamálá. By Siddha Sádhu.

Beginning. अर्हं । जगचूडामणि । ऋषभो जगच्चूडामणिभूतोऽधुना मुक्तिपदस्यायितया जगत उपरिवर्त्तीत्यर्थः । वीरः पुनः आसन्नतया त्रिलोकश्रीतिलकः । तथा अनयोर्मध्ये एक ऋषभो लोकादित्यः । युगादौ प्रभात इव निखिलव्यवहारकारणत्वापादकः । पुनर्वीरश्चक्षुस्त्रिभुवनस्येदानीन्तनजन्तुचक्षुर्भूतागमार्थभाषकत्वात् । अधुनैतदुद्देशेनैवं तपःकर्म्मोपदेशमाह । संवच्छरगाहा । नवरं जइच्छए उपमाणेणं त्ति । तपःकर्म्मणि यत्नं कुर्य्यात् । इत्यादि ।

End. दातव्या पुनरियं बहुश्रुतेभ्यो विवेकिभ्यः । इह सूत्रेषु पाठानां बाहुविध्यादपर्य्यालोचयतां सम्यगर्थप्रदः प्रतिभातः । स एवास्माभिः पाठो विहतः । कृतिरियं सिद्धर्षिचरणरेणोः सिद्धसाधोरिति ॥

Colophon. इति श्रीउपदेशमालावचूरिः ।

विषयः । जैनोपदेशमालासन्दर्भस्य संक्षेपेण व्याख्यानम् ।

No 3285. उपदेशरत्नकोशः, वा उपदेशरत्नमाला । Substance, country-made paper, 12 × 4½ inches. Folia, 2. Lines, 8 on a page. Extent, 39 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchayata-pausála. Appearance, old. Verse. Correct.

Upadeśa Ratnakośa. Verses briefly inculcating humanity, mercy to created beings, and other Jain virtues. By Padma Jineśvara Súri.

Beginning. उवएसरयणकोस नासिय नीसेससयलदोगव्व ।
उवएसरयणमाल वुत्थ नमिउन वीरजिणं ॥
जीवदयाइ रमज्जइ इंदियवग्गो दमिज्जइ सयावि ।
सव्वचे वचविज्जइ धम्मस्समिणमेव ॥
भीलनङ्ग खड़िज्जइ नवसिज्जइ समं कुशीलेहिं ।
गुरुवयणं नखलिज्जइ जइनज्जइ धम्मपरमत्थो ॥ इत्यादि ।

End. इय पउमजिणेसरसूरिवयण जिणवयणगुंफरमणीअं ।
वहउ जणोकं च गयं विउलं उवएसमालमिणं ॥

Colophon. इति उपदेशरत्नमाला समाप्ता ।

विषयः । संक्षेपेण जीवदयादिरूपधर्म्मानुष्ठानस्य कर्तव्यताकथनम् ।

No. 3286. **पुष्पमालाप्रकरणम्** । Substance, country-made paper, 12 × 5 inches. Folia, 25. Lines, 11 on a page. Extent, 584 ślokas. Character, Nágara. Date, Sm. 1541. Place of deposit, Válucbara, Pancháyata-pausála. Appearance, old. Verse. Correct. Half Mágadhí.

Pushpamálá-prakaraṇa. On the religious principles taught by Varddhamána Jina. Anonymous.

Beginning. सिद्धमकम्ममविग्गहमकलं कमसंखमक्खयं धीरं ।
प्रणमामि सुगद + + ल परमत्थपयासणं वीरं ॥
जिणवयणकाननाउ चिणि उणसुवन्नममरिसगुणड्ढं ।
वरसमालमेअं रएमि वरकुसुममालं व ॥
रयणायरपवभट्ठं रयणं व सुदुल्लहं मणुअजम्मं ।
तत्थवि रोरस्स निहिव्व दुल्लहोहोद जिणधम्मो ॥ इत्यादि ।

End. जाव जिणसासणमिणं जावय धम्मो जयंमि विप्फुरद ।
तावपडिज्जउ एसा भव्वेहिं सया सुहत्थीहिं ॥

Colophon. इति श्रीपुष्पमालाप्रकरणं समाप्तं । संवत् । १५४१ ।

विषयः । मानव्यजन्मलाभेऽपि तत्र जैनधर्म्मस्य दुर्ल्लभत्वकीर्त्तनम् । जैनधर्म्मस्य अहिंसा-मूलत्वनिरूपणम् । अत एव सर्व्वत्र जीवेषु दयादानाभयदानादीनां परमधर्म्मजनकत्वकीर्त्तनम् । गुरूपसदनादीनामावश्यकत्वकथनं । संक्षेपेण वर्द्धमानजिनोक्तधर्म्मदेशनासारकथनं । अत्र वर्द्धमा-नजिनेन्द्रोक्तधर्म्मोपदेशरूपाणां पुष्पाणां गुम्फनात् पुष्पमालेति प्रकरणस्याभिधानमन्वर्थमिति ज्ञेयम् ।

No. 3287. **धर्म्मशर्म्माभ्युदयः** । Substance, country-made paper, 14 × 5 inches. Folia, 99. Lines, 6 on a page. Extent, 1,700 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Ghaṭṭu Bábu. Appearance, decayed. Prose. Correct.

Dharmaśarmábhyudaya. An epic poem in 21 cantos on the birth of Dharma S'armá *alias* Jina. By Harichandra.

Beginning. श्रीनाभिसूनोश्चिरमङ्घ्रियुग्मनखेन्दवः कौमुदमेधयन्तु ।
यत्रानमन्नाकिनरेन्द्रचक्रचूड़ाश्मगर्भप्रतिबिम्बमेणः ॥
चन्द्रप्रभं नौमि यदीयभासा नूनं जिता चान्द्रमसी प्रभा सा ।
नोचेत् कथं तर्हि तदङ्घ्रिलग्नं नखच्छलादिन्दुकुटुम्बमासीत् ॥

दुरन्तरत्नोदधियेव धात्र्यां मुहुर्मुहुर्घृष्टललाटपट्टाः ।
यं स्वर्गिणोऽनल्पगुणं प्रणेमुस्तनोतु नः शर्म्म स धर्म्मनाथः ॥ इत्यादि ।

End. अभजदथविचित्रैर्वाक्प्रसूनोपचारैः
प्रभुरिह हरिचन्द्राराधितो मोक्षलक्ष्मीम् ।
तदनु तदनुयायी प्राप्तपर्य्यन्तपूजो-
पचितसुकृतराशिः स्वं पदं नाकिलोकः ॥

Colophon. इति महाकविश्रीहरिचन्द्रविरचिते धर्म्मशर्म्माभ्युदये महाकाव्ये एकविंशः सर्गः ॥ समाप्तोऽयं ग्रन्थः । (अतः परं कवेरस्य प्रशस्तिरेका वर्त्तते । सा च नितरां प्रलुप्ताक्षरतया नाधिगन्तुं शक्यते ।)

विषयः । प्रथमे सर्गे,—सज्जनस्तुतिदुर्ज्जननिन्दाकीर्त्तनं । जम्बूद्वीपवर्णनं । कनकाद्रिवर्णनं । भारतवर्षवर्णनं । आर्य्यावर्त्तवर्णनं । उत्तरकोशलाख्यदेशवर्णनं । तत्र रत्नपुरनगरवर्णनं ।

द्वितीये सर्गे,—रत्नपुरपुरन्दरस्य सूर्य्यवंशीयनरपतेः महासेनस्य वर्णनं । तन्महिष्याः सुव्रताया रूपादिवर्णनं । नृपतेः पुत्रप्राप्तिचिन्तनवर्णनं । अथ प्राचेतसाख्यस्य दिव्यमुनेरुद्यानपालकमुखादागमनस्रवणवृत्तान्तवर्णनं ।

तृतीये सर्गे,—परिकरसमेतस्य राज्ञो मुनिदर्शनार्थं गमनवर्णनं । वनवर्णनं । उद्यानप्राप्तिवर्णनं । मुनिवर्णनं । मुनिमहीपालयोः समागमवर्णनं । मुनिसमीपे राज्ञः पुत्रप्राप्तिचिन्तावर्णनं । भाविनः पुत्रस्य पूर्व्वजन्मविषये मुनिं प्रति राज्ञः प्रश्नादिवर्णनञ्च ।

चतुर्थे सर्गे,—धर्म्मनाथस्य पूर्व्वजन्मवृत्तान्तवर्णनमुखेन धातकीखण्डनामकद्वीपे वत्साख्यदेशवर्णनं । तत्र सुशीमाख्यनगरीवर्णनं । तदधिपतेः दशरथनृपस्य वर्णनं । तस्य वैराग्योदयवर्णनं । नृपं प्रति मन्त्रिणश्चार्व्वाकमतानुकूल उपदेशः । राजकृतं तत्खण्डनञ्च । नृपतेर्वनगमनवृत्तान्तवर्णनं । तस्य तपस्यावर्णनं । स एव महासेनस्य नृपतेः पुत्रत्वेनावतरिष्यतीतिकथनञ्च ।

पञ्चमे सर्गे,—महासेननृपतेः सभायां सार्द्धं लक्ष्म्या कासाञ्चिद्दिव्याङ्गनानामागमनवृत्तान्तवर्णनं। दिव्याङ्गनाकृतराजमहिषीसेवनवर्णनं । राजपत्न्याः स्वप्नदर्शनवृत्तान्तवर्णनं । महिष्या गर्भलक्षणादिवर्णनं ।

षष्ठे सर्गे,—माघशुक्लत्रयोदश्यां पुष्यनक्षत्रे धर्म्मनाथस्य जन्माभूदितिवर्णनं । इन्द्रादिकृतस्य महासेनकृतस्य च तज्जन्मोत्सवस्य वर्णनं ।

सप्तमे सर्गे,—सूतिकागृहस्थिताया महिष्या अङ्के मायाकल्पितमेकं शिशुं निधाय धर्म्मनाथमपहृत्य शची शक्राय समर्पयामास । शक्रोऽपि तमादाय सुरगजमारुह्य देवसेनासमेतो व्योमवर्त्मना सुमेरुपर्व्वतं जगामेतिवर्णनं । सुमेरुवर्णनं । तत्र देवसेनासन्निवेशवर्णनं । गजाश्वादिवर्णनञ्च ।

अष्टमे सर्गे,—सुमेरौ मणिसिंहासने धर्म्मनाथस्य उपवेशनवर्णनं । धर्म्मनाथस्य अभिषेकवर्णन-

मुखेन चीरसमुद्रवर्णनं। इन्द्रादिकृततत्स्तुतिवर्णनं। धर्म्मनाथस्य पुनः मातुरङ्के अधिष्ठानवर्णनञ्च।

नवमे सर्गे,—धर्म्मनाथस्य बाल्यवर्णनं। यौवनवर्णनं। यौवराज्यप्राप्तिवर्णनञ्च। विदर्भाधिनाथेन प्रतापराजेन स्वदुहितुः स्वयंवरे धर्मनाथानयनार्थं प्रेषितस्य दूतस्य आगमनवर्णनं। धर्मनाथस्य विदर्भगमनवर्णनं। पथि प्राप्ताया गङ्गाया वर्णनञ्च।

दशमे, एकादशे, द्वादशे, त्रयोदशे च सर्गे,—विन्ध्यगिरिवर्णनं। षड़्तुवर्णनं। पुष्पावचयवर्णनं। नर्मदायां जलक्रीड़ावर्णनं।

चतुर्दशे सर्गे,—सन्ध्यावर्णनं। अन्धकारवर्णनं। चन्द्रोदयवर्णनं। नायिकानां प्रसाधनवर्णनं। दूतीसंप्रेषणादिवर्णनञ्च।

पञ्चदशे सर्गे,—पानगोष्ठीवर्णनं। रात्रिक्रीड़ावर्णनञ्च।

षोड़शे सर्गे—प्रभातवर्णनं। विदर्भदेशप्राप्तिवर्णनं। विदर्भदेशवर्णनं।

सप्तदशे सर्गे—स्वयंवरवर्णनमुखेन राजकन्यया धर्मनाथो वृत इति वर्णनं। धर्मनाथस्य कुण्डिनपुरप्रवेशवर्णनं! नगरनारीविभ्रमवर्णनं। विवाहवर्णनं। वध्वा सह धर्मनाथस्य स्वपुरप्राप्तिवर्णनञ्च।

अष्टादशे सर्गे,—रत्नपुरे महोत्सववर्णनञ्च। धर्मनाथपितुर्महासेनस्य वैराग्यवर्णनं। धर्मनाथं प्रति तत्कृतस्य नीत्युपदेशस्य वर्णनं। तस्य राज्याभिषेकवर्णनं। महासेनस्य वनगमनवर्णनं।

ऊनविंशे सर्गे,—अनेकमहीपतिभिः सह सुषेणस्य चित्रयुद्धवर्णनं।

विंशे सर्गे,—पञ्चलक्षवर्षपर्य्यन्तं सम्यक् प्राजापालनं विधाय उल्कापातदर्शनेन धर्मनाथस्य वैराग्यप्राप्तिवर्णनं। विरक्तस्य तस्य तपस्यावर्णनं। ज्ञानप्राप्त्यादिवर्णनञ्च।

एकविंशे सर्गे,—दिव्यसभामधिष्ठितस्य धर्मनाथस्य संक्षेपेण जिनसिद्धान्तवर्णनं। ग्रन्थकर्त्तुः प्रशस्तिकीर्त्तनञ्च।

No. 3288. कर्पूरमञ्जरीप्रकाशः। Substance, country-made paper, 14 × 5 inches. Folia, 58. Lines, 6 on a page. Extent, 952 ślokas. Character, Nágara. Date, ? Place of deposit, Váhádurapura, Zillá Murshidábád, Sítánátha Bhaṭṭáchárya. Appearance, decayed. Prose. Correct.

Karpúramanjarí-prakáśa. A commentary by Rájaśekhara on a Prákṛit poem called Karpúramanjarí. By Vásudeva, son of Prabhákara Bhaṭṭa.

Beginning. दशास्योद्यदास्यच्छिदं जानकीशं
कुलोपास्यमानस्य साष्टाङ्गपातं।

गणेशञ्च गण्डोल्लसद्भृङ्गसङ्गं
हरोचाङ्गसङ्गांश्च गङ्गातरङ्गान् ॥
तातं प्रभाकरं नत्वा मातरं गोमतीमपि ।
कर्पूरमञ्जरीटीका वासुदेवेन तन्यते ॥

कर्पूरमञ्जर्य्याख्यसाटकारम्भे सूत्रधार आशीरूपां नान्दीं पठति भद्रमिति ।

अत्र च व्यासादय इत्यादौ सरस्वत्या इत्येतत्प्रभृतिषष्ठ्यन्तत्वोपक्रमभङ्गाभासेऽपि भवन्त्वित्यादि-प्रधानक्रियापदानां लोड़न्तत्वप्रक्रमः शङ्क्यः। तेन रीतिर्नाम शब्दगुणः। इत्यादि ।

End. आकाश इति ।
किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् ।
श्रुत्वेवानुक्तमपि चेत्तत् स्यादाकाशभाषितं ॥
इति भारतः ।

Colophon. इति श्रीमद्विद्वद्वृन्दवन्दितारविन्दसुन्दरपदद्वन्द्वकुन्दप्रतिमयशःप्रकरप्रखरक-ठोरकिरणकरप्रभप्रतिभप्रभाकारभट्टात्मजवासुदेवविरचिते कर्पूरमञ्जरीप्रकाशे चतुर्थं जवनिकान्तरं समाप्तं ।

विषयः। राजशेखरकृतप्राकृतभाषामयकर्पूरमञ्जर्य्यभिधानसट्टकस्य व्याख्यानम् ।

No. 3289. सञ्जीवनी । Substance, country-made paper, 14 × 5½ inches. Folia, 140. Lines, 8 on a page. Extent, 4,030 ślokas. Character, Bengali. Date, ? Place of deposit, Mírapura, Zillá Mursidábád, Yádavachandra Bhaṭṭáchárya. Appearance, new. Prose. Incorrect.

Sanjíbaní. A commentary on the Kumárasambhava of Kálidása. From canto 8 to 17. By Sítáráma, son of Lakshmaṇa Bhaṭa and Satí. This is a continuation of the work of the commentary of Mallinátha.

Beginning. शिरसा शकलं शशाङ्कमूर्त्तेर्भसितं विभ्रतमङ्गकेन भूरि ।
गरलञ्च गलेन चिन्तयामो हरमर्द्धाङ्गहराद्रिराजकन्यां ।
टीकासप्तसु मल्लिनाथकृतिना सञ्जीवनीसंज्ञिका
या सर्गेषु कुमारसम्भवमहाकाव्यस्य चक्रे पुरा ।
सैवैतत्स्ववशिष्टदिक्प्रमिततत्सर्गेषु विद्वन्मुदे
सीतारामकवीश्वरेण हि यथाप्रज्ञं समापूर्य्यत ॥

नवपरिणीतगिरिजारहःकेलिमपि विवर्णयिषुस्तत्र भवान् कालिदासः अष्टमं सर्गमारभते। पाणिपीड़नविधेरिति। पाणिपीड़नं नाम षोड़शविधेषु संस्कारेषु कश्चित् संस्कारविशेषः। पीड़यति यस्मिन्निति पीड़नं। इत्यादि।

End. मालिनीवृत्तं। लक्षणन्तूक्तं।
यं प्रासूत सुतं पुरा च जननी नाम्ना सुशीरेति सा
ख्यातो यस्य बुधेन्द्रमस्तकमणिः श्रीलक्ष्मणाख्यः पिता।
यद्भ्रातृद्वितीयं जगद्विजयते विद्वत्तया मण्डितं
तेनासौ रचिता कुमारविवृतिः सञ्जीवनी जीवदा॥
संवत्सरेऽङ्काद्रिपुवाणतुल्ये नभस्यमासे बहुले दले च।
तिथावनङ्गस्य सजीववारे टीका कुमारस्य समापदेषा(?)॥
— — — — — — ।

Colophon. इति श्रीपर्व्वणीकरोपनामकश्रीलक्ष्मणभट्टात्मजसतीगर्भसम्भवश्रीसीतारामकविविरचितया सञ्जीवनीसमाख्यया व्याख्यया समेतः श्रीकालिदासकृतौ कुमारसम्भवे महाकाव्ये तारकासुरवधो नाम सप्तदशः सर्गः। समाप्तोऽयं ग्रन्थः।

विषयः। कालिदासकृतकुमारसम्भवस्य अष्टमसर्गादारभ्य सप्तदशसर्गं यावत् मल्लिनाथरीत्यनुसारेण व्याख्यानम्।

No. 3290. तत्त्वबोधविधायिनी, वा सम्मत्तिटीका। Substance, country-made paper, 13 × 5½ inches. Folia, 910. Lines, 11—13 on a page. Extent, 14,332 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchâyatapausála. Appearance old. Prose. Incorrect. Sanskrit.

Tatvabodhavidháyiní. On Jain Philosophy, in describing which the author's great object is to refute the doctrines of the several systems of the Hindu Philosophy. By Abhayadeva Súri.

Beginning. (आदितः सप्ततिपत्राणि न विद्यन्ते। — — — नचागमः विधिः कश्चिन्नित्यः सर्वज्ञबाधकः। न च मन्त्रार्थवादानां तात्पर्य्यमवकल्प्यते॥ नचागमेन सर्वज्ञस्तदीयेनान्यसंश्रयात्। नरान्तरप्रणीतस्य प्रामाण्यं गम्यते कथमित्यादितो येन देशकालेत्यादिप्रयोगेणासिद्धो हेतुः। स व्यवहारनिषेधश्चानुपलम्भमात्रनिमित्तो निरोध्योऽनेनान्यत्र प्रवर्त्तित इत्यत्रापि तन्निमित्तसद्भावात् प्रवर्त्तयितुं युक्तः। इत्यादि।

End. एवंविधगुणाध्यासितस्य जैनवचनस्य सामायिकादिविन्दुसागरपर्य्यन्तक्लिष्टाम्भोधेः कल्याणमस्त्विति प्रतिकरणसमाप्तावन्त्यमङ्गलसम्पादनार्थं विशिष्टां स्तुतिमाहेति।

Colophon. इति तत्त्वबोधविधायिन्यां सम्मतिटीकायां तृतीयं काण्डं समाप्तम् ॥
इति कतिपयसूत्रव्याख्यया यन्मयाप्तं
कुशलमतुलमस्मात् सन्मतिर्भव्यसार्थैः ।
भवभयमभिभूय प्राप्यतां ज्ञानगर्भं
विमलमभयदेवस्थानमानन्दसारम् ॥
पुष्यद्वाग्दानवादिद्विरदघनघटाकुम्भपीठ-
प्रध्वंसोद्भूतमुक्ताफलविशदयशोराशिभिर्यस्य तूर्णम् ।
गन्तुं दिग्दन्तिदन्तच्छलनिचितपदं व्योमपर्य्यन्तभागान्
खल्पब्रह्माण्डभाण्डोदरनिविड़तरो + + ति संप्रतस्थे ॥
प्रद्युम्नसूरिशिष्येण तत्त्वबोधविधायिनी ।
तस्यैषाभयदेवेन सम्मतेर्विहृतिः कृता ॥

विषयः । न्यायवैशेषिकसांख्यपातञ्जलमीमांसावेदान्तचार्व्वाकबौद्धादिमतनिरसणपुरःसरं सम्मतिसूत्तव्याख्यनम् ॥

No. 3291. आर्य्याशतकम् । Substance, country-made paper, 13 × 5 inches. Folia, 7. Lines, 7 on a page. Extent, 125 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Ghaṭṭu Bábu. Appearance, decayed. Verse. Incorrect.

A'ryá-śataka. A hymn in praise of Kámákhyá, a form of Dúrgá. By Múkakavi Sárvabhauma.

Beginning. कारणपरचिद्रुपा काञ्चीपुरसीम्नि कामपीठगता।
काचन विहरति करुणा काश्मीरस्तवककोमलाङ्गलता ॥
काञ्चनकाञ्चीतिलकं करधृतकोदण्डवाणसृणिपाशम् ।
कठिनस्तनभरनम्रं कैवल्यानन्दकन्दमवलम्बे ॥
चिन्तितफलपरिपोषणचिन्तामणिरेव काञ्चिनिलया मे ।
चिरतरसुचरितसुलभा चित्तं शिशिरयतु चित्सुधाधारा॥ इत्यादि ।

End. जय जय जगदम्ब शिवे जय जय कामाक्षि जय जयाद्रिसुते ।
जय जय महेशदयिते जय जय चिद्गगनकौमुदीधारे ॥
आर्य्याशतकं भक्त्या पठतामार्य्या कटाक्षेण ।
निःसरति वदनकमलाद्वाणी पीयूषधोरणी दिव्या ॥

Colophon. इति श्रीमूककविसार्वभौमकृतौ आर्य्याशतकं समाप्तम् ॥

विषयः । काञ्चीपुराधिष्ठात्र्याः कामाक्ष्याः स्तुतिव्याजेन तद्रूपमाहात्म्यादिवर्णनम् ।

No 3292. द्रव्यसङ्ग्रहसूत्रम् । Substance, country-made paper, 12 × 5 inches. Folia, 5. Lines, 8 on a page. Extent, 40 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Arddha-Mágadhí.

Dravya-sañgraha-sútra. A treatise on Jaina Metaphysics and salvation. By Nemichandra Siddhántadeva, who lived after the time of Bhoj Deva of Dhar.

Beginning. जीवमजीवं दव्वं जिणवरवसभेण जेण निद्दिष्टं ।
देविं दविं दवंद वंदे तं सव्वदा सिरसा ॥
जीवो उव जगमऊ अमुत्ति कत्ता स देहपरिमाणो ।
मुत्ता संसारत्थो सिद्धो सो विस्ससोड्डगइ ॥ इत्यादि ।

End. दव्वसंगहमिणं मुणिनाहा दोससंचय+दा सुदपुणा ।
सोधयंतु तणुसुत्तधरेणं णेमि चंदमुणिणा भणियं जं ॥

Colophon. इति द्रव्यसङ्ग्रहसूत्रं समाप्तम् ।

विषयः । जीवाजीवादिषड्विधद्रव्यनिरूपणं । अत्र जीवस्य लक्षणादिविवेचणमुखेन चार्वाक-बौद्धतार्किकादिमतखण्डनं । तत्र परमार्थतः लोकप्रमितासंख्येयदेशमात्रोऽपि व्यवहारेण जीवस्य देहपरिमितत्वकथनं । पञ्चविधास्तिकायनिरूपणं । अथ यथा अनन्तज्ञानदर्शनसुखवीर्य्यगुणचतुष्टयं सर्व्वजीवसाधारणम्, एवं रूपरसगन्धस्पर्शगुणचतुष्टयं सर्व्वपुद्गलसाधारणमितिनिरूपणं । पुद्गलादि-स्वरूपकथनं । आकाशादीनां लक्षणादिकथनं । आस्रवबन्धपुण्यपापादिनिरूपणं । क्षयोपशमादि-निरूपणं । संवरादिनिरूपणं । प्रसङ्गाद्ब्रह्मचर्य्यनिरूपणं । अथ लोकसंस्थानादिकथनं । तत्र ज्यो-तिर्लोकादिपरिमाणादिकथनञ्च । अथ संसारे पतन्तं जीवमुद्धृत्य देवेन्द्रादिवन्द्ये निरन्तरानन्तसुखा-दिगुणलक्षणे मोक्षपदे धरतीति धर्म्मलक्षणप्रतिपादनं । क्षुत्पिपासादिरूपद्वाविंशतिविधपरीसह-निरूपणं । सामायिकादिचरित्रपञ्चकनिरूपणं । अथ मोक्षनिरूपणं । तत्र ध्यानध्येयध्यातृध्यानफ-लादिनिरूपणं । सम्यग्दर्शनज्ञानचारित्रनिरूपणं । मूढत्रयनिरूपणं । मदाष्टकनिरूपणं । अथ शुक्लध्यानादिस्वरूपकथनं । सर्व्वोच्चसिद्धिस्वरूपकथनञ्च ।

No. 3293. द्रव्यसङ्ग्रहवृत्तिः, वा ब्रह्मदेववृत्तिः । Substance, country-made paper, 15 × 6 inches. Folia, 84. Lines, 13 on a page. Extent, 2,639 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Prose. Slightly correct. Sanskrit.

Dravya-saṅgraha-vṛitti ALIAS **Brahmadeva-vṛitti.** A gloss on the next preceding work. By Brahmadeva.

Beginning. प्रनम्य परमात्मानं सिद्धं त्रैलोक्यवन्दितं ।
स्वाभाविकचिदानन्दस्वरूपं निर्म्मलाव्ययं ॥
शुद्धजीवादितत्त्वानां देशकञ्च जिनेश्वरं ।
द्रव्यसङ्ग्रहसूत्राणां वृत्तिं वक्ष्ये समासतः ॥

अथ मालवदेशे धारानामनगराधिपतिभोजदेवाबधानके कलिकालचक्रवर्त्तिसम्बन्धिनः श्रीपाल-महामण्डलेश्वरस्य सम्बन्धिन्याश्रमनामनगरे श्रीमुनिसुव्रतचैत्यालये शुद्धात्मद्रव्यसंवित्तिसमुत्पन्नसुखामृ-तरसास्वादविपरीतनारकादिदुःखभयभीतस्य परमात्मतत्त्वभावनोत्पन्नसुख + + रसपिपासितस्य भेदाभेदरत्नत्रयभावनाप्रियस्य — — — — — सोमाभिधानराजश्रेष्ठिनो निमित्तं श्रीनेमिचन्द्रसिद्धान्तदेवैः — — — — विरचितवृहद्द्रव्यसङ्ग्रहग्रन्थस्य—इत्यादि ।

End. मोक्षमार्गप्रतिपादकनामतृतीयाधिकार इत्यधिकारत्रयेणाष्टाधिकपञ्चाशत्-सूत्रैः श्रीनेमिचन्द्रसिद्धान्तदेवैर्विरचितस्य द्रव्यसङ्ग्रहाभिधानग्रन्थस्य सम्बन्धिनी ब्रह्मदेववृत्तिः समाप्ता ॥

Colophon. ग्रन्थसंख्या शत२७०० ।

विषयः । नेमिचन्द्रसिद्धान्तदेवकृतद्रव्यसङ्ग्रहसूत्रस्य व्याख्यानम् ॥

No. 3294. दानलीला । Substance, country-made paper, 14 × 4 inches. Folia, 8. Lines, 7 on a page. Extent, 126 ślokas. Character, Bengali. Date, ? Place of deposit, Váluchara, Jagadánanda Gosvámí. Appearance, fresh. Verse. Incorrect.

Dánalílá. A poem in praise of the benevolences of Krishṇa. By Mádhava Bhaṭṭa.

Beginning. स्वस्ति स्वस्तिकरी समस्तजगतां निर्वाणगर्वापहा
क्षौणीमण्डलमध्यभूषणमणिः काचित्पुरी माधवी ।
रम्या कृष्णतरङ्गिणीसहचरी कर्म्मद्रुमोन्मूलनी
सत्यानन्दचिदात्मनोऽनरतस्वेच्छा(ऽनवरतस्वेच्छा)विहारस्थली ॥
स्निग्धच्छायतरुप्रसूनविलसन्माधुर्य्यलोभभ्रमत्-
कालिन्दीपुलिनोपवर्त्तिपवनप्रालेयितप्राङ्गणम् ।
ब्रह्मेन्द्रादिसुरेन्द्रदुर्गममहिमप्रेमैकलभ्यं परं

पूर्णब्रह्मरहोविहारभवनं तत्रास्ति वृन्दावनं ॥ इत्यादि ।

End. कश्चित्कर्णाटविद्यावलवसतिरभूद्विष्णुशर्म्मा द्विजन्मा
सोमेनेष्टा च येनोत्तरवयसि पुनर्मुक्तिदामेत्य काशीं ।
शम्भोर्निर्वाणसद्मन्यनुपमविधिभिः कीर्त्तिमास्थाप्य लोके
संन्यस्याशेषकर्म्माध्यगमि पदमहो नेति यस्मिन् मनोऽपि ॥
अजनिषत तनूजांस्तस्य षट् यः कनीयान्
अखिलगुणगरीयांस्तत्र यज्ञेश्वराख्यः ।
अजनि च तनयोऽस्माद्वाचिदेवोऽस्य चास्ता-
मगणितगुणधामः लक्षणो माधवश्च ॥
आद्यो वंशावतंसः सुरगुरुसदृशः प्रज्ञया विष्णुदेवः
— — — — — — ।
तस्यासंस्तनयास्तयोऽपि सुधियो रामः क्षपाचन्द्रमाः
श्रीमान् विश्वपतिश्च माधव इति ख्याता गुणाम्भोधयः ।
तत्राकारि कनीयसा सुकृतिना चेतश्चमत्कारकं
काव्यं कृष्णकृपाभिलाषमनसा श्रीदानलीलाभिधं ॥
वसुकररसेन्दुवर्षे पक्षे शुक्ले चतुर्दश्यां ।
चन्द्रे तपसि कृतेयं वारीशाभे सुराज्ञि शूरजने ॥

Colophon. इति श्रीमद्वृन्दावनचन्द्रचरणारविन्दमकरन्दास्वादमुदितमनोमधुकरेण भट्ट-श्रीमन्माधवेन कृतं दानलीलाभिधं काव्यं समाप्तं ।

विषयः । श्रीकृष्णस्य दानलीलावर्णनव्याजेन तस्य रूपादिवर्णनम् ।

No. 3295. स्तुतिशतकम् । Substance, country-made paper, 13 × 5 inches. Folia, 10. Lines, 8 on a page. Extent, 210 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Ghaṭṭu Bábu. Appearance, old. Verse. Generally correct.

Stuti-śataka. A century of verses in praise of the goddess Kámákhyá. By Múkakavi.

Beginning. पाण्डित्यं परमेश्वरि स्तुतिविधौ नैवाश्रयन्ते गिरां
वैरञ्चाण्यपि गुम्फनानि विगलद्गर्व्वाणि सर्व्वाणि वै ।
स्नातुं त्वां परिफुल्लनीलमलिनश्यामाक्षि कामाक्षि मां

वाचालीकुरुत तथापि नितरां त्वत्पादसेवादरः ॥
तापिच्छस्तवकत्विषे तनुभृतां दारिद्र्यमुद्राद्विषे
संसाराख्यतमोमुषे पुररिपोर्वामाङ्कसीमाजुषे ।
कम्पातीरमुपेयुषे कवयतां जिह्वाकुटीं जग्मुषे
विश्वत्राणपुषे नमोऽस्तु सततं तस्मै परज्योतिषे ॥ इत्यादि ।

End. इमं परवरप्रदं प्रकृतिपेशलं पावनं
परापरचिदाकृतिप्रकटनप्रदीपायितम् ।
स्तवं पठति नित्यदा मनसि भावयन्नम्बिकां
जपैरलमलं मखैरखिलदेहसंशोषणैः ।

Colophon. इति श्रीमूककविसार्व्वभौमविरचितं स्तुतिशतकं सम्पूर्णम् ।

विषयः । काञ्चीपुराधिष्ठात्र्याः कामाक्ष्याः रूपादिवर्णनमुखेन महैश्वर्य्यादिवर्णनम् ॥

No. 3296. अर्थदीपिका, वा वृहत्प्रतिक्रमणसूत्रवृत्तिः । Substance, country-made paper, 12 × 5 inches. Folia, 208. Lines, 13 on a page. Extent, 6,744 ślokas. Character, Nágara. Date, Sm. 1652. Place of deposit, Váluchara, Pancháyata-pausála. Appearance, fresh. Prose. Incorrect. Sanskrit.

Artha-dípiká. A gloss on a Jaina Sútra entitled *S'rávaka-pratikramaṇa*. It treats of the duties of S'rávakas, and illustrates the subject by a number of anecdotes. By Ratnaśekhara Gaṇi.

Beginning. जयति सततोदयश्रीः श्रीवीरजिनेश्वरोऽभिनवभानुः ।
कुवलयबोधं विदधति गवां विलासो विभोर्यस्य ॥
सुतजलजलधीन् बहुविधल+प्रतिदध्महे गणधरेन्द्रान् ।
श्रुतदेवताश्च विश्रुतगुणैर्गरिष्ठान् निजगुरूंश्च ॥
— — — — — ।

इह तावत् कृतसामयिकेन प्रतिक्रमणमनुष्ठेयं । सामायिककर्त्रा च साक्षात् गुरोरभावस्थापनाचार्य्यस्थापना पूर्व्वं विधेया । सर्व्वस्यापि स्वानुष्ठानस्यैवमेवागमेऽभिहितत्वात् । शून्यानुष्ठानस्य च फलशून्यत्वापत्तेः । इत्यादि ।

End. एषां कालविध्यादि मत्कृतविधिकौमुद्यामवधार्य्यं ॥
— — — — — — ।

एषां श्रीसुगुरूणां प्रसादतोऽब्दे षड्ङ्कविश्वमिते ।
श्रीरत्नशेखरगणिरिदृत्तिमिमामकृत कृतितुष्ट्यै ॥
— — — — — — ।
एतस्यां टीकायामनुष्टुभामर्थदीपिकानाम्न्यां ।
षट्षष्टिशतीचत्वारिंशच्चतुरुत्तरानुमिता ॥

Colophon. समाप्ता चेयमर्थदीपिकानाम्नी इत्तत्प्रतिक्रमणसूत्रवृत्तिः । समाप्ता । संवत् १६५९ ।

विषयः । श्रावकप्रतिक्रमणाभिधानजैनसूत्रस्य उपाख्यानकीर्त्तनपुरःसरं व्याख्यानम् ॥

No. 3297. श्रावकदिनकृत्यम् । Substance, country-made paper, 12 × $4\frac{1}{2}$ inches. Folia, 55. Lines, 6 on a page. Extent, 694 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, fresh. Verse. Generally correct. Ardha Mágadhí.

S'rávaka-dinakṛitya. A summary of the duties of S'rávakas. Anonymous. Contents: Daily prayer and other religious duties of Jaina householders. Obeisance—Worship—Differences between worshipping with material substances and mental worship. Hymn and obeisance to the *Chaitya*—Contemplation or *prabhábana* of Chaitya. Ceremonies to be observed on first entering a *Chaitya*. Plastering a Chaitya with sandal paste—Merits of repairing dilapidated temples of Jina. Prohibition to taste anything offered to Jina. Prohibition of unfair dealings in trade. Rectitude in law courts. Consequences of associating with bad men. The mode of offering gifts. Superiority of the merits of the grant of land to that of the grant of any other thing. Gift of beds, &c. Merit of encouraging the virtuous. The merits of the Suris. H.

Beginning. वीरं न मे ऊणति लोयभाणु विसुद्धनाणं सुमहानिहाणं ।
वुत्थामि सड्ढाणदिणमकिच्चं जिणंदचंदाणय आगमाओ ॥
नवकारेण विबोहो अणुसरणं सावउव याहं मे ।
जोगो चिइवं दणमो पच्चक्खाणं च विहिपुव्वं ॥ इत्यादि ।

End. काऊण सड्ढाणदिणस्स किच्चं जं किंचिपुण्णं मह + जिचंति ।
तेणं नु भव्वाणभवुव्भवाणं तिखकाणदुक्खकाणभवेउ + सो ॥

अयाणमाणेण जिणुत्तमाणं मयं महत्थं मइ विब्भमेणं ।
जं मे विरुद्धं इह तम्म वुत्तं तं भव्भमिच्छामिच दुक्कडुंति ॥

Colophon. इति श्रीश्रावकदिनकृत्यं समाप्तम् ।

विषयः । जैनगृहस्थानामाह्निकादिकृत्यनिरूपणं । तत्र आदौ नमस्कारविधिकथनं । पूजादिविधिकथनं । तत्र द्रव्यपूजाभावपूजादिभेदनिरूपणं । चैत्यस्तवदण्डककथनं । प्रभावनादिविधिकथनं । चैत्यप्रवेशविधिकथनं । चन्दनादिविधिकथनं । वन्दनविधिकथनं । श्रवणादिविधिकथनं । जिनभवनजीर्णोद्धारादिफलकथनं । देवद्रव्यभक्षणादिनिषेधकथनं । अथ कूटवाणिज्यादिकरणनिषेधकथनं । व्यवहारशुद्धिकथनं । कुमित्रादिसंसर्गफलकथनं । दानविधिकथनं । वस्त्रान्नपानादिदानापेक्षया भूमिदानस्य फलाधिक्यकथनं । शय्यादिदानविधिकथनं । धार्म्मिकेषु वात्सल्यादिकरणमाहात्म्यादिकथनं । सूरिगुणादिकथनञ्च ।

No. 3298. उपदेशमालाप्रकरणम् । Substance, country-made paper, 12 × 5 inches. Folia, 24. Lines, 10 on a page. Extent, 767 ślokas. Character, Nágara. Date, ? Place of deposit, Válucbara, Panchâyatapausála. Appearance, old. Verse. Incorrect. Arddha-Mágadhí.

Upadeśamálá-prakaraṇa. A treatise on salvation. By Dharmadása Gaṇi. A man scorched by the glowing embers of sin, becomes anxious for *mukti,* and the only way leading up to *mukti* is the performance of austerities. That way is explained in the cult preached by Ṛishabha and others, and it consists of dispassion and aversion to worldly objects. The present work enumerates and explains what these duties and austerities are, and treats of *Áchára.* H.

Beginning. नमिऊण जिणवरिंदो इंदनरिंदच्चीए तिलोयगुरु ।
उपएस मालमिणमो वुच्छामि गुरुवएसेणं ॥
गजचूड़ामणिभूओ उसाभा वीरोतिलोय मिरितिलउ ।
एगो लोगाइच्चो एगो चक्कूति इयणस्स ॥
संवत्सुरसुसभ जिणो छम्मासावद्धमाणजिणचंदो ।
ईय विहरिया निसरण जइजए उवमाणेणं ॥ इत्यादि ।

End. अक्खरमत्ताहीणं जंविय पढियं मयाणमाणेणं ।
तं खमउ मज्झ सघ्घं जिणवयणविणिग्गया वाणी ॥

Colophon. इति श्रीधर्म्मदासगणिविरचितं श्रीउपदेशमालाप्रकरणं समाप्तं ।

विषयः। अथ अधर्म्माङ्गारदाहेन नितरां परिक्लिष्टस्य तदुपशमनाय निर्व्वेदमापन्नस्य मोक्षसेकाभिषेकाय साधीयसीं मतिं समुपलभ्य मोक्षद्वारभूतेषु तपःकर्म्मसु सुतरां प्रवृत्तिर्जायते। एवं तत्र प्रवर्त्तमानेन ऋषभादिजिनेन्द्रोक्तोपदेशक्रमेण पापकर्म्मादितो विरतेन अहरहः अहिंसादिधर्म्मानुष्ठानं विधेयमिति सप्रपञ्चनम्। तत्र तत्र तपःकर्म्मनिरूपणमुखेन आचारादिधर्म्मनिरूपणञ्च।

No. 3299. योगविन्दुः। Substance, country-made paper, 12 × 5 inches. Folia, 28. Lines, 10 on a page. Extent, 655 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchāyata-pausála. Appearance, fresh. Verse. Generally correct. Sanskrit.

Yogavindu. A treatise on the Jain Yoga. Anonymous. Contents: Nature, sanctity and importance of *Yoga*, which stands in close connection with *mukti*. It is called *yoga* (योजन) because it leads to *mukti*. A discussion on the nature of Átmá or soul, in the course of which the opinions of Máheśvara and other philosophical schools are refuted. Connection of Karma with Átmá. Nature of bondage. Jaina synonym of átmá is *purusha*. The attributes of the *purusha*. Various kinds of *Yoga*, and their definitions. Sacredness of *Yoga*. It produces transcendental knowledge. Patience, mercy, chastity, good conduct &c. are auxiliaries to *Samádhi*. The *Yoga* systems of Patanjali and others have nothing to do with *mukti*. A refutation of such doctrines as *sabhába-váda* and others. *Yoga* consists of perfect vision. Devotion as preached by the Jainas can alone lead to *mukti*. *Yama*, *Niyama* and so on are auxiliaries to *mukti*. Refutation of such doctrines as the existence of a supreme being—Isvara. Thoughts on *maitri* &c. Various kinds of *yoga*. Want of necessity for the assumption made by some as to the two kinds of *Yoga*. Conscious and unconscious—*Samprajnáta* and *Asamprajnáta*. The merits of performing various kinds of *Samádhi*. Refutation of the theories of the Mímáñsakas and of the Sáñkhyas. The nature of *mukti*. A refutation of the various theories of other schools of philosophy. H.

Beginning. नत्वाद्यन्तविनिर्मुक्तं शिवं योगीन्द्रवन्दितं।
योगविन्दुं प्रवक्ष्यामि तत्त्वसिद्ध्यै महोदयं॥

सर्व्वेषां योगशास्त्राणामविरोधेन तत्त्वतः ।
सन्नीत्या स्थापकञ्चैव मध्यस्थास्तद्विदः प्रति ॥
मोक्षहेतुर्यतो योगो भिद्यते न ततः क्वचित् ।
साध्याभेदात्तथाभावे उक्तिभेदो न कारणं ॥
मोक्षहेतुत्वमेवास्य किन्तु यत्नेन धीधनैः ।
सङ्गोचरादिसंशुद्धं स्वग्यं स्वहितकाङ्क्षिभिः ॥ इत्यादि ।

End. एवमाद्यत्र शास्त्रज्ञैस्तत्त्वतः स्वहितोद्यतैः ।
माध्यस्थ्यमवलम्ब्योच्चैरालोच्यं स्वयमेव तु ॥
स्वल्पमत्यनुकम्पायै योगशास्त्रमहार्णवात् ।
आचार्य्यहरिभद्रेण योगविन्दुः समुद्धृतः ॥
समुद्धृत्यार्ज्जितं पुण्यं यदेनं शुभयोगतः ।
भवान्ध्यविरहात्तेन जनः + योगलोचनः ॥

Colophon. इति श्रीयोगविन्दुः परिपूर्णः ।

विषयः। मोक्षनिमित्तत्वेन योगस्य अभ्यर्हितत्वकथनं। मोक्षेण सह योजनात् योग इति निर्व्वचनकथनञ्च । आत्मस्वरूपकथनमुखेन माहेश्वरादिमतनिरसनं । आत्मना कथं कर्म्मसंयोग इति निरूपणं । बन्धनिरूपणं । जैनमतेत्मनः पुरुष इति संज्ञाकथनं । पुरुषकारादिनिरूपणं । अथ योगस्य तात्त्विकातात्त्विकसानुबन्धनिरनुबन्ध-साश्रवानाश्रवसंज्ञाकथनं । क्रमेण तात्त्विकादीनां लक्षणादिकथनं । योगमाहात्म्यकीर्त्तनं । योग एव सर्व्वथा सेवनीय इति कथनं । योगस्य अतीन्द्रियज्ञानजनकत्वकथनं । धृतिक्षमाब्रह्मचर्य्यसदाचारादीनां समाध्युपयोगित्वकथनं । पातञ्जल्यादियोगशास्त्रस्य अनभ्यर्हितत्वकथनं । प्रसङ्गेन स्वभाववादादिनिरसनं । सम्यग्दर्शनादिरूप एव योग इति निरूपणं । जैनशास्त्रभक्तिरेव मुक्तिदूतीतिकथनं । यमनियमादीनां तदुपयोगित्वकथनं । अन्याभिमतेश्वरवादादिखण्डनं । मैत्र्यादिचिन्तनविधिकथनं । भावनाध्यानसमतावृत्तिसंक्षयरूपयोगपञ्चकथनं । वृत्तिसंक्षयरूपयोगकीर्त्तनं । अन्याभिमतेन सम्प्रज्ञातासम्प्रज्ञातनामभेदे हेतुकथनं । सर्व्वसमाधिफलकीर्त्तनं । अत्र मीमांसकादिमतनिरसनं । सांख्यादिमतखण्डनञ्च । मुक्तिनिरूपणं । तत्र अपरदर्शनमतखण्डनञ्च ॥

No. 3300. योगविन्दुवृत्तिः | Substance, country-made paper, 12 × 5 inches. Folia, 70. Lines, 15 on a page. Extent, 352 ślokas. Character, Nágara. Date, ? Place of deposit, Válucbara, Pancháyata-pausála. Appearance, fresh. Prose. Generally correct. Sanskrit.

Yogavindu-vṛitti. A gloss on the *Yogavindu* of the Jainas.

Beginning. सद्योगचिन्तामणितोऽनणीयो येनाधिजग्मे जगतः पतित्वं।
स योगिवृन्दारकवन्दनीयोऽद्यतादवद्यानि घनं जनो नः॥
सुधाविन्दोरिवानन्दमानन्दमुपचिन्वतः।
योगविन्दोः समासेन वृत्तिरेषा विधीयते॥
गुरूपदेशो न च तादृगस्ति मतिर्न वा काचिदुदाररूपा।
तथापि योगप्रियतावशेन यत्नस्तदाभ्यासकृते ममायं॥

तस्य वेदमादिमं सूत्रं। नत्वेत्यादि। नत्वा अभिवन्द्यादिः प्रथमभावो दृन्तपर्य्यवसान। विनिर्मुक्तं विरचितं। किमित्याह शिवं सकलोपप्लवकलाविकलं। इत्यादि।

End. योगलोचनः। यथावस्थितवस्तुपरिज्ञानावन्ध्यकारणत्वाद्योग एव लोचनमपि यस्य स तथा। विरह इति च भगवतः। श्रीहरिभद्रसूरेः स्वप्रकरणाङ्कप्रद्योतक इति।

Colophon. समाप्तेयं योगविन्दुवृत्तिः॥

विषयः। जैनयोगविन्दुप्रकरणस्य व्याख्यानम्।

No. 3301. षड्दर्शनसमुच्चयटीका। Substance, country-made paper, 11½ × 5 inches Folia, 45. Lines, 12 on a page. Extent, 1,282 ślokas. Character, Nágara Date, ? Place of deposit, Váluchara, Paṉcháyata-pausála. Appearance, old. Prose. Incorrect. Sanskrit.

Shaḍdarśana-samuchchaya-ṭíká. A commentary on the *Shaḍdarśana-samuchchaya*, being an epitome of the six schools of Hindu Philosophy. By Haribhadra Súri.

Beginning. ॐ नमः श्रीसर्व्वज्ञाय।
सज्ज्ञानदर्पणतले विमलेऽत्र यस्य ये केचिदर्थनिवहाः प्रकटीवभूवुः।
तेऽद्यापि भान्ति कलिकालजदोषभस्मप्रोद्दीपिता इव शिवाय स मेऽस्तु वीरः॥
जैनं यदेकमपि बोधविधायिवाक्यमेवं श्रुतिः फलवती भुवि येन चक्रे।
चारित्रमाप्य वचनेन महत्तरायाः।
श्रीमान् स नन्दतु चिरं हरिभद्रसूरिः॥
— — — — —।
व्यासं विहाय संक्षेपरुचिसत्त्वानुकम्पया।
टीका विधीयते स्पष्टा षड्दर्शनसमुच्चये॥

इह श्रीजिनशासनप्रभावनाविर्भावकप्रभोदयभूरियशाश्चतुर्दशशतप्रकरणोपकृतजिनधर्म्मा भगवान्

श्रीहरिभद्रसूरिः षड्दर्शनप्रमाणपरिभाषास्वरुप + + + + + + अर्थो निगद्यते अभिधीयतेऽत्र सम्बन्धः। इत्यादि।

End. न च, पूर्व्वभवादिसम्बन्धशुभाशुभकर्म्मविपाकः। वेद्यसुखदुःखानुबन्धः स व्यपेच्च इत्यर्थः। संयोगास्तु तत्शिखरावलीनसकुनिगुणः।

Colophon. इतः खण्डितम्।

विषयः। हरिभद्रसूरिकृतषड्दर्शनसमुच्चयस्य व्याख्यानम्।

No. 3302. षड़ावश्यकवृत्तिः। Substance, country-made paper, 12 × 5 inches. Folia, 99. Lines, 15 on a page. Extent, 4,410 ślokas. Character, Nágara. Date, Sм. 1721. Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Prose and verse. Incorrect. Sanskrit.

Shaḍávaśyaka-vṛitti. A commentary on the *Shadávaśyaka-sútra,* or maxims of good conduct for Jains. Anonymous.

Beginning. श्रीमन्नाभिकुलाब्जबोधनकृते मार्त्तण्डविम्बायते
यल्लोके व्यवहारसाररचनाचातुर्य्यधूर्य्यायते।
धर्म्मं येन चतुर्व्विधं प्रथमतः श्रीसङ्घमाचचते
स श्रीनाभिन्टपाङ्गजो वितनुते भव्यात्मनां मङ्गलं॥
— — — — — —।
श्रीवर्द्धमानं चरमं जिनेन्द्रं सिद्धार्थभूपालकुलप्रदीपं।
भवार्णवोत्तारणपोततुल्यं नमाम्यहं यत्पदपद्मरम्यं॥
— — — — — —।
सुप्रसन्नमनाः सन्तु (?) सन्त × सुविचच्चणाः।
ग्रन्थोऽयं यत्प्रसादेन विस्तारं प्राप्यते जने॥

अपि च। प्रथमं सकलमाङ्गलिकस्य मूलं श्रीजिनशासनस्य सार एकादशाङ्गचतुर्द्दशपूर्व्वोद्धारः सदैव शाश्वत + अपरमेष्ठिनमस्कारः। अथाच। णमो अरिहंताणमिति।

End. श्रीधर्म्मसूरिस्तदनुक्रमेण सूरिर्वरोऽभून्महिचन्द्रनामा।
शिष्यस्तदीयो महिमानिधानः कथाऽकरोत् पाठकराजवल्लभः (?)।
— — — — — —।
षड़ावश्यकवृत्त्येषा वार्त्तिकस्था कथामिमां।

छता स स्लोकबन्धेन सन्तवाचनहेतवे (?)।
यावत् सूर्य्यशशी यावत् यावज्जिनेन्द्रशासनं (?)।
तावन्नन्दकथाप्येषा वाच्यमाना सुहृज्जनैः ॥

Colophon. इति श्रीधर्म्मघोषगच्छे वादीन्द्रश्रीधर्म्मसूरीन्द्रसन्ताने मूलपट्टे श्रीमद्दीतिलकसूरिशिष्यपाठकश्रीराजवल्लभकृतैषा षड़ावश्यकवृत्तिः।

विषयः। षड़ावश्यकाभिधानजैनसूत्रस्य व्याख्यानमुखेन पद्येन कथांशकीर्त्तनम्।

No. 3303. गणधरसार्द्धशतकम्। Substance, country-made paper, 12 × 5 inches. Folia, 11. Lines, 8 on a page. Extent, 210 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, fresh. Verse. Correct.

Gaṇadhara-sárddha-śataka. An eulogium of Ṛishabhasena, surnamed *Gaṇadhara,* the principal disciple of the first Jina named Ṛishabha. Similar eulogia of Agitasvámí, the principal disciple of the last Jina, as well as of Gautama Svámi and others, the disciples of Varddhamána Jina. By Jinadatta Súri.

Beginning. गुणमणिरोहण गिरिणो रिसहजिणंदस्स पढमसुणिवइणो।
सिरि उसह(भ)सेणगणहारयस्स पणवयामि पए ॥
अजिआइ जिणिं दाणं जणिआणं दाण पणय पाणीणं।
घुणिमो दीणमणोहं गणहारीणं गुरु गुरुगुणोहं ॥
सिरिवद्धमाणर नाणचरणदंसण मणीण जलनिहिणो।
तिहुअणपहुणो पड़िहनीय सत्तुणो सत्तमो सीसो ॥ इत्यादि।

End. ते मह सव्वे परमो वयारिणो वंदणारिहा गुरुणो।
कय सिव सुह संपाए ते सिं पाए सया वंदे ॥
जिणदत्तगणिगण सयं संपर्ण सोमचंदविंवंव।
भव्वेहिं भणिज्जंतं भवरविसंतावमवहरउ ॥

Colophon. इति श्रीगणधरसार्द्धशतकं समाप्तं।

विषयः। ऋषभनाथस्यादिजिनेन्द्रस्य प्रधानशिष्यः गणधरशब्दभाक् कश्चित् ऋषभसेननामा आसीत्। तस्य गुणकथनव्याजेन स्तोत्रकथनं। एवं शेषजिनेन्द्रस्य प्रधानशिष्याणां गणधराणाम

जिनस्वामिप्रमुखानां तथा वर्द्धमानजिनेन्द्रस्य प्रधानशिष्याणां गणधराणां गौतमस्वामिसुधर्मस्वामि-प्रभृतीनां गुणादिवर्णनं ।

No. 3304. गणधरसार्द्धशतकलघुवृत्तिः । Substance, country-made paper, 12 × 5 inches. Folia, 32. Lines, 15 on a page. Extent, 1,598 ślokas. Character, Nágara. Date, Sm. 1651. Place of deposit, Váluchara, Pancháyata-pausála. Appearance, fresh. Prose. Correct. Sanskrit.

Gaṇadhara-sárddha-śataka-laghu-vṛitti. Scholia on the *Ganadhara-sárdha-s'ataka.* By Sarvarája Gaṇi.

Beginning. कल्याणं वः प्रतन्यात् प्रथमजिणपतिर्विश्वविश्वेशपूज्यो
यस्य श्रीपुण्डरीकः प्रथमगणधरः पञ्चकोटिसमेतः ।
श्रीमच्छत्रुञ्जयाद्रौ सकलरिपुजयात् प्राप्तसत्कीर्त्तिपूरः
प्रेयःश्रेयःसुकन्यापरिणयनमहो ब्रह्मचारी व्यधत्त ॥

श्रीविक्रमपुरश्रीमहावीरदेवस्थापनभूतप्रेतनिरसनश्रीमदुज्जयिनीयोगिनीचक्रप्रतिबोधकुमार्गनिरोधश्रीमदणहिल्लपाठकसप्तवर्षावस्थानप्रतिवादिसिंहसिंहनादभङ्गविधानश्रीत्रिभुवनगिरिदेशनियमितपञ्चसप्तयतिवासनिवारणश्रीपार्श्वनाथ — — श्रीजिनदत्त सूरिः — — — गणधरसार्द्धशतकाभिख्यं प्रकरणं चिकीर्षुः — — — प्रतिपादयितुं प्रथममिमां गाथामाह । गुणमणीति । व्याख्या । श्रीऋषभसेनगणधारिणः । ऋषभसेननाथगणधरस्य । इत्यादि ।

End. नानालब्धिनदीपरिवृढश्रीपुण्डरीकादिम-
ज्ञानध्यानचरित्रसद्गुणगणावासानगारेश्वरान् ।
स्तुत्वा यन्मयका सुवृत्तिमिषतः संप्रापि पुण्यं ततो
भव्यौघः प्रतनोतु सिद्धिकमलापाणिग्रहेणोत्सवं ॥

Colophon. इति श्रीगणधरसार्द्धशतकलघुवृत्तिः समाप्ता ।

विषयः । जिनदत्तसूरिकृतगणधरसार्द्धशतकप्रकरणस्य व्याख्यानम् ।

No. 3305. मन्त्रार्थदीपिका । Substance, country-made yellow paper, 14 × 3¼ inches. Folia, 248. Lines, 7 on a page. Extent, 7,378 ślokas. Character, Bengali. Date, ? Place of deposit, Simuliyá. Post Málipotá, Zilla Nadíyá. Kálíkṛishṇa Gosvámí. Appearance, old. Prose and verse. Generally correct.

Mantrártha-dípiká. Elaborate expositions of the mystic meanings of mantras or rituals used in religious ceremonies. By Govinda Nyáyavágíśa.

Beginning. देवश्रीरघुनाथपादयुगलध्यानामृतामोदिना
तन्त्राणामखिलार्थदुर्घटतया संक्षेपतो यत्नतः ।
मन्त्रोद्धारकुलोपचाररचनैर्नत्वा गुरूनादराद्-
गोविन्देन विविच्यते सुगमतो मन्त्रार्थसन्दीपिका ॥
गोविन्दन्यायवागीशभट्टाचार्य्यविनिर्म्मितां ।
मन्त्रार्थदीपिकां धीरा भावयध्वं सुनिर्म्मलां ॥
सन्ति यद्यपि भूयांसो मन्त्रार्थानां प्रकाशकः ।
तथापि सारमाकृष्य किञ्चिदत्र विधीयते ॥
स्वताररराशिकोष्ठानामनुकूलान् भजेन्मनून् ।
मनूनिति शारदाधृतवचनात् ।

End. किरीटकेयूरहारकुण्डलशङ्खचक्रगदाम्भोजहस्तपीताम्बरधरश्रीवत्साङ्कितवक्षः-स्थलश्रीभूमिसहितात्मकशोभित + + दीप्तकराय सहस्रादित्याभाय नमः ।

Colophon. इति मन्त्रार्थदीपिका समाप्ता ।

विषयः । शाक्तशैवादिपञ्चोपासकानां हिताय विविधमन्त्रोद्धारमन्त्रादिनिरूपणं । तत्र हरचक्रनिरूपणं । नामचक्रं । ऋणिधनिचक्रं । नक्षत्रचक्रं । राशिचक्रं । नाड़ीचक्रं . अकथहचक्रादिनिरूपणं । एषां संस्थानादिकथनञ्च । मन्त्रदोषपरिहारोपायकथनं । वैष्णवशैवादिमन्त्रेषु क्रमेण नक्षत्रकोष्ठादिशुद्धेरावश्यकताकथनं । सकारभेदनिरूपणं । आसननिरूपणं । वर्ज्जनीयासनकथनं । मन्त्रविशेषे आसनविशेषे फलाधिक्यकथनं । कूर्म्मचक्रसंस्थानादिकथनं । काली-ताराप्रभृतीनां नानाविधयन्त्रनिरूपणं । तत्र तत्र स्वर्णरौप्यताम्रादीनां परिमाणकथनञ्च । चक्रादिनाशे प्रायश्चित्तविधानं । भैरवीमन्त्रविवरणं । भुवनेश्वरीयन्त्रादिनिरूपणं । मातङ्गीयन्त्रं । त्रिपुटायन्त्रं । इन्द्राक्षी-मङ्गलचण्डीप्रभृतीनां यन्त्रादिनिरूपणं । एवं शैववैष्णवादियन्त्रनिरूपणं । सामान्यतो यन्त्रसंस्कारकथनं । देवप्रतिष्ठाविधिः । तत्कालादिनिरूपणं । पुरश्चरणविधानं । तत्कालादिनिरूपणं । ग्रहणकाले श्राद्धं पुरश्चरणं वा कर्त्तव्यमित्याशङ्कायां श्राद्धाधिकारिणा श्राद्धं कर्त्तव्यं न पुरश्चरणं किन्तु श्राद्धं कृत्वा दानादिकं कार्य्यं श्राद्धानधिकारिणा तु पुरश्चरणं कर्त्तव्यं । "श्राद्धदानानुरोधेन यदि जापं त्यजेन्नरः ।" इत्यस्य आरब्धपुरश्चरणविषयत्वादितिनिरूपणं । पुरश्चरणे भोजननियमः । जपलक्षणं । क्षेत्रपालपूजाविधिः । जपादौ रुद्राक्षधारणावश्यकता । वर्णमालानिरूपणं । करमालानिरूपणं । मणिरत्नादिमालाकथनं । महाशङ्खमालाकथनं । माला-

संस्कारः। ध्यानप्रकरणे मातृकाकाली--श्मशानकाली--गुह्यकाली-तारा-त्रिपुरासुन्दरी-भुवनेश्वरी--मातृकाघटितपञ्चाशन्मन्त्रभैरवी-चैतन्यभैरवी-रुद्रभैरवी--षट्कूटभैरव्यादि--प्रचण्डचण्डिका-छिन्नमस्ता--वगला-मातङ्गी-नादमातङ्ग्यादि--उच्छिष्टचाण्डाली-लक्ष्मी--महालक्ष्मी--त्वरिता--रेणुकाशवरी-नित्या-त्रिपुटा-दुर्गा-जयदुर्गा-शूलिनी-नवदुर्गा-महिषमर्दिनी-कात्यायनी--इन्द्राची--मङ्गलचण्डी--सरस्वती-षोड़शवर्णात्मकसरस्वती--हंसवागीश्वरी--वाचस्पतिसरस्वती--पारिजातसरस्वती--गणेश-महागणपति-रिरिगणपति-शक्तिगणपति-हेरम्ब--त्र्यम्बक-गणेशादि-लक्ष्मीविनायक-शिव-दक्षिणामूर्त्ति-मञ्जुघोष-महा-नीलकण्ठ--चिन्मय--गरुड़-वानरमन्त्रादि-अघोरास्त्र-पाशुपतास्त्र-चेत्रपाल- चण्डेश्वर-सूर्य्य--चन्द्र--अन्न-पूर्णा--कर्णपिशाची- सुरसुन्दरी-योगिनी-मनोहरणयोगिनी-कनकवतीयोगिनी-रतिसुन्दरीयोगिनी-पद्मिनी-योगिनी-नटिनी-रागिणी-श्रीविष्णु-गोपाल-सन्तानगोपालादि--राम--सीता--हयग्रीव-नृसिंह-वराह--वामन-वासुदेव-नारायण-लक्ष्मीवासुदेवादीनां ध्यानकथनं। गायत्रीप्रकरणे मन्त्रविशेषे गायत्री-निरूपणं। प्रातरादिषु कालेषु गायत्रीध्यानकथनं। कलौ तन्त्रोक्तविधानेन देवादिपूजाकर्त्त-व्यता। दीक्षाविधिः। पञ्चोपासकानां मन्त्रादिकथनं। तत्र तत्र हव्यादिनिरूपणं। सर्व्वत्र पूजनप्रयोगकथनञ्च। होमविधिः। संक्षेपदीक्षापद्धतिः। शवसाधनप्रकरणं। वेतालादिसिद्धि-प्रकरणं। चतुःषष्ट्याचारादिकथनं। राधामन्त्रादिनिरूपणं। किरीटादिमन्त्रकथनञ्च। अत्र शेषभागे पत्रसंख्या नास्ति।

No. 3306. तात्पर्य्यतरङ्गिणी वा मनोरमा। Substance, country-made paper, 13 × 3 inches. Folia, 21. Lines, 8 on a page. Extent, 920 ślokas. Character, Bengali. Date, ? Place of deposit S'ántipura, Kálídása Vidyávágíśa. Appearance, old. Prose. Incorrect.

Tátparya-taranginí ALIAS **Manoramá.** A gloss on the drama of *Prasanna-rághava* of Jayadeva. By Raghunandana. The MS. is a mere fragment, containing only the first Act of the drama.

Beginning. ब्रह्मविष्णुशिवैर्नित्यं सेवितं × महाप्रभुं।
ज्योतिर्म्मयं चिदानन्दं गोविन्दं तमहं भजे॥
यस्य चाङ्के स्थिता गौरी वदने यस्य भारती।
तमादिपुरुषं वन्दे जगदानन्दमीश्वरं॥
सौमित्रिर्द्दक्षिणे यस्य वामे यस्य च जानकी।
चिदानन्दं जगन्नाथं रामचन्द्रमहं भजे॥
ज्योतिर्म्मयीं चिदानन्दां ब्रह्मादीनां स्तुतिक्षमां।

तां वन्दे जगतां धात्रीं × + ॐ शिवप्रियां ।
सोऽहं देवान् नमस्कृत्य टीकां चक्रे मनोरमां ।
बालानां पाठनार्थाय प्रसन्नराघवस्य च ॥
(जगदीशं हरिं नत्वा पूर्णब्रह्म स्वयं प्रभुं ।
प्रसन्नराघवस्यार्थं वक्ति श्रीरघूनन्दनः ॥)
इह खलु सकलमङ्गल इत्यादि ।

End. इति श्रीप्रसन्नराघवटीकायां तात्पर्य्यतरङ्गिण्यां प्रथमोऽङ्कः । + × × × बन्धूकेति अस्याः सीतायाः अधरः बन्धूकबन्धुः विम्बोष्ठमिति यावत् । इतः लिप्यभावात् परिशेषवाक्यं नास्ति ।

विषयः । जयदेवमिश्रकृतप्रसन्नराघवनाटकस्य द्वितीयाङ्कस्य कियदंशं यावद्व्याख्यानं ।

No. 3307. अलङ्कारशेखरः । Substance, Foolscap paper, 13 × 5 inches. Folia, 36. Lines, 8 on a page. Extent, 1,100 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálídása Vidyávagíśa. Appearance, new. Prose and verse. Correct.

Alañkára-śekhara. An elaborate treatise on Rhetoric. By Keśava Miśra. It was written under the auspices of Mahárája Mánikya-chandra.

Beginning. प्राणान् कृशोदरीणां राधानयनान्तसर्व्वस्वं ।
तेजस्तमालनीलं शरणागतवज्रपञ्जरं वन्दे ॥
स्वप्रकाशचिदानन्दमयाय परमात्मने ।
अविद्यानिविड़ध्वान्तभास्कराय नमाम्यहं ॥
ग्रन्थाः काव्यकृता हिताय विहिता ये सप्त पूर्व्वं मया
ते तर्कार्णवसंप्लवव्यसनिभिः शक्याः परं वेदितुं ।
इत्यालोच्य हृदा मदालसवधूपादारविन्दक्वणन्-
मञ्जीरध्वनिकोमलोऽयमधुना प्रस्तूयते प्रक्रमः ॥
आसीत् प्रत्यर्थिपृथ्वीरमणकमलिनीहन्द्रहेमन्तमासः
कीर्त्तिभ्राजत्सुधर्म्मान्वयकुमुदवनीयामिनीजीवनाथः ।
राजद्राजन्यगोष्ठीमुकुटमणिगणप्रोक्षसत्पादपीठः

प्राद्यत्साम्राज्यलक्ष्मीशिथिलितनकुषो रामचन्द्रोऽवनीन्द्रः ॥

÷ + + + + + + ॥

क्षीराम्भोधेः शशीव द्युतिरिव वदनाद्वेधसो रामचन्द्रा-

दस्मादुद्यत्प्रतापः समजनि सुमना धर्म्मचन्द्रो नरेन्द्रः ।

यस्याद्यापि प्रसन्नस्मितसुभगमुखाः स्विद्यदुद्यत्कपोला

रोमाञ्चस्तम्भभव्याखिदशयुवतयो हन्त गायन्ति कीर्त्तीः ॥

+ + + + + + + ॥

तस्मादजायत समस्तगुणाभिरामो माणिक्यचन्द्र इति राजकचक्रशक्रः ।

प्रत्यर्थिभूपतिपरिग्रहराज्यलक्ष्मीधम्मिल्लमाल्यसुरभीकृतपाणिपद्मः ॥

काव्यालङ्कारपारङ्गममतिरखिलक्ष्माभृतां चक्रवर्त्ती

सर्व्वेषामस्तु काव्ये मतिरतिनिपुणेत्याशयं संनिवेश्य ।

वेदान्तन्यायविद्यापरिचयचतुरं केशवं संनियुज्य

श्रीमन्माणिक्यचन्द्रः क्षितिपतितिलको ग्रन्थमेनं विधत्ते ॥ इत्यादि ।

End. तर्कप्रौढ़मतिः प्रशस्तकवितावल्लीवसन्तोत्सवः

कोषव्याकरणप्रपञ्चचतुरोऽलङ्कारपारङ्गमः ।

श्रीमत्केशवमिश्रमद्भुतगुणावासं नियुज्य स्वयं

चक्रे शक्रसमः प्रबन्धमनघं माणिक्यचन्द्रो नृपः ॥

Colophon. इति श्रीमहाराजाधिराजश्रीमन्माणिक्यचन्द्रकारिते अलङ्कारशेखरे न्यायाचार्य्यकेशवमिश्रविरचिते विश्रामरत्नं ॥

समाप्तश्चायमलङ्कारशेखरः ।

विषयः। प्रथमे उपक्रमरत्ने,—काव्यलक्षणं। काव्यस्वरूपविचारप्रसङ्गेन मम्मट-वाभट-भोजादीनां मतकथनं। काव्यफलनिरूपणं। काव्यहेतुनिरूपणं। संस्कृत-प्राकृत-पैशाच-मागधभेदेन तस्य चतुर्व्विधत्वकथनं। गौड़ी-वैदर्भी-मागधीनां रीतीनां लक्षणादिकथनं। लोक-च्छेक-अर्भक-उन्मत्तभेदादुक्तेश्चातुर्व्विध्यकथनं। मुद्रालक्षणं। पदमुद्रादिकथनं। अभिधाशक्ति निरूपणं। लक्षणा। व्यञ्जना। उत्तममध्यमाधमकाव्यनिरूपणं।

२ ये, दोषरत्ने,—दोषलक्षणं। कष्ट-अप्रयुक्त-सन्दिग्ध-व्यर्थ-अश्लील-अप्रतीत-असाधु-अवाचक-भेदात् अष्टविधपददोषनिरूपणं। न्यून-विसन्धि-व्याकीर्ण-समाप्त-पुनरात्त-भग्नक्रम-भग्नयति-भग्नच्छन्दः—वाक्यगर्भ-अरीतिमत्-अविमृष्ट-विधेयांश-समुदायार्थ-वर्ज्जित-विरुद्धमतिकृद्भेदेन द्वादशविधवाक्यदोषनिरूपणं। असमर्थसमासो दोषान्तरमिति गोवर्द्धनाचार्य्यमतकीर्त्तनं। विरस-व्याहत-ग्राम्य-खिन्न-हीनोपम-अधिकोपम-असदृशोपम-देशादिविरोधिभेदादष्टविधवाक्यार्थदोषनिरूपणं।

३ ये, गुणरत्ने,—गुणलक्षणं। गुणानां शब्दार्थगतत्वकथनं। संक्षेप-उदात्त-प्रसाद-उक्ति-समाधिभेदेन पञ्चविधशब्दगुणनिरूपणं। भाविकत्व-सुशब्दत्व-पर्य्यायोक्ति-सुधर्म्मिताभेदेनार्थगुणस्य चतुर्व्विधत्वनिरूपणं। उक्तानामेव गुणानां विषयावस्थादिभेदात् अदोषत्वरूपवैशेषिकगुण-निरूपणं।

४ र्थे, अलङ्काररत्ने,—अलङ्कारलक्षणं। शब्दालङ्कारः। चित्रं। वक्रोक्तिः। लाटानुप्रासः। छेकानुप्रासः। गूढ़ं। श्लेषः। प्रहेलिका। प्रश्नोत्तरं। यमकञ्च। चतुर्द्दशविधमात्रमर्थालङ्कार-निरूपणं। अन्येषां यथायथमत्रैवान्तर्भावकथनं। तत्र उपमालक्षणं। वाक्यार्थोपमा। अतिशयो-पमा। श्लेषोपमा। निन्दोपमा। अभूतोपमा। विपर्य्ययोपमा। संशयोपमा। नियमोपमा। स्तोपमा। विक्रियोपमा। समभिव्याहारोपमा। रूपकलक्षणं। विरुद्धरूपकं। समस्तरूपकं। अस्त-रूपकं। रूपकरूपकं। श्लिष्टरूपकं। उत्प्रेक्षा। उत्प्रेक्षाव्यञ्जकशब्दाः। समासोक्तिः। अपह्नुतिः। समाहितं। स्वभावोक्तिः। सारः। दीपकं। मालादीपकं। सहोक्तिः। अन्यदेशत्वं। विशेषोक्तिः। विभावना। अन्यमतेन व्यतिरेककथनं। आक्षेपकथनञ्च।

५ मे, वर्णकरत्ने,—योषिद्वर्णनप्रकारकीर्त्तनं। तत्र चन्द्रकला-अम्बुजदाम-शिरीषकुसुम-विद्युत्-तारा-कनकलता-दमनकतरु-काञ्चनयष्टि-दीपादिभिः सह कामिनीशरीरस्य सादृश्यवर्ण-नीयता, गोरोचना-स्वर्ण-विद्युत्-हरिद्रा-वराटक-चम्पक-हेमकेतकीप्रभृतिभिः सह तनुद्युतेः सादृश्यं तमः-शैवाल-समुद्र-वर्ह-भ्रमर-चामर-यमुनावीचि-नीलाश्म-नीलाब्ज-मेघादिभिः केशस्य सादृश्यं। ललाटस्य अर्द्धचन्द्रहेमपट्टिकाभ्यां सादृश्यं। भ्रुवोः वल्ली-स्मरधनुः-तरङ्ग-भृङ्गाली-पल्लवैः सादृश्यं। कपोलस्य चन्द्र-मुकुराभ्यां सादृश्यं। मुखस्य चन्द्र-कमल-दर्पनादिभिः सादृश्यं। नासयोः तिलकुसुम-कामतूणीराभ्यां सादृश्यं। कण्ठस्य कम्बूसमत्वं। नयनयोः मृगनयन-कमल-कुमुद-कमलपत्र-झष-खञ्जन-चकोर-केतक-भृङ्ग-कामवाणादिभिः साधर्म्म्यं। अधरोष्ठयोः प्रवाल-विम्ब-बन्धूक-नवपल्लवादि-भिः सादृश्यं। दन्तानां मुक्ता-माणिक्य-नागरङ्ग-दाड़िमी-कुन्दकोरक-नारादिभिः सादृश्यं। वाण्याः हंस-भृङ्ग-कोकिलरवादिभिः सादृश्यं। एवं वाहु-नख-स्तनादीनां सादृश्यनिरूपणं। पुरुषशरीर-वर्णनप्रकारकीर्त्तनं। अत्र गोवर्द्धनाचार्य्यादीनां मतकथनं। सादृश्यव्यञ्जकशब्दादिनिरूपणं।

६ ष्ठे, कविसम्प्रदायरत्ने,—कविसम्प्रदायस्य त्रिविधत्वकथनं। वर्णनीयेषु नियमकथनं। महा-काव्यादौ वर्णनीयविशेषनिरूपणं। पुर-गिरि-कानन-समुद्रादौ वर्णनीयनिर्द्देशः। श्वेत-रक्त-कृष्णत्वेन वर्णनीयविशेषकथनं। अङ्काभिधानं।

७ मे, कविसामर्थ्यरत्ने,—चित्राद्युपकारिशब्दादिनिरूपणं। समस्यापूरणादिकं। तदुपाय-कीर्त्तनं।

८ मे, विश्रामरत्ने,—रसस्य आत्मत्वकथनं। रसलक्षणं। रसविभागः सम्भोगशृङ्गारः। अनू-ढ़ा-स्वीया-परस्त्री-वारवनिताभेदात् नायिकायाः चतुर्विधत्वकथनं। खण्डिता। उत्कण्ठिता।

प्रोषितपतिका। अभिसारिका। कलहान्तरिता। वासकसज्जा। विप्रलब्धा। स्वाधीनभर्तृका च। सामान्यनायकलक्षणं। धृष्टशठादीनां लक्षणं। विप्रलम्भशृङ्गारलक्षणं। पूर्व्वरागः। मानः। प्रवासः। करुणः। देवादिविषया रतिः। हास्यरसः। करुणः। वीरः। भयानकः। वीभत्सः। रौद्रः। अद्भुतः। शान्तः। रसानामविरोधविरोधकथनं। स्थायिभावाः। रत्यादीनां लक्षणं। उद्दीपनविभावः। आलम्बनादयश्च। हेला-विच्छित्तिप्रभृतयः। निर्व्वेदादयः। रसदोषनिरूपणं। दिव्यादिव्यादिनायकचेष्टादिवर्णनं। शृङ्गारवीरादौ अनुकूलवर्णच्छन्दआदिनियमनं।

No. 3308. शुद्धिनिर्णयः। Substance, Palm-leaf, 10 × 1½ inches. Folia, 103. Lines, 5 on a page. Extent, 1,793 śloka. Character, Bengali. Date, Sm, 1416. Place of deposit, Guptipáḍá. Khudiráma Nyáyabhúshaṇa. Appearance old. Prose and verse. Correct.

S'uddhinirṇaya. A digest of the laws relating to religious purifications. By Váchaspati Miśra. The work treats of religious impurities of all kinds, including those arising from death, birth and other domestic causes. Neglect of ceremonial rules, and the ceremonies required for the purification thereof. It treats also of the purification of crude materials to adapt them for religious purposes. Chapters are also given on moral offences and their expiations.

ॐ नमो गणेशाय।

Beginning. प्रणम्य परमात्मानं श्रीवाचस्पतिशर्म्मणा।
आलोच्य मुनिवाक्यानि शुद्धिनिर्णय उच्यते॥
प्रायणे जनने शुद्धिरशुद्धिनियतक्रियाः।
वर्णसङ्करशुद्धिश्च व्यवस्था शुद्धिरिष्यते॥
विदेशस्थस्य बालस्य नारीणां प्रायणे तथा।
गर्भस्रावापमृत्यूनां शुद्धयस्तदनन्तरं॥ इत्यादि।

End. त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्।
अदृष्टमद्भिर्निर्णिक्तं यस्य वाचा प्रशस्यते॥
अदृष्टमशुचितया न स्वयं प्रमितं निर्णिक्तं प्रक्षालितं ब्राह्मणानामिति॥

Colophon. इति महामहोपाध्यायसन्मिश्रश्रीवाचस्पतिविरचितः शुद्धिनिर्णयः समाप्तः। संवत् १४१६ चैत्रामावास्यायां।

विषयः। वक्तव्यनिर्देशः। शुद्धिपदार्थनिरूपणादिकं। प्रायणशुद्धिः। ब्राह्मणत्वलक्षणं।

सपिण्डादिनिरूपणं। क्षत्रियाद्यशौचं। वर्णसङ्कराशौचं। जननशुद्धिः। पुत्राद्युत्पत्तिनिमित्तकाङ्गास्पृश्यत्वं। अशौचयोः कार्य्याकार्य्यनियमकथनं। अशौचिसकाशाद् ग्राह्यद्रव्यनिरूपणं। वर्णसन्निपातशुद्धिनिरूपणं। अशौचसङ्करः। विदेशस्थाशौचकथनं। पारिभाषिकविदेशस्थाशौचकथनं। बालाद्यशौचं। स्त्र्यशौचं। गर्भस्रावाशौचकथनं। मृत्युविशेषाशौचकथनं। सपिण्डाद्यशौचं। मातृबान्धवादिनिरूपणं। निर्हारादिशुद्धिः। अज्ञानाशौचं। अनशौचिनः सपिण्डादिस्वरूपं। निर्हरणादिनिरूपणं। साग्नेर्दाहादिविधिः। पर्णनरदाहविधिः। उदकदानविधानं। अनुदकदायिनः। उदकदानार्हनिरूपणं। सर्पादिनिहतेभ्यो नारायणबलिदानविधानं। यतीनामौर्द्ध्वदेहिकक्रिया। तत्र प्रयोगः। विष्णुबलिविधानं। त्रयोदश्यां योगेश्वरपूजा। शोकापनोदनं। प्रेतस्पर्शिनां प्रवेशनविधानं। नीरक्षीरदानविधिः। पिण्डदानविधानं। अस्थिसञ्चयः। अशौचान्तकृत्यं। क्षौरादिविधानं। देहशुद्धिनिरूपणं। प्रक्षालनादिशुद्धिः। मद्यादिनिरूपणं। नाभ्यधःपुरीषाद्युपस्पर्शे विशेषकथनं। करव्यतिरेकेण ऊर्द्ध्वे विशेषकथनं। इन्द्रियेषु विशेषः। रजकादिस्पर्शे शुद्धिनिरूपणं। निष्ठीवादौ शुद्धिनिर्णयः। स्नानशुद्धिः। चण्डालादिस्पर्शे शुद्धिकथनं। निधुवनशौचं। मानुषास्थ्यादिस्पर्शशौचं। चैत्यादिस्पर्शस्नानं। अनुदकमूत्रादित्यागे शुद्धिकथनं। मार्ज्जारादिस्पर्शे विशेषः। आतुरस्नानं। भूतशुद्धिः। जलशुद्धिः। शवादिदूषितवाप्यादिशुद्धिः। तैजसादिशुद्धिः। शूद्रभुक्तपात्रशुद्धिः। रजस्वलाद्युपहतशुद्धिः। कम्बलशुद्धौ विशेषः। फलपात्रशुद्धिः। मृण्मयपात्रशुद्धिः। चर्म्मादिशुद्धिः। वस्त्रादिशुद्धिः। निर्य्यासगुडादिशुद्धिः। शाकमूलादिशुद्धिः। शङ्खादिशुद्धिः। यज्ञपात्रशुद्धिः। पुस्तकशुद्धिः। कृष्णाजिनादिशुद्धिः। आसनादिशुद्धिः। धान्यादिशुद्धिः। पक्वान्नशुद्धिः। त्वक्केशाद्युपहतान्नादिशुद्धिः। तत्र वायसाद्युपहते। म्लेच्छभाण्डस्थितद्रव्यशुद्धिः। तीर्थविवाहादौ स्पर्शास्पर्शे दोषाभावकथनं। स्वभावशुद्धिः। स्त्रीणां व्यभिचारादौ अङ्गच्छेदनिषेधः। तत्र बलात्कारादौ विशेषः। कर्म्मकाले नाभ्यधःस्पर्शनिषेधः। व्यभिचारिणीनां योषितां प्रायश्चित्तनिषेधः। अदृष्टशुद्धिकीर्त्तनञ्च।

No. 3309. प्रसन्नराघवनाटकम्। Substance, country-made paper, inches ? Folia, ? Lines, ? on a page. Extent, ? ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágíśa. Appearance, fresh. Prose and verse. Correct.

Prasannarághava Náṭaka. A dramatic composition on the career of Ráma from the time of his marriage to the fall of Rávana. By Jayadeva.

Beginning. चत्वारः प्रथयन्तु विद्रुमलतारक्ताङ्गुलिश्रेणयः
श्रेयः शोणसरोजकोरकरुचस्ते शार्ङ्गिणः पाणयः।

भालेष्वङ्गभुवो लिखन्ति युगपद्द्वये पुण्ड्रवर्णावलीः
कस्तूरीमकरीः पयोधरयुगे गण्डद्वये च श्रियः ॥

अपि च,—

आकल्पं मुरजिन्मुखेन्दुमधुरोन्मीलन्मरुन्माधुरी
वीरोदात्तमनोहरः सुखयतु त्वां पाञ्चजन्यध्वनिः ।
लीलालङ्घितमेघनादविभवो यः कुम्भकर्णव्यथा-
दायी दानवदन्तिनां दशमुखं दिक् चक्रमाक्रामति ॥

अन्यच्च,—

नाभीपद्मवसच्चतुर्मुखमुखोद्गीतस्तवाकर्णन-
प्रोन्मीलत्कमनीयलोचनकलाखेलन्मुखेन्दुद्युतिः ।
सक्रोधं मधुकैटभौ सकरुणस्नेहं सुतामम्बुधेः
सोत्प्रासप्रणयं सरोजवसतिं पश्यन् हरिः पातु वः ॥

+ + + + + + + सूत्र ।

स्फुटमस्ति प्रसन्नराघवं नामेति ।

+ + + + × कः पुनरस्य

कविः । सूत्र । सप्रणयकोपं,—

विलासो यद्वाचामसमरसनिष्यन्दमधुरः
कुरङ्गाक्षीबिम्बाधरमधुरभावं गमयति ।
कवीन्द्रः कौण्डिन्यः स तव जयदेवः श्रवणयो-
रयासीदातिथ्यं न किमिह महादेवतनयः ॥

अपि च,—

लक्ष्मणस्येव यस्यास्य सुमित्रागर्भजन्मनः ।
रामचन्द्रपदाम्भोजे भ्रमद्भृङ्गायते मनः ॥ इत्यादि ।

End. जायन्तामविरामरामचरितक्रीड़ाभिरामाः सता-
मुन्मीलन्नवमालिकाविरचितस्रग्दामरम्या गिरः ।
याः कण्ठेऽपि निवेश्य पेशलधियो रोमाञ्चलीलाञ्चिताः
कान्ताबाहुलताविहासमहिमास्लेषात् तृणं मन्वते ॥

इति निष्क्रान्ताः सर्व्वे ।

Colophon. इति श्रीजयदेवविरचिते प्रसन्नराघवनाम्नि नाटके सप्तमोऽङ्कः समाप्तः ।
समाप्तश्चायं ग्रन्थः ।

विषयः। परिणयादारभ्य रावणवधोत्तरमयोध्यायां प्रत्यागमनपर्य्यन्तं रामचरितमवलम्ब्य विरचितोऽयं ग्रन्थः।

तत्र प्रथमाङ्के,—रङ्गभूमिं प्रविष्टस्य दाम्भायनस्य मधुरप्रिय-प्रियालापयोरालापाकर्णनेन, 'वाणरावणयोरपि कर्णान्तिकं विश्रान्तोऽयं सीतास्वयम्बरवृत्तान्तः' इति सूचना। मञ्जीरकनूपुरकाभ्यां स्वयम्बरागतानां नृपतीनां प्रशस्तिवर्णनादिकं। 'निर्व्वीरमूर्व्वीतलमिति' वैतालिकवाक्यमाकर्ण्य क्रुद्धस्य दशाननस्य सौधशिखरगतां सीतां सखीभ्यां सह चित्रपटमालोकयन्तीमवलोकयतो वाणासुरेण समं विवादवर्णनं।

२ये,—भिक्षुतापसभूमिकयोराक्षसयोरन्योन्यं संवादेन रामकृतताड़कादिवधसूचनं। वसन्तवर्णनं। चण्डिकायतनमागच्छन्तीं सह सखीजनेन जानकीं समीक्षमाणेन रामेण तद्रूपातिशयवर्णनं। तयोरन्योन्यमनुरागरञ्जितयोश्चेष्टादिवर्णनं। सन्ध्यावर्णनञ्च।

३ये,—कुब्जवामनयोः कौतुकवर्णनं। रामलक्षणाभ्यां सार्द्धं विश्वामित्रस्य प्रवेशमुखेन प्रभातवर्णनं। शतानन्दस्य अभिनयः। विश्वामित्रजनकयोः परस्परमाप्यायनं। नयनानन्दजननं रामरूपं निरूपयतः सीरध्वजस्य प्रीत्यतिशयवर्णनादिकं। परशुरामसन्देशकथनार्थं कस्यचिन्मुनेः प्रवेशः। धनुर्भङ्गः।

४र्थे,—नेपथ्ये ध्रुवा गीतिः। जामदग्न्य-ताण्ड्यायनयोरभिनयः। रामपरशुरामयोः संवादः। लक्षणस्य कौतुकं। तस्य भार्गवं प्रति सोल्लुण्ठनोक्तिः। परशुरामेण राममनोरञ्जनञ्च।

५मे,—गङ्गायमुनयोरभिनयः। ताभ्यां सह सरस्वाः संवादेन रामस्य वनप्रवेशादिवृत्तान्तसूचनं। अयोध्यातो रामनिर्व्वासनसमये कौशल्यादीनां रामादीन् प्रति शिक्षादानकथनं। कलहंसस्य अभिनयेन रामादीनां वनगतवृत्तान्तवर्णनं। तत्र शूर्पणखानिग्रहादिकथनं। गोदावरीसहचरस्य सागरस्य प्रवेशेन सीताहरणवृत्तान्तसूचनं। तुङ्गभद्रया तेषां पुरतः सुग्रीवस्य राज्याभिषेकादिकथनञ्च।

६ष्ठे,—विरहविधुरस्य रामचन्द्रस्य वैक्लव्यवर्णनं। लक्षणकृततत्समाश्वासनञ्च। विद्याधरोपनीतमिन्द्रजालकं तत्त्वतोऽजानतो रामस्य तत्र सीताप्रतिकृतिमवलोकयतश्चेष्टावर्णनं। किञ्च तत्र त्रिजटामात्रशरणया सीतया तत्पुरतो निजस्वप्नवृत्तान्तकीर्त्तनं। नेपथ्ये हनूमतो लङ्काप्रवेशादिसूचनं। उत्तेजितसीतानुरागस्य रावणस्य अशोकवनं प्रविश्य सामादिप्रयोगेणापि तच्चित्तप्रसादमलभमानस्य "किमतः परं कालक्षेपेण तदधुना सत्वरं मम करे कपालपात्रमर्पयतां येनास्याः कण्ठरुधिरेण कालिकामर्च्चयामीति" विटपान्तरालप्रसारितकरतलस्य 'अये न्यस्तं न कपालमेतत् किन्तु शिर एव नूनमक्षयकुमारस्येति' कथयतो मूर्च्छादिवर्णनं। सीतया अङ्गारभ्रमेण अशोकतरुशिखरस्थितपद्मरागरत्नग्रहणं। हनूमता सीतायाः समीपे रामादिप्रवृत्तिकथनं। नेपथ्ये तत्कृतलङ्कादाहनसूचनं।

७म,—पुलस्त्यशिष्यकरालकयोरभिनयेन रावणकृतविभीषणनिग्रहसूचनं। चन्द्रानिलादिकृतरावणपरिचर्य्या। प्रहस्तकेन सह दशाननस्य चित्तविनोदनचित्रदर्शनं। तत्र सागरकुलस्थित कपिकुल-सेतुबन्धादिदर्शनावसरे प्रविष्टाया मन्दोदर्य्या उत्कण्ठादिवर्णनं। नेपथ्ये मेघनादकुम्भकर्णादिवधसूचनं। विद्याधरमिथुनाभ्यां रामरावणयोः समरसंवादवर्णनं। सीतालक्ष्मणसुग्रीवविभीषणादिभिः सह रामस्य प्रवेशेन सन्ध्यादिवर्णनं। पुष्पकारोहणेन अयोध्यागमनाभिनयः। प्रभातवर्णनञ्च।

No. 3310. पुराणसारः। Substance, country-made paper, 19×3 inches. Folia, 277. Lines, 9 on a page. Extent, 14,196 ślokas. Character, Bengali. Date ? Place of deposit, Government of India. Also Málipotá, Post Málipotá, Zilá Nadíyá, Kásínáth Bhaṭṭácharya. Appearance, very old. Verse, correct, some part incorrect.

Puráṇa-sára. An abstract of the eighteen great Puráṇas, treating principally of their historic portions. By Rájá Rudra Ráya *alias* Rudra S'armá.

Beginning. नारायणं भवमहार्णवकर्णधारं कारुण्यपूर्णजलधिं कलधौतवर्णं।
सर्गस्थितिप्रलयमूलममूलमेकं केयूरकौस्तुभविभूषणमानतोऽस्मि॥
श्रीनन्दनन्दनपदद्वितयारविन्दं वन्दे पुरन्दरपुरःसरवन्द्यवन्द्यं।
आनन्दकन्दमतनोदरविन्दजोऽपि यल्लीलया भुवनसृष्टिवितानमेनं॥
सदानन्दानन्दात्मजचरणलाभात् सुरधुनी
धुनीतेऽघं यस्यां त्रिपुरमथनस्य प्रणयिणी।
स्वयं वाणी साक्षादनुदिनविनोदी द्विजगणो
जयत्येका धन्या त्रिजगति नवद्वीपनगरी॥
रराज तत्र द्विजराजतेजा द्विजो भवानन्द इति क्षितीन्द्रः।
ननन्द तन्नन्दन एव आर्य्यः पूतः प्रजापालनमुख्यकार्य्यः॥
ततेऽतिभक्तो द्विजदेवरक्तो गोपालरायस्तनयस्ततोऽस्य।
दुष्टप्रशास्ताखिलशिष्टगोप्ता शिवाश्रयो वाङ्निलयो दयालुः॥
असौ यशोधाम रमाभिरामः श्रीमान् + + राघवराय आस्ते।
\+ + + + +
\+ + + + +॥

अपि च।

अथोनीताऽनीतिः श्रितविबुधरीतिः क्षितिपतिः
+ + + क्रीड़ाभवनमवनीदेवकुलपाः ।
सदादानोद्भूतावनिनिखिलदैन्यो मधुरवाक्
गुणग्रामैक + + द्विषदनधिग+ति सह+ ॥
एकत्रोत्तमधर्म्मशास्त्रस+तस्तोत्रादिशुश्रूषया
संदृश्याखिलसार+परिकरं नानापुराणादितः ।
ग्रन्थं नाम पुराणसारमखिलामोदाय मोक्षप्रदं
श्रीमद्राघवरायस्त्वनुरकरोत् श्रीरुद्रशर्म्माचिरात् ॥

End. भविष्ये,—इतिहासपुराणानि + + + + + + + + । यः करोत्यौर्द्धदेहिकं । ————लिलेख सुमतिर्गोविन्दरामः कृती ॥

Colophon. यथादृष्टमित्यादिना दोषास्तु नानुसन्धेयाः ।

(अत्र शेषपत्रस्य अर्द्धखण्डितत्वात् परिसमाप्तिसूचकं वाक्यं न सम्पूर्णं लब्धं ।)

विषयः । सर्व्वेषां पुराणानां सारमाकलय्य सङ्कलितोऽयं ग्रन्थः । तत्र आदिसृष्टिवर्णनं । कालपरिमाणादिकथनं । युगादिमानकथनं । ब्रह्मण उत्पत्तिकथनादिकं । देवदेवीनामुत्पत्त्यादि-कथनं । विश्वनिर्णयः । चतुर्द्दशमनूनां वंशविस्तारादिकथनं । मन्वन्तराणि । देवानां राज्ये नियोग-कथनं । सूर्य्यवंशादिवर्णनं । भुवनकोषवर्णनं । भूगोलवर्णनं । पर्व्वतविशेषेषु देवानां स्थानकथनं । विशेषेण भारतखण्डवर्णनं । कूर्म्मनिवेशकथनं । कुरुकिम्पुरुषवर्षादिवर्णनं । ज्योतिश्चक्रवर्णनं । ग्रह-विकल्पकीर्त्तनं । तत्र तिथ्यादीनां स्वरूपादिकथनं । चन्द्रक्षयवृद्धिकथनं । पृथ्वीच्छायाया राहुस्था-नत्वकथनं । स्वर्गवर्णनं । इन्द्रसभावर्णनं । यमसभावर्णनं । वरुणसभावर्णनं । कुवेरसभावर्णनं । ब्रह्म-सभावर्णनं । सप्तपातालवर्णनं । देहोत्पत्तिकारणकीर्त्तनं । दैनन्दिनप्रलयवर्णनं । प्राकृतप्रलयवर्णनं । आत्यन्तिकप्रलयवर्णनं । युगपरिमाणकथनादिकं । भविष्यवर्णनं । कलिधर्म्मकथनं । युगधर्म्मव्यवस्था । अष्टाविंशतिव्यासकथनं । वेदविभागादिकथनं । ब्रह्मचर्य्याद्याश्रमधर्म्मनिरूपणं । वर्णाश्रमाचारकथनं । (अत्र मन्वादीनां वचनोपन्यासः ।) षड्विधस्नाननिरूपणं । गुरुनिरूपणं । दिवाकृत्यनिरूपणं । रात्रिकृत्यकथनं । षोड़शदिनपर्य्यन्तं स्वलभिगमने प्रत्येकं कन्यापुत्रयोः शुभाशुभकथनं । कर्त्तव्याक-र्त्तव्यनिरूपणं । निषिद्धद्रव्याणि । वानप्रस्थधर्म्मकथनं । यतिधर्म्मनिरूपणं । गायत्रीजपादिप्रकारकी-र्त्तनं । ब्रह्मनिरूपणं । विष्णुमाहात्म्यकीर्त्तनं । भक्तिमहिमा । स्मरणकीर्त्तनादिनिरूपणं । विष्णुशि-वयोरभेदकथनं । विष्णुपूजाक्रमविधिः । वैशाखादिद्वादशमासेषु विष्णुपूजनविधानादिकं । वैष्णव-पीठमालाकथनं । शिवमाहात्म्यकीर्त्तनं । शैवपीठमालाकथनं । शिवलिङ्गपूजामाहात्म्यादिकथनं । लावणपैत्तलादिलिङ्गनिरूपणं । तत्स्पर्शनफलकीर्त्तनं । तत्पूजाविधानञ्च । पुष्पविचारः । गौरीना-माष्टकस्तोत्रं । देवीपीठमालाकथनं । दुर्गास्मरणादिफलकीर्त्तनं । तत्पूजाविधानकीर्त्तनं । शालग्रा-

ममाहात्म्यकथनं । शिलाचक्रनिरूपणं । शालग्रामादिलक्षणकथनं । तुलसीरोपणादिमाहात्म्यकीर्त्तनं । तत्पूजाविधानं । अत्र इतिहासकथनं । धात्रीमाहात्म्यकथनं । तीर्थयात्रामाहात्म्यकीर्त्तनं । तीर्थयात्राविधिकथनं । गङ्गामाहात्म्यकीर्त्तनं । गङ्गागर्भसीमानिरूपणं । तत्स्मरण-श्रवण-नमस्कारादीनां विधानं । अत्र भेकीभेकयोरुपाख्यानकीर्त्तनं । गङ्गातीरे वाणिज्यादिनिषेधः । वाराणसीमाहात्म्यकथनं । तत्र वासादिफलकथनं । विश्वेश्वरदर्शनादिमाहात्म्यं । मणिकर्णिकामाहात्म्यकथनं । ज्ञानवापीमाहात्म्यं । ओङ्कारेश्वरभैरवादीनां माहात्म्यकथनं । पुरुषोत्तममाहात्म्यकथनं । अत्र वासमरणादिफलकथनं । रोहिणीकुण्डाक्षयवटादिमाहात्म्यं । जगन्नाथसुभद्रादिदर्शनफलकथनं । समुद्रस्नानमाहात्म्यं । पञ्चतीर्थमाहात्म्यकथनं । श्वेतगङ्गाश्वेतमाधवमाहात्म्यकथनं । मत्स्यमाधवन्टसिंहादिमाहात्म्यं । रथयात्राशयनयात्रादिफलकथनं । द्वादशयात्राफलकीर्त्तनञ्च । एवं प्रयागमाहात्म्यादिकीर्त्तनं । अत्र धनुर्ध्वजस्य उपाख्यानकथनं । गयामाहात्म्यादिकीर्त्तनं । गयापरिमाणादिनिरूपणं । कनखलतीर्थमाहात्म्यादिकथनं । मथुरामाहात्म्यकथनं । तत्परिमाणादिकथनं । मधुवनकुमुदवनादिमाहात्म्यं । ध्रुवतीर्थादिमाहात्म्यं । अत्र चन्द्रसेनस्य उपाख्यानं । वदरिकाश्रममाहात्म्यादिकीर्त्तनं । नर्म्मदामाहात्म्यकथनं । द्वारकामाहात्म्यकथनं । अत्र विविधाख्यानकीर्त्तनं । अयोध्यामाहात्म्यकीर्त्तनं । कुरुक्षेत्रमाहात्म्यकथनं । पुष्करमाहात्म्यकीर्त्तनं । नैमिषारण्यमाहात्म्यकथनं । गङ्गासागरसङ्गममाहात्म्यं । अत्र दृढ्द्रथाभिधानराक्षसस्य उपाख्यानं । गङ्गाद्वारमाहात्म्यकथनं । अत्र मनोनामकन्टपतेरुपाख्यानकीर्त्तनं । सर्व्वतीर्थमाहात्म्यकथनं । पितृमातृतीर्थवर्णनादिकं । गुरुतीर्थकथनं । मानसिकतीर्थनिरूपणादिकं । अत्र वेदधर्म्मायाः उपाख्यानं । भार्य्यातीर्थादिनिरूपणं । अधर्म्मनिरूपणादिकं । पापशान्त्युपायकथनं । विष्णोरपराधाः । रत्नानां परीक्षानिरूपणं । तत्र वज्रपरीक्षाप्रकारकीर्त्तनं । मुक्ताफलपरीक्षा । पद्मरागादिपरीक्षा । मरकतपरीक्षा । इन्द्रनीलपरीक्षा । वैदूर्य्यपरीक्षा । कर्केतनादिपरीक्षा । पुलकपरीक्षा । रुधिराक्षपरीक्षा । स्फटिकरत्नपरीक्षा । विद्रुमादिपरीक्षा । विस्तरतः स्त्रीपुरुषयोः शुभाशुभलक्षणकथनं । गजलक्षणं । तत्परीक्षा च । अश्वलक्षणं । तत्परीक्षा च । गजचिकित्साकथनं । अश्वचिकित्साकथनं । पुनर्विस्तरेण पुष्पच्छायावर्त्तादिलक्षणादिकीर्त्तनं । लक्ष्मीविलासकीर्त्तनं । अलक्ष्मीविलासकथनं । दुर्निमित्तनिरूपणं । त्रिविधोत्पातवर्णनं । महापुराणानां नाम श्लोकसंख्यादिनिरूपणं । एवमुपपुराणानां । स्वप्नदर्शने शुभाशुभफलकीर्त्तनं । क्षत्रियावैश्यादीनां ब्राह्मणलाभोपायकथनं । अत्र मतङ्गोपाख्यानकीर्त्तनं । राजमन्त्र्यादिलक्षणं । क्षिप्रकारितश्चिरकारिणः प्रशंसाकथनं । कालस्वरूपादिकीर्त्तनं । मृत्योर्जन्मकथनं । अत्र नानेतिहासकीर्त्तनं । यमयातनादिवर्णनं । अत्र दीपदानेतिहासकीर्त्तनं । कर्म्मणां फलकीर्त्तनं । अत्र विविधोपाख्यानकीर्त्तनं । धर्म्मशीलतावर्णनं । अत्रोपाख्यानादिकथनं । धर्म्मरक्षणोपायादिकथनं । अत्र धर्म्मचाण्डालोपाख्यानादिकथनं । कुञ्जरोपाख्यानं । वासुराजोपाख्यानं । स्वर्गगुणवर्णनादिकं । गुरुतीर्थोपाख्यानं । प्रह्लादस्य दानवयोनिप्राप्तिकारणकथनं । जड़भर-

तोपाख्यानं। पद्मपुष्पमाहात्म्यकीर्त्तनं। अत्र एकप्रजाभिधानब्राह्मणस्य उपाख्यानकीर्त्तनं। क्षत-घ्नोपाख्यानं। सौहार्द्दात् हीनजनस्य उपदेशे दोषदर्शनप्रसङ्गेन शूद्रमुनिसंवादकीर्त्तनं। धर्म्मादिषु-नष्टेषु केन ब्राह्मणो जीवेदिति प्रस्तावेन विश्वामित्रश्वपचसंवादकीर्त्तनं। ब्राह्मणमाहात्म्यकीर्त्तनं। अत्र पञ्चप्रेतोपाख्यानादिकथनं। पाषण्डलक्षणादिकथनं। विषयतृष्णाक्षयकारणादिनिरूपणं। पिङ्गलो-पाख्यानकीर्त्तनं। ययातेरुपाख्यानं। योगप्रक्रियाकथनं। मरणकालनिरूपणं। तत्र दानादिविधा-नञ्च। पित्रोरन्तर्ज्जलकरणे पुत्राणां फलकथनं। पूजाकथनेतिहासकीर्त्तनं। वेतननिर्णयः। (अर्थात् काचखण्डनिर्म्माण-स्फाटिकमणिवेधनादौ वेतनदानव्यवस्था।) अभिवादनविधिः। नमस्यनिरूपणं। सारस-शुक-मयूरादिशकुनानां शुभाशुभचिन्तनं। स्पन्दनचरित्रकीर्त्तनं। हिक्काफलाफलकथनं। राक्षसभक्ष्यनिरूपणं। द्रव्यशुद्धिकथनं। कृषिविषये संवत्सरराजादिज्ञानं। वृष्टिज्ञानं। मेघफलक-थनं। द्वादशमासेषु वृष्टिलक्षणं। अनावृष्टिलक्षणं। रुद्राक्षधारणादिविधिः। ओङ्कारमाहात्म्यक-थनं। जपयज्ञादिनिरूपणं। अनध्यायनिरूपणादिकं। दायभागः। भूकम्पलक्षणं। मेघोत्पत्तिकारणा-दिकथनं। मेघानां स्थानादिनिरूपणञ्च।

No. 3311. पञ्चकल्पतरुः। Substance, country-made yellow paper, 19 × 3 inches. Folia, 331. Lines, 7 on a page. Extent, 8,832 ślokas. Character, Bengali. Date ? Place of deposit, Simuliyá, Post, Málipotá, Zilá, Nadíyá. Kálíkṛishṇa Gośvámí. Appearance, old. Prose and verse. Correct.

Pañchakalpataru. A digest of Tantric rites, giving elaborate descriptions of mystic circles and of worship of the Deví through the same. By Rághavadeva S'armá, son of Rámánanda Tarkapañchánana. The codex is evidently incomplete as it does not refer in detail to S'ákta divinities. The extant portion is divided into five parts. The first is devoted to mystic circles and incantations; the second to purification and accessories of worship, such as rosaries, &c.; the third is devoted to the mystic mantras of Vaishṇavite divinities; the fourth to the mantras of S'ivaite divinities and their attendants; and the fifth to minor divinities.

Beginning. त्रिहरेश्वरणं नत्वा पञ्चकल्पतरुनिह।
चतुर्वर्गफलावाप्त्यै विदधे राघवः कृती॥
तारचक्रादिमुद्रान्तः सन्तानक इति स्मृतः।

दीक्षामन्त्रसिद्धिलक्ष्मा कल्पवृक्ष इति स्मृतः ॥
विष्णुस्तच्छक्तिपूजान्तो हरिचन्दनकः स्मृतः ।
शिवस्तच्छक्तिपूजान्तः पारिजात इति स्मृतः ॥
गणेशादिविधिर्यावान् मन्दारक इति स्मृतः । इत्यादि ।

End. अङ्गैः प्रथमावरणं, अनन्तवासुकितक्षककर्कटपद्ममहापद्मशङ्खकुलिराः । + + + + + + ।

Colophon. इति महामहोपाध्यायश्रीरामानन्दतर्कपञ्चाननपुत्रश्रीराघवदेवशर्म्मणा विरचितोऽयं मन्दारकवृक्षः समाप्तश्चायं पञ्चमः कल्पः ।

विषयः । प्रथमे सन्तानके,—तारचक्रनिरूपणं । राशिचक्रकथनं । कोष्ठचक्रकथनं । गणचक्रकथनं । ऋणिधनिचक्रकथनं । नाड़ीचक्रकथनं । अकड़मचक्रकथनं । वर्णचक्रकथनं । एतेषामपवादकथनञ्च । महाविद्यानिरूपणं । सिद्धविद्याकथनं । कूर्म्मचक्रनिर्णयः । प्रातःकृत्यविधानं । दर्भनिरूपणं । द्विविधस्नानविधानं । सशिखतिलकनिरूपणं । सन्ध्याविधिः । तर्पणविधिः । भस्मस्नानादिविधिः । एकपुण्ड्रादिलक्षणं । सर्व्वेषां देवानां गायत्रीकथनं । यत्रेन विधिः । स्थाननिरूपणं । वास्तुयागादिप्रकारकीर्त्तनं । चतुर्म्मण्डलघटहनिर्णयः । द्वारदेवतादिपूजाविधिः । आसननिरूपणं । तत्र स्वस्तिकपद्मासनादीनां लक्षणकथनं । उपवेशनप्रकारकथनं । भूतशुद्धिप्रकारः । मातृकान्यासकथनं । अन्तर्मातृकाकथनादिकं । कराङ्गन्यासः । पीठमन्त्रन्यासः । पीठदेवताध्यानकथनं । प्राणायामप्रकारकथनं । भूतलिपिकथनं । अर्घ्यस्थापनविधिः । देवताबुद्ध्या स्वदेहे देवतापूजनविधिः । पीठयजनविधिः । षोड़शोपचारादिकथनं । तत्र तत्र मन्त्रकथनञ्च । पुष्पविचारः । नैवेद्यादिविधानं । उपहारद्रव्यप्रतिपादनादिप्रकारः । पादोदकस्वीकरणविधिः । अपराधनिरूपणं । काम्यषोड़शोपचारमन्त्रकथनं । अष्टत्रिंशदुपचारविधिः । चतुःषष्ट्युपचारविधानं । मन्त्रनिरूपणं । प्रतिष्ठाविधिः । मुद्रानिरूपणं ।

द्वितीये कल्पवृक्षे,—दीक्षाकालनिरूपणं । तत्र तिथिनक्षत्रवारादिकथनं । देवपर्व्वकीर्त्तनं । गयाकोलार्कादितीर्थेषु दीक्षाग्रहणनिषेधः । मन्त्रदोषकथनं । मन्त्राणां दशविधसंस्कारकथनं । शैववैष्णवादौ तत्तद्भेदकीर्त्तनं । दीक्षापद्धतिः । अध्वशोधनकथनं । कलावत्यादिदीक्षानिरूपणं । क्रियावतीदीक्षा । संक्षेपदीक्षा । होमविषये तन्त्रोक्तमन्त्रविधानं । अङ्गचतुष्टयदेवताकथनं । दीक्षोपदेशयोः भेदकथनं । पञ्चायतनपूजाकथनं । दीक्षाशब्दनिर्व्वचनं । उपदेशलक्षणं । नित्यकाम्यभेदेन दीक्षायाः द्वैविध्यकथनं । क्रियावत्यादियोग्यगुरुशिष्यनिरूपणं । मन्त्राधिकारनिरूपणं । अदेयमन्त्रकथनं । गुरुशिष्ययोः लक्षणं । पित्रादिभ्यो मन्त्रग्रहणे दोषकथमं । निषिद्धदीक्षाग्रहणे प्रायश्चित्तानन्तरं पुनर्दीक्षाविधानं । अङ्कुरार्पणविधिः । अग्निसंस्कारकथनं । कुण्डनिर्म्माणादिप्रकारः । तदभावे स्थण्डिलविधानं । स्रुक्स्रुवलक्षणं । वेदिनिर्म्माणप्रकारादिकथनं । कुण्डस्य अष्टादशसंस्कारक-

थनं । अग्न्याहरणादिविधानं । होमद्रव्यप्रमाणादिकथनं । चिह्नविशेषेण अग्नेः शुभाशुभजनकत्व-कथनं । करमालाविधानं । रुद्राक्षादिमालानिरूपणं । मालाविशेषे फलाधिक्यं । मालासंस्कारः । वैष्णव-गाणपत्यादौ क्रमेण तुलसी-गजदन्तादिमालाविधानं । सूत्रनिरूपणं । सूत्रसंस्कारादिकथनं । पुरश्चरणविधानं । तत्र भक्ष्यादिनियमकथनं । तदन्तदिवसकर्त्तव्यता । चितासाधनविधिः । शव-साधनविधानं । तत्र शवलक्षणादिकथनं । ग्रहणपुरश्चरणादौ विशेषनियमकथनं । मन्त्रसिद्ध्युपाय-कीर्त्तनं । सिद्धिलक्षणकथनञ्च ।

तृतीये हरिचन्दने,—कृष्णमन्त्रनिरूपणं । तत्पूजाविधानं । तत् प्रयोगः । किशोरादिमूर्त्ति-भेदेन पूजाभेदकथनं । विभूतिपञ्जन्यासः । केशवकीर्त्त्यादिन्यासकथनञ्च । हयग्रीवमन्त्रकथनं । वराहमन्त्रकथनं । नृसिंहमन्त्रकथनं । राममन्त्रकथनं । लक्ष्मणमन्त्रकथनं । लक्ष्मीमन्त्रकथनं । सरस्वतीमन्त्रकथनं । तुलसीमन्त्रकथनं । पृथिवीमन्त्रकथनं । सीतामन्त्रकथनं । वनमालाल-क्षणं ।

चतुर्थे पारिजाते,—शिवप्रकरणं । तत्र शिवमन्त्रादिकथनं । तत्पूजाविधानं । तत्र श्रीकण्ठ-श्रीपूर्णोदर्य्यादिन्यासकथनं । रुद्र-प्रमथ-योगिनीनां नामादिकीर्त्तनं । मृत्युञ्जयमन्त्रविधानं । दक्षि-णामूर्त्तिमन्त्रविधानं । अर्द्धनारीश्वरमन्त्रविधानं । तुम्बुरुमन्त्रविधानं । घण्टाकर्णादिमन्त्रविधिः । भुवनेश्वरी-ललिता-त्रिपुटा-अन्नपूर्णा-दुर्गा-बाला-भैरवी-श्रीविद्याप्रभृतीनां मन्त्रादिविधानं ।

पञ्चमे मन्दारके,—गणेशप्रकरणं । तत्र हरिद्रागणेश-उच्छिष्टगणेशादीनां मन्त्रादिविधानं । चन्द्रमन्त्रादिविधानं । सूर्य्यमन्त्रादिकथनं । अग्निमन्त्रकथनादिकं । विषहरनानाविधमन्त्रकथनं । इन्द्रमन्त्रकथनादिकं । गरुड़मन्त्रकथनादिकं । हनूमन्मन्त्रादिकथनं । तत्साधनकथनञ्च । धनदा साधनप्रकारकीर्त्तनं । एवं नायिकासाधनं । पिशाचसाधनं । वेतालसाधनकथनञ्च । निगड़भञ्जनो-पायकीर्त्तनं ।

No. 3312. ताराभक्तिसुधार्णवः । Substance, country-made paper, 10 × 3 inches. Folia, 395. Lines, 7 on a page. Extent, 11,204 ślokas. Character, Bengali. Date, ? Place of deposit, Simuliyá, Post Málipotá, Zilá Nadíya, Kálíkríshṇa Gośvámá; also another copy at Naduyárá, Post Madhuvaní, Darbhángá, Paṇḍit Kaṇṭu Jhá. Appearance, old. Verse. Correct.

Tárábhakti-sudhárṇava. On devotion to the goddess Tárá, giving details of S'ákta worship taken from the leading Tantras.

Beginning. सीनासीरमणिप्रवीणजलदग्रामाभिरामच्छविं
नृत्यत्पीड़पटद्वयी + कपटप्रोद्यत्परागोज्ज्वलं ।

वंशीवादनकैतवप्रविलसद्गम्भीरधीरध्वनिं
वन्दे कञ्चिदहं मुदा मधुलिहं हृत्पद्ममध्ये स्थितं ॥
हासव्याजविराजमानकुसुमां वक्षोजराजत्फला-
मुद्यत्कुन्तलकैतवप्रविलसन्मत्तालिमालाकुलां ।
स्थाणुस्थां रमणीयनूपुरकृतां बालामपर्णामहं
काञ्चित्कल्पलतां नमामि ललितां शैलाधिराजोद्गतां ॥
ललाटतटसङ्गमाद्व्रजति बालचन्द्रात्मतां
शिरोरुहनिवेशनाद्भवति जाह्नवीरूपधृक् ।
विभाति हृदि कौस्तुभात्मकतया सतां यद्यदा
गुरोश्चरणरेणवे निरुपमाय तस्मै नमः ॥
नानातन्त्राणि विज्ञाय गदाधरगुरोर्मुखात्
करोति नरसिंहोऽयं ताराभक्तिसुधार्णवं ॥

End. क्वनत्कनकनूपुरद्वितय + + + प्रोल्लसत्
+ धानमिथुना + + नरसि + स्फुरत् केसरं ।
महेन्द्रमणिमुद्रिकामधुकरीपरीतोदरं
नमस्त्रिपुरसुन्दरीचरणपुण्डरीकद्वयं ॥
आसीत्कीर्त्तिकरस्ततो हरिहरस्तस्मादभूत्सत्कविः
श्रीमान् पण्डितपुङ्गवो रुचिकरः श्रीकृष्णशर्म्मा ततः ।
तस्मादेव गदाधरः समभवत्तर्काम्बुधेः पारगः
ताराभक्तिसुधार्णवं समतनोत्तन्नन्दनः कौतुकात् ।

Colophon. इति महामहोपाध्याय + + + श्रीनरसिंहविरचिते ताराभक्तिसुधार्णवे विंशतितमः तरङ्गः समाप्तः ।

विषयः। शिवाशिवयोः संवादेन मन्त्रमाहात्म्यकीर्त्तनं । मन्त्रोद्धारप्रकारादिकथनं । गुरुलक्षणं । शिष्यलक्षणं । दीक्षाविधानं । तत्कालनिरूपणं । पक्षनिर्णयः । वारनिर्णयः । योगनिर्णयः । देशनिरूपणं । दीक्षामाहात्म्यकीर्त्तनं । मण्डपभूमिपरीक्षा । वास्तुयागविधिः । पूर्व्वादिदिग्ज्ञानोपायकथनं । मण्डपलक्षणं । कुण्डलक्षणं । स्रुवलक्षणं । अङ्कुरार्पणविधानं । दीक्षाप्रयोगः । सर्व्वतोभद्रमण्डलकथनं । शुभस्वप्ननिरूपणं । अशुभस्वप्नकथनं । अग्निसंस्कारकथनं । स्रुवादिधारणप्रकारः । दीक्षादिनकृत्यं । तारादीक्षा । कलावतीदीक्षा । वेधमयीदीक्षा । पूर्णाभिषेकविधिः । अरिष्टमन्त्रत्यागविधिः । गुरुभक्तिनिरूपणं । समयाचारकीर्त्तनं । यन्त्रादिकथनं । दिव्यवीरपशुभावादिनिरूपणं । नित्यक्रियाविधानं । तत्र स्नानकथनं । मन्त्रस्नानादिनिरूपणं । सन्ध्याविधिः ।

तर्पणविधानं। पूजाविधिः। आसनादिनिरूपणं। प्राणायामनिरूपणं। करशुद्धिकथनं। भूत-
शुद्धिप्रकारकीर्त्तनं। मातृकान्यासः। षोढ़ान्यासः। शिवशक्तिन्यासः। तारादिन्यासः। पीठन्यासः।
कराङ्गन्यासः। मन्त्रशुद्धिकथनं। विशेषशुद्धिः। द्रव्यशुद्धिः। अनुकल्पनिरूपणं। द्रव्यासादनकी-
र्त्तनं। कलसस्थापनविधिः। शापमोचनप्रकारकथनं। तारागुरुनिरूपणं। तत्त्वशुद्धिप्रकारः। वटु-
कादिबलिदानविधिः। आवाहनप्रकारः। ताराध्यानकथनं। उपचारविधिः। पञ्चविधमहामुद्रा-
निरूपणं। नानामुद्राः। देवताशुद्धिः। उपचारमुद्राकथनं। आवरणपूजाकथनं। आवरणदेवता-
ध्यानादिकथनं। बलिदानविधिः। संस्कारकालनिरूपणं। रुद्राक्षादिमालासंस्कारविधिः। रहस्य-
मालासंस्कारः। तारासहस्रनामस्तोत्रं। नित्यहोमविधिः। नमस्कारविधिः। पञ्चमयागविधिः।
दूतीयागविधानं। तदधिकार्य्यादिनिरूपणं। विरुद्धवचनानां समन्वयपूर्व्वकमागमशास्त्रप्रामाण्यसं-
स्थापनं। नैमित्तिकपूजाविधिः। कुलवारकथनं। कुलतिथ्यादिकीर्त्तनञ्च। द्वादशमासिकपूजा-
विधानं। अधिवासकृत्यविधानं। पूजादिनकृत्यं। कुमारीपूजाविधानं। शिवाबलिविधानं। ता-
न्त्रिकप्रायश्चित्तविधिः। अन्त्येष्टिविधानं। पुरश्चरणविधानं। तत्र देशादिनिरूपणं। वीरपुरश्चरणे
विशेषकथनं। सिद्धचिह्ननिरूपणं। वीरसाधनविधिः। चितासाधनविधानं। शवसाधनविधिः।
मन्त्रपरीक्षार्थं राशिचक्रादिनिरूपणं। फणिचक्रकथनं। अकड़मचक्रं। कुलाकुलचक्रं। मन्त्रषट्प-
दचक्रं। गणागणचक्रं। अष्टवर्गचक्रं। ऋणिधनिचक्रं। हरचक्रं। मारणस्तम्भनादौ कालादिनिरू-
पणं। तत्र तत्र विधानकथनं। विशेषप्रयोगकथनञ्च। काम्यकर्म्मविधानं। ताराभेदेन मन्त्रादिनिरूपणं।
महामन्त्रकथनं। न्यासकथनं। तारिणीकल्पः। नित्यार्च्चनक्रमकीर्त्तनं। तत्त्वन्यासकथनं। वर्णन्या-
सकथनं। अन्तर्मातृकान्यासः। उत्तरषड़ङ्गन्यासः। पीठपूजाविधिः। दक्षिणकालिकापूजाविधिः।
कर्पूरस्तोत्रकीर्त्तनं। श्यामाकवचं। कालीसहस्रनामस्तोत्रं। कालीमन्त्रकथनं। पुरश्चरणविधानं।
नैमित्तिककाम्यकालिकापूजाविधानं। तर्पणविधिः। कालीकवचकथनं। कालिकाभेदकथनं।
भुवनेश्वरीमन्त्रादिकथनं। गुह्यकालीमन्त्रादिनिरूपणं। षड़क्षरीविद्यानिरूपणं। षोड़शीविद्या-
निरूपणं। त्रयोदशीविद्याकथनं। चतुर्द्दशीविद्या। पञ्चदशीविद्या। विद्यामाहात्म्यकथनं। षो-
ढान्यासकथनं। भैरवोक्तदेवीध्यानस्तवकवचकथनादिकं। परदेवताकवचकथनं। वैरोचनिशतनाम-
स्तोत्रं। प्रचण्डचण्डिकासहस्रनामस्तोत्रं। छिन्नमस्तासहस्रनामस्तोत्रं। दीक्षाविशेषे पुरश्चरणविशेषक-
थनं। वीरसाध्यकाम्यकर्म्मनिरूपणं। योगविधानकीर्त्तनं। तत्प्रकारकथनं। आसनादीनां
लक्षणं। प्रत्याहारादीनां लक्षणं। मानसपूजनप्रकारकथनं। योगिनीगणस्नानविधिः। तर्पण-
विधिः। सन्ध्याविधिः। ध्यानादिकथनं। होमकुण्डलक्षणादिकीर्त्तनञ्च।

No. 3313. श्लेषविरोधिनी। Substance, country-made paper, 14 × 2½ inches. Folia, 131. Lines, 8 on a page. Extent, 6,240 ślokas. Character, Bengali. Date, ? Place of deposit. Post Málipotá, Zilá Nadíyá. Kásínátha Bhaṭṭáchárya. Appearance, old. Prose. Correct.

S'lesha-virodhiní. A commentary on the Rághava-Páṇḍavíya of Kavirája. By Rámabhadra.

Beginning. चन्द्रोपेन्द्रमहेन्द्रवह्निवरुणब्रह्मादिभिः सेवितं
षड्वर्गोज्झितकैर्मुमुक्षुमुनिभिर्व्यासादिभिः पूजितं।
आधायेश्वरपादपद्मयुगलं बद्धाञ्जलौ मस्तके-
ऽस्माभिः श्रीकविराजकोविदकृतेर्व्याख्यानमातन्यते॥
समीक्ष्य सत्शासनजात + + निः शेषरामायणभारतञ्च।
सं + + भावार्णवमत्युदग्रं वितन्यते राघवपाण्डवीया॥
नत्वा श्रीमत्तर्कवागीशभट्टाचार्य्यपादकं।
रामभद्रेण कविना श्लेषग्रामविरोधिनी॥ युग्मं।
न्यस्तमस्तकपुटाञ्जलिर्हृष्टेण दीर्घदर्शिनिवहांस्तु + + कान्।
अर्थदर्शनजुषाङ्कबुद्धिभिर्दूष्यमेतदमङ्क्तु नो वचः॥
कुमा + + स्तवव्याख्या कुमारकौमुदी तथा।
चक्रेऽचक्रेण वा येन तेने तेनेयमुत्तमा॥

तत्रादौ महाकाव्यस्य आशीर्नमस्क्रिया वस्तुनिर्देशो वा क्रियते,—इति सम्प्रदायः। उच्यते सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणं। आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखं॥

End. तं कीदृशं मणीनां सूर्य्यकान्तादीनां प्रभाभिर्भासुरं, कार्म्मणं मन्त्रतन्त्रादियो जने कर्म्मठेऽपि च। इति मेदिनी। भारतेऽप्येवं॥

Colophon. इतः परं लिप्यभावात् परिसमाप्तिसूचकवाक्यं नास्ति॥

विषयः। कविराजकृतराघवपाण्डवीयकाव्यस्य व्याख्यानं (अत्र प्रायः समाप्तिपर्य्यन्तं व्याख्यानमस्ति। केवलं त्रयोदशसर्गीयशेषश्लोकाष्टकानां व्याख्याया अभावः।)

No. 3314. दत्तकदीधितिः। Substance, country-made yellow paper, 16 × 4 inches. Folia, 9. Lines, 9 on a page. Extent, 362 ślokas. Character, Bengali. Date, Sk. 1740. Place of deposit, S'ántipura; Kálidása Vidyávágíśa. Appearance, old. Prose and verse. Generally correct.

Dattaka-dídhití. A digest of the laws regarding adoption. By Mahámahopádhyáya Ananta Bhaṭṭa.

Beginning. श्रुतिस्मृतिपुराणादिमीमांसान्यायविस्तरं ।
विचार्य्यानन्तभट्टेन क्रियते दत्तदीधितिः ॥
तत्रादौ दत्तके ग्राह्याग्राह्यविवेचनं तत्र शौनकः ।
ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसङ्ग्रहः ।
तदभावेऽसपिण्डेषु अन्यत्र तु न कारयेत् ॥

End. इतिहासपुराणेषु कुन्त्या दत्तोक्तेश्च, पत्न्यभावे सा रिक्थं लभते दुहितृत्वादिति शिवं ।

सतां सन्तोषसिद्ध्यर्थमिति दत्तकदीधितिः ।
अकार्य्यनन्तभट्टेन तेन तस्य मुदेऽस्तु सा ॥

Colophon. इति महामहोपाध्यायश्रीमदनन्तभट्टविरचिता दत्तकदीधितिः सम्पूर्णा । शकाब्दाः १७४० ॥

विषयः । दत्तके ग्राह्याग्राह्यविवेचनं । दत्तकग्रहणे आवश्यकताकथनं । हेतुकीर्त्तनञ्च । दत्तग्रहणस्य अधिकारनिरूपणं । स्वामिनोऽनुमत्या स्त्रीणां दत्तग्रहणं । ग्रहणनिषेधः । पुत्रं दातुं कः समर्थ इति निरूपणं । वर्त्तमानयुगे किंविधः पुत्रो ग्राह्य इति निर्णयः । विजातीयपुत्रग्रहणं कर्त्तव्यं न वा इति निरूपणं । द्व्यामुष्यायणपुत्रग्रहणविधिः । पौनर्भवो दासपुत्रश्च ग्राह्यो न वा इति विवेचनं । कस्मिन् समये दत्तकपुत्रग्रहणं कर्त्तव्यमिति कथनं । दत्तकग्रहणस्य विधिकीर्त्तनं । विधिना विना दत्तकग्रहणस्य फलकथनं । अत्र ग्रहणप्रयोगकथनं । दत्तकस्य विवाहाद्युपयोगिगोत्रादिनिर्णयः । सापिण्ड्यनिरूपणं । अशौचनिर्णयः । दायादनिरूपणं । दत्तककन्याग्रहणविधानञ्च ।

No. 3315. दत्तकदर्पणः । Substance, country-made yellow paper, 16 × 4 inches. Folia, 5. Lines, 10 on a page. Extent, 277 ślokas. Character, Bengali. Date, Sk. 1739. Place of deposit, S'ántipura. Kálidása Vidyávágíśa. Appearance, old. Prose and verse. Generally correct.

Daṭṭaka-darpaṇa. On certain details regarding adoption.

Beginning. ॐ नमो गणेशाय ।
अथ दत्तके ग्राह्याग्राह्यनिर्णयः । तत्रात्रिः ।

अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा ।
पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनाय च ॥

इति । अपुत्रेणैव इत्येवकारेण पुत्रवतो नाधिकारः ।

End. दत्तकग्रहणानन्तरमौरसे तु उत्पन्ने रिक्थे त्रयो विभागा औरसस्य, दत्तकस्य चतुर्थभागभाक्त्वमित्यलं पल्लवितेन ॥

द्वैपायनेन विदुषा संख्या दत्तकदर्पणः ।
निर्म्मितो व्हरिप्रीत्यै सद्भिरालोच्यतां मुहुः ॥

Colophon. इति दत्तकदर्पणः समाप्तः । शकाब्दाः १७३९ ।

विषयः । अपुत्रस्य दत्तकपुत्रग्रहणावश्यकता । तत्र अधिकारकथनं । पुत्रदानसामर्थ्यकथनं । ग्राह्याग्राह्यविवेचनं । दत्तकग्रहणकालनिरूपणं । तद्ग्रहणविधिकीर्त्तनं । स्त्रीणां दत्तग्रहणाधिकारकथनं । दत्तकस्तु होमादिविधिनैव ग्राह्य इति कथनं । अशौचादिनिरूपणं । दायविभागकथनञ्च ।

No 3316. भगवत्तत्त्वचन्द्रिका । Substance, country-made paper, 12 × 4 inches. Folia, 112. Lines, 7 on a page. Extent, 3,087 ślokas. Character, Nágara. Date, ? Place of deposit, Sántipura, Paṇḍít S'rínátha Bhaṭṭáchárya. Appearance, old. Prose and verse. Incorrect.

Bhagavattattva-chandriká. On devotion to Kṛishṇa who is described as the supreme divinity. By Mahámahopádhyá Ráma A'chárya.

Beginning. वासुदेवं नमस्कृत्य रामाचार्य्येण धीमता ।
क्रियते भगवत्प्रीत्यै भगवत्तत्त्वचन्द्रिका ॥

अथ आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चेति तथा । प्रसन्नात्मा हरिर्भक्त्या निदिध्यासनरूपया । अविद्यां कर्म्मसंघातरूपां सद्यो निवर्त्तयेदित्यतः तापत्रयातुरैरस्तत्वाय वासुदेवादिपदवेदनीयं ब्रह्म जिज्ञासितव्यमिति । इत्यादि ।

End. तस्मान्मात्रमिति प्रोक्तं परमो हरिरेव तु ।
तस्माद्भगवतः सर्व्वस्मादुत्कर्ष एव तात्पर्य्यं सर्व्वागमानामिति शं ।

Colophon. इति महोपाध्यायश्रीरामाचार्य्यकृतेयं भगवत्तत्त्वचन्द्रिका समाप्ता ।

विषयः। निरुपाधिमहाविभूतिरानन्दाकारो भगवान् श्रीकृष्ण एव सकलवेदवेदान्तप्रतिपाद्य इति निरूपणं। ब्रह्मणः साकारत्वव्यवस्थापनं। भगवच्छरीरस्य अमायिकत्वनिरूपणञ्च। श्रीमद्भागवतस्य सर्व्ववेदान्तार्थनिष्कर्षरूपत्वकीर्त्तनं। भगवन्मूर्त्तिनिरूपणं। चतुर्व्यूहनिरूपणं। प्रकाशाश्रयन्यायेन भगवति धर्म्मधर्म्मिभावोपपत्तिकथनं। चन्द्रचन्द्रिकान्यायेन जगतो भगवच्छक्तित्वकथनं। भगवदादिशब्दनिर्व्वचनं। भक्तिरेव भगवत्प्राप्त्युपाय इति सपरिकरनिरूपणं। निर्व्विशेषत्ववादखण्डनं। प्रणवस्वरूपनिरूपणं। वासुदेव एव परब्रह्मादिशब्दवाच्य इति निर्णयः। भगवदवतारकथनं। नारायणादिशब्दनिर्व्वचनं। भगवन्माहात्म्यादिकीर्त्तनं। भगवद्भजनाकरणे दोषकथनं। सात्वतशास्त्रमाहात्म्यकथनमुखेन पाञ्चरात्रपाशुपतादीनां मोहशास्त्रत्वकथनं। तामसराजससात्विकपुराणेषु क्रमेण शिवब्रह्मविष्णूनां माहात्म्याधिक्यवर्णनं। मोक्षस्वरूपकथनं। तद्भेदकथनञ्च। रुद्रादीनां भगवद्विभूतित्वकथनं। विशेषेण भगवन्माहात्म्यनिरूपणञ्च।

No. 3317. सत्तसआकाव्यम्, वा सप्तशतीकाव्यम् | Substance, country-made paper, $8\frac{1}{2} \times 4$ inches. Folia, 113. Lines, 5 on a page. Extent, 980 ślokas. Character, Nágara. Date, Sm. 1749. Place of deposit, Sántipura, Paṇḍit Kálidása Vidyávágíśa. Appearance, fresh. Verse. Generally correct.

Saptaśatí-kávya, ALIAS **Sattasayá-kávya.** On erotics. By Sáliváhana. See No. 2338, Vol. VII, page 111.

श्रीकृष्णाय नमः।

Beginning. पसुवइणो रोसारुण पड़िमासंकं तगोरिसुहअन्दं।
गहिअग्घपं कअं विअ संभासलिलं जलिं तमह ॥ १ ॥
अमिअं पाउअकव्वं पढ़िउं सोउं अजेण जाणंति।
कामस्स तत्ततत्तिं कुणंति तेकहं ण लज्जंति ॥ २ ॥
सत्त सआइं कइवच्छलेण कोड़ीअ मज्ज आरंसि।
हालेण विरइ आइं सालं काराणं गाहाणं ॥ ३ ॥ इत्यादि।

End. पसरइ जेण तमोसे जइ चंदस्स चंदिमा जेण।
तं सिडिसत्तरसिर पव्वआउणकवु अणिअं किं पि ॥ ८०६ ॥
एसो कविणा मंकिअ गहो पड़िवड़वित्तर हिअओ।
सत्त सआअ समत्तो सलाहण विरइओ कोसो ॥ ८०७ ॥

Colophon. इति सत्तसआकाव्यं सम्पूर्णं। संवत्। १७४९ ॥ अगहणमासे।

विषयः। सम्भोगविप्रलम्भयोः नायकादीनां चेष्टितवर्णनं। ग्रन्थस्यास्य सप्तशतीनामकत्वेऽप्यत्र सप्तोत्तराष्टशतसंख्यामिता गाथा वर्त्तन्ते॥

No. 3318. **गीतामाहात्म्यं।** Substance, country-made paper, 15 × 3 inches. Folia, 4. Lines, 6 on a page. Extent, 109 ślokas. Character, Bengali. Date ? Place of deposit, Guptipáḍá, Telipáḍá; Dínanátha Gañgopádhyáya. Appearance, old. Verse. Correct.

Gítámáhátmya. An eulogium on the Bhágavatgítá. Anonymous.

Beginning. श्रीकृष्णार्ज्जुनसंवादो गीतायाः प्रथमे कृतः ।
द्वितीये सांख्ययोगो हि तृतीये कर्म्मसंज्ञितः ॥ इत्यादि ।

End. पितृमातृरतः पुत्रो गीताध्यायी तथा नरः ।
यथा समस्तदेवानां निर्म्मलं जाह्नवीजलं ॥

Colophon. इति गीतामाहात्म्यं समाप्तं ।

विषयः । अध्यायार्थसङ्कलनपुरःसरं भगवद्गीताया माहात्म्यनिरूपणं ।

No. 3319. **देवीमाहात्म्यचन्द्रिका।** Substance, country-made yellow paper, 15 × 3 inches. Folia, 53. Lines. 10 on a page. Extent, 2,252 ślokas. Character, Bengali. Date Sk. 1664. Place of deposit, Guptipáḍá, Telípáḍá; Dínanátha Gañgopádhyáya. Appearance, old. Prose. Correct.

Devímáhátmya-chandriká. An eulogistic desertation on the Deví. By S'íva A'chárya.

Beginning. प्रणम्य परमां वाणीं कुमतिध्वंसकारिणीं ।
वितनोति शिवाचार्य्यो देवीमाहात्म्यचन्द्रिकां ॥
यच्चतुर्भुजमिश्रेण धृतिदासादिनापि यत् ।
लिखितं तत् समालोक्य रच्यतेऽत्र समासतः ॥
प्राक् किल जैमिनिः महाभारतकथां श्रोतुमिच्छन् मार्कण्डेयमुपस्थितवान् । इत्यादि ।

End. श्लोकस्यापि पुनः पुनरावृत्तिः समाप्तिं द्योतयतीति सम्प्रदायः ॥

Colophon. इति शिवाचार्य्यविरचितायां देवीमाहात्म्यचन्द्रिकायां देवीमाहात्म्यं समाप्तं ।

शाके कालसमन्विते विधुमुखे तस्माद्रसेष्वन्तरे अष्टम्यामसिते तिथौ विधुतिथौ यामे च सार्द्धद्वये ।
श्रीचण्डीचरणाम्बुजे निजमनः संस्थाप्य सि+वद्दे, पुस्तीयं लिखिता मया निजगृहे मासे च सुश्रावणे । शुभमस्तु शकाब्दाः ॥ १६६४ ॥

विषयः । देवीमाहात्म्यव्याख्यानं ॥

No. 3320. निगोदविचारगाथाषट्त्रिंशिकासूत्रम् । Substance, country made paper, 10 × 4 inches. Folia, 3. Lines, 8 on a page. Extent, 60 ślokas. Character, Nágara. Date ? Place of deposit, Káśírámagháṭa, Jaina Maṭha. Appearance, fresh. Verse. Correct.

Nigodavichára-gáthá-shaṭtriñ-śiká-sútra. A desertation on the identity of the soul. By Bhadravápasvámí.

Beginning. लोगस्से एग एमे जद्दतय एयं मिजियए एमाणं । इत्यादि ।

End. सम्नावनु यन्नाणि ज्ञात अणंता असंखा वा । इय ।

Colophon. इति निगोदविचारगाथाषट्त्रिंशिकासूत्रं समाप्तं ।

विषयः । सूक्ष्मजीवानां स्वरूपकथनादि ।

No. 3321. निगोदषट्त्रिंशिकाविवृतिः । Substance, country-made paper, 10 × 4 inches. Folia, 4. Lines, 17 on a page. Extent, 359 ślokas. Character, Nágara. Date ? Place of deposit, Káśírámagháṭa. Jaina Maṭha. Appearance, fresh. Prose. Correct.

Nigodashaṭtatriñ-śiká-vivṛiti. A commentary on the work described in the last preceding number. By Ratnasiñha Súri, disciple of Munichandra Súri.

Beginning. अथ पञ्चमाङ्गे एव एकादशशते दशमोद्देशके निगोदविचारः । इत्यादि ।

End. इति विवाहप्रज्ञप्तौ पञ्चमाङ्गे एकादशशते दशमः ।

Colophon. इति श्रीमन्मुनिचन्द्रसूरिशिष्यश्रीरत्नसिंहसूरिविरचिता निगोदषट्त्रिंशिका-विवृतिः समाप्ता ।

विषयः । निगोदषट्त्रिंशिकासूत्रस्य व्याख्यानं ।

No. 3322. आनन्दवृन्दावनचम्पूः । Substance, country-made paper. 15 × 6 inches. Folia, 358. Lines, 7—8 on a page. Extent, 8,938 ślokas. Character, Bengali. Date ? Place of deposit, Sántipura, Kṛishṇamaya Gośvámí; another copy at Ḍháká, Kṛishṇakamala Gośvámí. Appearance, fresh. Prose and verse. Correct.

A'nandavṛindávana-champu. An elaborate description on the life of Krishna in Vṛindávana. By Kavikarṇapura.

Beginning. वन्दे कृष्णपदारविन्दयुगलं यस्मिन् कुरङ्गीदृशां
वक्षोजप्रणयीकृते विलसति स्निग्धोऽङ्गरागः स्वतः ।
काश्मीरं तलशोणिमोपरितनः कस्तूरिका नीलिमा
श्रीखण्डं नखचन्द्रकान्तिलहरी निर्व्याजमातन्वते ॥ १ ॥
शोणस्निग्धाङ्गुलिदलकुलं जातरागं परागैः
श्रीराधायाः स्तनमुकुलयोः कुङ्कुमक्षोदरूपैः ।
भक्तश्रद्धामधुनखमहःपुञ्जकिञ्जल्कजालं
जङ्घानालं चरणकमलं पातु नः पूतनारेः ॥ २ ॥
माधुर्य्यैर्मधुभिः सुगन्धि भजनस्वर्णाम्बुजानां वनं
कारुण्यामृतनिर्झरैरुपचितः सत्प्रेमहेमाचलः ।
भक्ताम्भोधरधोरणीविजयिणीनिष्कम्पशम्पावलि-
र्देवो नः कुलदैवतं विजयतां चैतन्यकृष्णो हरिः ॥ ३ ॥
नमस्यामोऽस्यैव प्रियपरिजनान् वत्सलहृदः
प्रभोरद्वैतादीनपि जगदघौघक्षयकृतः ।
समानप्रेमानः समगुणगणास्तुल्यकरुणाः
स्वरूपाद्या येऽमी सरसमधुरास्तानपि नुमः ॥ ४ ॥
गुरुर्नः श्रीनाथाभिधमवनिदेवान्वयविधुं
नुमो भूषारत्नं भुव इव विभोरस्य दयितं ।
———लचिरवकरवृन्दावनसहः
कथास्वादं लब्ध्वा जगति न जनः क्वापि रमते ॥ ५ ॥
गते स्वस्याभीष्टं पदमहह चैतन्यभगवत्-
परीवारे पश्चाद्गतवति च तस्मिन् निजपदं ।
विलुप्ता वैदग्धी प्रणयरसरीतिर्विगलिता
निरालम्बो जातः सुकविकवितायाः परिमलः ॥ ६ ॥
तव स्तवं किं करवाणि वाणि प्राणी न वक्तुं क्षमते त्वदीयां
यतः सुवद्देव तनोषि मानं त्वमन्यथा सन्तमपि क्षिणोषि ॥ ७ ॥
आत्मनः प्रियतया तनुभाजां नात्मनः क्षतिषु दूषणदृष्टिः ।
सर्व्वतस्तिमिरमस्यति दीपो नात्मस्थलतिमिरं विनिहन्ति ॥ ७ ॥
निर्म्मलेऽपि सुजनाः स्वचित्ते दोषमेव पुरतः प्रथयन्ते ।
उज्ज्वलेऽपि सति धाम्नि पुरस्तान् धूममेव वमति स्फुटमग्निः ॥ ९ ॥

अर्थादिपर्य्याकलनं विनापि प्रह्लादयन्ते सुकवेर्वचांसि ।
विनावगाहादपि दृष्टिमात्रान्मनः पुनन्त्येव हि पुण्यनद्यः ॥ १० ॥
तावत्पदानि जायन्ते निर्द्दोषाणि पृथक् पृथक्।
यावत् स्वरसनास्वद्या तानि ग्रथ्नाति नो कविः ॥ ११ ॥
निर्म्मलयसि भुवनतलं सततावृष्टिप्नेन परमलेन ।
खलरसने सम्मार्ज्जनि तदपि च भीतिर्भवत्स्पर्शे ॥ १२ ॥
न लवोऽपि लवेन च व्यथायाः परिहृष्टो विदुनोति यस्य जनः ।
न खलो न खलो मतोऽन्यस्तमवद्वाः किल केन संत्यजेयुः ॥ १३ ॥
आनन्दवृन्दावननामधेयां चम्पूमिमां कृष्णचरित्रचित्रां ।
मनोविनोदाय रसग्रहाणां चक्रे स्वमोदाय च कर्णपूरः ॥ १४ ॥ इत्यादि ।

End. स्थितो वृन्दारण्ये सततमपि ताभिर्मधुपुरीं
गतस्त्वासां तद्वद्विरहरुजमप्यारचितवान् ।
अतोऽतर्कैश्वर्य्ये पुरुमहिमनि श्रीभगवति
व्रजेश्वर्य्याः सूनौ न किमपि विचित्रं विलसति ॥
चैतन्यकृष्णकरुणोदितवाग्विभूति—
सन्मात्रजीवनधनस्य जनस्य पुत्रः ।
श्रीनाथपादकमलस्मृतिशुद्धबुद्धि-
श्चम्पूमिमां रचितवान् कविकर्णपूरः ॥

Colophon. इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे द्वाविंशतितमः स्तवकः ॥ समाप्तश्चायमानन्दवृन्दावनाभिधो ग्रन्थः ॥

विषयः । भगवल्लीलावर्णनात्मको द्वाविंशतिभिः स्तवकैर्गुम्फितोऽयं ग्रन्थः । तत्र १ प्रथमस्तवके, वृन्दावनवर्णनं । २ये, श्रीकृष्णजन्मोत्सवादिवर्णनं । ३ये, पूतनावधः । यशोदारोदनं । मथुरातो नन्दस्यागमनवर्णनञ्च । ४र्थे, शकटतृणावर्त्तविवर्त्तनं । ५मे, जृम्भण-रिङ्गण-नामकरण-नवनीतापहरण-स्वङ्गलग्नविश्वरूपदर्शनकथनानि । ६ष्ठे, भाण्डस्फोटन-दामबन्धन-यमलार्ज्जुनमोचन-फलक्रमणकीर्त्तनानि । ७मे, वत्सासुरहनन पुलिनभोजन-ब्रह्ममोहनविवरणं । ८मे, युगपत् पौगण्डकैशोरलीलावर्णनं । तत्र व्रजसुन्दरीणां पूर्व्वरागवर्णनं । कन्दुकक्रीड़ा । धेनुकासुरनिपातनञ्च । ९मे, गोकुलव्याकुलता, श्रीकृष्णस्य कालियनागशिरसि नटनादिकञ्च । १०मे, श्रीकृष्णस्य राधामन्दिरे निमन्त्रणस्वीकारकौतुकवर्णनं । ११शे, ग्रीष्मवर्णनं । प्रलम्बासुरवधः । शरद्वर्णनं । गोपीनां वेणुगानाकर्णनं । श्रीकृष्णेन समं राधाया विलासवर्णनादिकञ्च । १२शे, वस्त्रहरणं । १३शे, यज्ञपत्नीजनानुग्रहकीर्त्तनादि । १४शे, वसन्तोत्सववर्णनं । १५शे, गोवर्द्धनधारणादिकं । १६शे, ब्रह्मलो-

कदर्शनवर्णनं। १७,१८,१९,२०, स्तवके, रासविलासवर्णनं। २१ स्तवके, मुरलीचौर्य्यविलासकीर्त्तनं। २२स्तवके, दोलोत्सववर्णनं॥

No. 3323. मुखवर्त्तनी। Substance, country-made paper, 15×6 inches. Folia, 358. Lines, 7 on a page. Extent, 13,000 ślokas. Character, Bengali. Date ? Place of deposit, Sántipura. Kṛishṇamaya Gosvámí. Appearance, fresh. Prose. Correct.

Mukhavartaní. A commentary on the Ánandavrindávana Champu of Kavikarṇapura. By Vṛindávana Chakravarttí.

Beginning. वत्सास्वाद्य मुक्तः स्वया रसनया प्रापय्य सत्काव्यतां
देयं भक्तजनेषु भाविषु सुरैर्दुष्प्रापमेतत्त्वया।
इत्याज्ञापयतेव येन निदधे श्रीकर्णपूराननं
बाल्ये स्वाङ्घ्रिदलाम्रुतं गतिरसौ चैतन्यचन्द्रोऽस्तु नः॥
नितान्तनैसर्गिककृष्णसारलीलाद्यमुच्चैः पदमात्मलीनं।
श्रीरूपसम्मत्यनुकूलमेव पूर्व्वैः श्रितं संश्रयते सुमेधाः॥
नन्दोत्सवादिरासान्तां दोलादोलादिकाधिकां।
श्रीकृष्णलीलां जग्रन्थ कर्णपूरो महाकविः॥ इत्यादि।

End. परमपूर्णतमप्रकाशे व्रजेश्वर्य्याः स्तनौ तत्र किमद्भुतमिति भावः। तन्मात्रजीवनधनस्य श्रीशिवानन्दसेनस्य। इत्यानन्दवृन्दावनटीकायां सुखवर्त्तन्यां द्वाविंशतिस्तवकसङ्गमनं।

Colophon. राधासरसीरकुटीरवर्त्तिनः प्रा—वृन्दावनचक्रवर्त्तिनः।
आनन्दचम्पूविवृतिप्रवर्त्तिनः सन्तो गतिर्मे सुमहानिवर्त्तिनः॥
समाप्तेयं टीका।

विषयः। कर्णपूरकृतानन्दवृन्दावनचम्पूकाव्यस्य व्याख्यानं।

No. 3324. पिङ्गलटीका। Substance, country-made paper, 16 × 4 inches. Folia, 24. Lines, 8 on a page. Extent, 992 ślokas. Character, Bengali. Date, ? Place of deposit, Rámanagar, Post, Sántipura, Rámatáraṇa Bhaṭṭácharya. Appearance, decayed. Verse. Incorrect.

Piñgala-ṭíká. An exegecís on Piñgala's aphorisms on versification in the Prakrit language. By Váninátha. The text is noticed under No. 191, Vol. I, page 103 and commentaries, by different authors under No. 1608, Vol. IV, page 172 and No. 2464, Vol. VII, page 220.

Beginning. प्रणिपत्य गिरां देवीं शङ्खकुन्देन्दुसन्निभां ।
वाणीनाथस्त्रकारेमां टीकां प्राकृतपिङ्गले ॥

अथादौ वस्तुनिर्द्देशं कुर्व्वन् आत्मानं लक्षयति । पिङ्गलनागो जयति उत्कर्षेण वर्त्तते । स कः, यो विविधमात्रैव लघ्वादिमात्रैव सागरस्तस्य पारं प्राप्तोऽपि विमलमतिः सहेलं यथा स्यात् तथा । एवं शषसहां प्रायो लोप इति लोपे सहेलमित्यत्र सकारलोपः । यद्वा विमलमतिहेलं । किम्भूतः । प्रथमं भाषातरण्डः । इत्यादि ।

End. हे मनोहरे रजनीप्रभुमुखि चन्द्रमुखि कमलनयने द्वाविंशमात्रा भवन्ति । तेषां मध्ये एकः करतलगणः प्रकाश्यते मात्रावर्णसुललितं मध्ये षट्चतुःकलगणा कुर्व्वित्यर्थः । शेषं सुगमं ।

Colophon. इति मिश्रश्रीवाणीनाथकृतौ पिङ्गलटीकायां द्वितीयो वर्णपरिच्छेदः समाप्तः । समाप्तोऽयं ग्रन्थः ।

विषयः । पिङ्गलनागकृतप्राकृतच्छन्दोग्रन्थस्य व्याख्यानम् ।

No. 3325. वैराग्यशतकटीका । Substance, country-made paper, 16 × 5 inches. Folia, 19. Lines, 10 on a page. Extent, 558 ślokas. Character, Bengali. Date, ? Place of deposit, Rámanagara, Post S'ántipura, Rámatárana Bhattácharya. Appearance, old. Prose. Incorrect.

Vairágya-śataka-ṭiká. Exegecis on the Vairágya-śataka of Bhaṭṭrihari. By Minanátha. Vide No. 2738, Vol. VIII, page 186 for another commentary.

Beginning. वाचां देवीं नमस्कृत्य हिमकुन्देन्दुसन्निभां ।
वैराग्यशतकव्याख्या मीननाथेन तन्यते ॥

तदादौ ग्रन्थारम्भे शिष्टाचारप्रतिपालनाय कविः स्वीयमभीष्टदेवमभिष्टौति चूड़ोत्तंसितेति । योगिनां चेतःसद्मनि—इत्यादि ।

End. वारितरङ्गचञ्चलतरे वारिणः समुद्रस्य तरङ्गास्तद्वच्चञ्चलतरे ॥

Colophon. इति श्रीमीननाथकृता वैराग्यशतकटीका सम्पूर्णा ।

विषयः । भर्तृहरिकृतवैराग्यशतकस्य व्याख्यानम् ।

No. 3326. व्यवहारमाधवः । Substance, country-made paper, 17 × 5 inches. Folia, 183. Lines, 8 on a page. Extent, 4,380 ślokas. Character, Nágara. Date, Sm. 1866. Place of deposit, S'ántipura, Rámanátha Tarkaratna. Appearance, fresh. Prose and verse. Correct.

Vyavahára-mádhava On Judicature. By Mádhava A'chárya. The text is being published in the Bibliotheca Indica.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम्।
सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं
मज्जन् सज्जनसङ्गतीर्थनिपुणः सद्वृत्तितीर्थं श्रयन्।
लब्धामाकलयन् प्रभावलहरीं श्रीभारतीतीर्थतो
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकण्ठमव्याहतम्॥
सत्यैकव्रतपालको द्विगुणधीस्त्रय्यर्थी चतुर्वेदिता
पञ्चस्कन्धकृती षडन्वयदृढ़ः सप्ताङ्गसर्व्वं महः।
अष्टव्यक्तिकलाधरो नवनिधिः पुष्यद्दिशत्प्रत्ययः
स्मार्त्तोच्छ्रायधुरन्धरो विजयते श्रीवुक्कणक्ष्मापतिः॥
इन्द्रस्याङ्गिरसो नलस्य सुमतिः शैब्यस्य मेधातिथि-
र्धौम्यो धर्म्मसुतस्य वैण्यन्टपतेः सौधानिधेर्गौतमः।
प्रत्यग्दृष्टिररुन्धतीसहचरो रामस्य पुण्यात्मनो
यद्वत्तस्य विभोरभूत्कुलगुरुर्मन्त्री तथा माधवः॥
— — — — — ।
श्रीमती जननी यस्य सुकीर्त्तिर्मायणः पिता।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ॥
यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी।
भारद्वाजकुलं यस्य सर्व्वज्ञः स हि माधवः॥

— — — — — व्याख्याते आचारप्रायश्चित्ते। अथ व्यवहारः प्रस्तूयते। यद्यप्यृणादानादीनामष्टादशपदानां व्यवहाराणां मध्ये कमपि व्यवहारं पराशरो न व्युत्पादितवान्। इत्यादि।

End. मनुरपि।
एवं सर्व्वानिमान् राजा व्यवहारान् समापयन्।
व्यपोह्य किल्बिषं सर्व्वं प्राप्नोति परमां गतिं॥

Colophon. इति श्रीमहाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरवुक्कभूपालसाम्राज्यधुरन्धरस्य माधवामात्यस्य कृतौ पराशरस्मृतिव्याख्यायां व्यवहारमाधवः समाप्तः। संवत् १८९९।

विषयः। पराशरस्मृतिव्याख्यायाः परिशिष्टरूपोऽयं सन्दर्भः। तत्र व्यवहारस्वरूपनिरूपणम्। सभानिरूपणम्। सभाप्रवेशविधिकथनं। तत्र समयादिनिरूपणम्। दशस्थाननिरूपणम्। सभ्यनि-

रूपणम् । राजप्रतिनिधिनिरूपणम् । व्यवहारदर्शनविधिनिरूपणम् । चतुष्पाद्व्यवहारनिरूपणम् । साक्षिनिरूपणम् । तत्संख्यादिकथनम् । साक्षिभेदनिरूपणम् । तत्र दोषोद्भावनविधिकथनं । तत्परीक्षाविधिकथनम् । तदनुयोजनतत्प्रश्नप्रकारादिकथनम् । लिखितविधानम् । लेख्यविभागादिकथनम् । भुक्तिनिरूपणम् । दिव्यविधिकथनम् । तत्र धटाग्निजलविषकोशादिविधिकथनम् । अष्टादशपदकथनम् । ऋणादानादिविधिकथनम् । वृद्धिनिरूपणम् । तत्परिमाणादिकथनम् । आधिनिरूपणम् । प्रतिभूविधिकथनम् । निक्षेपविधिकथनम् । अस्वामिकविक्रयविधिकथनम् । सम्भूयसमुत्थानविधिकथनम् । अदेयविधिकथनम् । दत्तादत्तविधिकथनम् । वेतनापाकर्म्मनिरूपणम् । अभ्युपेत्य शुश्रूषाविधिकथनम् । संविद्व्यतिक्रमविधिकथनम् । क्रीतानुशयविधिकथनम् । विक्रीयासम्प्रदानविधिकथनम् । स्वामिपालविवादविधिकथनम् । शस्यरक्षादिविधिकथनम् । सीमाविवादविधिकथनम् । सेत्वादिनिरूपणम् । दण्डपारुष्यविधिकथनम् । वाक्पारुष्यविधानम् । स्तेयविधिकथनम् । साहसविधिनिरूपणम् । स्त्रीसङ्ग्रहणविधिकथनम् । दायभागनिरूपणम् । द्यूतसमाह्वयविधिकथनम् । प्रकीर्णकविधिकथनञ्च ।

No. 3327. अमरुशतकव्याख्या । Substance, country-made paper, 16 × 5 inches. Folia, 115. Lines, 9 on a page. Extent, 2,052 ślokas. Character, Nágara. Date, ? Place of deposit, Rámanagara, Post S'ántipura, Rámatárana Bhaṭṭáchárya. Appearance, new. Prose. Incorrect.

Amaruśataka-vyákhyá. A gloss on Amaru's century of verses. By Bhaṭṭa Devasañkara. Vide No. 557 of Vol. II, page 22, and Vol. XVII, page 135, No. 2367.

Beginning. चन्द्रविभूषितभालं गौरीवालं गले मणिमालं ।
विघ्नविघातायालं स्मरामि हतदेवरिपुजालं ॥
सीतास्ये स कुतूहलं हनुमतो वीर्य्ये चमत्कारिणं
+ + द्दानरचेष्टितेर्ऽञ्चितदृशं धैर्य्यान्वितं रावने ।
म्लानं पाशगलत्क्षणेऽपवचनेऽस्वस्थं खरे दूषणे
तीव्रं शूर्पणखामुखे नतमुखं श्रीरामचन्द्रं भजे ॥
क्व मन्दा मे बुद्धिः क्व च रसमयं शङ्करवच-
स्तथापि व्याख्यातुं तरलमनसः शङ्करकृतिं ।
सहायो मे श्रीमद्गुरुचरणपाथोजयुगलं
तथा ताराम्बायाः पदकमलयोर्धूलिपटलं ॥

रानेरपुरनिवासी पुरोहितो देवशङ्करः सहृदां।
अमरुकशतस्य टीकां करोति विदुषां प्रमोदाय ॥

अथ यद्यपि ग्रन्थारम्भकर्त्तुरिष्टदेवतायाः दृशकन्याच्च एवापेक्षितः। स च कटाक्षः आर्द्रतामूल इत्यादि।

End. विप्रलम्भे उन्मादावस्थेयं।
ग्रन्थो ह्ययं शङ्करपादपद्मव्याख्यानरूपः कुतुकान्मया कृतः।
कृतांञ्जलिप्रार्थितपण्डितैर्घैर्विलोकनीयोऽथ विशोधनीयः॥
निर्म्मलमपि पानीयं निर्म्माल्यं निपीयते निपुणैः।
मद्ग्रन्थेऽपि च बुधैर्निपुणं विभाव्य तथैव यतितव्यं॥
— — — — — — ।

Colophon. इति श्रीराजनपुरसञ्जात + + + + कृतनिवासपुरोहितोपनामकभट्टदेवशङ्करनाम्नां नाभाश्रि(?)कृतेयममरुशतकव्याख्या समाप्ता।

विषयः। अमरुशतकस्य व्याख्यानम्।

No. 3328. काव्यालङ्कारः। Substance, country-made paper, 17 × 4 inches. Folia, 68. Lines, 6 on a page. Extent, 1,198 ślokas. Character, Bengali. Date, Sm. 1719. Place of deposit, Káugáchhi, Post S'ántipura, Nílamaṇi Bhaṭṭachárya. Appearance, decayed. Verse. Correct.

Kávyálaṅkára. A treatise on rhetoric. By Rudraṭa.

Beginning. अविरलविगलन्मदजलकपोलपालीनिलीनमधुपकुलः।
उद्भिन्नवश्मश्रुश्रेणिरिव गणाधिपो जयति ॥
सकलजगदेकशरणं प्रणम्य चरणाम्बुजद्वयं गौर्य्याः।
काव्यालङ्कारोऽयं ग्रन्थः क्रियते यथायुक्ति ॥
अस्य हि पौर्व्वापर्य्यं पर्य्यालोच्याचिरेण निपुणस्य।
काव्यमलङ्कर्त्तुमलंकर्त्तुरुदारा मतिर्भवति ॥ इत्यादि।

End. जयति जनमनिष्टादुद्धरन्ती भवानी
जयति निजविभूतिव्याप्तविश्वो मुरारिः।
जयति गजवक्त्रः सोऽत्र यस्य प्रसादा
दुपशमति समस्तो विघ्नवर्गोपसर्गः॥

Colophon. इति श्रीरुद्रटकृते काव्यालङ्कारे षोड़शोऽध्यायः।

विषयः। काव्यप्रयोजनादिकथनं। काव्यचारुतानिदानकथनं। शक्तिस्वरूपादिकथनं। व्युत्पत्तिस्वरूपादिनिरूपणं। काव्यस्वरूपादिकथनं। पाञ्चाल्यादिरीतिकथनं। वाक्यलक्षणादिकथनं। भाषाभेदनिरूपणं। गुणदोषनिरूपणं। शब्दालङ्कारकथनं। तत्र वक्रोक्तिलक्षणं। अनुप्रासलक्षणादिकथनं। मधुरादिवृत्तिपञ्चकनिरूपणं। यमकलक्षणादिकथनं। श्लेषलक्षणादिकथनं। चित्रालङ्कारनिरूपणं। तत्र मुसल-शर-शूल-शक्ति-हल-रथपद-तुरगपद-गजपद-मुरजबन्धादिकथनञ्च। शब्दालङ्कारदोषनिरूपणं। अथ अर्थालङ्कारनिरूपणं। तत्र वास्तव-औपम्य अतिशय-श्लेषरूपाश्चतुर्व्विधा एव अर्थालङ्काराः। अन्ये तु तत्तद्वान्तरभेदा एवेतिनिरूपणं। तत्र सहोक्तिकथनं। समुच्चयकथनं। जातिकथनं। यथासंख्यकथनं। भावकथनं। पर्य्यायकथनं। विषमकथनं। अनुमानकथनं। दीपककथनं। परिकरकथनं। परिवृत्तिकथनं। परिसंख्याकथनं। हेतुकथनं। कारणमालाकथनं। व्यतिरेककथनं। अन्योन्यकथनं। उत्तरकथनं। सारकथनं। सूक्ष्मकथनं। लेशकथनं। अवसरकथनं। मीलितकथनं। एकावलीकथनं। उपमाकथनं। उत्प्रेक्षाकथनं। रूपककथनं। अपह्नुतिकथनं। संशयकथनं। समासोक्तिकथनं। मतकथनं। उत्तरकथनं। अन्योक्तिकथनं। प्रतीपकथनं। अर्थान्तरन्यासकथनं। उभयन्यासकथनं। भ्रान्तिमत्कथनं। आक्षेपकथनं। प्रत्यनीककथनं। दृष्टान्तकथनं। पूर्व्वकथनं। सहोक्तिकथनं। समुच्चयकथनं। साम्यकथनं। स्मरणकथनं। अन्यविधपूर्व्वकथनं। विशेषकथनं। उत्प्रेक्षाकथनं। विभावनाकथनं। तद्गुणकथनं। अधिककथनं। विरोधकथनं। विषमकथनं। असङ्गतिकथनं। पिहितकथनं। व्याघातकथनं। अहेतुकथनं। अविशेषविरोधाधिकादिरूपश्लेषकथनं। सङ्करनिरूपणं। अथ अर्थालङ्कारदोषनिरूपणं। काव्यश्रवणफलकथनं। रसनिरूपणं। तत्र शृङ्गाररसनिरूपणं। वीरनिरूपणं। करुणनिरूपणं। वीभत्सनिरूपणं। भयानकनिरूपणं। अद्भुतनिरूपणं। हास्यनिरूपणं। रौद्रनिरूपणं। शान्तनिरूपणं। प्रेयोनिरूपणञ्च। वीरादिरसेषु रीतिनियमनं। अथ काव्यकथाख्यायिकादिलक्षणञ्च।

No. 3329. काव्यालङ्कारटिप्पणम्। Substance, country-made paper, 16 × 5 inches. Folia, 88. Lines, 8—10 on a page. Extent, 3,246 ślokas. Character, Bengali. Date, ? Place of deposit, Káugáchhi, Post S'ántipura, Nílmaṇi Bhaṭṭácbárya. Appearance, decayed. Prose. Correct.

Kávyálaṅkára-ṭippana. A gloss on the last preceding work. By Rudraṭa.

Beginning. निःशेषापि त्रिलोकी विनयपरतया सन्नमन्ती पुरस्ता-
यस्याङ्घ्रिद्वन्द्वसक्ताङ्गुलिविमलनखादर्शसंक्रान्तदेहा।
निर्भीतिस्थानलीना भयदभवमहारातिभीत्येव भाति
श्रीमान् नाभयदेवः स भवतु भवतां शर्म्मणे कर्म्मसक्तः॥

पूर्व्वमहामतिविरचितटत्त्वनुसारेण किमपि रचयामि ।
संचिप्ततरं रुद्रटकाव्यालङ्कारटिप्पणकं ॥

इह शास्त्रकारः शिष्टस्थितिपालनार्थं अविघ्नेन शास्त्रसमाप्त्यर्थञ्च प्रथममेव तावद्गणनायकस्य स्तुतिमाह । अविरलेति । गणाधिपो विनायकः जयति सर्व्वोत्कर्षेण वर्त्तताम् । इत्यादि ।

End. जयतीति सुगमं ।
एवं रुद्रटकाव्यालङ्कृतिटिप्पणकविरचनात् पुण्यं ।
यदवापि मया तस्मान्मनः परोपकृतिरतिभूयात् ॥
थारापद्रपुरीयगच्छतिलकः पाण्डित्यसीमाभवत्
सूरिर्भूरिगुणैकमन्दिरमिह श्रीशालिभद्राभिधः ।
तत्पादाम्बुजषट्पदेन नमिना संचेपसंप्रेच्छिणः
पुंसो मुग्धधियोऽधिकृत्य रचितं सट्टिप्पणं लघ्वदः ॥
अज्ञानाद्यद्वितथं विहतं किमपीह तन्महामतिभिः ।
संशोधनीयमखिलं रचिताञ्जलिरेष याचेऽहं ॥
सहस्रत्रयमन्यूनं ग्रन्थोऽयं पिण्डितोऽखिलः ।
द्वाविंशत्यचरश्लोकप्रमाणेन सुनिश्चितं ॥
पञ्चविंशतिसंयुक्तैरेकादशसमाशतैः ।
विक्रमात् समतिक्रान्तैः प्रावृषीदं समर्थितं ॥

Colophon. इति श्रीरुद्रटकृतकाव्यालङ्कारटिप्पणं नमिसाधुविरचितं समाप्तं ।
समाप्तश्च षोड़शोऽध्यायः समाप्तोऽयं ग्रन्थः ।

विषयः । रुद्रटकृतकाव्यालाङ्काराभिधानालङ्कारसन्दर्भस्य व्याख्यानम् ।

No. 3330. व्यवस्थादीपिका, अशौचप्रकरणम् । Substance, country-made paper, 16 × 4 inches. Folia, 7. Lines, 6 on a page. Extent, 126 ślokas. Character, Bengali. Date, ? Place of deposit, Rámanagara, Post S'ántipura, Rámatárana Bhattáchárya. Appearance, fresh. Verse. Incorrect.

Vyávasthá-dípiká. A digest of Smriti rules. The manuscript is confined to the rules regarding mournings. By Rádhánátha S'armá.

Beginning. श्रीगोपालं नमस्कृत्य श्रीराधानाथभूसुरः ।
व्यवस्थादीपिकाग्रन्थे वक्त्यशौचव्यवस्थितिं ॥

तत्रादौ रजस्वलाशौचं । रजस्वला चतुर्थेऽह्नि शुद्धा स्नानेन लौकिके । दैवं पैत्र्यञ्च यत्कर्म्म तत्र शुद्धा तु पञ्चमे । पुनर्यदि रजोयोगः सप्तदशदिनावधेः । इत्यादि ।

End. निमित्ताज्ञानिनोऽशौचं न स्यात् तदपरो यदि ।
ज्ञात्वा तदन्नं भुञ्जीत तदा पूर्व्वोक्तमाचरेत् ॥

Colophon. इति व्यवस्थादीपिकायामशौचप्रकरणम् ।
इत्यशौचव्यवस्थोक्ता श्रीराधानाथशर्म्मणा ।
विविधा बुद्धिबोधायसौ शोध्या सद्भिर्महत्तमैः ॥

विषयः । अशौचव्यवस्थानिरूपणम् ।

No 3331. विवेकधैर्य्याश्रयः । Substance, country-made paper, 12 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 24 ślokas. Character, Nágara. Date, ? Place of deposit, Rámanagara, Post S'ántipura, Rámatárana Bhaṭṭáchárya. Appearance, fresh. Verse. Incorrect.

Viveka-dhaiyyáśraya. A treatise on dispassion and patience as ancilatory to devotion. By Valáváchárya.

Beginning. विवेकधैर्य्ये सततं रक्षणीये तथाश्रयः ।
विवेकन्तु हरिः सर्व्वं निजेच्छातः करिष्यति ॥
प्रार्थिते वा ततः किं स्यात् स्वाम्यभिप्रायसंशयात् ।
सर्व्वत्र तस्य सर्व्वं हि सर्व्वसामर्थ्यमेव च ॥ इत्यादि ।

End. एवमाश्रयणं प्रोक्तं सर्व्वेषां सर्व्वदा हितं ।
कलौ भक्त्यादिमार्गा हि दुःसाध्या इति मे मतिः ॥

Colophon. इति श्रीवल्लभाचार्य्यविरचितो विवेकधैर्य्याश्रयः सम्पूर्णः ।

विषयः । भगवद्विषयकविवेकधैर्य्याश्रयणेनैव भक्तिर्लभ्यते इति निरूपणम् ।

No. 3332. मनोरमा । Substance, country-made paper, 14 × 4 inches. Folia, 70. Lines, 10 on a page. Extent, 1,552 ślokas. Character, Bengali. Date, ? Place of deposit, Rámanagara, Post S'ántipura, Rámatárana Bhaṭṭáchárya. Appearance, fresh. Prose. Incorrect.

Manoramá. A gloss on the Vidagdhamukhamaṇḍana of Dharma Dása. By Tárachandra.

Beginning. श्रीगोकुलेशपदपद्ममधुव्रतेन
तारामिधेन कविना शिवराजधान्याम् ।
विद्वत्कुलोपकृतये क्रियते स्फुटार्था
टीका विदग्धसुखमण्डलसंज्ञकस्य ॥
विमत्सराणां विदुषां चित्ते टीका मया कृता ।
मुदं वितनुतां नित्यमेषा विद्वन्मनोरमा ॥
जैनकृतेऽस्मिन् ग्रन्थे सम्यग्ज्ञातुं मनो यदा विज्ञाः ।
विद्वन्मनोरमां मे द्रष्टुं यत्नं तदा कुरुत ॥

इह ग्रन्थस्य कर्त्ता निर्व्विघ्नपरिसमाप्त्यर्थं कायिकवाचिकमानसिकपापापहारित्वरूपं स्वेष्टदेवताप्रसन्नात्मकं मङ्गलमाचरति सिद्धौषधानीति । इत्यादि ।

End. सा रम्या रमणीया रन्तुं योग्या वा ।
ताराचन्द्रेण कविना कृता चैषा मनोरमा ।
टीके + + स्यां पूर्णोऽयं परिच्छेदश्चतुर्थकः ॥
कोषाननेकानवलोक्य टीका कायस्थकूजामणिना कृतैषा ।
ताराभिधेयेन सतां कवीनामाचन्द्रतारं रमतां मनःसु ॥

Colophon. इति श्रीताराचन्द्रेण विरचिता विदग्धसुखमण्डलटीका मनोरमा समाप्ता।

विषयः । धर्म्मदासकृतविदग्धसुखमण्डलस्य व्याख्यानम् ।

No. 3333. रसवती । Substance, country-made paper, 16 × 5 inches. Folia, 82. Lines, 7 on a page. Extent, 1,363 ślokas. Character, Bengali. Date, ? Place of deposit, Zilá Nadiyá, Gráma-Dhuvulíyá, Gaṅgágovinda Vidyáratna. Appearance, fresh. Prose. Incorrect.

Rasavatí. A gloss on the author's work entitled Gopála Champu. By Jívarája Díkshita. The text has been noticed in Vol. I, page 40, No. 72.

Beginning. अम्भोजन्म व मत्यनल्पकरकाभ्रङ्गावलीमेकतः
पञ्चेषोः शरमन्यतोऽर्द्धशशिनं सूते नवं पल्लवं ।
चित्रं चुम्बति चक्रवाकमिथुनं प्रोद्दामतारागणं
ज्योत्स्ना कापि विधौ गता वितनुतां गङ्गातरङ्गान् विधेः ॥
कविजीवराजनामा तामातनुतेऽभिनम्य गीर्व्वाणीं ।
गोपालभूपचम्प्वाख्यां खलु रसवत्याख्यां ॥

ग्रन्थनिर्व्विघ्नतासिद्ध्यर्थमादौ मङ्गलमारचयति । अदितिजेति । अत्र मङ्गलं प्रतिपच्चन्द्रविषयकं। इत्यादि ।

End. रसालाख्यः पाकः । निरुक्तलक्षणं मालिनीनामकं छन्दः ॥

मदयति माला मदीयं तनूजघनभारतीरसविलासः ।

— — — — — — ॥

Colophon. इति श्रीमद्विद्वत्कदम्बहेरम्बसकलविपुलकविकुलतिलकमहाराष्ट्रदेशवारिधिसुधानिधिभारद्वाजकुलकाशारराजहंसकाशीस्थजगद्गुरुश्रीमद्दीक्षितकविसामराजसूरिवरसूनुदीक्षितकामराजसूरितनयदीक्षितव्रजराजकविराजात्मजबालकविदीक्षितजीवराजविरचितायां रसवत्याख्यायां गोपालचम्पूव्याख्यायां पूर्व्वाङ्गं समाप्तं ।

विषयः । निजनिर्म्मितगोपालचम्पूकाव्यस्य व्याख्यानम् ।

No. 3334 अमृतलहरी । Substance, country-made paper, 15 × 6 inches. Folia, 5. Lines, 12 on a page. Extent, 172 ślokas. Character, Bengali. Date, ? Place of deposit, Dhuvuliya Gráma, Zilá Nadiyá, Gaṅgágovinda Vidyáratna. Appearance, fresh. Prose. Incorrect.

Amṛita-laharí. A gloss on Válmiki's hymn to the Ganges. By Harinátha Gosvámí, son of Manohara Gosvámí.

Beginning. श्रीमन्नाथाभिधो नत्वा हरेः पादपङ्कजं ।

वाल्मीकिकृतगङ्गाष्टटीकां वितनुतेऽमलां ॥

तत्र वाल्मीकिनामा ऋषिवर्य्यः श्रीगङ्गास्तोत्राष्टकेन स्तोतुं स्वहृद्गतं प्रार्थयन्नाह । मातरिति । हे मातः भवतीं त्वां प्रार्थये याचे । इत्यादि ।

End. यद्यदर्थपठितं तत्तदेवार्थप्रदमित्यर्थः ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्गोवर्द्धनधरानन्दपुरीपादपद्मपरागरञ्जितभालस्थलश्रीगोस्वामिहरिनाथेन श्रीगोस्वामिमनोहरसूनुना विरचितामृतलहरी नाम गङ्गाष्टकटीका समाप्ता ॥

गङ्गाष्टकस्य टीकेयं हरिनाथेन कल्पिता ।

कृपाकटाक्षैः सत्कुर्व्वन्त्वेनां सन्तो दयालवः ॥

वर्षे विक्रमभूपतेः परिगते सिद्धोकसुन्यङ्कके

मासे भाद्रपदेऽसितेऽष्टमितिथौ वारे बुधे भूसुरः ।

वैतस्तं तटमाश्रिते कुशपुरे श्रीनाथनामाव्यधा-
ट्टीकां जह्नुसुताष्टकस्य सुधियां कण्ठेषु सा सज्जतां ॥ इति शम् ॥

विषयः । वाल्मीकिकृतगङ्गाष्टकस्य व्याख्यानम् ।

No. 3335. साम्बपञ्चाशिका । Substance, country-made paper, 13 × 4 inches. Folia, 8. Lines, 6 on a page. Extent, 107 ślokas. Character, Bengali. Date, ? Place of deposit, Dogechhe Gráma, Zilá Nadiyá, Kálikiṅkara Gosvámí. Appearance, decayed. Verse. Correct.

Sámba-pan̲cháśiká. A hymn to the Sun-god in 50 stanzas. By Sámba.

Beginning. शब्दार्थत्वविवर्त्तमानपरमज्योतीरचो(?)गोपते-
रुद्गीथोऽभ्युदितः पुरोऽरुणतया यस्य त्रयी मण्डलं ।
भाव्यद्वर्णपदक्रमेरिततमःसप्तस्वराश्वैर्वियद्-
विद्यास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे ॥
ओमित्यन्तर्नदति नियतं यः प्रतिप्राणिशब्दो
वाणी यस्मात् प्रसरति परा शब्दतन्मात्रगर्भा ।
प्राणापानौ वहति च समौ यो मिथोग्राससक्तौ
देहस्थं तं सपदि परमादित्यमाद्यं प्रपद्ये ॥ इत्यादि ।

End. इति परमरहस्यश्लोकपञ्चाशदेषा
तपनपवनपुण्या सागमब्रह्मचर्च्चा ।
हरतु दुरितमस्मद्वर्णिताकर्णिता वो
दिशतु च शुभसिद्धिं मातृवद्भक्तिभाजां ।

Colophon. इति साम्बपञ्चाशिका सम्पूर्णा ।

विषयः । सूर्य्यस्य माहात्म्यादिकीर्त्तनं ।

No. 3336. साम्बपञ्चाशिकाविवृतिः । Substance, country-made paper, 13 × 5 inches. Folia, 18. Lines, 8 on a page. Extent, 351 ślokas. Character, Bengali. Date, ? Place of deposit, Dogeckhe Gráma, Zilá Nadiyá, Kálikiṅkara Gosvámí. Appearance, decayed. Prose. Incorrect.

Sámba-pan̲cháśiká-vivṛiti. A gloss on the next preceding work. By Kshemaja.

Beginning. पुष्णन् देवानमृतविसरैर्(?) मिन्दुमाखाद्य सम्यग्-
भाभिः स्वाभीरसयति रसं यः परं नित्यमेव ।
चीर्णं चीर्णं पुनरपि च तं पूरयत्येवमीदृग्-
दोलालीलोल्लसितहृदयं नौमि चिद्भानुमेकम् ॥
एतदादेशवैवश्यप्रोन्मिषद्धिषणा वयं ।
विमृशामो मनाक् श्रीमत्साम्बपञ्चाशिकास्तुतिं ॥
सोऽयं परामृतरसो रसज्ञैरिह रस्यतां ।
स्वायुष्याच्चामृतस्पर्शः शतपद्या हि शान्तये ॥

समस्तागममहा+रहस्यविमृष्टायोगिसद्दृसम्प्रदायसम्पूर्णः श्रीवासुदेवस्य भगवतः पुत्रः साम्बः स्वात्मविवक्षत्स्तुतिं जगतोऽनुग्रहाय वक्तुमुपक्रमते शब्दार्थत्वेति । इत्यादि ।

End. स्वभीष्टां मोचलक्ष्मीं घटयतमिति शिवं ।
कश्चिच्छैवः परशिवसमावेशगाढ़ानुरागो-
द्रेकस्फूर्जन्नभिनवदशावेशवैवश्यशाली ।
सत्स्तोत्रेऽस्मिन् विवृतिरचनां चेमराजो न्ययुङ्क्त
त्वेतन्नैवं झटिति घटितं दर्शनीयं हि सद्भिः ॥

Colophon. इति महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तपादपद्मोपजीविश्रीक्षेमराजकृतौ साम्बपञ्चाशिकाविवृत्तिः समाप्ता ।

विषयः । साम्बपञ्चाशिकाया व्याख्यानम् ।

No. 3337. योगविवेकद्वात्रिंशिका । Substance, country-made paper. 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyatapausála. Appearance, old. Verse. Incorrect. Sanskrit.

Yogaviveka-dvátriñśiká. A short summary of the principle of the Yoga meditation as inculcated by Jains. Anonymous.

Beginning. इच्छासाखसामर्थ्यमाश्रित्य त्रिविधोऽप्ययं।
गीयते योगः शास्त्रज्ञैर्निर्व्याजं यो विधीयते ॥
चिकीर्षोः श्रुतशास्त्रस्य ज्ञानिनोऽपि प्रमादिनः ।
कालादिविकलो योग इच्छायोग उदाहृतः ॥ इत्यादि ।

End. फलावचकयोगस्तु सद्भ्य एव नियोगतः ।

सानुबन्धफलावाप्तिर्धर्म्मसिद्धौ सतां मता॥
इत्थं योगविवेकस्य विज्ञानाद्वीतकल्मषः।
यतमानो यथाशक्ति परमानन्दमश्नुते॥

Colophon. इति योगविवेकद्वात्रिंशिका समाप्ता।

विषयः। जैनमतेन इच्छायोगादिकथनं।

No. 3338. योगावतारद्वात्रिंशिका। Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Yogávatára-dvátriñśiká. On conscious and unconscious Yoga meditation of the Jains. Anonymous.

Beginning. सम्प्रज्ञातोऽपरश्चेति द्विधान्यैरयमीरितः।
सम्यक् प्रज्ञायते येन सम्प्रज्ञातः स उच्यते॥
विकल्पेन विचारेणानन्देनास्मितयान्वितः।
भाव्यस्य भावनाभेदात् सम्प्रज्ञातश्चतुर्विधः॥ इत्यादि।

End. मिथ्यात्वे मन्दतां प्राप्ते मित्राद्या अपि दृष्टयः।
मार्गाभिमुखभावेन कुर्व्वते मोक्षयोजनं॥
प्रकृत्या भद्रकः शान्तो विनीतो मृदुरुत्तमः।
सूत्रे मिथ्यादृगप्युक्तः परमानन्दभागतः॥

Colophon. इति योगावतारद्वात्रिंशिका समाप्ता।

विषयः। अन्यमतेन सम्प्रज्ञातासम्प्रज्ञातरूपयोगद्वयविवेचनं।

No. 3339. क्लेशहानोपायद्वात्रिंशिका। Substance, country-made paper. 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Kleśa-hánopáya-dvátriñśiká. A treatise on the subject of the destruction of mundane pain according to the doctrines of Jaina philosophy.

H. P. S.

Beginning. ज्ञानञ्च सदनुष्ठानं सम्यक् सिद्धान्तवेदिनः।
क्लेशानां कर्म्मरूपाणां हानोपायं प्रचक्ष्यते॥

नैरात्म्यदर्शनादन्ये निबन्धनवियोगतः ।
क्लेशप्रहाणमिच्छन्ति सर्व्वथा तर्कवादिनः ॥ इत्यादि ।

End. क्लेशाः पापानि कर्म्माणि बहुभेदानि नो मते ।
योगादेव क्षयस्तेषां +भोगादनवस्थितेः ॥
ततो निरुपमं स्थानमनन्तमुपतिष्ठते ।
भवप्रपञ्चरहितं परमानन्दमेदुरं ॥

Colophon. इति क्लेशहानोपायद्वात्रिंशिका समाप्ता ।

विषयः । जैनागमोक्तयोगेनैव अविद्यास्मितारागद्वेषाभिनिवेशरूपपञ्चविधक्लेशनिवृत्तिरिति-निरूपणम् ।

No. 3340. योगमाहात्म्यद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Yogamáhátmya-dvátriṅśiká. Thirty-two stanzas on the Sanctity and Superiority of *Yoga*.

H. P. S.

Beginning. शास्त्रस्योपनिषद्योगो योगो मोक्षस्य वर्त्मनी ।
अपायशमनो योगो योगः कल्याणकारणं ॥
संसारवृद्धिर्धनिनां पुत्रदारादिना यथा ।
शास्त्रेणापि तथा योगं विना हन्त विपश्चितां ॥ इत्यादि ।

End. भरतो भरतक्षौणीं भुञ्जानोऽपि महामतिः ।
तत्कालं योगमाहात्म्याद्बुभुजे केवलश्रियं ॥
पूर्व्वमप्राप्तधर्म्मापि परमानन्दनन्दितः ।
योगप्रभावतः प्राप मरुदेवः परं पदं ॥

Colophon. इति योगमाहात्म्यद्वात्रिंशिका समाप्ता ।

विषयः । जैनागमोक्तयोगमाहात्म्यादिकथनम् ।

No. 3341. भक्तिद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Bhakti-dvátriñśiká. On the necessity of erecting and consecrating temples and doing other acts of religious charity by the devoted followers of Jina.

H. P. S.

Beginning. श्रमणानामियं पूर्णा स्वतोक्ताचारपालनात् ।
द्रव्यस्तवाद्गृहस्थानां वेश्मतस्त्वद्धि + + यं ॥
न्यायार्ज्जितधनो धीरः सदाचारः शुभाशयः ।
भवनं कारयेज्जैनं गृही गुर्व्वादिसम्मतः ॥ इत्यादि ।

End. यच्च धर्म्मार्थ + त्यादि तदपेक्ष्य दशान्तरं ।
शङ्का सा + किल श्रेयस्तूपेत्यापि प्रवृत्तितः ॥
पूजया परमानन्द + पकारं विना कथं ।
ददाति पूज्य इति चेच्चिन्तामण्यादयो यथा ॥

Colophon. इति भक्तिद्वात्रिंशिका समाप्ता ।

विषयः । जैनभक्तिमतां तन्मन्दिरादिनिर्म्माणावश्यकतादिकथनम् ।

No. 3342. साधुसामग्र्यद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas, Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyatapausála. Appearance. old. Verse. Incorrect. Sanskrit.

Sádhu-sámagrya-dvátriñśiká. On the purification of the mind.

H. P. S.

Beginning. ज्ञानेन ज्ञानिभावः स्याच्छिचुभावश्च भिक्षया ।
वैराग्येण विरक्तत्वं संयतस्य महात्मनः ॥
विषयप्रतिभासाख्यं तथात्मपरिणामवत् ।
तत्त्वसंवेदनञ्चेति त्रिधा ज्ञानं प्रकीर्त्तितं ॥ इत्यादि ।

End. स्वेच्छाचारे च बालानां मालिन्यं मार्ग + रिणः ।
गुणानां तेन सामग्र्यं गुणवत्पारतन्त्र्यतः ॥
इत्थं विज्ञाय मतिमान् यतिगीतार्थसङ्गकृत् ।
+ + शुद्ध्या चरन् धर्म्मं परमानन्दमश्नुते ॥

Colophon. इति साधुसामग्र्यद्वात्रिंशिका समाप्ता ।

विषयः । चित्तशुद्ध्युपायकथनम् ।

No. 3343. चैत्यवन्दनसूत्रम्। Substance, country-made paper, 12 × 5 inches. Folia, 20. Lines, 7 on a page. Extent, 235 ślokas. Character, Nágara. Date, ? Place of deposit, Válucbara, Panchấyata-pausála. Appearance, old. Prose and verse. Incorrect. Mágadhí.

Chaitya-vandana-sútra. The merits of worshipping *Chaityas,* the process of worshipping and the qualification of the worshipper.

H. P. S.

Beginning. चत्तारि मङ्गलं (?)। अरिहंता मङ्गलं। सिद्धा मङ्गलं। साहू मङ्गलं। केवलिपन्नत्तो धम्मो मङ्गलं। चत्तारि लोगुत्तमा। अरिहंता लोगुत्तमा। सिद्धा लोगुत्तमा। साहू लगुत्तमा। केवलिप. .ो धम्मो लोगुत्तमा। इत्यादि।

End. श्रीपुंडरीयगेयमपमुहागणहारिणो महामुणिणो।
तिहुयणपणमियचलणा सरणं मम मोहनिद्दलणा॥

Colophon. इति श्रीचैत्यवन्दनसूत्रं समाप्तं।

विषयः। चैत्यवन्दनस्य प्रकृष्टशुभाध्यवसायनिबन्धनत्वेन ज्ञानावरणादिलक्षणकर्म्मक्षमादिफलत्वादवश्यकर्त्तव्यत्वेन तद्विधिकथनमुखेन तदधिकार्य्यादिकथनम्।

No. 3344. श्रावकाराधना। Substance, country-made paper, 12 × 5 inches. Folia, 4. Lines, 15 on a page. Extent, 202 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchấyata-pausála. Appearance, old. Prose and verse. Incorrect. Sanskrit.

S'rávakárádhaná. The process of daily worship, &c., of Jaina laymen. By Samaya-sundara Gani, of Uchch. The work was composed in the year 1667 of the S'aka (?) era.

H. P. S.

Beginning. श्रीसर्व्वानं प्रणिपत्य दुष्टकष्टप्रणाशनं।
श्रावकाराधनां वक्ष्ये सुगमां शिष्यहेतवे॥

अत्र आराधनायां पञ्च अधिकाराः। सम्यक्त्वशुद्धिः। पापस्थानकपरिहारः। लक्षजीवक्षामणं। दुष्कृतगर्हा। सुकृतानुमोदना। इत्यादि।

End. आराधनां सुगमसंस्कृतवार्त्तिकाभ्यां
चक्रे क्रमात् समयसुन्दर आदरेण।
उच्चाभिधाननगरे महिमासमुद्र-
शिष्याग्रहेण मुनिषड्रसचन्द्रवर्षे॥

Colophon. इति श्रावकाराधना समाप्ता।

विषयः। श्रावकाणां नित्योपासनादिविधिकथनम्।

No. 3345. चैत्यवन्दनवृत्तिः, वा ललितविस्तरा । Substance, country-made paper, 13 × 5 inches. Folia, 26. Lines, 15 on a page. Extent, 1,196 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, new. Prose. Generally correct. Sanskrit.

Chaitya-vandaná-vṛitti or Lalita-vistará. A commentary on No. 3343. By Haribhadra A'cháryya.

H. P. S.

Beginning. प्रणम्य भुवनालोकं महावीरं जिनोत्तमं ।
चैत्यवन्दनसूत्रस्य व्याख्येयमभिधीयते ॥
अनन्तागमपर्य्यायं सर्व्वमेव जिनागमे ।
सूत्रं यतोऽस्य कार्त्स्न्येन व्याख्यां कः कर्त्तुमीश्वरः ॥
यावत् तथापि विज्ञातमर्थजातं मया गुरोः ।
सकाशादल्पमतिना तावदेव ब्रवीम्यहं ॥
ये सत्वाः कर्म्मवशतो मत्तोऽपि जड़बुद्धयः ।
तेषां हिताय गदतः सफलो मे परिश्रमः ॥

इत्यवाह । अचिन्त्यमत्र साफल्यं । चैत्यवन्दनस्यैव निष्फलत्वात् । इत्यत्र उच्यते । इत्यादि ।

End. सम्यग्ज्ञाता गुण एव श्रद्धाद्यतिशयभावतः विधिविरहेण महाकल्याणसिद्धेरित्यलं प्रसङ्गेन ।

आचार्य्यहरिभद्रेण दृष्टा सन्न्यायसङ्गता ।
चैत्यवन्दनसूत्रस्य वृत्तिर्ल्ललितविस्तरा ॥
य एनां भावयत्युच्चैर्मध्यस्थो नान्तरात्मना ।
सवन्दनां सबीजं वा नियमादधिगच्छति ॥
पराभिप्रायमज्ञात्वा तत्कृतस्य न वस्तुनः ।
गुणदोषौ सता वाच्यौ प्रश्न एव तु युज्यते ॥
— — — — — ।

Colophon. इति ललितविस्तरा नाम चैत्यवन्दनवृत्तिः समाप्ता ।

विषयः । चैत्यवन्दनसूत्रस्य व्याख्यानम् ।

No. 3346. विनयद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Vinaya-dvátriñśiká. On Jaina religious discipline and how it leads to emancipation.

H. P. S.

Beginning. कर्म्मणां द्राग्विनयनाद्विनयो विदुषां मतः ।
अपवर्गफलाद्यस्य मूलं धर्म्मतरोरयं ॥
ज्ञानदर्शनचारित्रतपोभिरुपचारतः ।
अयञ्च पञ्चधा भिन्नो दर्शितो मुनिपुङ्गवैः ॥ इत्यादि ।

End. क्रियते विनयो यैस्तु + + +रि परैरपि ।
तैरप्यप्रेसरीभूय मोक्षमार्गे विलुप्यते ॥
नियुंक्ते यो यथास्थानमेनं तस्य तु सन्निधौ ।
स्वयंवराः समायान्ति परमानन्दसम्पदः ॥

Colophon. इति विनयद्वात्रिंशिका समाप्ता ।

विषयः । जैनागमोक्तज्ञानदर्शनादीनां विनयभेदलक्षणकथनपूर्व्वकं विनयादेव मोक्षो भवतीति-कथनम् ।

No. 3347. केवलिभुक्तिव्यवस्थाद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect.

Kevali-bhukti-vyavasthá-dvátriñśiká. The mode of eating, &c., among the Jaina monks. It is a work belonging to the Svetámbara sect who appear to rejoice at the discomfiture of their naked rivals, the Digambaras.

H. P. S.

Beginning. सर्व्वथा दोषविगमात् कृतकृत्यतया तथा ।
आहारसंज्ञाविरहादनन्त + + सङ्गतेः ॥
दग्ध + + सरत्वाच्च वेदनीयस्य कर्म्मणः ।
अक्षोद्भवतया देहगतयोः सुखदुःखयोः ॥ इत्यादि ।

End. कलङ्कैः कल्पितैर्दुष्टैः स्वामितो नैव दुष्यति ।
चौराद्युत्क्षिप्तधूलीभिः स्पृश्यते नैव भानुमान् ॥
परमानन्दितैरित्थं दिगम्बरविनिग्रहात् ।
प्राप्तं सिताम्बरैः + + जैनं जयति शासनम् ॥

Colophon. इति केवलिभुक्तिव्यवस्थाद्वात्रिंशिका समाप्ता ॥
विषयः । जिनसम्मतकेवलिनां भुक्त्यादिकथनम् ।

No. 3348. मुक्तिद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pan̲cháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Mukti-dvátriñśaká. The establishment of the Jaina theory of emancipation by the refutation of the theories on the same subject of other Schools.

H. P. S.

Beginning. दुःखध्वंसः परा मुक्तिर्मानं दुःखलमत्र च ।
आत्मकालान्यग++प्रतियोगिन्यवृत्तिमान् ॥
सत्कार्य्यमात्रवृत्तित्वात् प्रागभावो सुखस्य यः ।
तदनादा++ध्वंसप्रतियोगिनि वृत्तिमत् ॥ इत्यादि ।

End. उपचारोऽत्र ना++साक्षिणि चात्र दृश्यते ।
नित्यं विज्ञानमानन्दं ब्रह्मेत्यप्यपरा श्रुतिः ॥
परमानन्दलयतां परमानन्दयाचनां । (?) ।
परमानन्दपीताः स्मः परमानन्दचर्य्यया ॥ (?) ॥

Colophon. इति मुक्तिद्वात्रिंशिका समाप्ता ।
विषयः । अन्याभिमतमुक्तिलक्षणनिन्दाकथनपूर्व्वकं जैनोक्तमुक्तिकथनम् ।

No. 3349. सज्जनस्तुतिद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 4. Lines, 6—7 on a page. Extent, 68 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pan̲chyáata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Sajjana-stuti-dvátriñśiká. In praise of religious men known for their acts of charity according to the Jaina doctrine.

H. P. S.

Beginning. नाम सज्जन इति त्रिवर्णकं कर्षकोटरकुटुम्बि+ङ्भवेत् ।
नोल्लसन्ति विषसक्तयस्तदा दिव्यमन्त्रनिहताः खलोक्तयः ॥
स्याद्बली बलमिह प्रदर्शयेत् सज्जनेषु यदि सत्सु दुर्ज्जनः ।
किं बलन्तु तमसोऽपि वर्ण्यते यद्भवेदसति भानुमालिनि ॥ इत्यादि ।

End. यत्र स्याद्वादविद्यापरिमिततिमिरध्यानसूर्य्यांशुधारा-
निस्तारा जन्मसिन्धोः शिवपुरपदवीं प्राणिनो यान्ति यस्मात् ।
अस्माकं किञ्च यस्माद्भवति शमरसैर्नित्यमाकर्षदृप्ति-
र्जैनेन्द्रं शासनन्तद्विलसति परमानन्दकन्दोऽम्बुवाहः ॥

Colophon. इति सज्जनस्तुतिद्वात्रिंशिका समाप्ता ।

विषयः । जैनागमोक्तविधानेन सत्कर्मशालिनां सज्जनानां प्रशंसादिकथनम् ।

No. 3350. तत्त्वार्थशास्त्रटीका । Substance, country-made paper, 13 × 4⅓ inches. Folia, 484. Lines, 13 on a page. Extent, 18,344 ślokas. Character, Nágara. Date, Sm. 1687. Place of deposit, Váluchara, Pánchájata-pausála. Appearance, old. Prose. Generally correct. Sanskrit.

Tattvártha-śástra-ṭíká. A commentary on the Jaina work entitled *Tattvártha-sútra*. By Siddhasena Gaṇi, disciple of Bhásvámí, who received his knowledge of Jaina doctrines from Siñha Súra, who was in his turn the disciple of Dina Gaṇi.

Beginning. ॐ नमः सिद्धेभ्यः ।

+ + + + + व्यंज्ञ तत्त्वार्थस्य विधीयते ।
टीका संक्षेपतः स्पष्टा मन्दबुद्धिविबोधिनी ॥

सम्यगर्हत्प्रवचनमधिगम्य कालसहनश्रद्धायुरादेः परिहाणिमवलोक्य सत्त्वानुकम्पया समासतो मोक्षमार्गमुपदेष्टुकाम आचार्य्य इदमाह । सम्यग्दर्शनशुद्धं यो ज्ञानं विरतिमेव वाप्नोति । अत्र सम्यग्दर्शनशुद्धमिति कतरो विग्रह आख्यीयते । यदि तावत् सम्यग्दर्शनेन शुद्धमिति करोति करणे तृतीया । इत्यादि ।

End. सुखलक्षणमनन्तमनुपमं परमार्थं मोक्षमचिरेण प्राप्नुतीति ॥

Colophon. आसीद्देवगणिक्षमाश्रमणतां प्रापत् क्रमेणैव यो
विद्वत्सु प्रतिभागुणेन जयिना प्रख्यातकीर्त्तिर्भृशं ।
वोढ़ा शीलभरस्य सच्छ्रुतनिधिर्मोक्षार्थिनामग्रणी-
र्ज्वालामलसुचक्रैर्निजतपस्तेजोभिरव्याहतं ॥

— — — — — — ।

तस्याभूत्परतत्त्वादिनिर्जयपटुः सैंही दधच्छूरतां
नाम्ना यश्च्युत सिंहसूर इति च ज्ञाताखिलार्थागमः ।
शिष्यः शिष्टजनप्रियः प्रियहितव्याहारचेष्टाश्रया-

द्भ्यानां शरणं भवौघपतनक्लेशार्द्दितानां भुवि ॥

— — — — — —।

शिष्यस्तस्य बभूव राजकशिरोरत्नप्रभाजालक-

व्यासज्जच्छुरितस्फुरन्नखमणिप्रोद्भासिपादद्वयः ।

भास्वामीति विजित्य नाम जगदे यस्तेजसां सम्पदा

ना + + भवनिर्जयोद्यतमतिर्विद्वज्जनाग्रेसरः ॥

— — — — — —।

तत्पादरजोऽवयवः स्वल्पागमशेमुषीकबहुजाद्यः ।

तत्त्वार्थशास्त्रटीकामिमां व्यधात् सिद्धसेनगणिः ॥

अष्टादशसहस्राणि द्वे शते च तथा परे।

अशीतिरधिका द्वाभ्यां टीकायाः श्लोकसङ्ग्रहः ॥

ग्रन्थाग्रं १८२८० । संवत् १९८७॥

विषयः । जैनतत्त्वार्थसूत्रस्य व्याख्यानम् ।

No. 3351. तत्त्वार्थवृत्तिः, वा सर्व्वार्थसिद्धिः । Substance, country-made paper, 5 × 13 inches. Folia, 120. Lines, 14 on a page. Extent, 4,183 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pan͟cháyata-pausála. Appearance, fresh. Prose. Incorrect. Sanskrit.

Tattvártha-vṛitti ALIAS **Sarvártha-siddhi.** A commentary on the above described work.

Beginning. मोक्षमार्गस्य नेतारं भेत्तारं कर्म्मभूभृतां ।

ज्ञातारं विश्वतत्त्वानां वन्दे तद्गुणलब्धये ॥

कश्चिद्भव्यः प्रत्यासन्ननिष्ठः प्रज्ञावान् स्वहितमुपलिप्सुः विविक्ते परमरम्ये भव्यसत्त्वविश्रामास्पदे क्वचिदाश्रमपदे मुनिपरिषन्मध्ये सन्निषसं मूर्त्तमिव मोक्षमार्गं वाग्विसर्गं वपुषा निरूपयन्तं युक्त्यागमकुशलं परहितप्रतिपादनैककार्य्यमार्गनिषेव्यं निर्ग्रन्थाचार्य्यवर्य्यमुपसद्य सविनयं परिपृच्छति स्म । भगवन् किं नु खलु आत्मने हितं स्यादिति । स आह मोक्ष इति ।

End. एवं कालादिविभागेऽपि यथागममल्पबहुत्वं वेदितव्यं ॥

स्वर्गापवर्गसुखमाप्तुमनोभिरार्य्यै-

र्जैनेन्द्रशासनवरामृतसारभूता ।

सर्व्वार्थसिद्धिरिति सद्भिरुपात्तनामा

तत्त्वार्थवृत्तिरनिशं मनसा प्रधार्य्या ॥

तत्त्वार्थवृत्तिमुदितां विदितार्थतत्त्वाः
शृण्वन्ति ये परिपठन्ति सुधर्म्मभक्त्या ।
हस्ते कृतं परमसिद्धिसुखामृतं तै-
र्मर्त्यामरेश्वरसुखेषु किमस्ति वाच्यं ॥
येनेदमप्रतिहतं सकलार्थतत्त्व-
मुद्योतितं विमलकेवललोचनेन ।
भक्त्या तमद्भुतगुणं प्रणमामि वीर-
मारान्नरामरगणार्च्चितपादपीठं ॥

Colophon. इति तत्त्वार्थवृत्तौ सर्व्वार्थसिद्धिसंज्ञिकायां दशमोऽध्यायः समाप्तः । ग्रन्थ-संख्या ४२०० ।

विषयः । जैनतत्त्वार्थसूत्रस्य व्याख्यानम् ।

No. 3352. मित्राद्वात्रिंशिका । Substance, country-mode paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Mitrádvátriñśika. Thirty-two stanzas on most beneficial Jain obligations.

Beginning. मित्रायां दर्शनं + + योगाङ्गञ्च यमो भवेत् ।
अखेदो देवकार्य्यादावन्यत्राद्वेष एव च॥
अहिंसासून्टतास्तेयब्रह्माकिञ्चनता यमाः ।
दिक्कालाद्यनवच्छिन्नाः सर्व्वे भौमा महाव्रतं ॥ इत्यादि ।

End. विनैनमतिमूढानां येषां योगोत्तमस्पृहा ।
तेषां हन्त विना नावमुत्तितीर्षा महोदधेः ॥
तन्मित्रायां स्थितो दृष्टो मद्योगेन गरीयसा ।
समारुह्य गुणस्थानं परमानन्दमश्नुते ॥

Colophon. इति मित्राद्वात्रिंशिका समाप्ता ।

विषयः । जैनमतेन मित्रायां योगनिरूपणादिकम् ।

No. 3353. तारादित्रयद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character,

Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Táráditraya-dvátriñśika. Thirty-two stanzas on the planets in the Jain system.

Beginning. तारायान्तु मनाक् स्पष्टं दर्शनं नियतं शुभं ।
अनुद्वेगो हितारम्भे जिज्ञासा तत्त्वगोचरा ॥
नियमाः शौचसन्तोषौ स्वाध्यायतपसा अपि ।
देवताप्रणिधानञ्च योगाचार्य्यैरुदाहृतं ॥ इत्यादि ।

End. एते स्वचेष्टयात्मानं मलिनं कुर्व्वते निजं ।
वड़िशामिषवत्तुच्छे प्रसक्ता भोगतः सुखे ॥
अवेद्यसंवेद्य+दं सत्सङ्गागमयोगतः ।
तद्दुर्गतिपदं जेयं परमानन्दमिच्छता ॥

Colophon. इति तारादित्रयद्वात्रिंशिका समाप्ता ।

विषयः । जैनमतेन तारादित्रययोगकथनम् ।

No. 3354. कुतर्कग्रहनिवृत्तिद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara,. Pancháyata-pausála. Appearance, old. Verse. Generally correct. Sanskrit.

Kutarka-graha-nivṛitti-dvátriñśiká. Thirty-two stanzas on the suppression of doubts and false arguments.

Beginning. जायमानेऽत्र राजीवचमूचरण+च्छदे । (?) ।
निवर्त्तते स्वतः शीघ्रं कुतर्कविषमग्रहः ॥
शमारामानलज्वाला हिमा+ज्ञान+पङ्कजे ।
श्रद्धाम्बुन्यं स्मयोल्लासः कुतर्कः सुन्दनार्गला ॥ इत्यादि ।

End. जायेरन् हेतुवादेन पदार्था यदतीन्द्रियाः ।
कालेन तावता प्राज्ञैः कृतः शास्त्रेषु निश्चयः ॥
तत्कुतर्कग्रहस्त्याज्यो ददता दृष्टिमागमे ।
प्रायोऽधर्म्मा अपि त्याज्याः परमानन्दसम्पदि ॥

Colophon. इति कुतर्कग्रहनिवृत्तिद्वात्रिंशिका समाप्ता ।

विषयः । जैनागमोक्तविषये हेतुवादो न कर्त्तव्य इति निरूपणम् ।

No. 3355. सद्दृष्टद्वात्रिंशिका। Substance, country-made paper, 12 x 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Slightly correct. Sanskrit.

Sadrishṭa-dvátriñśika. Thirty-two stanzas on mental obstruction to Jain morality.

Beginning. प्रत्याहाराः स्थिरा यस्य दर्शनं नित्यमक्षमं ।
तथा निरतिचारार्थां सूक्ष्मबोधसमन्वितं ॥
विषयासम्प्रयोगे+स्वरूपानुकृतिः किल ।
प्रत्याहारो हृषीकाणामतदायत्तताफलः ॥ इत्यादि ।

End. केवलं श्रियमासाद्य सर्व्वलब्धिफलान्वितां ।
परं परार्थमासाद्य ततो योगान्तमश्नुते ॥
तत्रायोगाद्योगमुख्याद्भवोपग्राहिकर्म्मणां ।
चयं कृत्वा प्र+ +पूर्व्वैः परमानन्दमन्दिरं ॥

Colophon. इति सद्दृष्टद्वात्रिंशिका समाप्ता।

विषयः। जैनमतेन प्रत्याहारादिफलकथनम् ।

No. 3356. भिक्षुद्वात्रिंशिका। Substance, country-made paper, 12 x 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara. Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Bhikshu-dvátriñśiká. Thirty-two stanzas on Jain mendicancy.

Beginning. नित्यं चेतः समाधाय यो निष्क्रम्य गुरूदिते ।
प्रत्यायिषति न वान्ते+वशः कुटिलभ्रुवां (?) ॥
पृथिव्यादींश्च षट्कायान् सुखे+ +सुखद्विषः ।
गणयित्वात्मतुल्यान् यो महाव्रतरतो भवेत् ॥ इत्यादि ।

End. अज्ञानज्ञ्यभिक्षुस्तु शुद्धसंविग्नपाक्षिकः ।
सम्पूर्य्या प्रतिमां दीर्घां गृही+ +ग्रहीष्यति ।
केचिदुक्ता अनन्तेषु भावभिक्षोर्गुणाः पुनः ।
भाव्यमाना अमी सम्यक् परमानन्दसम्पदे ॥

Colophon. इति भिक्षुद्वात्रिंशिका समाप्ता ।

विषयः। जैनभिक्षोः संक्षेपेण कर्त्तव्यतानिरूपणम् ।

No. 3357. दीक्षाद्वात्रिंशिका । Substance, couutry-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchāyata-pausála.

Díkshá-dvátriñśiká. Thirty-two stanzas on Jain initiation.

Beginning. दीक्षा हि श्रेयसी दानाद्शिवक्षपणाद्पि ।
सा ज्ञानिनो + योगेन ज्ञाननिष्ठावतोऽथ वा ॥
एकः स्यादिह चक्षुष्मानन्यस्तदनुवृत्तिमान् ।
प्राप्नुतो युगपद्ग्रामं गन्तव्यं यद्भावपि (?) ॥ इत्यादि ।

End. विचित्रत्वमनालोच्य बक्ष+त्वादिना श्रुतं ।
दीक्षाप्युद्दैकरूपेण इथा भ्रान्तं दिगम्बरैः ॥
चित्रा क्रियात्मना + +मेका सामायिकात्मना ।
तस्मात् समुच्चयेनास्थे परमानन्दकृन्मता ॥

Colophon. इति दीक्षाद्वात्रिंशिका समाप्ता ।
विषयः । जैनदीक्षानिरूपणादिकम् ।

No. 3358. पातञ्जलयोगलक्षणविचारद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchāyata-pusála. Appearance, old. Verse. Incorrect. Sanskrit.

Pátanjala-yoga-lakshaṇa-vichára-dvátriñśiká. Thirty-two stanzas on the elements of Pátanjala yoga compared with the Jain system.

Beginning. चित्तवृत्तिनिरोधन्तु योगमाह पतञ्जलिः ।
द्रष्टुं स्वक + वस्थानं यत्र स्यादविकारिणि ॥
आपन्नो विषयाकारं यत्र चेन्द्रियवृत्तितः ।
पुमान् भाति तथा चन्द्रश्चलन्नीरे चलन् यथा ॥ इत्यादि ।

End. योगारम्भोऽथ विक्षिप्ते व्युत्थाने क्षिप्तमूढयोः ।
एकाग्रे च निरुद्धे च समाधि+मि चेन्न तत् ॥
योगारम्भोऽपि योगस्य निश्चयेनोपपादनात् ।
मद्युक्तलक्षणं तस्मात् परमानन्दकृत् सतां ॥

Colophon. इति पातञ्जलयोगलक्षणद्वात्रिंशिका समाप्ता ।

विषयः। संक्षेपेण पातञ्जलशास्त्रोक्तयोगलक्षणादिविवेचनपुरःसरं जैनागमोक्तयोगस्य प्रशंसाकीर्त्तनम्।

No. 3359. पूर्व्वसेवाद्वात्रिंशिका। Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Válucbara, Pancháyata-pausála, Appearance, old. Verse. Incorrect. Sanskrit.

Púrva-sevá-dvátriñśika. Thirty-two stanzas on the most revered gods, or those who should be honoured most, of the Jain system.

Beginning. पूर्व्वसेवानुयोगस्य गुरुदेवादिपूजनं।
सदाचारस्तथा + + द्वेषश्चेति प्रकीर्त्तिताः॥
माता पिता कलाचार्य्य एतेषां ज्ञातयस्तथा।
वृद्धा धर्म्मोपदेष्टारो गुरुवर्गः समासतः॥ इत्यादि।

End. नचायमेव रागः स्यान्मृदुमध्यादिकल्पतः।
तत्रोपायेन + + + योगिभेदप्रदर्शनात्॥
द्वेषस्याभावकल्पत्वाद्द्वेष एक एव हि।
रागात् क्षिप्रं क्रमाच्चातः परमानन्दसम्भवः॥

Colophon. इति पूर्व्वसेवाद्वात्रिंशिका समाप्ता।

विषयः। गुरुदेवसदाचारादिनिरूपणपूर्व्वकं प्रथममेव तेषां सेवनावश्यकादिकथनादिकम्।

No. 3360. मुक्त्यद्वेषप्राधान्यद्वात्रिंशिका। Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Muktyadvesha-pradhánya-dvátriñśiká. Thirty-two stanzas on the purification of the mind.

Beginning. उक्तभेदेषु योगीन्द्रैर्मुक्त्यद्वेषः प्रशस्यते।
मुक्त्युपायेषु न चेष्टा + + नायैव यत्नतः॥
विषान्नतृप्तिसदृशं त + तो व्रतदुर्ग्रहः।
उक्तः शास्त्रेषु शस्त्राग्निव्यालदुर्ग्रहसन्निभः॥ इत्यादि।

End. वीर्य्योल्लासस्ततश्च स्यात्ततः स्मृतिरनुत्तरा।
ततः समाहितं चेतः स्थैर्य्यमप्यवलम्बते॥

अधिकारित्वमित्यमपुनर्बन्धकतादिना ।
मुक्त्यद्वेषः क्रमेण स्यात् परमानन्दकारणं ॥

Colophon. इति मुक्त्यद्वेषप्राधान्यद्वात्रिंशिका समाप्ता ।

विषयः । मुक्त्यनुरागेणैव चित्तशुद्ध्यादिर्जायते इति तत्प्राधान्यादिकथनम् ।

No. 3361. अपुनर्बन्धकद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Apunarvandhaka-dvátriñśiká. Thirty-two stanzas on bondage and redemption.

Beginning. शुक्लपक्षेन्दुवत् प्रायो वर्द्धमानगुणः स्मृतः ।
भवाभिन + +दोषाणामपुनर्बन्धकोऽव्ययः ॥
अस्यैव पूर्वमेवोक्त्या मुख्यान्यस्योपचारतः ।
+ + + पतिताभिमुखो पुनः ॥ इत्यादि ।

End. सर्व्वोत्तमं यदेतेषु भिन्न + + तदिष्यते ।
फलवद्द्रुमसद्बीजप्ररोहोद्भेदसन्निभं ॥
तत्त्वं तचोक्तमखिलमपुनर्बन्धकस्य च ।
अवस्थाभेदता न्याय्यं परमानन्दकारणं ॥

Colophon. इति अपुनर्बन्धकद्वात्रिंशिका समाप्ता ।

विषयः । संसारस्य दुःखमयत्वकथनपूर्व्वकं सदा शान्तोदात्तत्वाद्यवलम्बनमेव अपुनर्बन्धाय भवतीति कीर्त्तनम् ।

No. 3362. मार्गद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Márga-dvátriñśiká. Thirty-two stanzas on the safest paths according to the Jain system.

Beginning. मार्गः प्रवर्त्तकं मानं शब्दो भगवतोदितः ।
संविग्नाशठगीतार्थाचरणं चेति स द्विधा ॥
द्वितीयानादरे हन्त प्रथमस्याप्यनादरः ।
ज्ञानस्यापि प्रधानत्वं साम्प्रतं श्रूयते यतः ॥ इत्यादि ।

End. ते च वो + + सम्यक्त्वमिथ्यादर्शनभूमयः ।
अतो द्वयोः प्रकृत्यैव वर्त्तितव्यं यथाबलं ॥
इत्थं मार्गस्थिताचारमनुसृत्य प्रवृत्तया ।
मार्गदृष्ट्यैव लभ्यन्ते परमानन्दसम्पदः ॥

Colophon. इति मार्गद्वात्रिंशिका समाप्ता ।

विषयः । संक्षेपेण जैनानां कर्त्तव्याकर्त्तव्यमार्गकथनम् ।

No. 3363. जिनमहत्त्वद्वात्रिंशिका ॥ Substance, country-made paper, 12 × 6 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchâyatapausála. Appearance, old. Verse. Incorrect. Sanskrit.

Jinamahattva-dvátriñśiká. Thirty-two stanzas on the superiority of the Jain doctrine over those of Kapila and others.

Beginning. रत्नत्रयध्वजच्छत्रचक्रचामरसम्पदा ।
विभुत्वं न विभोस्तस्य मायाविष्वपि सम्भवात् ॥
स्वामिनो वचनं यत्तु संवादिन्यायसङ्गतं ।
कुतर्कध्वान्तसूर्य्यांशुर्महत्त्वं तद्‌यदभ्यधुः ॥ इत्यादि ।

End. पूज्योऽयं स्मरणीयोऽयं सेवनीयोऽयमादरात् ।
अस्यैव शासने भक्तिः कार्य्या चेच्चेतनास्ति वः ॥
सारमेतन्मया लब्धं श्रुताब्धेरवगाहनात् ।
भक्तिर्भागवती बीजं परमानन्दसम्पदां ॥

Colophon. इति जिनमहत्त्वद्वात्रिंशिका समाप्ता ।

विषयः । कपिलादिभ्योऽपि जिनेन्द्रस्य महत्त्वातिशयमुपन्यस्य तच्छासनग्रहणावश्यकताकथनम् ।

No. 3364. विवेककौमुदी । Substance, country-made paper, 16 × 4 inches. Folia, 36. Lines, 6—7 on a page. Extent, 1,055 ślokas. Character, Bengali. Date, ? Place of deposit, Guptipáḍá, Rámadhan Vidyálañkára. Appearance, old. Prose and verse. Generally correct

Viveka-kaumudí. The indispensability of the obligation to wear the *sikhá* or crown lock and the holy thread. A discussion on the nature of *Vidhi*, *Niyama* and *Parisañkhyá*. The particular positions of the holy thread in reference to the body on various occasions. The

śráddha on the occasion of an eclipse. The blind man has no right to perform this particular *S'ráddha*. A refutation of the doctrine that Sudras can repeat Puráṇic *mantras*. The place for putting the sectarial or *tilaka* mark. The necessity of wearing gold and the *kusha* grass at the time of *japa*. The necessity of putting in *tila* or sesamum in pouring oblations to the manes. When a *mantra* is forgotten its place may be supplied with a *vyáhṛiti*. The eight forms of S'iva are to be worshipped before his own worship. The rule for touching flowers offered to S'iva. A female after her marriage and a Sudra after his tonsure can worship S'iva. The difference between consecration and presentation to a god. The circumstances under which the *Sapiṇḍíkaraṇa* may be performed before the end of the year after death. What is a *Nándímukha S'ráddha* or a S'raddha ceremony preceding auspicious occasions like marriage? Why is it called *Nándímukha?* The group of goddesses Gaurí and others is to be worshipped on the occasion of a *Nándímukha S'ráddha* and not the group *Bráhmaṇí* and others. The reading of the mantra, *Madhuvátá*, &c., Ric. I.

H. P. S.

Beginning. धर्म्मशास्त्रप्रवक्तारं प्रणम्य परमेश्वरं ।
विवेककौमुदी रम्या रामकृष्णेन तन्यते ॥
सन्ति यद्यपि विद्वद्भिर्निर्म्मिताः संग्रहाः स्मृतौ ।
दुरूहार्थप्रकाशाय कृतिरेषा तथापि मे ॥
सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशिखो व्युपवीतिश्च यत्करोति न तत्कृतं ।

अत्र पूर्व्वार्द्धेन नित्यता, उत्तरार्द्धेन च कर्म्माङ्गता बोधिता, अन्यथा उपवीताभावदशायां कृतं साङ्गमेव स्यात् । इत्यादि ।

End. नपुंसकमनपुंसकमित्यादिना तानीति निर्द्देशस्य सुकरत्वात् + + सहितैव दक्षिणा इति ।

Colophon. समाप्तश्चायं विवेककौमुदीग्रन्थः ।

विषयः । शिखोपवीतधारणनित्यताविचारः । विधिनियमपरिसंख्याविचारः । अत्र द्वितीयपत्रादारभ्य पञ्चमपत्रपर्य्यन्तं खण्डितं । कर्म्मविशेषे प्राचीनावीत्यादिनियमकथनं । स्नानविधिः । स्नानलक्षणनिरूपणादि । ग्रहणदर्शनादिव्यवस्था । ग्रहणश्राद्धादौ अन्धस्य अनधिकारकथनादि । शूद्राणां पौराणमन्त्रपाठानुमोदकमतदूषणं । तिलकधारणस्थानादिनिर्द्देशः । पत्न्या सह यागाद्यनु-

स्नानविधिविचारः। साहित्यलक्षणादिनिरूपणं। प्रौढ़पादलक्षणं। जपादिकाले सुवर्णकुशादि-परिग्रहावश्यकता। पवित्रादिलक्षणकथनं। तर्पणे तिलावश्यकता। पञ्चदेवतापूजाक्रमः। मन्त्रा-ध्यनादेशे व्याहृत्यादिविधानं। गन्धादिदाने विशेषकथनं। शिवपूजाविधिः। पूजनात् पूर्वमष्टमू-र्त्तिपूजाकर्त्तव्यतानयाक्षेपः। त्रिपुण्ड्रनियमः। स्नाननिर्म्माल्यस्पर्शादिविधानं। ग्रहणपुरश्चरणविधिः। स्त्रीशूद्रयोः यथाक्रमेण विवाहचूड़योरूर्द्ध्वं शिवपूजायामधिकारः। प्रतिष्ठोत्सर्गयोर्भेदप्रतिपादनं। उद्देश्यलक्षणादि। सम्प्रदानस्वरूपकथनादि। नान्दीमुखश्राद्धविधानं। विवाहमासादिनिरूपणं। गर्भाधानान्नप्राशनादिविधानं। सपिण्डनापकर्षविधानं। श्राद्धविघ्नव्यवस्था। नान्दीश्राद्धे गौर्य्यादि-पूजननियमः न तु ब्रह्माण्यादीनामितिकथनं। वसुधारादानविधिः तन्मन्त्रव्याख्या च। ब्राह्मणो-पवेशनक्रमः। कुत्र नान्दीमुखपदप्रयोगः कर्त्तव्य इति कथनादि। मधुवातेतिमन्त्रपाठविचारः। दक्षिणाकथनञ्च। इति समाप्तिः।

No. 3365. श्राद्धदीपः, वा श्राद्धप्रदीपः। Substance, country-made paper, 16 × 4 inches. Folia, 39. Lines, 6 on a page. Extent, 936 ślokas. Character, Bengali. Date, ? Place of diposit, Guptipáḍá, Rámadhana Vidyábhúshaṇa. Appearance, old. Prose and verse. Generally correct.

S'ráddha-dípa, or S'ráddha-pradípa. The definition of a S'ráddha. A refutation of the doctrine of the author of Kalpataru on the subject. Whether the six ancestors honoured at a *śráddha* as gods are to be taken with their wives or without them? The Ashṭaká-śráddha can be performed even by a Súdra. Various kinds of *S'ráddhas* and some directions in regard to their performance.

H. P. S.

Beginning. गोविन्दचरणद्वन्द्वं देवदेवाभिवन्दितं।
प्रणम्य जयकृष्णेन श्राद्धदीपः प्रकाश्यते॥
तत्र श्राद्धं चतुर्विधं। पार्व्वणैकोद्दिष्टसपिण्डीकरणाभ्युदयिकभेदात्। इत्यादि।

End. तत्प्रयोजनानुपस्थितौ तदकरणमेवेति निष्कर्षः।

Colophon. इति श्रीजयकृष्णभट्टाचार्य्यविरचितः श्राद्धप्रदीपः समाप्तः।

विषयः। श्राद्धलक्षणं। तत्र कल्पतरुकारमतदूषणादिकं। देवतालक्षणं। श्राद्धे पित्रादीनां षण्णां पत्नीनैरपेक्ष्येण देवतात्वमुत तत्साहचर्य्येणेत्यत्र समाधानं। श्राद्धे निमन्त्रणप्रकारादिकीर्त्तनं। ऊहविचारः। श्राद्धदेवाः। अर्घ्यादिविधानं। आमश्राद्धं। अन्नोत्सर्गप्रकारः। श्राद्धशेषभोजनं। श्राद्धस्य नित्यकालाः। अष्टकाश्राद्धं। तत्र शूद्रस्याप्यधिकारः। अश्वयुक्कृष्णपक्षश्राद्धं। तत्र अष्ट-म्यादिकल्पवाददूषणं। मघात्रयोदशीश्राद्धं। नित्यनैमित्तिकादिश्राद्धभेदाः। विकृतिपार्व्वणं। अमा-

बास्याश्राद्धं । तत्कालविचारः । तद्भिन्नकृष्णपक्षीयपार्व्वणव्यवस्था । एवं शुक्लपक्षीयस्य च । एकोद्दिष्टव्यवस्था । पार्व्वणलक्षणादि । नवान्नादिश्राद्धकालः । सावकाशश्राद्धं । जीवत्पितृकश्राद्धं । आभ्युदयिकश्राद्धं । द्वादशविधपुत्रकथनं । विविधप्रेतक्रियाकथनं । प्रेतश्राद्धाधिकारिपरम्परा । स्त्रीकर्त्तृकप्रेतश्राद्धे रजोयोगे व्यवस्थानिरूपणं । महागुरुनिपाते वर्ज्जनीयानि । सपिण्डीकरणश्राद्धं । तत्स्वरूपकथनं । मलमासपाते श्राद्धवृद्धिः । चतुर्व्विधमासलक्षणादिनिरूपणं । अशौचान्तद्वितीयदिनकृत्यप्रयोगः । वृषोत्सर्गादिकालः । वृषलक्षणं । विधिनियमपरिसंख्याविचारः । पर्य्युदासादिलक्षणं । तन्त्रप्रसङ्गन्यायस्वरूपनिरूपणं । शूद्रकर्त्तृकवृषोत्सर्गे पाकविचारः । इति ।

No. 3366. मलमासतत्त्वविवृतिः । Substance, country-made paper, 17×3½ inches. Folia, 77. Lines, 7 on a page. Extent, 2,381 ślokas. Character, Bengali. Date, Sk. 1722. Place of deposit, Guptipáḍá. Khudiráma Nyáyabhúshaṇa. Appearance, old. Prose. Correct.

Malamása-tattva-vivṛiti. A commentary or Raghunandana's *Malamásatattva* or the treatise on intercalary months. By Kásíráma Bhaṭṭácháryya Váchaspati. The MS. was copied in the S'aka year 1722.

Beginning. नत्वा गुरोश्चरणपद्मरजांसि मूर्ध्ना
श्रीकान्तकान्तचरणञ्च निधाय चित्ते ।
श्रीकाशिरामसुकृती कृतिनां हिताय
सम्यक् तनोति विवृतिं मलमासकस्य ॥
स्मृतिशास्त्राम्बुधौ लीलाकृतसेतुं जगद्गुरुं ।
विदितं त्रिषु लोकेषु नमामि रघुनन्दनं ॥

मीमांसादिनानाशास्त्रपारदृश्वा वन्द्यघटीयः श्रीमान् रघुनन्दनभट्टाचार्य्यः प्राचीनविचक्षणगणनानाविधव्याख्याजनितसन्देहं स्मृतिशास्त्रं मुन्यन्तरवचनयुक्तिभ्यां निर्णीय इदानीन्तनानां सुखबोधाय निबन्धांश्चकार । तत्र स्मृतिशास्त्रस्य स्वभावतो दुर्गमतया कानिचित् कठिनानि सन्ति, अतस्तानि मया यथामति व्याख्यायन्ते । तत्र मलमासतत्त्वव्याख्या । इत्यादि ।

End. स्यार्त्तस्तु विनामकं मलिम्लुचादिरूपं नाम यस्य सः । यद्वा + + + नाम असदेव तत्तन्मासविहितकर्म्मानर्हत्वादित्याहुः ।

यं प्रासूत समस्तशास्त्रनिपुणः श्रीरामकृष्णात्मजः
श्रीराधोत्तरवल्लभाख्यसुकृती सद्वीरचूड़ामणिः ।
तेन श्रीयुतकाशिरामकृतिना यत्नेन निष्पादिता
टीका नातिसुशृङ्खलापि कृतिभिः सानुग्रहैर्दृश्यतां ॥

Colophon. इति काशीरामभट्टाचार्य्यवाचस्पतिविरचिता मलमासतत्त्वविवृतिः समाप्ता । शक ॥ १७२९ ॥

विषयः । रघुनन्दनकृतमलमासतत्त्वस्य व्याख्यानं ।

No. 3367. प्रबोधिनी । Substance, country-made yellow paper, 16 × $3\frac{1}{2}$ inches. Folia, 57. Lines, 8 on a page. Extent, 2,137 ślokas. Character, Bengali. Date, ? Place of deposit. Guptipáḍá. Gañgádhara Vidyáratna. Appearance, fresh. Prose. Correct.

Prabodhiní. A commentary on Jagadíśa's work on the connotation and denotation of terms, entitled S'abdaśakti prakáśiká. By Rámabhadra Siddhántavágíśa.

H. P. S.

Beginning. विश्वतात जगन्मातरेवं गौरीगिरीशयोः ।
मिथः सम्भाषया स्मेरं हेरम्बं समुपास्महे ॥
गुरुमिव गुरुमिह नत्वा तत्कृतशब्दशक्तिप्रकाशिकासु ।
श्रीरामभद्रसुकृती कुरुते टीकां मुदे सुधियः ॥

शब्दशक्तीति शब्दस्य शक्तिर्बोधसामर्थ्यं । तत्प्रकाशिका इत्यर्थः । तेन ग्रन्थस्य लक्षणादिप्रकाशकत्वेऽपि न क्षतिः । ग्रन्थारम्भे ग्रन्थस्य आरम्भदशायां । वाक्यसमूहो ग्रन्थः । आनुपूर्व्वविशेषो वा । इत्यादि ।

End. अनुभवस्य बाधितत्वादित्याशयेनाडरित्युक्ता अस्वरसो व्यञ्जितः ।

Colophon. इत्यन्तं प्रचरन्ती शब्दशक्तिप्रकाशिकाविबोधिनी श्रीलरामभद्रसिद्धान्तवागीशभट्टाचार्य्यविरचिता ।

विषयः । जगदीशतर्कालङ्कारकृतशब्दशक्तिप्रकाशिकाया व्याख्यानं ।

No. 3368. अमरपञ्जिका । Substance, country-made paper, 12 × $2\frac{1}{2}$ inches. Folia, 63. Lines, 8 on a page. Extent, 2,709 ślokas. Character, Bengali. Date, ? Place of deposit, Guptipáḍá. Dínanátha Gañgopádhyáya. Appearance, too much decayed. Prose. Correct.

Amara-paṇjiká. A commentary, by Náráyaṇa, on Amara's well-known dictionary.

H. P. S.

Beginning. हृदिस्थमपि दूरस्थं सर्वमावृत्य तिष्ठति ।

यन्मन्त्रः परमं वीजं तदानन्दपदं नुमः ॥
रन्त्रः शशिभृता समं विविधकेलिमातन्वती
मुक्तः स्मरमहोत्सवे शिवमुखाब्जचुम्बार्थिनी ।
दिगम्बरहृताम्बरा विधुमवेक्ष्य मौलिस्थितं
ह्रिया नतमुखी सदा चितिधरेन्द्रकन्यावतु ॥
मङ्गलानन्दवीजानि भक्तानामति सन्ततं ।
गुरूणां चरणाब्जानि पुनःपुनरुपास्महे ॥
ज्ञात्वा शास्त्रमशेषमादिविदुषाञ्चालोक्य नानामतं
हेरम्बाङ्घ्रिसरोजयुग्ममलं नत्वातिभक्त्या सुधीः ।
श्रीनारायणपादपद्ममधुलिड्नारायणः श्रीनिधि-
र्यत्नेनामरपञ्जिकां वितनुते संक्षेपतः सत्कविः ॥

शास्त्रारम्भे प्रत्यूहव्यूहवारणकामाः शिष्टाचारानुमितवेदबोधितकर्त्तव्यताकं मङ्गलमाचरन्ति सूरयः । इत्यादि ।

End. प्रततिर्वततिस्तथेति हलायुधः । लतिः सौत्रो वेष्टनार्थः ।

Colophon. इतः परं खण्डितं ।

विषयः । अमरकृतनामलिङ्गानुशासनस्य व्याख्यानं ।

No. 3369. सुजनबोधकरी, वा मनोहरा । Substance, country-made paper, 12 × 2½ inches. Folia, 56. Lines, 7 on a page. Extent, 1,813 ślokas. Character, Bengali. Date, ? · Place of deposit, Guptipáḍá Telipáḍá. Dínanátha Gaṅgopádhyáya. Appearance, decayed. Prose. Incorrect.

Sujanabodhakarí ALIAS **Manohará.** A commentary by Rámachandra Kavi on Bháravi's well-known poem entitled Kirátárjuníya.

H. P. S.

Beginning. आनम्य सौम्यपदपद्ममन्दभक्त्या
श्रीमद्गुरोर्नियततीर्थविचारबुद्धेः ।
श्रीरामचन्द्र इतिनाम दधद्द्विजोऽहं
टीकामिमां सुजनबोधकरीं करोमि ॥
अनुग्राह्या वयं धीराः सुधीभिर्दृश्यतामियं ।

यदि मे स्खलनन्नात्र विदा यत्नेन शोध्यताम् ॥
इयं शिष्यसमूहस्य हिताय विहिता मया ।
नाम्ना मनोहरा टीका सरसा रसकारिणी ॥
श्रिय इति । कुरवो जना इत्यादि ।

End. स्वं आत्मीयं पुरुषकारं पौरुषमिव शैलमिन्द्रकीलं अभ्यासमाद् प्राप ॥
सारो बले स्थिरांशे च न्याय्ये क्लीवे वरे त्रिषु । इत्यमरः ।

Colophon. इति श्रीरामचन्द्रकविविरचितायां मनोहराख्यायां भारविटीकायां पञ्चमः स्वर्गः । श्रीहरिः ।

विषयः । भारविकृतकिरातार्ज्जुनीयकाव्यस्य व्याख्यानं ।

No. 3370. रत्नकोषकारमतविचारः । Substance, country-made paper, 16 × 3½ inches. Folia, 25. Lines, 8 on a page. Extent, 1,525 ślokas. Character, Bengali. Date, ? Place of deposit, Guptipáḍá. Khudiráma Nyáyabhúshaṇa. Appearance, decayed. Prose. Correct.

Ratna-kosha-kára-mata-vichára. The author of Ratna-kosha holds that with the help of two contradictory arguments, such as one for the establishment of the existence of fire in the mountain and the other for its non-existence, an inference in the shape of a doubt may be arrived at. The author of the present work attempts to refute his arguments.

H. P. S.

Beginning. ॐ नमो गणेशाय ।
परोक्षज्ञानं निश्चय + + + + सिद्धान्तः, रत्नकोषकारस्तु सत्प्रतिपक्ष + + + + + + + अनुमितिं स्वीकरोति । तत्र संशयत्वस्य लिङ्गपरामर्शादिजन्यतानवच्छेदकतया कथं ततः संशय उत्पद्यते—इति न आशङ्कनीयं । इत्यादि ।

End. तदपेक्षया लाघवेनापरकोट्यनुमितिसामग्र्यभावस्यैव निवेशयितुमुचितत्वादिति न किञ्चिदनुमितेः संशयत्वापत्तिरिति कृतमतिविस्तरेण ।

Colophon. इति रत्नकोषकारमतविचारः सम्पूर्णः ।

विषयः । रत्नकोषकारो हि सत्प्रतिपक्षसम्वलनदशायां संशयात्मिकामनुमितिमभ्युपगच्छति अत्र तु तस्य सारासारविमर्शनेन निराकरणं ।

No. 3371. मेघदूतटीका। Substance, country-made paper, 12 × 2½ inches. Folia, 15. Lines, 6 on a page. Extent, 1,167 ślokas. Character, Bengali. Date, ? Place of deposit, Guptipáḍá. Khudiráma Nyáyabhúshṇa. Appearance, decayed. Prose. Correct.

Meghadúta-ṭíká. A commentary, by Ravikara, on *Meghadúta* the Cloud Messenger by Kálidása.

H. P. S.

Beginning. परमानन्दसन्दोहं + + + + + + प्रभं।
गोविन्दमय्रभ + + मिन्दिरानन्दद्वन्दं॥

कश्चिदित्यादि। कश्चिदनिर्द्दिष्टनामा यक्षः। रामगिर्य्याश्रमेषु वसतिं वासस्थानं चक्रे। खण्डकाव्यमुखं कुर्य्यात् कश्चिदित्यादिभिः पदैः। इत्यादि।

End. अर्थान्तरन्यासमाह। केषामर्थिनां प्रार्थना याच्ञा अभ्युन्नतेषु महत्सु अवितथं फलं यस्याः सेयं सफला न स्यादिति काक्वा तु स्यादेवेति भावः।

Colophon. इति महोपाध्यायश्रीरविकरविरचिता मेघदूतटीका समाप्ता।

विषयः। कालिदासकृतमेघदूतकाव्यस्य व्याख्यानं।

No. 3372. कारकवादः। Substance, country-made paper, 15 × 4 inches. Folia, 16. Lines, 5 on a page. Extent, 700 ślokas. Character, Bengali. Date, ? Place of deposit, Guptipáḍá, Khudiráma Nyáyabhúshaṇa. Appearance, old. Prose. Incorrect.

Káraka-váda. On Sanskrit case marks and their uses, &c.

Beginning. इन्दारामन्दमन्दारवन्द्यमानन्दकन्दलं।
नत्वा कृष्णं कारकाणां वादोऽयं क्रियते मुदा॥
क्रियानिमित्तं कारकमिति न सामान्यलक्षणं। इत्यादि।

End. तत्र पतनक्रियायामेव पञ्चम्यर्थविभागजनकत्वान्वये अस्वद्वत्तिधारणक्रिया।

Colophon. इतः खण्डितत्वात् समाप्तिवाक्यं नास्ति।

विषयः। कारकाणां लक्षणादिनिरूपणं।

No. 3373. विस्तारचन्द्रिका। Substance, country-made paper, 15 × 4 inches. Folia, 19. Lines, 6 on a page. Extent, 588 ślokas. Character, Bengali. Date, ? Place of deposit, Guptipáḍá, Púrnachandra Bhaṭṭácháryya. Appearance, old. Prose. Correct.

Vistára-chandriká. A commentary, by Govinda Tarkavágíśa Bhaṭṭácháryya, on Sankara's A'nanda-laharí.

H. P. S.

Beginning. अद्वैतानन्दरूपां मम नियतमनोमात्रगम्यामरूपां
ब्रह्मोपेन्द्रेन्दुमौलिप्रमुखदिविषदो मायया मोहयन्तीं ।
जन्तूनां गर्भवासादपहृतिसमये शुद्धबुद्धिं निहन्त्रीं
नित्यां देवीं तुरीयां परशिवरटहिनीं चिन्मयीं तां भजामः ॥
गुरूणां पादाम्भोरुहयुगलमभ्यर्च्य सुचिरं
रहस्यं तन्त्राणां निखिलमधिकृत्याध्ययनतः ।
कृती श्रीगोविन्दस्तुहिनगिरिजानन्दलहरी-
स्तुतेर्भावं मुक्तापटलमिव यत्नाद्वितनुते ॥

अथ खलु महादेवः पूर्व्वयुगे जगदेवं तपोध्यानयज्ञादिविहीनमनादिवासनापङ्कमग्नबुद्धिधीयुः परमकारुणिकः श्रीशङ्कराचार्य्यरूपेण पुण्यक्षेत्रपावने द्रविड़देश सोमपीतिनां पंक्तिपावनानां द्विजानां कुले समवतीर्य्य परमहंसपरिव्राजकरूपी भोगस्वर्गैकजननीं तुरीयां स्तुवन् मन्त्रयन्त्रपूजा-सङ्केतं प्रकाशयति,—शिव—इत्यादिना । इत्यादि ।

End. एतेन पूज्यपूजकपूजोपचाररूपा त्वमसीतिभावः।

Colophon. इति श्रीगोविन्दतर्कवागीशभट्टाचार्य्यविरचितानन्दलहरीविस्तारचन्द्रिका समाप्ता ।

विषयः । शङ्कराचार्य्यकृताया आनन्दलहर्य्या व्याख्यानं ।

No. 3374. एकादशीतत्त्वदीपः । Substance, country-made yellow paper, 16 × 4 inches. Folia, 103. Lines, 8 on a page. Extent, 3,914 ślokas. Character, Bengali. Date, SK. 1742. Place of deposit, Sántipura, Kálidása Vidyávágíśa. Appearance, fresh. Prose. Generally correct.

Ekádaśítattvadípa. This is a commentary on the *Ekádaśítattva*, one of the 28 digests of Hindu law and rituals by Raghunandana. The author of the commentary is Rádhámohana Gośvámí commonly known as Gosvámí Bhaṭṭácháryya of Sántipura who flourished during the early part of this century and was a friend of Colebrooke. He was descended from Advaita the associate of Chaitaṇya, the Great preacher of Vaishṇavism in the Sixteenth Century.

H. P. S.

Beginning. भवेऽस्मिन् कान्तारे मुहुरटनदुःखैकविकलः
समीहे संलब्धुं तवचरणपाथोजशरणं ।
न योगो ज्ञानं वा भजनमपि यद्यपि हरे
तथाप्याशा दीर्घा तव च करुणा किं न कुरुते ॥
वन्दे श्रीकृष्णमानन्दघनं परममीश्वरं ।
राधास्वर्णलतासङ्गतमालरुचिविग्रहं ॥
श्रीराधामोहनो दीपं करोति शुभदर्शनं ।
एकादश्यादितत्त्वानां पूर्व्वाचार्य्यमतेच्छया ॥
ग्रन्थारम्भे विघ्नविघाताय मङ्गलमाचार्य्यः शिष्यशिक्षायै निबध्नाति प्रणम्येति । इत्यादि ।

End. स्मृतितत्त्वबुभुत्सयेति । एतेनैतद्ग्रन्थस्य निर्द्दोषत्वमित्युक्तं तत्त्वनिर्णायकत्वा·दिति ।

Colophon. इति कलियुगपावनावतारश्रीमदद्वैतवंशसम्भवश्रीराधामोहनगोस्वामिभट्टाचार्य्यविरचितैकादशीतत्त्वटीप्पणी सम्पूर्णेति ।
लिखितैकादशीतत्त्वटीका भारतशर्म्मणा ।
पञ्चवेदाब्धिभूमानेऽब्दे पीताम्बरदेशतः ॥

विषयः । रघुनन्दनकृतैकादशीतत्त्वस्य व्याख्यानं ।

No. 3375. प्रायश्चित्ततत्त्वटीका । Substance, country-made yellow paper, 16 × 4 inches. Folia, 94. Lines, 9 on a page. Extent, 4,230 ślokas. Character, Bengali, Date, ? Place of deposit, Sántipura, Kálidása Vidyávágíśa. Appearance, fresh. Prose. Correct.

Práyaschitta-tattva-ṭíká. A commentary on another of Raghunandana's digests—of the Law on expiation. By the same author. H. P. S.

Beginning. तड़िद्गौतो लीलाम्बुदरुचिररूपस्तरुतले
लसद्वंशीनादामृतनिकरवर्षी प्रियसखि ।
नवीनोऽयं किं मे रचयति हृदीतीङ्गितकथा-
मृदुस्पन्दा राधा जयति वकशत्रोर्हृदि गता ॥
स्फुटा प्रायश्चित्ततत्त्वव्याख्या मोहनशर्म्मणा ।
क्रियतेऽद्वैतवंश्येण गोविन्दरतिकाम्यया ॥

प्रारिप्सितग्रन्थसमाप्तिहेतुतया मङ्गलमाचरन् शिष्यशिक्षायै तदुपनिबध्नन् तदवधानाय प्रतिज्ञाञ्चाचरति प्रणम्येत्यादिना ।

End. चाण्डाल्यादिरजस्वलास्पर्शे तथाविधब्राह्मण्याः षड्रात्रद्वैगुण्यं शूलपाणिभिः सच्छूद्रात् चाण्डालादेस्त्रिगुणाधमत्वस्य कथनादिति ।

Colophon. इति श्रीमदद्वैतवंशोद्भवश्रीराधामोहनगोस्वामिभट्टाचार्य्यविरचिता प्रायश्चित्ततत्त्वटीका समाप्ता ।

विषयः । रघुनन्दनकृत-प्रायश्चित्ततत्त्वस्य व्याख्यानं ।

No. 3376 विवादार्णवसेतुः । Substance, country-made yellow paper, 16 × 3 inches. Folia, 175. Lines, 6 on a page. Extent, 4,462 ślokas. Character, Bengali. Date, ? Place of deposit, Sántipura, Kálidása Vidyávágíśa. Appearance, old. Prose and verse. Incorrect.

Vivádárṇava-setu. A digest of Hindu Law. Compiled by Paṇḍits from various parts of Bengal. The names of the Paṇḍits who assisted in the compilation are given in the Colophon, *viz.* :— Váṇeśvara, Kṛipaáráma, Rámágopála, Krishṇajívana, Víreśvara, Krishṇachandra, Gauríkánta Kalíśaṅkara, S'yámasundara, Kṛishṇakeśava and Sítáráma. Of these Váneśvara was the court poet of Rájá Kṛishṇachandra of Nadiya during the middle of the last century. The works consulted are those of Chaṇḍes'vara, Rája of Dhára, Visvarúpa, the author of the Mitáksharа́, Haláyudha, S'ríkrishṇa Váchaspati, the Author of Dharmaratna, S'ríkara, Súlapáṇi, Govinda, Lakshmídhara the author of the Tattvas, A'cháryya Chúḍámaṇi and Nátha Bhaṭṭa. The work commences with the origin and distribution of castes, and goes on with various topics of law, such as the laws relating to usury, mortgage, inheritance, partition of property, adoption, treasure troves, &c.

The work appears to have been written with the object of rivalling the work of Jagannátha Tarkapaṇchánana entitled Vivádabhaṅgárṇava which is known to Anglo-Indian lawyers as the Paṇchanana Code.

H. P. S.

Beginning. विश्वेषां शरणं नवाम्बुदरुचिः सद्भक्तचिन्तामणि
यः प्रत्यूहतमोविनाशमिहिरः कीनाशभीनाशनः ।
संसारैकमहार्णवे निपततां निस्तारवीजं नृणां

गोविन्दः कृपया सुरासुरगणैर्वन्द्यश्चिरं पातु वः ॥
चण्डेश्वधारेश्वरविश्वरूपा मिताक्षराकारहलायुधौ च ।
श्रीकृष्णवाचस्पतिधर्म्मरत्नकृतस्तथा श्रीकरशूलपाणी ॥
गोविन्दलक्ष्मीधरतत्त्वकारा आचार्य्यचूड़ामणिनाथभट्टाः ।
वाक्यानि चैषां सुविमृश्य कुर्म्मो ग्रन्थं विवादार्णवसेतुबन्धं ॥ इत्यादि ।

End. एवं कार्य्याणि सर्व्वाणि सर्व्वान् सम्यक् महीपतिः ।
देशानलब्धान् लिप्सेत लब्धांश्च परिपालयेत् ॥
इति विद्वद्भिरचिते विवादार्णवसेतुके ।
तरङ्गो निधिदण्डाद्यैरेकविंशोऽत्र कीर्त्तितः ॥
वाणेश्वर-कृपाराम-रामगोपाल-कृष्णजीवनाख्यैः ।
वीरेश्वर-कृष्णचन्द्र-श्रीगौरीकान्ताभिधानैः ॥
सद्भिः कालीशङ्कर श्यामसुन्दर-कृष्णकेशवसंज्ञैः ।
सीतारामसंज्ञैश्च कृतो ग्रन्थः स्फुरतु सभायां ॥
इत्यनेकविषयवासिविद्वद्वृन्दोपवर्णितः ।
विवादार्णवसेत्वाख्यो ग्रन्थः सम्पूर्णतां गतः ॥

Colophon. इति समाप्तिः ।

विषयः । वक्तव्यप्रतिज्ञा । वर्णादिसृष्टिकथनं । एषां वृत्तिनिरूपणं । राजप्रशंसा । राजच्छत्रलक्षणं । राजमन्त्रिलक्षणं । राजलेखकलक्षणं । दूतलक्षणं । राजवासस्थानलक्षणं । राजधर्म्मनिरूपणं । ऋणादानविवादपदं । वृद्धिः । अकृतवृद्धिः । परमवृद्धिः । वृद्धिनिषेधः । उद्ग्राहणविधानं । ऋणदानविधिः । दायभागः । अपुत्रधनाधिकारी । वानप्रस्थयतिब्रह्मचारिणां धनाधिकारिणः । स्त्रीधननिरूपणं । स्त्रीधनाधिकारिणः । विभाज्याविभाज्यता । पितृकृतविभागनिरूपणं । भ्रातृविभागादिकथनं । संसृष्टधनविभागः । अविभक्तधनस्य देयादेयत्वविचारः । विभागानन्तरागतस्य विभागः । एकमातृकविभिन्नपितृकाणां विभागः । दत्तकौरसयोर्विभागः । निह्नुतद्रव्यविभागः । भुक्तिनिरूपणं । व्यवहारदर्शनं । आततायिबधप्रायश्चित्तविचारः । भाषापादः । उत्तरपादः । क्रियापादः । लिखितनिरूपणं । निर्णयपादः । साक्ष्यविधिः । क्रियाबलाबलनिरूपणं । निक्षेपः । अस्वामिविक्रयः । सम्भूयसमुत्थानं । दत्ताप्रदानिकं । दत्तनिरूपणं । अदत्तनिरूपणं । भृतकविधिः । वेतनस्थानपाकर्म्मकथनं । पण्यस्त्रीविधिः । स्वामिपालविवादः । विक्रीयासम्प्रदानं । क्रीत्वानुशयः । सीमाविवादः । दृष्टादृष्टनिरूपणं । शस्यरक्षा । अदण्ड्यनिरूपणं । वाक्पारुष्यं । दण्डपारुष्यं । स्तेयनिरूपणं । प्रकाशाप्रकाशतस्करदण्डकथनं । चौरान्वेषणं । स्तेनातिदेशः । चौरापवादः । साहसनिरूपणं । घातकान्वेषणं । स्त्रीसंग्रहणं । अभिगमदण्डकथनं । बन्धक्यादिगमन-

दण्डकथनं। स्त्रीपुंधर्म्मनिरूपणं। मृतभर्त्तृकाधर्म्मनिरूपणं। द्यूतसमाह्वयः। प्रकीर्णककथनं। निरोधनिरूपणं।दण्डप्रशंसा। दत्तकग्रहणादिकथनञ्च।

अलभ्यमध्यमम्भोधेरिवाम्भो वङ्करत्नभृत् ॥
कला-कलाप-निलयः साहसस्यैकमन्दिरं ।
राजपुत्रो मूलदेवस्तत्र मूलं धियामभूत् ॥
स धूर्त्तविद्यैकधनः क्षपणानाथवान्धवः ।
कूटचेष्टामधुरिपूरूपलावण्यमन्मथः । इत्यादि ।

End. विड़म्बनाभिर्वक्त्रीभिर्मण्डिकं चण्डशासनः ।
निजग्राह ततो राजा पापानां कुशलं कियत् ॥

चौर्य्यात् स्वसुर्यमपि विक्रमराजराज

श्चानीय मण्डिकमखण्डनयो जघान ।

+न्यं नतेन विदधीत सुधीः कथञ्चि-

द्वापि जन्मनि विरुद्धफलानुबन्धि ॥

Colophon. इति श्रीमूलदेवकथा समाप्ता ।

विषयः । पाटलीपुत्राधिपपुत्रस्य सकलकलाकलापकुशलस्य मूलदेवस्य नितरां द्यूतव्यसनासक्ततया पित्रा निर्वासितस्य उज्जयिनीगमनपूर्व्वकं देवदत्ताभिधानायाः वेश्यायाः साहाय्येन तदानीमुज्जयिनीनाथस्य विमलसिंहस्य प्रीतिपात्रत्वप्राप्त्यादिवर्णनम् ।

No. 3387. सिद्धचक्रमाहात्म्यगाथावृत्तिः । Substance, country-made paper, 12 × 5 inches. Folia, 3. Lines, 16 on a page. Extent, 126 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Páncháyatapausála. Appearance, fresh. Prose. Incorrect. Sanskrit.

Siddha-chakra-máhátmya-gáthá-vṛitti. A commentary on twelve *gáthás* on the subject of a Tántric rite named *Siddhachakroddhára,* to be found in the work entitled Srípála-Charitra. By Ratna Shekhara Súrí, the head of the Tapogaṇa at Nágapura. The author of the commentary is Chandrakírtti. H. P. S.

Beginning. अथ ग्रन्थकार एकादशसंख्याभिर्गाथाभिः सिद्धचक्रोद्धारविधिमाह । तथेयमादिगाथा । गयणमकलियायं तमित्यादि । अथ गगनादिसंज्ञा मन्त्रशास्त्रेभ्यो ज्ञेया । तत्र गगन· शब्देन । इत्यादि ।

End. नवमं पूर्व्वं तस्य परमार्थरूपं परमरहस्यभूतमित्यर्थः ।

Colophon. इति श्रीनागपुरीय-तपोगण-नायक-श्रीरत्नशेखर-सूरिकृतौ श्रीसिद्धचक्रयन्त्रोद्धारे द्वादशश्लोके श्रीचन्द्रकीर्त्तिसूरिभिः कृता व्याख्या समाप्ता ।

इति श्रीसिद्धचक्रमाहात्म्यगाथावृत्तिः सम्पूर्णा ।

विषयः । रत्नशेखरसूरिकृत-श्रीपालचरित्रान्तर्गतसिद्धचक्रमाहात्म्यनिरूपकगाथाद्वादशकस्य व्याख्यानम् ।

No. 3388. वलिमहानरेन्द्राख्यानम् । Substance, country-made paper, 14 × 6 inches. Folia, 102. Lines, 8 on a page. Extent, 1,776 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Páncháyatapausála. Appearance, fresh. Prose and few verses. Correct. Sanskrit.

Bali-mahánarendrákhyána. This is a work on Jaina philosophy, and treats of such topics as the evanescent character of everything mundane, and so on. It contains in fact, the substance of what was preached by Bali Mahánarendra *alias* Bhubana-bhánu before Chandramauli, a king of Vijayapurí.

Beginning. अस्तीह जम्बूद्वीपे मेरोः पश्चिमायां दिशि गन्धिलावती नाम + + +। तत्र निवासः सर्व्वसम्पदां निलयो निःशेषविलासानां गृहं समस्तसद्भावव्यवहाराणाम् अनास्पदम् अशेषपापव्यवहाराणां धाम धर्मकर्म्मणां वलयितं प्रांशुप्राकारेण दुर्गीकृतमतिगम्भीरपरिखया समग्राश्चर्य्यनिकेतनम् अतिविस्तीर्णभवनिवनिताशिरस्तिलकभूतं विजयपुरं नाम नगरम् । तत्र चाराध्यः पार्थिवसहस्राणां प्रथमः सत्त्ववतां । इत्यादि ।

End. सर्व्वशरीरसम्बन्धं विहाय सञ्जातो निर्वृतिपुरीपरमेश्वरो वलिमहानरेन्द्रराजर्षिः केवलिजीव इति ।

Colophon. इति वलिनरेन्द्राख्यानं सम्पूर्णम् ।

विषयः । भुवनभानुकेवलीत्यपरनामधेयस्य वलिमहानरेन्द्रस्य वृत्तान्तकीर्त्तनम् । तत्र, विजयपुरनगरीनाथस्य चन्द्रमौलिनामकस्य राज्ञः पुरस्तात् भुवनभानुना रूपकच्छलेन धर्माधर्मादिसाम्राज्यवर्णनं कृतमस्ति । तस्यायं सारः । तथाहि । बलरूपसमृद्धियौवनप्रभुत्वादिकमपि रमणीयं वस्तु अनित्यत्वेन सम्यगवज्ञाय ज्ञानदर्शनचारित्ररूपे धर्म एव सदा समूहः करणीय इति अभीष्टवस्तुसंप्रयोगाणामनित्यत्वनिरूपणम् । ननु श्रूयते खलु उत्कृष्टधर्मकर्तॄणामपि बहूनां शरीरादिविनाशः । तत् किमर्थं शरीरक्लेशविधायिना तादृशेन धर्मेणाकृष्यन्तां नाम विवेकिन इति धर्मोऽप्यनित्य एव । उच्यते । यत्तावदुक्तं धर्मोऽप्यनित्य एव । तत्र सिद्धसाध्यता । एकान्तेन नित्यत्वस्य जैनानां मोक्षेऽप्यसिद्धत्वात् । अथ कथञ्चिन्नित्यता तु तरुभवनधनादिष्वपि अस्तीति न किञ्चिदनित्यं स्यादिति चेन्नैवम् । अर्पितानर्पितसिद्धेः । यत्र हि पर्य्यायः कुतोऽपि कारणादर्पितया अत्युत्कटो विवक्ष्यते तत्र तेनैव व्यपदेशः प्रवर्त्तते, नेतरेण । मोक्षे चानन्तसुखात्मकानन्तज्ञानदर्शनमयत्वसिद्धत्वामूर्त्तत्वादिलक्षणो नित्यपर्य्याय एव उत्कटो विवक्षितोऽतस्तेनैव व्यपदेशः मोक्षसाधकानुष्ठाने मुमुक्षुप्रवृत्तिहेतुत्वात् । अत एव उपयोगादिरूपतया तस्य क्षणभङ्गुरत्वलक्षणोऽनित्यत्वपर्य्यायोऽनर्पितत्वेन विवक्षित इति व्यवस्थितमिदं । यथा, सद्भेषजपथ्याद्युपयोगादेव सद्यः क्रमेण वा रोगनिवृत्तिः वाणिज्यादिक्रियातस्त्वार्थलाभः। तथा सद्धर्मानुष्ठानादेव जातिजरामरणरोगाद्युपद्रवशतस्य सर्वथा निवृत्तिर्नान्यत इति ।

No. 3389. प्रश्नोत्तरम् । Substance, country-made paper, 13 × 6 inches. Folia, 17. Lines, 10 on a page. Extent, 495 ślokas. Character, Nágara. Date, Sᴍ. 1656. Place of deposit, Váluchara, Pánchāyatapausála. Appearance, decayed. Prose and verse. Incorrect.

Praśnottara. Thirty-six questions relating to the doctrine of the Jaina religion with thus answers. By Jayasena. He wrote this at the command of one Jina Siñha at Lábhapura, the head-quarters of the Jainas of the Kharataragachchha.

Beginning. नत्वा श्रीसर्वज्ञं ध्यात्वा श्रुतदेवतां विशेषेण ।
गुरुचरणाम्बुजसेवां कृत्वा विघ्नव्यपोहाय ॥
खरतरगणराजानां श्रीमज्जिनचन्द्रसूरिराजानां ।
राज्ये श्रीलाभपुरे प्रमोदमाणिक्यगणिशिष्यैः ॥
श्रीजिनसिंहगुरूणामाज्ञातः प्रवचनानुसारेण ।
जयसोमोपाध्यायैः प्रश्नानामुत्तराणि लिख्यन्ते ॥

तथा जे लिख्या आपणइ श्रावकसामायक—इत्यादि ।

End. प्रश्नोत्तराणि लिखता लिखितमनाभोगतो यदुत्सूत्रं ।
तत्संशोध्यं सुधिया विचार्य्य सिद्धान्तपारीणैः ॥
आगमपरम्पराभ्यां यदवगतमतीवमन्दमतिनापि ।
तल्लिखितमिहास्ति न मया केवलं दृष्टिरागेण ॥

Colophon. इति श्रीप्रश्नोत्तरं सम्पूर्णम् ॥ संवत् १६५६ ।

विषयः । जैनशास्त्रीयषट्त्रिंशत्प्रश्नानामुत्तरकथनम् ।

No. 3390. **समरादित्यचरित्रम् ।** Substance, country-made paper, 14 × 6 inches. Folia, 305. Lines, 13 on a page. Extent, 10,639 ślokes. Character, Nágara. Date, ? Place of deposit, Váluchara, Páñcháyatapauśála. Appearance, new. Prose and few verses. Generally correct. Sanskrit. Few Mágadhi verse.

Samaráditya-charitra. A biographical account of Samaráditya, written in Sanskrit from a Prakrit work on the same subject by the Haribhadra Muni. Haribhadra's work is very difficult, our authoress renders it in easy Sanskrit. Her name is Sumati Bardhana Muni, a disciple of Bení-sundara who was a disciple of Iládharma. Iládharma again derived his knowledge of the Jaina religion from Kírtivardhana, an immediate disciple of Jinamukha, the head of the Bríhat Kharataragachchha. There are three classes of Jaina works which are recited before a

religious audience, namely, (1) *Devya* or works containing accounts of gods, (2) *Devya Mánusha*, containing accounts of men and gods, and (3) *Mánusha* containing accounts of men only. The subjects of such of the work may be various. Same may treat of the means of acquiring wealth, called *Arthakathá*, some may treat of love, affection, &c. and are called *Káma-kathá ;* some may treat of religion, called *Dharma-kathá*, and some may treat of miscellaneous topics, called *Samkírṇa-kathá*. At the end of the work there is a metrical eulogium of the author. H. P. S.

Beginning. श्रीमन्तं परमात्मतापदमितं त्रैलोक्यपूज्यं परं
नाभेयादिसमस्ततीर्थपगणं सिद्धांश्च सिद्धाश्रितान् ।
आचार्य्यान् गणिपुण्डरीकप्रभृतीन् पूज्यानुपाध्यायकान्
साधून् दर्शनबोधचारुचरितान् द्वेधा तपःसंयुतान् ॥
सज्ज्ञानामृतवारिधीन् गुणगुरून् श्रीसद्गुरून् भक्तितो
नत्वा विघ्नविनाशनाय मनसि स्मृत्वा च वाग्देवतां ।
सद्वैराग्यविधायकं सुमनसामादेयमत्यादरात्
कुर्वे चारुचरित्रमार्य्यसमरादित्यस्य भूमिपतेः ॥ युग्मं ।
श्रीहरिभद्रमुनीन्द्रैर्विहितं प्राकृतमयं समस्तीह ।
समरादित्यचरित्रं तथापि तदतीव विषमार्थं ॥
आधुनिकमन्दबुद्धिकसत्वपरिज्ञानहेतवे तस्मात् ।
सफलोऽस्तु मे प्रयासः प्रसादतः सर्व्वसुगुरूणां ॥
उपनयतु मङ्गलं वो जिनस्य सुरराजिहृन्दसंमिलिता ।
तीर्थप्रवर्त्तनसमये देवविमुक्ता कुसुमवृष्टिः ॥ इत्यादि ।

End. महाफलं प्राप्तं। द्वितीयेन विहितं भूरिमत्सरेण अनन्तसंसारवर्द्धनं कृतमिति ।

Colophon. इति बृहत्खरतरगच्छाधीशभट्टारकश्रीजिनसुखसूरिसूरीश्वरपादपद्ममधुकरविद्वच्छ्रीकीर्त्तिवर्द्धनमुनिविनेयविबुधवरश्रीइलाधर्ममुनिशिष्यप्राज्ञश्रीविनयसुन्दरमुनिशिष्यसंविग्नपक्षीयसुमतिवर्द्धनमुनिविरचिते संस्कृतमयसमरादित्यचरित्रोत्तरार्द्धे समरादित्यगिरिसेनप्रबन्धरूपो नवमो भवः ।

इतश्च समाप्तोऽयं सर्वोऽपि ग्रन्थः । (अतः पद्यमयी विस्तीर्णा ग्रन्थकारप्रशस्तिर्वर्त्तते) ।

विषयः। अवन्तीदेशाधिपस्य समरादित्यस्य चारुचरित्रं हरिभद्रमुनिना प्राकृतभाषया गुम्फितमासीत्। तदवलम्बनेन विरचितत्वात् तत्रोक्तविषय एवास्य विषय इति ज्ञेयं। तत्र खलु महानुपदेशोऽयं संक्षेपेण सङ्गृह्यत यथा, सर्वथा श्रोतुं योग्यान्येव श्रोतव्यानि, प्रशंसार्हाण्येव वस्तूनि

प्रशंसनीयानि, आचरितुं योग्यान्येव आचरणीयानि, परिहर्त्तुं योग्यान्येव परिहर्त्तव्यानि। तत्र हि श्रोतव्यानि सुरनरसुखोत्पादकानि अर्थसाराणि सर्वज्ञवचनानि। येषां यशस्त्रिभुवने विस्तृतमस्ति, तान्येव जिनेन्द्रवचनानि प्रशंसनीयानि स्पृहणीयानि च सम्यक्त्वज्ञानचारित्राणि। तथैव आचरणीयानि निस्तारहितत्वेन दारिद्र्यविनाशकानि चिन्तामणिरत्नसदृशानि सम्यक्त्वज्ञानचारित्राणि। तथा परिहर्त्तव्यानि कुगतिवासस्य हेतुभूतानि मिथ्यात्वादीनि लोकविरुद्धकार्य्याणि च। अथ श्रोतव्यञ्च तावत्त्रिविधं दिव्यं, दिव्यमानुषं, मानुषञ्चेति। तत्र दिव्यं नाम यत्र केवलिनामेव चरित्रं वर्ण्यते। दिव्यमानुषं पुनर्यत्र द्वयोरपि देवमानुषयोश्चरितं वर्ण्यते। मानुषन्तु यत्र केवलं मनुष्यचरितं वर्ण्यते इति। तत्र सामान्यतश्चतस्रः कथा भवन्ति यथा, अर्थकथा, कामकथा, धर्मकथा, सङ्कीर्णकथा चेति। तत्र अर्थकथा नाम कृषिवाणिज्यशिल्पादिविचित्रोपायसंप्रयोगेण द्रव्योपार्ज्जनोपायसंबद्धा। या पुनः कामोपायविषया चित्तव्यामोहकलादाक्षिण्यानुरागदूतीव्यापारप्रियानुवर्त्तनादिपदार्थमिलिता सा द्वितीया। या पुनर्धर्मोपायगोचरक्षमार्ज्जवनिर्लोभतातपःसंयमसत्यशौचाकिञ्चन्याणुव्रतब्रह्मचर्य्याणदिग्देशविरतिसामायिकपोषधोपवासातिथिसंविभागयुक्तानुकम्पादिरूपा सा तृतीया। अथ चतुर्थी पुनर्या खलु धर्मार्थकामाख्यत्रिवर्गोपायैः संबद्धा सर्वकथाग्रन्थार्थविरचिता लोकवेदसमयप्रसिद्धा दृष्टान्तहेतुकारणयुक्ता चेति। तासाञ्च कथानां श्रोतारोऽपि त्रिविधा भवन्ति अधमा, मध्यमा, उत्तमाश्चेति। तत्र ये खलु क्रोधमानमायालोभसमाच्छादितमतयः परलोकदर्शनपराङ्मुखा इह लोके परमार्थदर्शिनो जीवेषु च सर्वेषु निर्दयाश्चेति ते प्रथमतस्तामसा अधमाः परमार्थतोऽनर्थवहुलायामर्थकथायामासक्ता भवन्ति। ये पुनः शब्दादिविषयविषविमोहितमनसो रागद्वेषेन्द्रियानुकूलवर्त्तिनोऽननुभावितपरमार्थमार्गा इदमेव सुन्दरतरमिति सुन्दरेषु अविनिश्चितमतयस्ते राजसा मध्यमा इति विबुधजनोपहसनीयायां विडम्बनामात्रप्रतिबद्धायामिहामुत्रायामासक्ता भवन्ति। अथ ये पुनर्जन्मजरामरणजनितवैराग्या जन्मान्तरेऽपि कुशलभावितमतयो दुःखसंवर्द्धिकायां कामकथाकामोपभोगेभ्यो नितरां विरततया पापलेशतोऽपि मुक्तप्राया विज्ञानपरमपदस्वरूपासिद्धिसम्पत्तेर्निकटवर्त्तिनस्ते सात्त्विका उत्तमपुरुषाः स्वर्गनिर्वाणसमारोहणवर्त्तिन्यां बहुजनप्रशंसनीयायां निखिलकथासारभूतायां परमसुन्दर्य्यां महापुरुषसेवितायां धर्मकथायामेव आसक्ता भवन्ति। अत एव धर्मगुणमाश्रित्य सर्वज्ञोक्ता धर्मकथा एव भव्यजन्तुभिः श्रोतव्येति विस्तरेण तत्कथाकीर्त्तनम्।

No. 3391. चम्पकश्रेष्ठिकथा। Substance, country-made paper, 12×5 inches. Folia, 18. Lines, 8 on a page. Extent, 402 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, fresh. Prose and few verses. Incorrect. Sanskrit.

Champaka-śreshṭikathá. The story of Champaka, an inhabi-

tant of Champá, who, by works of charity and merit, obtained the highest bliss given here in full. In the opening line there is an enumeration of the castes and trades of ancient India which is very interesting.

H. P. S.

Beginning. चम्पानगरी सौगन्धिकगान्धिकताम्बूलिककान्दिकसुवर्णकारमणिकारसौवर्णिकमल्लापवर्त्तिकसुखभक्षिकाकारकन्यापणिकदूषिकचर्म्मकारमालाकारसूत्रधारघृतपाणिकतैलिकसौत्रिककार्पासिकभाण्डशालिकरजकचारिकवैज्ञानिकतन्तुवायप्रमुख + + चतुष्पथरमणीया । तत्र सामन्तपालो राजा । तस्य इन्द्रदत्तो व्यवहारी । इत्यादि ।

End. इति पूर्वभवं श्रुत्वा चम्पको भार्य्यायुतो दीक्षां लब्ध्वा तमाराध्य स्वर्गं जगाम । महाविदेहे मोक्षं यास्यति ।

Colophon. इति श्रीचम्पकश्रेष्ठिकथा समाप्ता ।

विषयः । चम्पानगरीवास्तव्यस्य चम्पकनामकस्य श्रेष्ठिनो दयादाक्षिण्यादिगुणसम्पन्नस्य दानप्रभावेण सद्गतिप्राप्तिकथनप्रसङ्गेन तस्य सपरिकरचरित्रकीर्त्तनं जैनदीक्षाग्रहणमाहात्म्यकथनञ्च ।

No. 3392. जंबूचरियं, जम्बूचरितम् । Substance, country-made paper, 14 × 5 inches. Folia, 19. Lines, 15 on a page. Extent, 1,683 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, fresh. Prose. Incorrect. Prákṛita.

Jambu-chariya, or Jambu-charita. An account of the life and teachings of Jambúsvámí, in Prákrita, by Padamasundara.

H. P. S.

Beginning. तेणं कालेणं तेणं समएणं रायगिहे नाम नयरे होत्था । वण्णउ तच्छणं रायगिहे गुणसेलए नाम चेइए वण्णउ तच्छणं रायगिहे सेणिए नाम राया होत्थो । मंत्ती अभय नाम कुमारे + + बुद्धिनिउणे । तेणं कालेणं तेणं समएणं समणे भगवं महावीरे ।

End. एस जंबूचरियं जे सद्धीससि से आराहगा भणिया । जंबूअवभय होत गवां समोउ + ।

Colophon. इति श्रीजंबूचरियं पद्मसुन्दरकियं समत्तो ।

विषयः । जम्बूस्वामिनो जीवनवृत्तान्तकथनं । स च जम्बूस्वामी वर्द्धमाननाथस्य शिष्यत्वमधिगम्य कृतकृत्यो बभूवेतिकथनञ्च ।

No. 3393. श्रीपालपृथ्वीपालकथा । Substance, country-made paper, 14 × 5 inches. Folia, 10. Lines, 17 on a page. Extent, 414 ślokas. Character,

Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, fresh. Verse. Incorrect.

S'rípála-prithvípála-kathá. The story of S'ripála, king of Rájagriha, narrated in connection with a Tantric rite, entitled *Siddha-chakra.* H. P. S.

Beginning. श्रिये श्रीमन्महावीरः स्वामी वासवसेवितः ।
यद्वाचो भव्यजन्तूनां रज्जूयन्ते भवावटे ॥
अर्हदाद्यां नवपदीं ध्यात्वा हृत्पद्मसद्मनि ।
श्रीसिद्धचक्रमाहात्म्यमुत्तमं किमपि ब्रुवे ॥
अस्त्यत्र भारते वर्षे देशे मगधनामनि ।
पुरं राजगृहं तत्र राजते श्रेणिको नृपः ॥ इत्यादि ।

End. राकापक्षवलक्षपक्षविमलाः सद्वृत्तपुण्योज्ज्वलाः
प्रश्वच्छास्वसुधासमुद्रलहरीनिस्तन्द्रचन्द्रत्विषः ।
सूरिश्रीगुणसागराख्यसुगुरुप्राप्तप्रतिष्ठोदयाः
श्रीसन्तो + + + समुद्रगुरवो राजन्ति तेजःप्रियाः ॥
तत्पादद्वितयप्रसादवशतो वाग्देवताध्यानतो
दृष्टं पण्डितसत्यराजगणिना स्वात्मस्मृतेर्हेतवे ।
यावच्चन्द्रगभस्तिमेरुधरणीपाथोधराम्भोधय-
स्तावन्नन्दतु वाच्यमानमृषिभिः श्रीपालवृत्तं हृदि ॥

Colophon. इति श्रीसिद्धचक्रमाहात्म्यविषये श्रीपालपृथ्वीपालकथा समाप्ता ।

विषयः । सिद्धचक्रमाहात्म्यकथनप्रसङ्गेन मगधेश्वरस्य श्रीपालस्य राज्ञो जीवनवृत्तान्तकथनं । तत्र भगवतो वर्द्धमानजिनेन्द्रस्य जैननवपदविषयकदेशनादिकथनञ्च ।

No. 3394. सुबोधिनी । Substance, country-made paper, 16 × 4½ inches. Folia, 48. Lines, 9 on a page. Extent, 1,026 ślokas. Character, Bengali. Date, ? Place of deposit, Váluchara, S'ítánátha Bhaṭṭáchárya. Appearance, decayed. Prose. Incorrect.

Subodhiní. A commentary on Kálidása's well-known poem entitled Nalodaya. By Prajnákara, of Mithilá, the son of Vidyákara Upádhyáya, and the grandson of Mahámahopádhyáya A'nandakara Miśra Svámí. The commentary was written when Prajnákara was very young. H. P. S.

Beginning. कङ्कणफणिराजमणिं दीपधिया वदनमारुतैरसकृत् ।
निर्वापयति कुमारे सगिरिसुतो जयति सस्मितः शम्भुः ॥
नलोदयस्य सहसा दुर्बोधस्य सुबोधिनीम् ।
क्रियमाणस्य मे + + +स्य शरणं शिवः ॥

तच भगवान् कालिदासः प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धकविघ्नविघाताय श्रीकृष्णस्मरणरूपमङ्गलमादौ निबध्नाति हृदयेति । हे हृदय अन्तःकरण सदा यादवतः श्रीकृष्णादन्यत्र मा गाः मा गच्छ इत्यर्थः । इत्यादि ।

End. इति सर्व्वमवदातमिति शम् ।
मिश्रानन्दकरस्वामी महोपाध्यायलक्षितः ।
पुण्यग्रामसभाजेता + +वाणीमयः सुधीः ॥
वेदेनैव विधिं कविं नयरुतैस्तर्केण वाचस्पतिं
वेदान्तेन शिवं मनुं स्मृतिभरैर्ज्योतिर्षैर्भास्करं ।
व्याकृत्यैव फणाधरं क्षितिधरं नागाधिपं छन्दसा
धर्म्मो यस्य विजेतुमर्हति पदं सांख्येन चार्व्वाककं ॥
तत्सूनुः सुकृती क्षितीश्वरकृपापात्रं सुहृत्पालको
नानाशास्त्ररतो महापदयुतोपाध्यायसंज्ञान्वितः ।
सत्तर्कायतकाननोद्धतबलद्वादीन्द्रदन्तावल-
श्रेणीमर्द्दनचातुरीचणहरिर्विद्याकरो मैथिलः ॥
तस्यात्मजोऽभूद्विबुधाग्रगन्ता प्रज्ञाकरः सज्जनतापहन्ता ।
गुणालयः श्रीचरणानुमन्ता शास्त्रेषु दक्षः कुधियां निहन्ता ॥
स्वल्पेन वयसा तेन कृता टीका सुबोधिनी ।
पूर्व्वाचार्य्यकृतीर्वीक्ष्य सुधियां पश्यतां मुदा ॥

Colophon. इति मैथिलश्रीप्रज्ञाकरमिश्रकृता सुबोधिनी समाप्ता ।

विषयः । कालिदासकृतनलोदयस्य व्याख्यानम् ।

No. 3395. कामदा । Substance, country-made paper, 16 × 4 inches. Folia, 64. Lines, 8 on a page. Extent, 21,504 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Sítánátha Bhaṭṭáchárya. Appearance, decayed. Prose. Incorrect.

Kámadá. A commentary on the Amaru S'ataka. By Vírachandra, a profound scholar. The commentary explains every *śloka* in two

different ways. It first explains the S'atakas as describing different phases of love, and then goes on to explain them as having a religious and devotional meaning underlying.

H. P. S.

Beginning. विद्या वितरति मुक्तिं भुक्तिमविद्या च तां भजिष्यामः ।
या चरमा च रमायाः शक्तिः सा नः शिवं दिशतु ॥
तदुभयरसपरिपाटीं परिहृतवाटीमिमां रम्यां ।
कुरुतेऽमरुशतटीकां + + + + कलाधरः ॥
यो दौर्भाग्यवता विभक्तवलितज्ञानामृतानन्दथु-
र्यो वात्स्यायनकामतन्त्रविलसत्केलिक्रियाकौशलः ।
व्याचष्टेऽत्र रसद्वयं कविकुलालङ्कारचूड़ामणिः
श्रीलश्रीरविचन्द्र एव पिशुनां मात्सर्य्यतामुत्सृजन् ॥
यदि स्यात्परमानन्दे कामानन्दे च वासना ।
तदा संसेव्यतां धीराष्टीकेयं कामदा सदा ॥
— — — — — ।

निर्विघ्नप्रारिप्सितशतकसमाप्तिकामो ग्रन्थकृदिष्टदेवतां कीर्त्तयन्नाह,—ज्याकृष्टीति । अम्बिकायाः पार्वत्याः कटाक्षः अपाङ्गदर्शनं । इत्यादि ।

End. अनेन च सन्दर्भेण नानाविधान् भागवतधर्मान् निरूप्य रामस्मरणमेव सर्वगरिष्ठमिति सूचितं ।

Colophon. इत्यमरुशतकव्याख्या कामदा समाप्ता । समाप्तोऽयं ग्रन्थः ।

विषयः । अमरुशतकस्य शृङ्गारपक्षे शान्तिपक्षे च व्याख्यानम् ।

No. 3396. रामचरित्रम् वा रामायणम् । Substance, country-made paper, 12 × 5 inches. Folia, 163. Lines, 11 on a page. Extent, 4,682 ślokas. Character, Nágara. Date, Sm., 1866. Place of deposit, Váluchara, Pañcháyata-pausála. Appearance, fresh. Prose and verse. Sanskrit.

Ráma-charita, or Ramáyana. An extravagant travesty of the divine epic of Válmiki. It was written in Samvat 1652, A. C. 1596, during the reign of the Mughal Emperor Akbar, by Padmadeva Vijayagaṇi. He was a disciple of Rájavijaya Súri, the disciple of Vijayasena Súrí, the head of the Tapágachchha. The work is written

in Sanskrit prose though the older works on the same subject were in verse, Prákrit and Sanskrit. It is based on the Rámáyaṇa by Hemácháryya. Its extent in slokas is estimated at 5000.

The story differs considerably from that given in Válmiki's work, both in the plot and in the disposition of the details. It commences with a description of the Rákshasa island. Then it says, there is on the top of the Mount Trikúṭa a city named Lañká, and another lower down, known as Pátála-lañká. They were both governed by Bhíma, a Rákshasa. He left them to Meghavábana who was a son of Mahá Rákshasa. In the course of time the kingdoms fell into the hands of S'ríkaṇṭha who abducted Padmá. Then the writer goes on to describe the island of the Monkeys with its capital Kishkindhyá which is located on a mountain of the same name. The island was not actually inhabited by monkeys, it was so called, because the people used to set up images of monkeys in conspicuous places all over the land. The people of the Monkey Island had a war with Taditkesha one of the powerful kings of Lañká. Ratnaśraváh of the Pátála Lañká had three sons Rávaṇa, Kumbhakarṇa and Vibhíshaṇa. They were married to Mandodarí, Tadinmálá and Paṇkajaśrí. Rávaṇa defeated Jama, the monkey king, and placed one A'ditya on the throne. A'ditya had two sons; Báli by his first wife Indumáliní, and Sugríva by his second wife S'ríprabhá. Rávana goes to pay his respects to a Chaitya on the top of the Sumeru where his sister Súrpaṇakhá marries Khara-dúshaṇa. Rávaṇa obtains the knowledge of the secret formula Amoghavijayá, of unfailing success in war, and goes out to conquer the world, defeats Báli, Marutta, and others. Nárada, a great Ṛíshi, was the son of a Jaina named Brahmaruchi by Kúrmí. Hanumán, the son of Pavanaṇjaya by Aṇjaná, was the son-in-law of Varuṇa, one of the Devas, defeated by the secret formula of Rávana. Anaranya, belonging to the family of king Saudása, had two sons Anantaratha and Daśaratha. At the command of Rávaṇa, Vibhíshaṇa invests the city of Ajodhyá, destroys a statue of Daśaratha, which he mistakes for the real Daśaratha, and so reports to the king. Daśaratha flies away from Ajodhyá to Rajagriha, but returns to it after the birth of Ráma and Lakshmaṇa, and becomes, after the exile of Ráma, converted to Jainaism. Kekayí goes to the forest with a view to induce Ráma to return. A daughter of Bálakhilla comes in man's disguise and serves Ráma and Lakshmaṇa. They go to

Vindhyátaví and meet Gokarṇa, a Yaksha. Vanamálá, unable to marry Lakshmaṇa, attempts to commit suicide, but is saved by him. Ráma and Lakshmaṇa fight with Mahídhara. Chandraṇakhá, a sister of Rávaṇa married Khara, a Vidyádhara of Pátála Lañká, and had two sons Sunda and S'ambúka. Ráma and Lakshmaṇa fight with Khara and Ravana takes this opportunity to steal away Sítá. Ráma makes a treaty with Sugríva, and sends Hanumán and Virádha to bring information about Sítá's whereabouts. Ráma crosses over to Lañká with his army through the sky. Vibhíshaṇa joins him. Indrajit and Meghanáda fight with Vibhíshaṇa. Lakshmaṇa kills Rávana. Ráma returns to Ajodhyá and Bharata renounces the world to become a Jaina Bhikshu, and obtains emancipation. Ráma exiles Sítá. She lives in the family of king Vajrajañgha and gives birth to two sons Lavana and Ankuśa. They fight with Ráma and Lakshmaṇ, when Nárada intervenes. Sítá passes through the ordeal of fire, and renounces the world according to the precepts of the Jaina religion, and she is followed by Sugríva, Hanumán and others. Lavana and Ankuśha are initiated into the Jaina religion by Amṛita Ghosha, and they obtain Nirváṇa. Lakshmaṇa dies on hearing a false report of Ráma's death, and Ráma, in sorrow, takes to *pravrajyá* and attains Nirváṇa. H. P. S.

Beginning. अथ श्रीसुव्रतस्वामिजिनेन्द्रस्यामितद्युतेः ।
हरिवंशम्टगाङ्कस्य तीर्थे सञ्जातजन्मनः ॥
बलदेवस्य पद्मस्य विष्णोर्नारायणस्य च ।
प्रतिविष्णो रावणस्य चरितं परिकीर्त्यते ॥

अथास्मिन् जम्बूद्वीपे भरतक्षेत्रे लवणाब्धौ योजनसप्तशतविस्तृतः सर्वासु दिक्षु राक्षसनाम्ना द्वीपोऽस्ति । इत्यादि ।

End. श्री (?) तेन्द्रो देवकुशे प्रदेशामरराजमण्डलजीवं प्रतिबोध्य ततः स्वयमच्युतो देवलोकं गतः ।

उत्पन्ने सति केवले स शरदां पञ्चाधिकां विंशतिं
मेदिन्यां भविकान् प्रबोध्य भगवान् श्रीरामभट्टारकः ।
आयुश्च व्यतिलङ्घ्य पञ्चदश चाब्दानां सहस्रान् कृती
शेमुषीं प्रतिपद्य शाश्वतसुखानन्दं प्रपेदे पदम् ॥

Colophon. इति श्रीमत्तपागच्छे भट्टारकश्रीहीरविजयसूरिराज्ये आचार्य्यश्रीविजयसेन-

सूरिश्रीवराज्ये पंपदेवविजयगणिविरचिते गद्यबन्धे श्रीरामचरित्रे श्रीरामनिर्वाणगमनो नाम दशमः सर्गः । समाप्तञ्चेदं रामायणम् ।

इदं रामायणं प्रायेण श्रीहेमाचार्य्यकृतरामायणमुपजीव्य मया कृतमिति संस्कृतभाषयैव लिखितं । सत्यपि प्राकृतपद्यबन्धचरित्रे तथा सत्यपि संस्कृतपद्यबन्धचरित्रे मया आत्मविनोदार्थं कर्मक्षयार्थञ्च गद्यबन्धेन कृतमिति । स्वस्ति श्रीमत्तपागच्छे भट्टारकयुगप्रधानश्रीलश्रीविजयदाख्य-सूरिशिष्याचार्य्यश्रीराजविजयसूरिशिष्यपंपदेवविजयगणिभिर्विरचितं समाप्तञ्चेदं श्रीरामायणम् । संवत् १६५२ वर्षे आश्विनमासे कृष्णपक्षे दशम्यां तिथौ गुरुपुष्ययोगे श्रीमन्मरुस्थल्यां + +कस्थित्यां स्थितेन पंपदेवविजयेन श्रीमालपुरनगरे श्रीमदकब्बरराज्ये विरचितं श्रीरामायणम् ।

प्रत्यक्षरं निरूप्यास्य ग्रन्थमानं विनिश्चितं ।
सम्यग्गणनया ज्ञेयं श्लोकपञ्चसहस्रकम् ॥
यदक्षरं परिभ्रष्टं मन्त्राहीनञ्च यद्भवेत् ।
क्षन्तव्यं तद्बुधैः सर्व्वं कस्य न स्खलना भवेत् ॥
अक्खरमत्तहीणं जं विश्रा पढ़िश्रं अयाणमाणेणं ।
तं खमह मज्भ सव्वं जिणवयण विणिग्गया वाणी ॥

इति प्रशस्तिः । संवत् १८६१ इति भाद्रकृष्णसप्तम्याम् ।

विषयः । लवणसागरमध्ये राक्षसेति नाम्ना प्रसिद्धः कश्चित् द्वीपो वर्त्तते । वर्त्तते च तत्र खलु त्रिकूटाभिधेयगिरिवरस्य महोच्चतरे शिखरे स्वर्णप्राकारादिपरिशोभिता लङ्का नाम काचित् पुरी । अथ तत्र स्फटिकमयवप्रा मणिकपिशीर्षशतेन विराजमाना काचित् पातालल‌ङ्केति विख्याता नगरी च आसीत् । ते चोभे नगर्य्यौ भीमनामकराक्षसेन्द्रेण परिरक्षिते नितरां रेजातेतराम् । अथ तेन तद्राक्षसराज्यं मेघवाहनाय तत्समर्पितमासीत् । एवं गतेषु कालेषु तत्र वंशे श्रीकण्ठाभिधानस्य कस्यचित् राक्षसस्य जन्मादिकथनं । तत्कृतपद्माहरणविवरणकथनं । अथ वानरद्वीपस्य वृत्तान्तकथनं । तत्र सिंहल-वहल-विमलादिद्वीपकथनं । अस्य वानरद्वीपीय-किष्किन्धपर्व्वतशिखरावस्थितायाः किष्किन्धाख्याया नगर्य्या विवरणकथनं । तत्र श्रीकण्ठस्य वासकथनं । वानरद्वीपवासिनस्तु गृहेषु रथादिषु च वानरमूर्त्तिमालेखयन्तीति वानरेति नाम्ना व्यपदिश्यन्ते न तु स्वरूपतो वानरा इति कथनम् । अथ असंख्येयेषु नृपेषु गतेषु लङ्कापूर्य्यां तड़ित्-केशनामा राजा बभूव । तस्य वानरेन सह युद्धादिवर्णनं । आदित्यपुराधिपस्य माल्यवत उपाख्यानकथनं । अथ पाताललङ्कायां कैकेय्याः गर्भे सुमालिपुत्ररत्नश्रवणरावणकुम्भकर्णनामक-पुत्रत्रितयजन्मकथनं । अथ वानरवंशोत्पत्तिकथनं । लङ्कावानरद्वीपाधिपस्य कुवेरस्य जन्मादि-कथनं । अथ रावणस्य मन्दोदर्य्या सह विवाहकथनं । तस्य लङ्कायामवस्थितिवृत्तान्तकथनं । कुम्भकर्णविभीषणयोः तड़िन्मालापङ्कजश्रीभ्यां सार्द्धं विवाहकथनं । रावणेन किष्किन्ध्यापते

यमस्य पराजयादिकथनं । अथ रावणेन किष्किन्ध्याराज्ये प्रतिष्ठितस्य आदित्यराजस्य इन्दुमालिन्यां पत्न्यां वालिनः जन्मादिकथनं । अथ परस्यां तत्पत्न्यां श्रीप्रभानामिकायां सुग्रीवस्य जन्मकथनं । अथ चैत्यवन्दनार्थं मन्दोदर्य्या सह रावणस्य सुमेरुशिखरगमनादिवृत्तान्त-कथनं । सूर्पणखया सह खरदूषणस्य परिणयादिवर्णनं । वालिरावणयोर्युद्धादिवर्णनं । रावणेन अमोघविजया विद्या लब्धेति कथनं । रावणस्य दिग्विजयकथनं । अथ शतवाहुपुत्रसहस्रांशु-कथाकीर्तनं । मरुत्तनृपतेरुपाख्यानं । पर्वतकवस्रूपाख्यानकथनं । महाकालोपाख्यानकथनं । अथ ब्रह्मरुचिनामकस्य जैनस्य कूर्म्मीनामिकायां भार्य्यायां कश्चन पुत्रोऽभवत् । स तु नारदेति नाम्ना प्रसिद्धिं गत इति कथनं । नलकूवरोपाख्यानं । तत्र रम्भाख्यानकथनं । स्त्रीचरित्रकथनञ्च । अथ रावणकृतेन्द्रनिग्रहवर्णनं । वरुणेन सह रावणस्य युद्धादिवर्णनं । तत्र प्रह्लादकुमारस्य पवनञ्जयस्य उपाख्यानकथनं । तत्र अञ्जनागर्भे हनूमत उत्पत्तिकथनं । हनूमते वरुणस्य सत्यवतीनामककन्यादानविवरणकथनञ्च । जनकराजोपाख्यानम् । सुकोमल-मूलेरुपाख्यानं । तत्पुत्रस्य हिरण्यगर्भस्य वृत्तान्तकथनं । सौदासनृपतेरुपाख्यानं । तद्वंशजातस्य अनरण्यस्य द्वौ पुत्रौ अनन्तरथो दशरथश्चेति कथनं । रावणादेशाद्विभीषणस्य अयोध्यानगररोध-पूर्व्वकं दशरथप्रतिमूर्त्तिमेव तत्त्वतो न दशरथ इति बद्धा विनाश्य राजानं प्रति गमनकथनं । जनकदशरथयोः रावणभयात् प्रच्छन्नभावेनावस्थितिकथनं । अपराजिताकैकेय्यादिभिः पत्नीभिः सार्द्धं दशरथस्य राजगृहनगरे वासकथनं । रामलक्ष्मणयोर्जन्मकथनं । दशरथस्य पुनरयोध्या-गमनकथनं । तत्र भरतशत्रुघ्नयोर्जन्मकथनं । सीतादिभिः सह रामलक्ष्मणादीनां विवाहकथनं । रामवनवासादिकथनं । रामादीनामानयनार्थं कैकेय्याः तदध्युषितवनगमनादिवृत्तान्तकथनं । दशरथस्य जैनदीक्षाग्रहणकथनं । सिंहोदरवज्रकर्णयोः कथाकीर्त्तनं । वालिखिल्लतनयायाः पुरुषवेशेन रामादीनां परिचर्य्यादिकरणविवरणकथनं । रामादीनां विन्ध्याटवीगमनवृत्तान्त-कथनं । रामादिभिः सह गोकर्णाभिधानयक्षस्य संवादकथनं । अथ लक्ष्मणं पतित्वेन कामय-मानाया वनमालायाः तदप्राप्त्या उद्बन्धनेन मरणोत्थिताया लक्ष्मणकृतजीवनरक्षादिकथनं । महीधरेण सह रामस्य युद्धादिवर्णनं । शत्रुदमनराजदुहितुः जितपद्मायाः उपाख्यानं । कुल-भूषणदेशभूषणयोरुपाख्यानकथनं । स्कन्दकाचार्य्यादिवृत्तान्तकथनं । अथ पाताललङ्कायां खरनामा कश्चिद्विद्याधर आसीत् । तस्य पत्नी रावणभगिनी चन्द्रनखा नाम । तस्याः शम्बुकसुन्दना-मानौ द्वौ पुत्रौ वभूवतुरिति तेषां वृत्तान्तकथनं । खरदूषणादिभिः सह रामलक्ष्मणयोः संप्रवृत्ते महाहवे तदवकाशेनैव रावणकृतसीताहरणवृत्तान्तकथनं । अथ सुग्रीवादिभिः सह रामस्य संवादादिकथनं । विटसुग्रीवसत्यसुग्रीवयोर्युद्धादिवर्णणं । सीतासंदेशानयनार्थं विराधाख्यसैन्या-दिप्रेषणकथनं । हनूमतः सीतान्वेषणवृत्तान्तकथनं । ससैन्यस्य रामस्य गगनमार्गेण लङ्कागमनादि-वृत्तान्तकथनं । रामसमीपे मित्रभावेन विभीषणागमनादिवृत्तान्तकथनं । रामसैन्यराक्षससैन्ययो-

युद्धादिवर्णनं। इन्द्रजिन्मेघनादयोर्विभीषणेन सह युद्धादिवर्णनं। कुम्भकर्णादीनां वधादिकथनं। लक्ष्मणकृतरावणवधादिवर्णनं। रामादीनामयोध्याप्रत्यावर्त्तनवृत्तान्तकथनं। भरतस्य प्रव्रज्याग्रहण-पूर्व्वकं निर्वाणप्राप्तिकथनादिकं। सप्तर्षिकामा + + कथनं। रामस्य सीतापरित्यागवृत्तान्तकीर्त्तनं। वज्रजङ्घस्य राज्ञो गृहे सीताया अवस्थितिकथनं। तद्गर्भे लवणाङ्कुशयोर्जन्मादिकथनं। राम-लक्ष्मणाभ्यां सह लवणाङ्कुशयोर्युद्धसमये नारदस्य आगमनवृत्तान्तकथनं। अथ अग्निपरीक्षातः समुत्तीर्णायाः सीताया रामेण सह अयोध्याप्रवेशादिवृत्तान्तकथनं। सीताया जैनप्रव्रज्याग्रहणादि-वृत्तान्तकथनं। श्रीरामसुग्रीवादीनां पूर्व्वजन्मवृत्तान्तकथनं। अमृतबोधहनूमदादीनां जैनप्रव्र-ज्याग्रहणपूर्व्वकं निर्व्वाणप्राप्तिकथनं। मायाविकथितकल्पितरामनिधनवृत्तान्तश्रवणेन लक्ष्मणस्य पञ्चत्वकथनादिकं। भ्रातृशोकेन क्लिष्टस्य रामस्य प्रव्रज्याग्रहणपूर्व्वकं निर्व्वाणप्राप्त्यादिकीर्त्तनञ्च। इति शम्।

No. 3397. सम्यग्दृष्टिद्वात्रिंशिका। Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Samyag-dṛishṭi-dvátriñśiká. Thirty-two stanzas on the essence of philosophy, giving the salient points of the leading schools of Hindu Darsanas. It is attributed to the Jina himself.

Beginning. लक्ष्यते ग्रन्थिभेदेन सम्यग्दृष्टिः स्वतन्त्रतः।
शुश्रूषाधर्म्मरागाभ्यां गुरुदेवादिपूजया॥
भोगिकिन्नरगेयादिविषयाधिक्यमीयुषी।
+ शूषास्यदस्तुप्ते + कथा + विषयोपमा॥ इत्यादि।

End. उद्भावनामतिग्राह्यं युक्तिरेव हि यौक्तिके।
प्रामाण्ये च न वेदत्वं सव्यत्वन्तु प्रयोजकं॥
शिष्टत्वमुक्तमन्त्रैव भेदेन प्रतियोगिनः।
तमानुभविकं विभ्रत् परमानन्दवन्मनः॥

Colophon. इति सम्यग्दृष्टिद्वात्रिंशिका समाप्ता।

विषयः। जैनोक्तसम्यग्दर्शनमाहात्म्यादिकीर्त्तनम्।

No. 3398. ईशानुग्रहविचारद्वात्रिंशिका। Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas,

Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Iśánugraha-dvátriñśiká. This work in thirty-two stanzas attempts to refute the theory that through Mahádeva's favour alone, one is able to achieve success in Yoga, and to establish that Jaina doctrines alone can lead to the achievement of such success. Anonymous.

H. P. S.

Beginning. महेशानुग्रहात् केचिद्योगसिद्धिं प्रचक्षते ।
क्लेशाद्यैरपरामृष्टः पुंविशेषः स चेष्यते ॥
ज्ञानमप्रतिमं यस्य वैराग्यञ्च जगत्पतेः ।
ऐश्वर्य्यञ्चैव धर्म्मश्च सहसिद्धचतुष्टयं ॥ इत्यादि ।

End. जिनेभ्यो याचमानोऽन्यं लब्धं धर्म्ममपालयन् ।
तं वि + + विना भाग्यं केन मूल्येन लप्स्यसे ॥
अनुष्ठानं ततः स्वामिगुणरागपुरःसरं ।
परमानन्दतः कार्य्यं मन्यमानैरनुग्रहं ॥

Colophon. इति ईशानुग्रहविचारद्वात्रिंशिका समाप्ता ।

विषयः। केचित् खलु महादेवस्यैव उपासनासन्तोषितस्य अनुग्रहेण योगसिद्धिर्भवतीति कथयन्ति । अथ तन्मतस्यासारतां प्रदर्श्य जैनोक्तमार्ग एव श्रेयानिति कथनम् ।

No. 3399. कथाद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Kathá-dvátriñśiká. Thirty-two stanzas on the various kinds of kathás or literary works popularly called for the edification of popular audiences. Anonymous. H. P. S.

Beginning. अर्थकामकथा धर्म्मकथा मिश्रकथा तथा ।
कथा चतुर्व्विधा तत्र प्रथमा तत्र वर्ण्यते ॥
विद्या शिल्पमुपायश्चाविवेकश्चापि सञ्चयः ।
दक्षत्वं साम भेदश्च दण्डो दानञ्च यत्नतः ॥ इत्यादि ।

End. विधिना कथयन् धर्म्मं हीनोऽपि श्रुतदीपनात् ।
वरं न तु क्रियास्थोऽपि मूढो धर्म्माध्वतस्करः ॥

इत्थं व्युत्पत्तिमान् न्याय्यां कथयन् पण्डितः कथां ।
स्वसामर्थ्यानुसारेण परमानन्दमश्नुते ॥

Colophon. इति धर्म्मकथाद्वात्रिंशिका ।

विषयः । अर्थकथाकामकथाधर्म्मकथामिश्रकथाभेदेन कथायाश्चातुर्विध्यकथनपूर्व्वकं प्रत्येकं फलकथनम् ।

No. 4000. योगलक्षणद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Yogalakshaṇa-dvátriñśiká. Thirty-two stanzas on the nature of the Yoga. H. P. S.

Beginning. मोक्षेण योजनादेव योगो ह्यत्र निरुप्यते ।
लक्षणं तेन तन्मुख्यहेतुव्यापारतोऽस्य (?) तु ॥
मुख्यत्वं चान्तरङ्गत्वात् फलाक्षेपाच्च दर्शितं ।
चरमे पुद्गलावर्त्ते यत एतस्य सम्भवः ॥ इत्यादि ।

End. द्रव्यादेः स्याद्भेदेऽपि शुद्धाभेदनयादिना ।
इत्थं व्युत्पादनं युक्तं नयसारादिदेशना ॥
योगलक्षणमित्येवं जानानो जिनशासनं ।
परोक्तं न परीक्षेत + + + + + + ॥

Colophon. इति योगलक्षणद्वात्रिंशिका समाप्ता ।

विषयः । जैनमतेन योगनिरूपणम् ।

No. 4001. दैवपुरुषकारद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Prose. Incorrect. Sanskrit.

Daivapurushakára-dvátriñśiká. Thirty-two stanzas on the merits and demerits of self-reliance and fatalism. Anonymous.

H. P. S.

Beginning. दैवं पुरुषकारश्च तुल्यौ द्वावपि तत्त्वतः ।
निश्चयव्यवहाराभ्यामत्र कुर्म्मो विचारणाम् ॥

दैवं पुरुषकारश्च स्वकर्म्मोद्यमसंज्ञकौ ।
निश्चयेनानयोः सिद्धिरन्योन्यनिरपेक्षयोः ॥ इत्यादि ।

End. मार्गानुसारिता श्रद्धा प्राज्ञप्रज्ञापना रतिः ।
गुणराग + + गानि शक्यारम्भोऽपि चास्य हि ॥
योगप्रवृत्तिरत्र स्यात् परमानन्दसङ्गता ।
देश + + वभेदेन चित्रे सर्व्वज्ञभाषिते ॥

Colophon. इति दैवपुरुषकारद्वात्रिंशिका समाप्ता ।

विषयः । दैवपुरुषकारयोः स्वरूपादिनिरूपणपूर्व्वकं तयोः प्राधान्यादिविवेचनम् ।

No. 4002. योगभेदद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Prose. Incorrect. Sanskrit.

Yogabheda-dvátriñśiká Thirty-two verses giving a summary of the principles of the Yoga as practised by the Jainas. Anonymous.

Beginning. अध्यात्मभावना ध्यानं समति (?) वृत्तिसंचयः ।
योगः पञ्चविधः प्रोक्तो योगमार्गविशारदैः ॥
क्वचि + वृत्तियुक्तस्य वचनात्तत्त्वचिन्तनं ।
मैत्र्यादिभावसंयुक्तमध्यात्म तद्विदो विदुः ॥ इत्यादि ।

End. उपायत्वेऽत्र पूर्व्वेषामन्त्य एवावशिष्यते ।
तत्पञ्चमगुणस्थानादुपायोऽर्व्वागिति स्थितिः ॥
भगवद्वचनस्थित्या योगः पञ्चविधोऽप्ययं ।
सर्व्वोत्तमं फलं दत्ते परमानन्दमञ्जसा ॥

Colophon. इति योगभेदद्वात्रिंशिका समाप्ता ।

विषयः । जैनसम्मताध्यात्मभावनादिरूपपञ्चविधयोगकथनम् ।

No. 4003. धर्म्मव्यवस्थाद्वात्रिंशिका । Substance, country-made, paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Dharmavyavasthá-dvátriñśiká. Thirty-two verses to settle the rules of conduct, such as what to eat, what not to eat, &c.

Beginning. भक्ष्याभक्ष्यविवेकाच्च गम्यागम्यविवेकतः ।
तपोदयाविशेषाच्च सद्धर्मो व्यवतिष्ठते ॥
भक्ष्यं मांसमपि प्राह कश्चित् प्राण्यङ्गभावतः ।
श्रोदनादिवदित्येवमनुमानपुरःसरं ॥ इत्यादि ।

End. तिष्ठतो न शुभो भावो ह्यसदायतनेषु च ।
गन्तव्यं तत्सदाचारभावाभ्यन्तरवर्त्मना ॥
विदित्वा लोकसुत्त्विष्य (?) लोकसंज्ञा च लभ्यते ।
इत्थं व्यवस्थितो धर्म्मः परमानन्दकन्दभूः ॥

Colophon. इति धर्म्मव्यवस्थाद्वात्रिंशिका समाप्ता ।

विषयः । संक्षेपेण जैनमतेन भक्ष्याभक्ष्यादिव्यवस्थादिकथनम् ।

No. 4004. **वादद्वात्रिंशिका ।** Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Váda-dvátriñśiká. Thirty-two stanzas to explain the different kinds of disputations. They are *śushkaváda, viváda* and *dharmaváda.* They seem to be the same as *váda, jalpa* and *vitandá* of Naiyáyikas. *Sushkaváda* is *vitandá,* a disputation which leads to no result but to one of the disputants defeating the other. *Jalpa* and *viváda* seem to be identical in which the winner refutes the position of his opponent without establishing anything himself. *Váda* and *Dharmaváda* seem to be the same in which the disputants are bent on the search of truth.

Beginning. शुष्कवादो विवादश्च धर्म्मवादस्तथापरः ।
कीर्त्तितस्त्रिविधो वाद इत्येवं तत्त्वदर्शिभिः ॥
परानर्थी लघुत्वं वा विजये च पराजये ।
यत्रोक्तौ सह दुष्टेन शुष्कवादः स कीर्त्तितः ॥ इत्यादि ।

End. अपवर्गतरोर्वीजं मुख्याहिंसेयमुच्यते ।
सत्यादीनि व्रतान्यत्र जायन्ते पल्लवा नवाः ॥
विषयो धर्मवादस्य निरस्य मतिकर्द्दमं ।
संशोध्यः स्वाशयादित्थं परमानन्दमिच्छता ॥

Colophon. इति वादद्वात्रिंशिका समाप्ता ।

विषयः । शुष्कवाद-विवाद-धर्मवादभेदात् त्रिविधवादनिरूपणादिकम् ।

No. 4005. दानद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchảyata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Dána-dvátriñśiká. Thirty-two stanzas to illustrate the superiority of charity.

Beginning. ऐन्द्रशर्म्मप्रदं दानमनुकम्पासमन्वितं ।
भक्त्या सुपात्रदानन्तु मोक्षदं देशितं जिनैः ॥
अनुकम्पानुकम्प्ये स्याद्भक्तिः पात्रे तु सङ्गता ।
अन्यथा + + दातॄणामतिचारप्रसङ्गिका ॥ इत्यादि ।

End. + + योगेऽपि यो दोषो द्रव्यतः कोऽपि जायते ।
उपभोगेन स पुनर्नानिष्टो यतनावतः ॥
इत्थं दानविधिज्ञानद्वारः पुण्यप्रभावकः ।
यथाशक्ति ददद्दानं परमानन्दभाग् भवेत् ॥

Colophon. इति दानद्वात्रिंशिका समाप्ता ।

विषयः । जैनधर्मानुसारेण दानमाहात्म्यकीर्त्तनम् ।

No. 4006. देशनाद्वात्रिंशिका । Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 6 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Panchayata-pausála. Appearance, old. Verse. Incorrect. Sanskrit.

Deśaná-dvátriñśiká. Thirty-two stanzas to illustrate the merit of preaching.

Beginning. यथास्थानं गुणोत्पत्तेः सुवैद्येनेव भेषजं ।
बालाद्यपेक्षया देया देशना क्लेशनाशिनी ॥
उन्मार्गनयनात् पुंसामन्यथा वा कुशीलता ।
सन्मार्गद्रुमदाहाय वह्निज्वाला प्रसज्यते ॥ इत्यादि ।

End. जानाति दातुं गीतार्थो य एवं धर्मदेशनां ।

कलिकालेऽपि तस्यैव प्रभावाद्धर्म एधते ॥
गीतार्थाय जगज्जन्तुपरमानन्ददायिने ।
मुनये भगवद्धर्मदेशकाय नमो नमः ॥

Colophon. इति देशनाद्वात्रिंशिका समाप्ता ।

विषयः । संक्षेपेण जैनोक्तदेशनाकथनं ।

No. 4007. क्षुल्लकुमारकथा। Substance, country-made paper, 12 × 4 inches. Folia, 4. Lines, 7 on a page. Extent, 87 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, decayed. Prose and verse. Incorrect. Sanskrit and Prákṛita.

Kshulla-kumára-kathá. The story of Kshulla-kumára, a citizen of Sáketa, is given here to demonstrate the superiority of indifference to wealth and power. Anonymous. H. P. S.

Beginning. जयन्ति जितमत्सराः परहितार्थमभ्युद्यताः
परभ्युदयसुस्थिताः परविपत्तिखेदाकुलाः ।
महापुरुषसत्कथाश्रवणजातरोमोद्गमाः
समस्तदुरितार्णवप्रकटसेतवः साधवः ॥
साकेतनामनगरं पुण्डरीको नरेश्वरः ।
युवराजः कण्डरीको यशोभद्रा च तत्प्रिया ॥ इत्यादि ।

End. बहुतद्गत नया + + किलेति प्रतिबोधतः ।
दत्तोऽस्माभिः प्रभोस्त्यागस्तुष्टः सर्वेषु भूपतिः ॥
सर्वे क्षुल्लकुमारस्य मार्गे लग्नाः प्रवव्रजुः ।
बलोभनैव कर्त्तव्या सर्वैरपि महात्मभिः ॥

Colophon. इति क्षुल्लकुमारकथा समाप्ता ।

विषयः । साकेतपुरवासिनः क्षुल्लकुमारस्य चरितकीर्त्तनव्याजेन निर्लोभताया माहात्म्यकीर्त्तनम् ।

No. 4008. सङ्घासश्रावककथा। Substance, country-made paper, 12 × 4 inches. Folia, 4. Lines, 8 on a page. Extent, 72 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, decayed. Prose and verse. Incorrect. Sanskrit and Prákṛita.

Saṅkása-śrávaka-kathá. In this work the story of one Saṅkása-śrávaka has been told to illustrate the sinfulness of the misappropriation of temple endowments and the merit of increasing income from such sources. Anonymous. H. P. S.

Beginning. पमायमित्तदोसेणं जिनरित्या जहादुहं ।
पत्तं संकाससड्ढेण तहा अनोवि पाविही ॥
अत्रार्थे सङ्कासश्रावकदृष्टान्तः ।
जम्बूद्वीपाभिधे द्वीपे परिपूर्णेन्दुवर्त्तुले ।
विद्यते भरतक्षेत्रमधिज्यधनुराकृति ॥
सुवर्णनिर्म्मितावासा बहुपुण्यजनार्च्चिता ।
साक्षाल्लङ्कापुरीवास्ति नगरी गन्धिलावती ॥ इत्यादि ।

End. श्रुत्वाख्यानं तदिदमधुना चैत्यवित्तोपयोग-
स्त्याज्यः सद्भिर्विदितभगवद्धर्म्मतत्त्वैः सुसत्त्वैः ।
रक्ष्यं यत्नाज्जिनगृहधनं वर्द्धनीयं तथोच्चै-
र्येन स्वर्गः प्रथममथ सा प्राप्यते मोक्षलक्ष्मीः ॥

Colophon. इति सङ्कासश्रावककथा समाप्ता ।

विषयः । ग्रन्थिलापुरवास्तव्यस्य सङ्कासश्रावकस्य चरितकीर्त्तनव्यपदेशेन चैत्यधनस्य दृथा-व्ययकरणे महान् दोषः, तद्वर्द्धने च महानभ्युदय इति कथनम् ।

No. 4009. सिरिपालणरिंदकहा । (श्रीपालनरेन्द्रकथा ।) Substance, country-made paper, 14 × 6 inches. Folia, 79. Lines, 10 on a page. Extent, 138 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, new. Verse. Correct. Prákṛita.

Siripála-narinda-kahá, or S'rípála-narendra-kathá. The story of S'rípála, king of Rájagṛiha, is fully given in this work. It contains an exposition of the nine cardinal doctrines of the Jaina faith and a description of the Tantric rite known as the Siddhachakra.

H. P. S.

Beginning. अरिहाई नवपयाइं काइत्ता हिअ कमलमज्झंमि ।
सिरिसिद्धचक्कमाहप्पमुत्तमं किं पि जंपेमि ॥
अत्थिथ जंबुदीवे दाहिण भरहद्ध पच्छिमे खंडे ।
बहुधनधण समिद्धो मगहादेसो जयप्पसिद्धो ॥

जन्मुप्पत्तं सिरिवीरनाथतित्थं जयंमि वित्थरियं ।
तं देसं सविसेसं तित्थं भासंति तित्थयरा ॥ इत्यादि ।

End. एसा नवपयमाहप्पसारसिरिपालनरवरिंदकहा ।
निसुणंत कहंताणं भवियाणं कुणउ कल्लाणं ॥
सिरिरज्जसेण गणहर पट्टप्पह हेमतिलयसूरीणं ।
सीसेहिं रयणसेहरसूरीहिं इमाउ संकलिया ॥
तस्सीस हेमचंदेण साहुणाविक्कमस्स वरिसंमि ।
चउदस अट्ठावीसे लिहिया गुरुभत्तिकलिएण ॥
— — — — — — — ।

Colophon. इति सिरिपालणरिंदकहा । सम्पूर्णोऽयं ग्रन्थः ।

विषयः । जैननवपदसिद्धान्तकथनमुखेन सिद्धचक्रमाहात्म्यकीर्त्तनप्रसङ्गेन च राजगृह पुराधिनाथस्य श्रीपालस्य विस्तरेण चरित्रकथनम् ।

No. 4010. जम्बूचरित्रम् । Substance, country-made paper, 12 × 5 inches. Folia, 46. Lines, 8 on a page. Extent, 728 ślokas. Character, Nágara. Date, ? Place of deposit, Váluchara, Pancháyata-pausála. Appearance, fresh. Prose and verse. Incorrect. Sanskrit.

Jambú-charitra. A biographical account of Jambúsvámí. The author's name is Sakalaharsha. The interlocuters are Mahavira and S'reṇika, king of Rájagṛiha. The story opens with an account of of Jambú's four previous existences. In his fifth existence he was born as the son of Ṛishabha, a S'reshṭhi of Rájagṛiha. He was named Jambú because his mother in a dream saw a Jambú tree. He was from early youth indifferent to worldly pleasure and pain, though his father married him to eight exceedingly handsome girls. Once on a time thieves entered his house at night. He preached to them and to his wives. They all followed him, and renounced the world. He became a disciple of Vardhamán. There are eighteen moral stories in this work. Some of them were told by Jambú to the thieves and the wives, and some by his wives to him. These are the stories of (1) Madhuvindu, (2) of the eighteen relatives, (3) of Mahes'varadatta, (4) of S'amudra S'rí, (5) of a crow, (6) of Brahma-śrí, (7) of a goldsmith, (8) of Kalámbita,

(9) of a she-monkey, (10) of Siddhaibuddhi, (11) of a horse of the purest descent, (12) of S'rí-vallabhá, (13) of an illiterate Bráhmaṇa, (14) of Kanakavatí, (15) of a prostitute and a Bráhmaṇa, (16) of a bird, (17) of three friends, (18) and a story told by the Bráhmaṇa.

Beginning. सप्रभावं जिनं नत्वा पार्श्वं सुरेन्द्रवन्दितं ।
लिख्यते स्वोपकाराय जम्बूस्वामिकथानकं ॥

अथैकदा समुद्रवद्गम्भीरः प्राप्तभवाब्धितीरः श्रीमहावीरः क्षितितले विहारं कुर्व्वन् राजगृह-पुरं प्रतिष्ठितः । ततो देवैर्भव्याङ्गिसुखकरणं समवसरणं चक्रे । अथ तत्समये श्रीवीरागमनं श्रुत्वा श्रीश्रेणिकभूपालः सदभयकुमारादिपरिवारविशालः वन्दनार्थमागतः । पश्चात् परमेश्वरेण चतुर्विधो धर्मः प्रकाशितः । यतः,

दानेन प्राप्यते लक्ष्मीः शीलेन प्राप्यते सुखं ।
तपसा क्षीयते कर्म भावेन मोक्षसम्पदः ॥ इत्यादि ।

End. उवसमो कम्पि संजमतियं च केवलबुच्छिन्नामदस इमे ठाणी ।
लोकोत्तरं हि सौभाग्यं जम्बूस्वामिमहामुनेः ।
अद्यापि यं पतिं प्राप्य शिवश्रीर्नान्यमिच्छति ॥

Colophon. इति श्रीजम्बूचरित्रं समाप्तं विहितं श्रीसकलहर्षेण ।

विषयः । अथैकदा राजगृहनगरे धर्म्मदेशनां दिशन्तो भगवन्तो वर्द्धमानस्वामिनः श्रेणिक-भूपालमुद्दिश्य भारतेऽस्मिन् चरमकेवलज्ञानी जम्बूकुमारो भविष्यतीत्यूचुः । अथ कीदृशोऽसौ जम्बूकुमार इति सप्रश्रयं श्रेणिकभूपालेन पृष्टो भगवानाह । तत्र जम्बूकुमारस्य चतुःसंख्यकातीत-जन्मविवरणकथनपूर्व्वकं पञ्चमे जन्मनि राजगृहपुरवासिनः ऋषभश्रेष्ठिनः पुत्रत्वमधिगम्य तत्पत्न्या धारिण्या गर्भधारणकाले स्वप्ने जम्बूवृक्षदर्शनात् जम्बूकुमारेति नाम्ना व्यपदेशकथनं । अथासौ यौवनेऽपि प्रोद्भिन्नवैराग्यतया पित्रोराज्ञेति अष्टौ कन्याः परिणीय तासु सुन्दरीष्वपि तृणबुद्ध्या सञ्जातोपक्षाबुद्धिः रात्रौ स्वगृहागतान् चौरान् तथा स्वदारांश्च धर्म्मोपदेशदानेन साधुचरितान् विधाय प्रातरेव भगवतो वर्द्धमानस्य पञ्चमगणधरं सुधर्मस्वामिनं गुरुत्वेनाङ्गीकार्य्य ततो दीक्षां लब्ध्वा प्रव्रज्याग्रहणेन च कृतकृत्यो बभूवेति विस्तरेण कथनं । तत्र चौरान् स्वदारांश्चोद्दिश्य जम्बू-कुमारेण, अथ तत्पत्नीभिरपि तमुद्दिश्य आख्यायिकाः कथिताः । ताश्च अष्टादशभेदाः । तत्र प्रथमतो मधुबिन्दुकथाकीर्त्तनं । एवं क्रमेण अष्टादशज्ञातिविवेचनकथाकीर्त्तनं । महेश्वरदत्तकथा । समुद्रश्रीकथा । काककथा । ब्रह्मश्रीकथा । स्वर्णकारकथा । कलम्बिककथा । वानरीकथा । सिद्धिबुद्धिकथा । विशुद्धजातीयाश्वकथा । श्रीवल्लभाकथा । मूर्खब्राह्मणकथा । कनकवतीकथा । वेश्याब्राह्मणकथा । पक्षिकथा । मित्रत्रयकथा । ब्राह्मणकल्पितकथाकीर्त्तनञ्च ।

No. 4011. जिनशतकबालाबोधः। Substance, country-made paper, 14 × 5 inches. Folia, 93. Lines, 15 on a page. Extent, 3,051 ślokas. Character, Nágara. Date, ? Place of deposit. Válucbara Panchâyata-pausála. Appearance, new. Prose. Incorrect. Gujaráṭí-bhásá.

Jina-śataka, bálábodha. A commentary in Gujarati of Devendra Súri's Prakrit work, entitled Jinaaśtaka. The author's name is Mati-chandra, a disciple of Gopálgaṇi, belonging to the Anchalika Gachchha. H. P. S.

Beginning. रत्नत्रयोपदेष्टारं नत्वा वीरं जिनोत्तमम्।

स्वल्पो हि शतकस्यार्थो मतिचन्द्रेण लिख्यते॥

नमिय जिनमिति। अर्थः। जिन कहिइ रागद्वेषमोहादिदुर्व्वारवैरवारणाजेता अष्टमहा-प्रातिहार्य्यलक्षणा शोभाइं अलङ्कृततीर्थङ्कर ते प्रतिइं नमस्कार करीने। इत्यादि।

End. शतकशाइते सम्पूर्ण करेवं। विकरालकलिकाललक्षण जे पातान तेहने उद्धरवाने धूरीणसमान जे श्रीजगच्चन्द्रसूरि तेहना चरणकमलने विशेषभ्रमरसमान जे देवेन्द्रसूरि तिणए ग्रंथ लिख्यो छे। कर्मप्रकृति। पञ्चसङ्ग्रह। इहत्शतकादिकशास्त्रथी उद्धरीने। सयग-कहतां शतकगाथा प्रमाण छे। ते कारणे शतककहिइ।

ए शास्त्र विचारतां आत्मज्ञान ऊइ।

Colophon. इति श्रीमदञ्चलिकगच्छीयगोपालगणिशिष्यमतिचन्द्रकृतः जिनशतकबा-लाबोधः।

शतकस्यार्थलेशो हि लिखितो लोकभाषया।

बालानां सुखबोधाय मतिचन्द्रेण साधुना॥

छद्माद्यद्यद्विसंवादि लिखितं बुद्धिविभ्रमात्।

तच्छोध्यं हि कृपां कृत्वा सुधिया श्रुतज्ञानिना॥ इति शम्।

विषयः। देवेन्द्रसूरिकृतप्राकृतभाषामयजिनशतकस्य गुर्ज्जरभाषया व्याख्यानम्।

No. 4012. निबन्धसङ्ग्रहः। Substance, country-made paper, 12 × 4 inches. Folia, 325. Lines, 8 on a page. Extent, 6,662 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Nibandha-sañgraha. Abstract of the Chikitsásthána section of the Suśruta. By Ulhana.

Beginning. शारीरानन्तरं चिकित्सास्थानमारभ्यते । अथातो द्विव्रणीयचिकित्सितं व्याख्यास्यामः । द्वौ व्रणौ अधिकृत्य कृतं चिकित्सितं द्विव्रणीयचिकित्सितं विकारप्रतीकारः । इत्यादि ।

End. दोषघ्नमिति दोषेण येन वा मुखरोगेण वा ।
निबन्धान् बहुधा वीक्ष्य भिषक्श्रीडल्लणाभिधः ॥
चिकित्सास्थानमकरोत्सुबोधं भरतात्मजः ।

Colophon. इति श्रीडल्लणविरचिते निबन्धसङ्ग्रहे समस्तनिबन्धज्ञापकार्थके सौश्रुतचिकित्सास्थानं समाप्तमिति । चत्वारिंशोऽध्यायः समाप्तः ।

विषयः । सुश्रुतसंहिताचिकित्सास्थानस्य व्याख्यानम् ।

No. 4013. द्वादशाब्दादूर्द्धमवलोकने विधिः । Substance, country-made paper, 8 × 4 inches. Folia, 2. Lines, 8 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose and verse. Correct.

Dvádaśábdádúrddha-mavalokane-vidhi. A description of a rite to be celebrated on the return of a son or other relation after an absence of twelve years from home.

Beginning. अथ द्वादशाब्दादूर्द्धमवलोकने विधिः ।
द्वादशाब्दे व्यतीते तु न कुर्य्याद्भ्रातृदर्शनम् ।
पित्रोः पुत्रस्य नैवाङ्कर्महाहानिकरं भवेत् ॥
दर्शनं यदि कुर्व्वीत शिवं पूज्य शिवालये ।
कांस्यपात्रं स्थापयित्वा अन्तः पटविधानतः ।
जलपूर्णे कांस्यपात्रे पूर्वं मुखनिरीक्षणम् ॥
मुखावलोकनं पश्चात् समालिङ्ग्य विपर्य्ययात् । इत्यादि ।

End. आचार्य्यपुरःसरमष्टोत्तरशतं तिलान् हुत्वा आचार्य्याय च दक्षिणां दत्त्वा ब्राह्मणान् भोजयित्वा बन्धुभिः सह भुञ्जीतेति ।

विषयः । पितृमातृभ्रात्रादीनामदर्शनदिनात् द्वादशाब्दे अतीते पुनर्दर्शनविधिकथनं । तत्र प्रयोगकथनञ्च ।

No. 4014. गुणस्थानावचूरिः वा, गुणस्थानक्रमारोहटीका । Substance, country-made paper, 11½ × 5 inches. Folia, 15. Lines, 18—19 on a page. Extent, 770 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Guṇasthánávachúri, or Guṇasthána-kramároha-ṭíká. A gloss on the Jain treatise entitled *Guṇasthána.*

Beginning. अर्हत्पादं हृदि ध्यात्वा गुणस्थानविचारिणां ।
अनुष्टुभामियं वृत्तिर्लिख्यते ह्यवचूर्णिवत् ॥

तत्रादौ मङ्गलार्थमभीष्टदैवतनमस्कारस्य सम्बन्धादेश्चाविर्भावकमाद्यपद्यमाह । गुणमिति । यत्र यत्र पूर्वाप्राप्तगुणविशेषाविर्भावो भवति तत्तद्गुणस्थानमित्युच्यते । चौदश गुणस्थानानि । तेषां स्वरूपं किञ्चिदल्पमात्रमुच्यते इति सम्बन्धः । इत्यादि ।

End. श्लोकैः प्रायः पूर्व्वर्षिरचितैः श्लोकैरेवेत्यर्थः । कैरुद्धृतो रत्नशेखरसूरिभिर्बृहद्गच्छीयश्रीवज्रसेनसूरिशिष्यैः श्रीहेमतिलकसूरिपट्टप्रतिष्ठितैः श्रीरत्नशेखरसूरिभिः स्वपरोपकाराय प्रकीर्णरूपतया प्रकटित इत्यर्थः ।

Colophon. इति श्रीगुणस्थानक्रमारोहस्य टीका समाप्ता ।
ऋषिरससुनिचन्द्रे दशम्यां फाल्गुणे सिते ।
गुणस्थानावचूरिं हि लिलेख तिलकोदयः ॥

विषयः । गुणस्थानक्रमारोहाभिधानजैनप्रकरणस्य व्याख्यानम् ।

No. 4015. **विविक्तनामसङ्ग्रहः ।** Substance, country-made paper, 10 × 4 inches. Folia, 103. Lines, 15 on a page. Extent, 2,338 ślokas. Character, Nágara. Date, Sm. 1785. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Vivikta-náma-sañgraha. A commentary on the *náma-sañgraha* of Hema Ácharya commonly called Hema Kosha.

Beginning. स्वस्ति श्रीत्रिजगज्जन्तुजातजीवातुसन्निभः ।
शिवतातिः सतां भूयाच्छान्तिनाथो जिनेश्वरः ॥
नवीनकविताकान्ताभिमानव्रतशालिनः ।
स्वगुरोः सूरचन्द्रस्य प्रणम्य चरणाम्बुजं ॥
भावचन्द्रादिशिष्याणां सम्यग्व्युत्पत्तिहेतवे ।
नामसङ्ग्रहनामानि विलिख्यन्ते पृथक् पृथक् ॥
रूढयौगिकमिश्राख्यास्त्रिधा शब्दाः प्रकीर्त्तिताः ।
व्युत्पत्तिवर्ज्जितास्तत्र रूढा आखण्डलादयः ।
व्युत्पत्तिभाजः सर्व्वेऽपि मन्यते शाकटायनः ।
तत्पक्षेऽपि तदन्वर्थवर्ज्जितः प्रथमो मतः ॥

यौगिका योगजनिता योगस्तत्रान्वयो मतः ।
गुणक्रियाभ्यां सम्भूतः सम्बन्धप्रभवश्च सः ॥
— — — — — — ।

अनयोरर्थः । शब्दानां परमार्थानुगमनमन्वयः स योगो गुणक्रियासम्बन्धाच्च भवति । इत्यादि ।

End. यदाहुः ।
इयन्त इति संख्यानं निपातानां न विद्यते ।
प्रयोजनवशादेते निपात्यन्ते पदे पदे ॥

Colophon. इति श्रीमत्तपोगणगगनाङ्गनगगनमणिभट्टारकसार्व्वभौमभट्टारकश्री ५ श्रीविजयसेनसूरीश्वराणां विजयराज्ये पतिसाहश्री ५ श्रीअकव्वरजल्लालदीनप्रदत्तोपाध्यायधारकश्रीशत्रुञ्जयकरमोचनाद्यनेकसुकृतकारकमहोपाध्यायश्री ५ श्रीभानुचन्द्रगणिविरचिते विविक्तनामसङ्ग्रहे षष्ठः काण्डः समाप्तः । संवत् १७८५ ।

विषयः । हेमचन्द्रकृतनाममालाभिधानकोषस्य व्याख्यानम् ।

No. 4016. जीवविचारप्रकरणवृत्तिः, वा जीवविचारलघुवृत्तिः ।
Substance, country-made paper, 10 × 5 inches. Folia, 8. Lines, 17 on a page. Extent, 408 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Jívavichára-prakaraṇa-vṛitti, or Jívavichára-laghu-vṛitti. A gloss on the Jaina treatise called *Jivavichára.* By Sánti Súri.

Beginning. ध्यात्वा जैनं महः श्रीमत्सद्गुरुं प्रणिपत्य च ।
वृत्तिं जीवविचारस्य कुर्व्वे संक्षेपतः स्फुटां ॥

इह हि संसारसागरे निमज्जतां जन्तूनामुपकाराय प्रवहणकल्पं तत्त्वोपदेशं दातुकामः श्रीशान्तिसूरिस्तावत् स्वेष्टदेवताप्रणतिपूर्व्विकामभिधेयादिसूचिकामादिमां गाथामाह । भुवणपईवमिति । अत्र भणामीतिक्रियाभिसम्बन्धादहमिति कर्तृपदमध्याहार्य्यं । इत्यादि ।

End. एतेन न स्वमनीषया कल्पित इति सूचितं ।
इति जीवविचारलघुवृत्तिः ।
वृहद्वृत्त्यादिकं त्वस्य यद्यप्यस्ति पुरातनं ।
तथापि सुखबोधार्थं वृत्तिकेयं विनिर्म्मिता ॥
प्रमादाद्वा मतेर्मान्द्यादुक्तमुत्सूत्रमत्र यत् ।
तन्मिथ्यादुष्कृतं मेऽस्तु शोधनीयश्च धीधनैः ॥

संवद्द्रामशिलीमुखाष्टवसुधासंख्ये नभस्ये सिते
पक्षे पावनसप्तमीसुदिवसे वीकादिनेराभिधे ।
+गे श्रीमति पूर्णतामभजत व्याख्या सुवोधिन्यसौ
सम्यक् श्रीजिनचन्द्रसूरिसुनिपे गच्छेशतां बिभ्रति ॥
श्रीमन्तो जिनभक्तिसूरिगुरवखान्द्रे कुले जज्ञिरे
तच्छिष्या जिनलाभसूरिसुनिपाः श्रीप्रीतितः सागराः ।
तच्छिष्यास्तधर्म्मवाचकवरास्तेषां विनेयः क्षमा-
कल्याणः स्वपरोपकारविषयेऽकार्षीदिमां वृत्तिकाम् ॥

Colophon. इति श्रीजीवविचारप्रकरणवृत्तिः सद्भिर्वाच्यमाना चिरं नन्दतात् ।

विषयः । शान्तिसूरिकृतजीवविचारनामकजैनसन्दर्भस्य व्याख्यानम् ।

No. 4017. अभिधानचिन्तामणिः, वा योगशतटीका। Substance, country-made paper, 10 × 4½ inches. Folia, 11. Lines, 20 on a page. Extent, 647 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Abhidhána-chintámani or Yogaśataka-ṭíká. A medical treatise, being a century of recipes. By Vararuchi.

Beginning. श्रीवर्द्धमानं प्रणिपत्य मूर्ध्ना
जनस्य सर्व्वस्य निरोगहेतोः ।
श्रीपूर्णसेनेन सुबोधनार्थं
प्रारभ्यते योगशतस्य टीका ॥

अथ जीवा आदिनिधनास्तेषां जीवानां आहारमन्वाहतशीतातपवर्षानिलविषमाशनानिद्रादिभिर्व्याधय उत्पद्यन्ते । तेषां व्याधीनां प्रतीकारार्थं पुरा सर्व्वज्ञैर्भाषिताद्वैद्यशास्त्रात् सारयोगान् विविच्य योगशतं कर्त्तुकामो वररुचिः शास्त्रादौ प्रतिज्ञां करोति कृत्स्नस्येति । कृत्स्नस्य निरवशेषस्य चरकवाग्भट्टसुश्रुतस्य तन्त्रस्य कल्याणादिर्वैद्यशास्त्रस्य—इत्यादि ।

End. मूत्रपुरीषयोः स्थिरत्वेन प्रवर्त्तनं । एतानि श्लेष्मरोगे जानाति ।
एतानि लिङ्गानि च तत्कृतानां .
सर्व्वामया + + + चैकनाम्नाम् ।
कश्चित् + + प्राप्तिनिरोधपूर्वं
संज्ञान्तरं येन तु संप्रयाति ॥

Colophon. इत्यभिधानचिन्तामणियोगशतटीका सम्पूर्णा ।

विषयः । वररुचिकृतयोगशताभिधानवैद्यकनिबन्धस्य व्याख्यानम् ।

No. 4018. संघपट्टकप्रकरणावचूरिः, वा संघपट्टकपञ्जिका । Substance, country-made paper, 12 × 5 inches. Folia, 7. Lines, 22—24 on a page. Extent, 547 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Correct.

Sañgha-paṭṭaka-prakaraṇávachúri or Sañgha-paṭṭaka-paṇjiká. A gloss on a Jain treatise. By Jinavallabha Súri.

Beginning. नत्वा श्रीशान्तिदेवेशं ज्ञानचन्द्रं गुरुं तथा ।
मया विलिख्यते चैषा संघपट्टकपञ्जिका ॥

श्रीमद्विक्रमन्टपात् दशशताशीतिवर्षे श्रीमदनहलपुरपत्तने दुर्लभराजसभायां चैत्यवासिवासिनो निर्जित्य प्राप्तखरतरविरुदः श्रीजिनेश्वरसूरिः तत्पट्टे श्रीजिनचन्द्रसूरिस्तद्विनेयो नवाङ्गवृत्तिविधाता श्रीअभयदेवसूरिस्तच्छिष्यः श्रीजिनवल्लभसूरिश्चैत्यवासनिराकरणाय श्रीसंघस्य पट्टकरूपराजपट्टमिव श्रीसंघपट्टकशास्त्रं चकार । तस्याद्यकाव्यं । वक्ष्यीति । व्याख्या । वयं तं देवं श्रीपार्श्वनाथं स्तुमः प्रणमामः । इत्यादि ।

End. तेषाञ्च परमं मङ्गलं भविष्यतीति भावार्थः ।
संवत् पञ्चदशाधिके सप्तदशशते त्वियं ।
लिखिता देवराजेन संघपट्टकपञ्जिका ॥

Colophon. इति श्रीसंघपट्टकप्रकरणावचूरिः सम्पूर्णा ।

विषयः । जिनवल्लभसूरिकृतसंघपट्टकाभिधानजैनसन्दर्भस्य व्याख्यानम् ।

No. 4019. स्वोपज्ञधातुपारायणम् । Substance, country-made paper, 13 × 4½ inches. Folia, 70. Lines, 15 on a page. Extent, 4,398 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Svopajṇa-dhátu-páráyaṇa. Illustrations of verbs and cojugations in a grammatical treatise by the author. By Hemachandra.

Beginning. श्रीसिद्धहेमचन्द्रव्याकरणनिवेशितान् स्वकृतधातून् ।
आचार्यो हेमचन्द्रो विवृणोत्यर्हं नमस्कृत्य ॥

इह तावत्पदपदार्थज्ञानद्वारोत्पन्नं हेयोपादेयज्ञानं निःश्रेयसहेतुरिति प्रसिद्धम्। पदपदार्थ ज्ञान + नयनिक्षेपादिभिरभिगमोपायैः परमार्थतो व्यवहारतस्तु प्रकृत्यादिभिरिति इत्यादि।

End. चल्लयति। खल्लयति। चपयति। चपयति। इत्यपि भवति।

Colophon. इत्याचार्य्यश्रीहेमचन्द्रविरचिते स्वोपज्ञधातुपारायणे निरनुबन्धो भ्वादिगणः सम्पूर्णः।

विषयः। निजकृतसिद्धहेमचन्द्रव्याकरणान्तर्गतधातूनां विशेषेण गणादिप्रदर्शनपूर्व्वकं प्रयोगस्वरूपकथनं।

No. 4020. शूलटङ्केश्वरमाहात्म्यम्। Substance, country-made paper, 9 × 5 inches. Folia, 39. Lines, 11 on a page. Extent, 777 ślokas. Character, Nágara. Date, Sm. 1844. Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose and verse. Incorrect.

S'úla-ṭaṅkeśvara-máhátmya. A description of the sanctity of S'úlaṭaṅkeśvara. An extract from the Skanda Puráṇa.

Beginning. अथ शूलटङ्केश्वरमाहात्म्यं लिख्यते। तदुक्तं स्कान्दे शिवरहस्ये। ऋषय ऊचुः।

सूत सूत महाबुद्धे सर्व्वशास्त्रविशारद।
शूलटङ्केश्वरस्यैव माहात्म्यं वद विस्तरात्॥
शूलटङ्केति नामापि कथं जातं महेशितुः।
कुत्र वा संस्थितिस्तस्य पूर्व्वमासीत् प्रभोः सदा॥
केन वा कारणेनैव काश्यामागमनं विभोः।
आकारितश्च केनापि किमर्थं कुत्र वा स्थितः॥
कैश्च सार्द्धं समागत्य किञ्च कार्य्यं कृतं तथा।
किञ्च तीर्थं तदा जातं किञ्च पूर्व्वं स्थितञ्च यत्॥ इत्यादि।

End. रणेऽरण्ये विवादे च सन्निधौ यदि चेद्भवेत्।
जयं तस्य भवेत् तत्र नास्ति शास्त्रादिक + व॥
राजा वा राजपुत्रो वा राजकीयस्तथैव च।
एतन्माहात्म्यराजस्य सान्निध्यं सर्व्वदाचरेत्॥

Colophon. इति स्कन्दपुराणे शिवरहस्ये शूलटङ्केश्वरमाहात्म्यविशेषवर्णने षोड़शोऽध्यायः समाप्तः। संवत् १८४४।

विषयः। काशीस्थवृद्धकालेश्वरनामकमहादेवस्य विशेषेण माहात्म्यादिकथनं। तदाविर्भाव-वृत्तान्तकथनं। वृद्धकालेश्वरनामकारणकथनं। तस्य दशाश्वमेधावस्थितिकारणकथनं। वृद्धकालेश्वर-क्षेत्रनिरूपणं। तत्र यात्राक्रमकथनं। तत्र नैमित्तिककाम्ययात्रादिविधिकथनं। तत्फलकथनञ्च। तत्तीर्थे माघस्नानादिमाहात्म्यकथनं। प्रसङ्गान्माघमाहात्म्यकथनं दशहरामाहात्म्यादिकथनं। दशाश्वमेधे तृणगृहादिभिश्छायाकरणमाहात्म्यकथनं। तत्र प्रासादलिङ्गस्थापनादिमाहात्म्यकथनं। स्नानदानादिमाहात्म्यकथनं। तत्र मरणे सायुज्यमोक्षप्राप्तिकथनं। तत्र गृहदानहोमादिकरणमा-हात्म्यकथनं। तत्र अभिषेकादिमाहात्म्यकथनं। तत्र पुराणपठनपाठनाश्रवणश्रावणादिमाहात्म्य-कथनं। कलौ वृद्धकालेश्वरस्य माहात्म्यातिशयवर्णनञ्च।

No. 4021. रसमीमांसा। Substance, country-made paper, 10 × 4½ inches. Folia, 25. Lines, 3—4—5 on a page. Extent, 114 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Rasa-mímáñsá. Literary criticism. By Gañgáráma Jaḍhi.

Beginning. बलरामेणाकाशं कलिन्दकन्या यथानायि।
गङ्गारामेण तथा रसमीमांसापि बालमनः॥
कविभिः काव्यैः सुहृदां मानसं सदनं समानीतैः।
अनुभावैश्च विभावैर्व्यभिचारिभिरपि च सम्भूय॥
कश्चिदलौकिकरूपो व्यापारो जन्यते तत्र।
तस्मात् स्वतः प्रकाशज्ज्ञानावरणमपसरति द्राक्॥ इत्यादि।

End. गङ्गारामोन्नीतां रसमीमांसां विजानानः।
पुरुषोऽस्तु तुष्टः सर्व्वज्ञः सोऽपि गोविन्दः॥

Colophon. इति श्रीजडुपनामकगङ्गारामोन्नीता रसमीमांसा सम्पूर्णा।

विषयः। रसस्वरूपविवेचनं। रसलक्षणं। आलम्बनविभावलक्षणादिकथनं। उद्दीपनविभा-वादिलक्षणं। स्थायिभावलक्षणादिकथनं। अनुभावलक्षणादिकथनं। शृङ्गारादिनवविधरसलक्षणा-दिकथनं। रत्यादीनां लक्षणादिकथनं। अथ असंलक्ष्यक्रमलक्ष्यक्रमरूपभेदनिरूपणञ्च।

No. 4022. छाया, वा रसमीमांसाव्याख्या। Substance, country-made paper, 10 × 4½ inches. Folia, 25. Lines, 6—7—8 on a page. Extent, 618 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Iucorrect.

Chháyá or Rasa-mímáñsá-vyákhyá. A gloss on the author's treatise on the Rasas.

Beginning. श्रीगणेशाय नमः ।

व्यावल्गत्कारफुत्कृतिनिरस्तपूर्वापरप्रचुरविघ्नः ।
सव्यापसव्यलक्ष्यो गणाधिपो जयति सार्वभौम इव ॥
नाभीसरोरुहोद्वैर्वदनसरोजासनोपरि स्थित्वा ।
त्रिभुवनमपूर्वमिव या प्रदर्शयति सा सरस्वती जयति ॥
— — — — — — — ।
राधादेवीं गङ्गारामो जड़ीति यः ख्यातः ।
सोऽहं रसमीमांसां विदुषोऽप्यर्थप्रबोधसिद्ध्यर्थम् ॥

प्रारम्भे इष्टस्य ग्रन्थस्य निर्विघ्नसमाप्तिकामनया कृतं वस्तुनिर्देशात्मकं मङ्गलं शिष्यशिक्षायै निबध्नं चिकीर्षितं प्रतिजानीते । बलरामेणेति । बलरामेण कलिन्दकन्या यमुना आकाशमूर्द्धं यथानायि । इत्यादि ।

End. पुरुषोत्तमः तुष्टोऽस्तु । स गोविन्दः सर्वज्ञः पात्विति अन्वयः । शेषं पूर्ववदिति ॥

रसरागपद्मरागां भावप्रज्ञाविशुद्धमुक्ताभाम् ।
सात्त्विकसुवर्णवर्णां नानामुक्तां गृहाण वाणीमाम् ॥
नौकाया भानुतरङ्गिण्यां छायामिमां समास्थाय ।
नवरसयात्रीभूता विहरन्तः केन रामकृष्णन्ति ॥

Colophon. इति श्रीजड़ुपनामकगङ्गारामविरचिता छायाभिधा रसमीमांसाव्याख्या समाप्ता । शुभमस्तु ।

विषयः । निजकृतरसमीमांसाया व्याख्यानम् ।

No. 4023. चतुर्विंशतिमतव्याख्या, (आचारकाण्डम्) । Substance, country-made paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 114. Lines, 7 on a page. Extent, 2,174 ślokas. Character, Nágara. Date, Sm. 1867. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Chaturviñśatimata-vyákhyá. (A'chárakáṇḍa.) Dialectic disquisitions on duty. By Bhaṭṭojí Díkshita.

Beginning. श्रीगणेशाय नमः ।

अथाह्निकं लिख्यते । तत्र माधवीये कूर्म्मपुराणे । ब्राह्मे मुहूर्त्ते उत्थाय धर्म्ममर्थञ्च चिन्तयेत् । कायक्लेशं तदुद्भूतं ध्यायीत परमेश्वरमिति । सूर्य्योदयात् प्रागर्द्धप्रहरे द्वौ मुहूर्त्तौ । तत्राद्यो ब्राह्मः । द्वितीयो रौद्रः । तदुक्तं विष्णुपुराणे । रात्रेः पश्चिमयामस्य मुहूर्त्तो यस्तृतीयकः । स ब्राह्म इति विज्ञेयो विहितः स प्रबोधन इति ।

End. तत्र च वर्ज्यानाह पराशरः । विक्रीणन् मद्यमांसानि ह्यभक्ष्यस्य च भक्षणात् । कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात् । इति शेषमन्यतो बोध्यम् । इति शूद्रधर्म्माः ॥

Colophon. इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरेः सूनुना भट्टोजिदीक्षितेन रचितायां श्रीचतुर्विंधमतव्याख्यायामाचारकाण्डं समाप्तम् । संवत् । १८६७ ।

विषयः । आह्निककृत्यनिरूपणम् । तत्र ब्राह्मरौद्रादिमुहूर्त्तलक्षणादिकथनं । उत्थानविधिकथनं । तत्र भूमिप्रार्थनाविधिकथनं । तृणकाष्ठाद्याहरणे कालभेदेन नियमविशेषकथनं । शौचादिविधिविवेचनं । पादप्रक्षालनादिविधिकथनं । आचमनविधिकथनादिकं । गण्डूषनिरूपणादिकं । ब्राह्मतीर्थादिनिरूपणं । आचमननिमित्तकथनं । दृष्टद्वये दन्तधावने वर्ज्यतिथिकथनादिकं । पवित्रविधिकथनं । स्नानविधिकथनं । तदनुकल्पकथनं । दर्भमोचनादिविधिकथनं । परिधेयवस्त्रादिनिरूपणं । आर्द्रवस्त्रोत्तारणे विशेषकथनं । अनुकल्पकथनं । आश्रमभेदेन स्नानभेदनिरूपणम् । नित्यनैमित्तिकस्नानादिविधिकथनं । वस्त्रान्तरिते स्पर्शे विशेषकथनं । देवलकादिलक्षणकथनं । अश्वत्थच्छायास्नानविधिः । समुद्रस्नानविधिः । तिलकविधिः । सन्ध्याविधिकथनं । तत्कालदेशादिनिरूपणं । सन्ध्याप्रयोगकथनञ्च । गायत्रीजपविधिकथनं । होमविधिकथनं । प्रातर्होमकालादिनिरूपणं । श्रौतस्मार्त्ताग्निव्यवस्थाकथनं । नित्यदानविधिकथनं । मङ्गलदर्शनविधिकथनं । एवं दिनस्य द्वितीयतृतीयभागकृत्यकथनं । आतिथ्यविधिकथनं । अर्ज्जनोपायकथनं । आपद्वृत्तिकथनं । चतुर्थभागकृत्यकथनं । पञ्चयज्ञविधिकथनं । तदनुष्ठानक्रमकथनं । विशेषेण तर्पणविधिकथनं । देवतार्चनविधिकथनं । तत्र विष्णुपूजाविधिकथनं । पूजोपकरणादिनिरूपणं । पूजेतिकर्त्तव्यतानिरूपणं । गुरुपूजाविधिकथनं । पञ्चमभागकृत्यनिरूपणं । भूतयज्ञपितृयज्ञादिनिरूपणं । भोजनविधिकथनं । तदुदीच्याङ्गनिरूपणं । कालविशेषे भोजनाकर्त्तव्यतादिनिरूपणं । षष्ठभागकृत्यनिरूपणं । शयनविधिकथनं । उदक्शिर आदिशयनविधिः । अथ वाणप्रस्थाश्रमकृत्यनिरूपणं । सन्न्यासाश्रमकृत्यनिरूपणं । कुटीचकबहूदकहंसपरमहंसभेदात् चतुर्विधसन्न्यासिनिरूपणं । अथ क्षत्रियधर्मकथनं । वैश्यधर्मकथनं । शूद्रधर्मकथनञ्च ।

No. 4024. प्रशस्तिकाशिका। Substance, country-made paper, 12 × 4½ inches. Folia, 20. Lines, 10 on a page. Extent, 600 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Praśasti-káśiká. A Letter-writer, giving the forms and addresses appropriate for letters to various persons; defective.

Beginning. नत्वा गणपतिं देवं सर्वविघ्नविनाशनम्।
गुरुञ्च करुणानाथं ब्रह्मानन्दाभिधानकम्॥
प्रशस्तिकाशिका दिव्या शम्भुदेवेन लिख्यते।
सर्वेषामुपकाराय लेखनाय च धीमताम्॥
चतुर्णामपि वर्णानां क्रमतः कार्य्यकारिणी।
लिख्यते सर्वविद्यार्थिप्रबोधाय प्रशस्तिका॥
यस्या लेखनमात्रेण विद्या कीर्त्तिर्यशोऽपि च।
प्रतिष्ठा लभ्यते शीघ्रमनायासेन धीमता॥

तत्रादौ ब्राह्मणानाम्। स्वस्तिश्रीमत्सकलविद्याविनोदरसिकविराजमानसन्मण्डलीसमाजमण्डलविहितदिग्विजयवादीन्द्रवृन्दमर्द्दन—इत्यादि।

End. श्रीमत्याः।

स्वस्तिश्रीमद्रुस्थतीरुमानपातिव्रत्यालङ्करणालङ्कृतभोगायतनप्रपालितनिखिलस्वाश्रितजनकदम्बासु असुकमहाराजासु।

Colophon. अतः परं खण्डितत्वात् परिसमाप्तिसूचकवाक्यं नास्ति॥

विषयः। प्रशस्तिलेखनप्रकारकथनं। तत्र गद्येन ब्राह्मणानां प्रशस्तिकथनं। तत्र पण्डितानां। विद्वत्प्रभूणां। यतेः। प्रसङ्गेन तपोवनवर्णनं। अथ पद्येन पूर्वोक्तानां प्रशस्तिकथनं। अथ कनिष्ठविषये प्रशस्तिकथनं। कुशललेखनोपालम्भकथनं। अमात्यादीनां प्रशस्तिकथनं। राज्ञः प्रशस्तिकथनं। अथ गुरूणां। पितृचरणानां। एषाञ्च पद्येन प्रशस्तिकथनं। एवं परत्र ज्ञेयं। अथ कुशललेखनप्रकारकथनं। अथ वैश्यविषये प्रशस्तिकथनं। अथ शूद्रविषये प्रशस्तिकथनं। अथ मात्रादीनां प्रशस्तिकथनं। नायकनायिकादीनां प्रशस्तिकथनं। अथ भ्रात्रादीनां प्रशस्तिकथनं। अथ राज्ञ्याः प्रशस्तिकथनञ्च। अतःखण्डितम्।

No. 4025. कारुण्यलहरीस्तवः। Substance, country-made paper, 12 × 4 inches. Folia, 14. Lines, 8 on a page. Extent, 238 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Correct.

Káruṇya-laharí-stava. A Hymn to Dakshiṇámúrtí. Anonymous.

Beginning. श्रीगणेशाय नमः।

तदव्यादेन्द्या विमलकलधौतद्युतिमहः
परं येन क्लीवं पुरुषति च सौन्दर्य्यमयते।
हरीन्द्रादेः सर्गस्थितिलयकृतिर्यस्य विकृति-
श्चिदानन्दाकारं किमपि करुणापूरमरुणम्॥ १॥
(अष्टशतोत्तरायुतद्वयमन्त्रवाची।)
शिवे तन्त्रज्ञानागमनिगमवैषम्यकलहा-
कुलीभावादेकां द्रुहिणहरिरुद्रादिजननीम्।
प्रपद्ये त्वामेव स्फुरदरुणकारुण्यलहरीं
चिदानन्दस्यन्दामितरपथमन्दादरतया॥ २॥ इत्यादि।

End. अपारव्याहारे तव रुचिरकारुण्यलहरी-
स्तवेऽवोचत् किञ्चित्सदसदपि यत्कङ्कणकविः।
मुदं तत्ते धत्तां करुणिमसुधासिन्धुलहरि-
स्खलद्वर्णो बालः सुखयतितरामेव जननीम्॥ १००॥
इति शतकमनन्तब्रह्मविद्यास्तवस्य
प्रकटितपरमार्थानन्दसन्दोहभावम्।
कलयतु मतिमस्मिन् यादृशं यस्य चेत-
स्तदखिलफलसाक्षी दक्षिणामूर्त्तिरेकः॥ १०१॥

Colophon. इति श्रीशङ्करीचरणकिङ्करीभवता कविकङ्कणेन कृतः कारुण्यलहरीस्तवः। शुभमस्तु।

विषयः। स्तोत्रव्याजेन भगवत्या रूपगुणमाहात्म्यादिवर्णनम्।

No. 4026. मुकुन्दविलासम्। Substance, country-made paper, 11 × 4½ inches. Folia, 16. Lines, 10 on a page. Extent, 350 ślokas. Character, Nágara, Date, ? Place of deposit, Calcutta, Government of India. Appearance. fresh. Verse. Incorrect.

Mukunda-vilása. An imitation of Jayadeva's Gitagovinda.

Beginning. श्रीकृष्णाय नमः।

वेदान्तैरपि गीतं नित्यमसङ्गं गुणातीतम्।

नन्दसुतं गुणसिन्धुं चिन्तय तं चित्त राधिकावल्लभम् ॥
हेरम्बं कतिचित्परे दिनकरं केचित्पुनः शङ्करं
शक्तिं केचन कोऽपि विष्णुममलं त्वन्ये परे पद्मजम् ।
एकं भिन्नधिया यमेव परमात्मानं सदोपासते
तं वृन्दावनचन्द्रमाश्रय मनः श्रीराधिकावल्लभम् ॥
या वाणी विधिसन्निधौ जलधिजा या शार्ङ्गिणः सङ्गिनी
येशानार्द्धशरीरिणी भगवती या रामचन्द्रप्रिया ।
या रुक्मिण्यपि वासुदेवघटिता या रामगा रेवती
तामेतां व्रजराजपुत्रदयितां श्रीराधिकामाश्रये ॥
— — — — — ।
श्रीजगन्नाथदेवस्य श्रीवाणपुरपालिनः ।
शिवस्य परितोषाय काव्यमारभ्यते मया ॥
तुण्डीरागः ।
जय परमेश रमेश्वर विष्णो ।
विदितजगद्गुण रिपुगणजिष्णो ॥ इत्यादि ।

End. इति लसद्वचनं मधुसूदनम्
जलधिजा नलिनी मधुसूदनम् ।
अनुमताञ्जलिभाषितदैवतं
स्मरदशी भृशभावितदैवतम् ॥

Colophon. अतः परं खण्डितत्वात् परिसमाप्तिसूचकं नास्ति ।

विषयः । जयदेवकृतगीतगोविन्दच्छायामवलम्ब्य विरचितोऽयं निबन्धः । तत्र प्रथमे सर्गे,—गोपीनां श्रीकृष्णं प्रति पूर्वरागवर्णनं । द्वितीये सर्गे,—तासां वाग्विलासवर्णनं । तृतीये सर्गे,—गोपीभ्यो नारदस्य उपदेशदानवर्णनं । चतुर्थे सर्गे,—ताभिर्गौरीशङ्करपूजनवर्णनं । सप्तमे सर्गे,—तासां समक्षं श्रीकृष्णस्य अनुरागप्रकटनवर्णनं । षष्ठे सर्गे,—गोपीकृष्णयोः परस्परमालापवर्णनं । वस्त्रहरणलीलावर्णनञ्च, (अतः खण्डितम्) (काव्येऽस्मिन् हरिहरयोरभिन्नतया लीलावर्णितेति ज्ञातव्यमिति ।)

No. 4027. प्रपञ्चसारविवेकः । Substance, country-made paper, 10 × 4 inches. Folia, 41. Lines, 10 on a page. Extent, 890 ślokas. Character, Nágara. Date, Sm. 1840. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Prapañcha-sára-viveka. A compilation on morality as inculcated in the Sástras. By Gańgádhara Mahákara, son of Sadásiva Súri.

Beginning. श्रीगणेशाय नमः ।

ॐ नमस्कृत्य शिवानाथं लक्ष्मीकान्तं जगद्गुरुं ।
भवानीं ढुण्ढिराजञ्च दण्डपाणिञ्च भैरवं ॥
गङ्गां सरस्वतीं रामं वायुपुत्रं जितेन्द्रियं ।
देवदैत्यगुरू सूर्य्यं वाल्मीकिं व्यासनारदौ ॥
अद्वैतानन्दपादाब्जं पितरं मातरं गुरुं ।
देवानृषीन् पितॄन् धर्म्मं काशीञ्च हृदि भक्तितः ॥
सदाशिवतनूजन्मा वत्सगोत्रः सतां प्रियः ।
गङ्गाधर इति ख्यातो भगवद्भक्तकिङ्करः ॥
नानाशास्त्राणि चालोक्य बालानां हितकाम्यया ।
भवसारविवेकञ्च कुर्व्वे मोहविनाशकं ॥
यत्नप्रज्ञानमात्रेण मातेव हितकारिणी ।
बुद्धिर्विवर्द्धते पुंसां सोऽयमाद्रियतां बुधैः ॥ इत्यादि ।

End. बहवो यद्यपि ग्रन्थाः पादपाः सन्ति भूतले ।
तथाप्ययं विजयते हरिनामफलैः प्रभुः ॥

Colophon. इति श्रीमन्महाड़करोपनामकसदाशिवसूरिसूनुभगवद्भक्तकिङ्करगङ्गाधरविरचितेप्रपञ्चसारविवेके अहोरात्रकृत्यनिरूपणं नाम अष्टमोल्लासः समाप्तः । संवत् १८४० ।

विषयः। विस्तरेण नीतिकथनं । तत्प्रसङ्गाद्धर्म्मनीतिकथनञ्च। विशेषेण नीतिमार्गनिरूपणं। सदसत्कर्म्मफलकथनं । देवस्वरूपनिरूपणं । भगवत्पूजाविधिकथनं । भागवतधर्म्मकथनं । आह्निककृत्यकीर्त्तनञ्च ।

No. 4028. कवीन्द्रकल्पद्रुमः । Substance, country-made paper, 11 × 4½ inches. Folia, 20. Lines, 14 on a page. Extent, 1,572 ślokas. Character Nágara. Date, ? Place of deposit, Calcutta, Government of India Appearance, fresh. Prose and verse. Incorrect.

Kavíndra-kalpadruma. On literary composition. By Kavindra Áchárya Sarasvati.

Beginning. श्रीरामाय नमः ।

गुरुं गङ्गां गणेशञ्च शिवौ विष्णुदिनेश्वरौ ।

प्रणम्य रम्यतासिन्धुर्निबन्धोऽयं निबध्यते ॥
काशीवासी प्रकाशीकृतगुणनिचयः सर्व्वविद्याविलासी
दासीभूतः स्मरारेर्विषयसुखगणे + + दासीनचेताः ।
गोदातीरे प्रमोदावलिबलिततमे जन्मभाक् पुण्यभूमा-
वृग्वेदी वेदवेदी जगति विजयते श्रीकवीन्द्रो यतीन्द्रः ॥
अधीत्य वेदवेदाङ्गकाव्यशास्त्राणि सर्व्वशः ।
ततः स्वीकृत्य सन्न्यासं ब्रह्माभ्यासं समाश्रितः ॥
— — — — — — ।
तत्रादौ गणेशस्तोत्रं ।
सचित्ते विधत्ते यदीयस्मृतिं य-
स्तदैवातिविन्नेशतातस्य पुंसः ।
प्रकामं प्रकामं द्रुतं विधत्ते
प्रमत्तेभतुण्डं समीडंग्र तमीड़े ॥ (?) इत्यादि ।

End. तत्त्वज्ञानदूरीकृतमहामोहसमवगतसप्तभूमिकासमारोहमहम्मद्दाराशिकोह-कृता + + + नारायणेत्यष्टाक्षरमन्त्रपूर्व्वका नमस्काराः सन्ति ॥

Colophon. इति श्रीसर्व्वविद्यानिधानकवीन्द्राचार्य्यसरस्वतीविरचिते कवीन्द्रकल्पद्रुमे प्रास्ताविकगद्यपद्यदण्डकप्रशस्तिः ॥

विषयः । गणेशस्तोत्रकीर्त्तनं । गङ्गास्तोत्रकथनं । यमुनास्तोत्रं । वितस्तास्तोत्रं । सूर्य्यस्तोत्रं । शिवस्तोत्रं । भवानीस्तोत्रं । नृसिंहरूपवर्णनं । श्रीकृष्णरूपवर्णनं । रामचन्द्ररूपवर्णनं । हनूमत्स्तोत्रं । प्रास्ताविकश्लोककथनं । शिवरामवर्णनं । पत्रावलम्बनपद्यकथनं । पत्रप्रशस्तिवर्णनञ्च ।

No. 4029. विमलोदयमाला । Substance, country-made paper, 9 × 4½ inches. Folia, 58. Lines, 11 on a page. Extent, 1,394 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Vimalodaya-málá. An introduction to the Gṛihya Sútras of Ásvaláyana.

Beginning. प्रथमतः खण्डितम् ।
— — — — स्थाने स्वाहाकारं प्रयोजयेत् ।
अग्न्यादिना तु मन्त्रेण पूर्व्वं होमसुशन्ति हि ॥
विप्रहेण तु कर्त्तव्यमिति गृह्यविदां मतं ।
भुक्तवत्सु कृतं तेषु यथेष्टं भोजयेत् ततः ॥

प्रभूतं मन्त्रदेयं स्याद्दध्यन्नादीनि निश्चितं ।
ज्ञात्वा तु श्रावयेत् द्विप्रान् सर्व्वा मधुमतीर्ऋचः ॥
अक्षन्निमीयमदक् श्राव्या श्रावितायाश्चि लय ।
— — — — — ।
नान्दीश्राद्धमिद्दाचार्य्या गृह्यस्मृतिनिबन्धनं ॥
इति नान्दीश्राद्धप्रकरणं ।
अथापरेद्युः समाचारतो ब्राह्मणभोजनादिकं
कृत्वा स्नाताहृतवस्त्रः सितकुसुमानुलेपनः । इत्यादि ।

End. तेनैव पथा पशून् गमयित्वा पूर्णपात्रनिनयनादिशेषं परिसमाप्य शन्ता-तीयं (?) जपन् पशूनां मध्यं गच्छेत् ।

Colophon. कृतौ विमलोदयमालायां चतुर्थोऽध्यायः ईरितः ।

विषयः । आश्वलायनगृह्यसूत्रस्य व्याख्यानमुखेन प्रयोगकथनम् ।

No. 4030. आश्वलायनप्रायश्चित्तप्रयोगः । Substance, country-made paper, 10 × $3\frac{1}{2}$ inches. Folia, 16. Lines, 10 on a page. Extent, 380 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

A'śvaláyana-práyaśchitta-prayoga. Directions for the performance of sundry expiations according to the rules of A'śvaláyana.

Beginning. श्रीगणेशाय नमः ।

ॐ विध्यपराधे प्रायश्चित्तिः । विहितस्याकरणे अन्यथाकरणे च प्रायश्चित्तिः कर्त्तव्या । अपराधे सति तदर्थतया विहितमस्ति चेत् तदेव कर्त्तव्यं । तत्रास्ति चेत् व्याहृतिहोमः कार्य्यः । इत्यादि ।

End. गृहीतेनाज्येन सप्तहोतारं सप्रग्रहं होष्यामीति सङ्कल्प्य महाहुर्य्यो देवता सर्व्वप्रायश्चित्तमाहवनीये ।

Colophon. इत्याश्वलायनप्रायश्चित्तप्रयोगस्त्रियम्बकमोक्षोपनाम्ना कृतः समाप्तिमगमत् ।

विषयः । आश्वलायनोक्तविधिना पिण्डपितृयज्ञादिलोपे प्रायश्चित्तविधिकथनम् ।

No. 4031. आधानपद्धतिः । Substance, country-made paper, 9 × 4 inches. Folia, 31. Lines, 8 on a page. Extent, 427 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

A'dhána-paddhati. A guide to the performance of the *ádhána* rite according to A'pastamba. By Ananta Bhaṭṭa.

Beginning. श्रीगणेशाय नमः ।

अथाधानं । जातपुत्रकृष्णकेशावस्थः सभार्य्यः पितुर्ज्येष्ठस्य वा कृताधानत्वे प्रयुक्ताधिकारप्रतिबन्धरहितोऽपि क्वचित् (?) कालमनाहिताग्निश्चेत् । उक्तकृच्छ्राद्यनुष्ठानपूर्व्वककुष्माण्डहोमैरात्मानं पावयेत् । यस्तु पित्रादिपाकोपजीवी—इत्यादि ।

End. प्राणाय स्वाहेति प्रथमग्रासग्रहणं । अचारहविषाशनं भूर्भुवः स्वरिति हविरासादनं ।

अवादीत्यमनन्तेन प्रकृत्यारम्भगोचरः ।
आपस्तम्बीयकल्पोक्तविधिः श्रीहरितुष्टये ॥

Colophon. इत्यन्वारम्भणीयप्रयोगः । इत्याधानपद्धतिः समाप्ता ।

विषयः । आपस्तम्बमतानुसारेण आधानकालविहारादिनिरूपणपूर्व्वकं तत्र तत्र प्रयोगकथनम् ।

No. 4032. आग्रयणम् । Substance, country-made paper, 9 × 5 inches. Folia, 12. Lines, 10 on a page. Extent, 284 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

A'grayaṇa. Directions for the performance of the *A'grayana* rite.

Beginning. श्रीगणेशाय नमः ।

अथाग्रयणम् । अथाग्रयणमिति कर्म्मनामधेयं । तत्र श्रुतिः । शतायुषाय शतवीर्य्याय शतोतयेभिमातिषाहे । शतंयो नः शंतनुवेश्योनः । इत्यादि ।

End. सहस्रं भोजयेत् सोमे ब्राह्मणानां शतं पशौ ।
चातुर्मास्ये तु चत्वारि शतान्यथ सुराग्रह इति ॥

संस्कार इत्यनेनान्वारम्भदर्शपूर्णमासादिसुराग्रहणेन सौत्रामणिग्रहणं । असामर्थ्ये तु ब्राह्मणं तर्पयेत वै । इत्याह कात्यायनः । अत्र कर्कोपाध्यायाः ऋत्विजाधिकमेकं भोजयेत् । अनेनैव न्यायेन सर्व्वत्र ज्ञेयमिति व्याचक्रुरित्यलम् ।

विषयः । आग्रयणस्वरूपनिरूपणं । तत्र ब्रीह्याग्रयणं यवाग्रयणं श्यामाकाग्रयणञ्च त्रिधेति तस्य स्वरूपभेदादिकथनं । तत्र क्रमेण कालनिरूपणं । अनुकल्पविधानकथनं । तदकरणे प्रत्यवायादिकथनं । दक्षिणादिनिरूपणं । पूर्णपात्रादिलक्षणकथनं । ब्राह्मणभोजनसंख्यादिकथनञ्च ।

No. 4033. मासिश्राद्धमानोपन्यासः। Substance, country-made paper, 10 × 5 inches. Folia, 2. Lines, 12 on a page. Extent, 40 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Mási-śráddha-mánopanyása. An introduction to directions on the performances of monthly śráddhas. By Maunamallári Dikshita.

Beginning. श्रीगणेशाय नमः।

अष्टकादिश्राद्धेषु मासिश्राद्धविधिः। सांवत्सरिकादिषु दर्शश्राद्धविधिः सर्व्वेषां। नामचोदनालिङ्गानिर्द्देशाभ्यां प्रत्यक्षविधिनातिदेशस्य बलवत्त्वात्। इत्यादि।

End. तस्मान्न्यायानालोचनपूर्व्वकग्रन्थश्रद्धामात्रमनादेयमिति सर्व्वतन्त्रस्वतन्त्रस्य परामर्शः।

Colophon. इति दीक्षितमौनिमल्लारिकृतो मासिश्राद्धमानोपन्यासः।

विषयः। श्राद्धातिदेशस्वरूपादिनिरूपणं। मासिश्राद्धकालादिनिरूपणञ्च।

No. 4034. मासिश्राद्धविधिक्रमः, मासिश्राद्धप्रयोगश्च। Substance, country-made paper, 10 × 4 inches. Folia, 14. Lines, 12 on a page. Extent, 236 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Mási-śráddha-vidhikrama or **Másia-śráddha-prayoga.** Directions for the performance of monthly S'ráddhas according to Ápastamba.

Beginning. नत्वा रामं गणेशानमापस्तम्बमुनिं तथा।

तत्सूत्रभाष्यकारादींस्तन्मार्गेण निबध्यते॥

सम्राजा रघुनाथेन मासिश्राद्धविधिक्रमः।

यदत्र स्खलितं किञ्चिच्छोध्यं तद्वङ्कवेदिभिः॥

अपरपक्षे श्राद्धं कुर्वीत। इत्यादि।

End. शुचिदेशनिधानेन प्रतिपत्तिं विधायेष्टैः सह श्राद्धशेषं भुञ्जीतेति।

Colophon. इति सम्राट्स्थपतिभट्टरघुनाथानुक्रान्तो मासिश्राद्धप्रयोगः समाप्तः।

विषयः। आपस्तम्बमतानुसारेण मासिश्राद्धविधिकथनं। तत्प्रयोगकथनञ्च।

No. 4035. ब्रह्मचिन्तनिका । Substance, country-made paper, 10 × 4 inches. Folia, 3. Lines, 9 on a page. Extent, 45 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Brahma-chintaniká. On meditation on the soul. By Sánkara A'cháryya.

Beginning. श्रीगुरुभ्यो नमः ।

ॐ अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति स्यान्निश्चितो मुक्तो + + एवान्यथा भवेत् ॥
अहमेव परं ब्रह्म न चाहं ब्रह्मणः पृथक् ।
इत्येव समुपासीत ब्राह्मणो ब्रह्मणि स्थितः ॥ इत्यादि ।

End. नाहं देहो न मे देहः केवलोऽहं सनातनः ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ॥

इति श्रुतेः ।

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचिता ब्रह्मचिन्तनिका समाप्ता ।

विषयः । आत्मनोऽभिन्नत्वेन ब्रह्मचिन्तनप्रकारकथनम् ।

No. 4036. व्रते प्रधाननिरूपणम्, वा व्रते अन्वाधानम् । Substance, country-made paper, 11 × 4 inches. Folia, 4. Lines, 12 on a page. Extent, 102 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Vrata-pradhána-nirúpaṇa. On some of the principles of optional fasts or *vratas*.

Beginning. श्रीगणेशाय नमः ।

अथ व्रते अन्वाधानं । अरुन्धतीप्रधानं । अरुन्धतीं प्रतिद्रव्यं अष्टाधिकशतसंख्यया तिलसमिधा यक्ष्ये । मन्त्रः । पुत्रान् देहि धनं देहि सौभाग्यं देहि सुव्रते । अन्यांश्च सर्व्वकामांश्च देहि देवि नमोऽस्तु ते । इत्यादि ।

End. ज्येष्ठागौरीव्रते । मम मृत + + वन्ध्यादिदोषपरिहारार्थं — — — — — तामग्निवर्णां प्रतिद्रव्यं चाष्टोत्तरशतसंख्यया दधिमधुक्षीरघृताक्तैतिभिः————परं खण्डितम् ।

विषयः । अरुन्धत्यादिव्रतेषु प्रधानदेवतामन्त्रद्रव्यविधानकथनम् ।

No. 4037. ब्रह्मसूत्रसिद्धान्तमरीचिका, वा ब्रह्मसूत्रवृत्तिः। Substance, country-made paper, 12 × 5½ inches. Folia, 5. Lines, 12 on a page. Extent, 317 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose. Incorrect.

Brahma-sútra-siddhánta-maríchiká, or Brahma-sútra-vṛitti. Gloss, called *Marichiká*, on the aphorsims of the Vedánta. By Vanamáli.

Beginning. श्रीहयग्रीवाय नमः।

सर्व्ववेदाभिधेयो यो हेयशून्यो गुणालयः।
वाजिग्रीवः कृपाब्धिर्नः सोऽव्यादानन्दविग्रहः॥
श्रीमद्द्वैपायनं वन्दे मद्दंशमरिन्दमम्।
श्रीगुरुपादधूलीश्च +न्यान् ग्रन्थकृतः सतः॥
प्राचीनोक्तीः समालोच्य संक्षेपाद्वनमालिना।
श्रीब्रह्मसूत्रसिद्धान्तमरीचिका विरच्यते॥

ब्रह्मादिभिः प्रार्थितः संसारिणः सञ्जीवान् उद्दिधीर्षुर्भगवान् द्वापरादौ वेदान् विभज्य तदर्थ-निर्णायकब्रह्मसूत्राणि चकार। तत्रादौ सर्व्वशास्त्रविचारविधिमसूत्रयत्। अथातो ब्रह्मजिज्ञासा। अत्र वेदार्थनिर्णायकन्यायग्रथनात्मकमिदं शास्त्रमारम्भणीयं न वेति चिन्तायां नारम्भणीयमिति।

End. ब्रह्मलोकमभिसंपद्यन्ते इति श्रुतेः।

श्रीगोविन्दविहारभूषितभुवो वृन्दावन+ + +
सिक्तो +नाङ्घ्रिसुखे+ + + +विप्राभरद्वाजजाः।
श्रीसन्नाहसुचो वसन्ति सुकुले तेषां सुगतेन वै
वर्णिश्रीवनमालिना श्रुतिनये वृत्तिः समाप्ता कृता॥
— — — — — — ।
भगवतो+कञ्जस्य श्रीगोपालस्य रेणवः।
क्रियासुर्मृतिमस्माकमानन्दानाञ्च संविदाम्॥

Colophon. इति श्रीवनमालिविरचितायां ब्रह्मसूत्रे मरीचिकायां वृत्तौ चतुर्थाध्यायस्य चतुर्थः पादः।

विषयः। परमैश्वर्य्यवाचकवासुदेवभगवद्ब्रह्मशब्दानामेकार्थकत्वनिरूपणपूर्व्वकं हरिप्रसाद-स्यैव मोक्षहेतुत्वञ्चोक्त्वा ब्रह्मसूत्राणां गुणपूर्त्तिवादनिर्णयपरतया व्याख्यानम्। मतेऽस्मिन् मोक्षद शायां कीटभृङ्गन्यायेन जीवानां ब्रह्मभावप्राप्तिकीर्त्तनञ्च।

No. 4038. दशवैकालिकशब्दार्थवृत्तिः। Substance, foolscap paper, 10 × 5 inches. Folia, 27. Lines, 20 on a page. Extent, 2,730 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Sanskrit.

Daśavaikálika-śabdártha-vritti. Gloss on the Jain treatise called *Daśavaikálika*. By Samayasundara Gaṇi.

Beginning. सम्भनाधीशमानम्य गणिः समयसुन्दरः।
दशवैकालिके सूत्रे शब्दार्थं लिखति स्फुटं॥

धम्मो मंगलमित्यादिव्याख्या। धर्म्मो दुर्गतिप्रपतज्जन्तुधारणलक्षणः। उत्क्रष्टं प्रधानं मङ्गलं वर्त्तते। को धर्म्म इत्याह। अहिंसा न हिंसा। इत्यादि।

End. मुच्यते विमुच्यते ब्रवीमीति पूर्व्ववत्। इति चूलिकाद्वयं व्याख्यातं। अथ प्रशस्तिः।

हरिभद्रकृता टीका वर्त्तते विषमा परं।
मया तु शीघ्रबोधाय शिष्यार्थं सुगमा कृता॥
चान्द्रकुले श्रीखरतरगच्छे जिनचन्द्रसूरिनामानः।
जाता युगप्रधानास्तच्छिष्यः सकलचन्द्रगणिः॥
तच्छिष्यसमयसुन्दरगणिना चक्रे च सम्भतीर्थपुरि।
दशवैकालिकटीका शशिनिधिशृङ्गारमितवर्षे॥
अर्थस्यानवबोधेन मतिमन्द्यो(मान्द्या)न्मतिभ्रमात्।
जिनाज्ञाविपरीतं यत्तन्मिथ्यादुष्कृतं मम॥
ममोपरि कृपां कृत्वा शोधयन्तु बुधा इमां।
परोपकरणे यस्मात्तत्परा उत्तमा नराः॥
टीकाकरणतः पुण्यं यन्मयोपार्ज्जितं भवेत्।
तेनाहमिदमिच्छामि बोधिरस्तु परत्र मे॥
शब्दार्थवृत्तिटीकायाः श्लोकमानमिदं स्मृतं।
सहस्रत्रयमे + + पुनः सार्द्धचतुःशती॥

Colophon. इति श्रीदशवैकालिकशब्दार्थवृत्तिः श्रीसमयसुन्दरविरचिता समाप्ता।

विषयः। जैनदशवैकालिकसूत्रस्य व्याख्यानम्।

No. 4039. ब्रह्मप्रयोगः। Substance, country-made paper, 11 × 5 inches. Folium, 1. Lines, 24. Extent, 30 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Brahma-prayoga. On the proper places of the officiating priests around a fire sacrifice, being a guide to the Brahma priest.

Beginning. श्रीगणेशाय नमः।

प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य समस्तपाण्यङ्गुष्ठाग्रेणाहवनीयं परीत्य दक्षिणत आहवनीयस्य ब्रह्मसदनात् तृणं। इत्यादि।

End. यत्ते न्यूनं तस्मै त उपयत्तेऽतिरिक्तं! तस्मै ते नमः। संस्थाजपे नोपस्थानि+मेत्॥

Colophon. इति ब्रह्मप्रयोगः समाप्तः।

विषयः। आहवनीयस्य दक्षिणतो ब्रह्मोपवेशनादिविधिकथनम्।

No. 4040. मानसपूजा, वा अव्यक्तमूर्त्तिमानसपूजनम्। Substance, country-made paper, 10 × 3 inches. Folium, 1. Lines, 12. Extent, 12 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Mánasa-pújá, or Avyakta-múrti-mánasa-pújana. On mental worship or worship without the aid of material objects. By Saṇkara A'chárya.

Beginning. अथ मानसपूजा।

पूर्णस्यावाहनं कुत्र सर्व्वाधारस्य चासनं।
स्वच्छस्य पाद्यमर्घ्यञ्च शुद्धस्याचमनं कुतः॥
निर्म्मलस्य कुतः स्नानं वासो विश्वोदरस्य च।
निरालम्बस्योपवीतं रम्यस्याभरणं कुतः॥
निर्लेपस्य कुतो गन्धः पुष्पं निर्वासनस्य च।
सुगन्धस्य कुतो धूपः स्वप्रकाशस्य दीपनं॥ इत्यादि।

End. अध्यात्मपूजनस्तोत्रं यः पठेत् सततं नरः।
पदार्थपूजनात् पुण्यमनन्तं लभते ध्रुवम्॥

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचितं अव्यक्तमूर्त्तिमानसपूजनम्।

विषयः। नित्यशुद्धमुक्तबुद्धस्वप्रकाशस्य ब्रह्मणः पदार्थोपहारपूजनादध्यात्मपूजनमेव श्रेय इति निरूपणमुखेन अध्यात्मपूजाविधिकथनम्।

No. 4041. दण्डलक्षणविधिः, वा दण्डपद्धतिः। Substance, country-made paper, 11 × 5 inches. Folia, 6. Lines, 9 on a page. Extent, 84 ślokas. Character, Nágara. Date, Sk. 1750. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Daṇḍa-lakshaṇa-vidhi, or Daṇḍa-paddhati. Directions for the adoption of the religious staff by a Hermit.

Beginning. श्रीगणेशाय नमः।

अथ दण्डलक्षणविधिः।

धारयेद्वैणवं दण्डं न स्थूलं न कृशं तथा।

तस्य चाग्रे च मूले च ग्रन्थिं त्यक्त्वा तु धारयेत्॥

द्विचत्वारिंशदष्टौ वा द्वाङ्गुलानि + + + +।

न न्यूनं नातिरिक्तं वा द्विगुणं मूलतोऽग्रके॥ इत्यादि।

End. मनो वाक्कायदण्डश्च वह्नदके शुचि स्मृतम्।

एकश्च ज्ञानदण्डश्च सं+ऽपि गुच्यते बुधैः॥

Colophon. इति दण्डपद्धतिः समाप्ता। शकाब्दाः १७५०।

विषयः। दण्डग्रहणविधिकथनं। तत्र वैणवदण्डपरिमाणादिकथनं। अथ ब्रह्मचर्य्यवानप्रस्थादौ पालाशबिल्वादिदण्डविधानकथनं। दण्डलक्षणकथनं। ज्ञानदण्डादिस्वरूपकथनञ्च।

No. 4042. धर्म्मार्णवः। Substance, country-made paper, 10 × 4 inches. Folia, 4. Lines, 11 on a page. Extent, 140 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Dharmárṇava. The ceremonial reading of the Chaṇḍi for nine days. Anonymous.

Beginning. पितरौ श्रीगुरुं नत्वा नत्वा ढुण्टिं विनायकम्।

प्रतिपन्निर्णयं वक्ष्ये चण्डीस्थापनकर्म्मणि॥

अथ नवचण्डीविधिमुत्क्रमिष्यमाणो नवचण्डीस्थापनाङ्गभूतमादौ प्रतिपन्निर्णयमाह।

End. व्याघ्र आह। नवमी स्वल्पमात्रापि यदि न स्यात्परेऽहनि। तदाष्टमीयुतायां वै कार्य्यं होमादिकञ्च यत्। देव्युवाच। उदयव्यापिनी किञ्चिन्नवमी दृश्यते यदि।

Colophon. (अतः परं खण्डितत्वात् परिसमाप्तिसूचकवाक्यं नास्ति)।

विषयः। नवरात्रपूजायां प्रतिपदादितिथिविवेचनम्।

No. 4043. ब्रह्मैक्यप्रकरणं स्तोत्रम्। Substance, country-made paper, 10 × 4 inches. Folia, 2. Lines, 7 on a page. Extent, 14 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Brahmaikya-prakaraṇa-stotra. The identification of Brahma and Jíva. A hymn. By S'aṇkara A'chárya.

Beginning. श्रीगणेशाय नमः।

सदहं सदहं वस्तु सदहं नात्र संशयः।
अहमस्मि नवेत्येवं न सन्दिग्धो हि कश्चन॥
चिदेवाहं चिदेवाहं चिदेवाहं न संशयः।
जाग्रत्स्वप्नसुषुप्त्यादि जानीयात् कथमन्यथा॥ इत्यादि।

End. इति ब्रह्मैक्यवृत्तिं यो नित्यमावर्त्तयेद्बुधः।
स्ततोऽपि श्वपचागारे ब्रह्मनिर्वाणमृच्छति॥
ब्रह्मनिर्व्वाणमृच्छत्योमिति।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमच्छङ्कराचार्य्यविरचितं ब्रह्मैक्यप्रकरणं स्तोत्रं सम्पूर्णम्।

विषयः। ब्रह्मजीवयोरभेद एव चिन्तनीय इति कथनपूर्वकं तन्माहात्म्यकथनम्।

No. 4044. भैरवदीपदानविधिः। Substance, country-made paper, 10 × 5 inches. Folium, 1. Lines, 20. Extent, 22 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Bhairava-dípadána-vidhi. The offerings of burning lamps to Vatukbhairava. An extract from the Bhairavatantra.

Beginning. श्रीभैरवाय नमः।

अथातः संप्रवक्ष्यामि वटुकस्य वरानने।
दीपदानं सर्वकार्य्यसाधनं प्रत्ययावहम्॥
चतुरस्रां भुवं सम्यक् प्रकल्प्य सुरवन्दिते।

गोमयेनोपलिप्याथ मण्डलं रचयेत् ततः ॥ इत्यादि ।

End. अयं दीपविधिः प्रोक्तो वटुकस्य तवानघे ।
गोपनीयः प्रयत्नेन सत्यं सत्यं वचो मम ॥

Colophon. इति भैरवीतन्त्रे भैरवदीपदानविधिः ।

विषयः । वटुकभैरवाय प्रदीपदानविधिकथनं तत्फलकीर्त्तनञ्च ।

No. 4045. बालग्रहस्तवः । Substance, country-made paper, 11 × 5 inches. Folia, 3. Lines, 10 on a page. Extent, 63 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Bálagraha-stava. A hymn for the pacification of adverse planets, for the cure of infantile diseases.

Beginning. श्रीगणेशाय नमः ।
अथ बालग्रहस्तवः । प्रयोगसारे ।
प्रणम्य शिरसा शान्तं गणेशानन्तमीश्वरम् ।
बालग्रहस्तवं वक्ष्ये समस्ताभ्युदयप्रदम् ॥
तपसा यशसा दीप्त्या वपुषा प्रक्रमेण च ।
निर्द्दिष्टः सदयः स्कन्दः स नो देवः प्रसीदतु ॥
रक्तमाल्याम्बरधरः रक्तगन्धानुलेपनः ।
रक्तादित्योज्ज्वलः शान्तः स नो देवः प्रसीदतु ॥ इत्यादि ।

End. दिव्यं स्तोत्रमिदं पुण्यं बालरक्षाधिकारकम् ।
जपेत्सन्तानरक्षार्थं बालद्रोहोपशान्तये ॥

Colophon. इति बालग्रहस्तवः समाप्तः ।

विषयः । बालग्रहशान्तिकारकस्तुतिकथनम् ।

No. 4046. अङ्गिराकल्पः, वा (अङ्गिरःकल्पः) । Substance, country-made paper, 10 × 4 inches. Folia, 30. Lines, 13 on a page. Extent, 828 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Âñgirá-kalpa or Âñgirah-kalpa. A conversation between Angira and Pippaláda on diverse occult rites.

Beginning. श्रीदुर्गायै सकलसिद्धिदायै नमः।
दक्षिणामूर्त्तिरूपाय श्रीगभस्तीश्वराय नमः।
तत्र चाङ्गिरसा मन्त्रा बहवः परिकीर्त्तिताः॥
तत्रासुरीमहामन्त्रो मुख्योऽयं सर्वकर्म्मसु॥
पुरा हिरण्यगर्भेण उपदिष्टः स्वयं मम।
अङ्गिरा ऋषिरुद्दिष्टस्त्रष्टुप्छन्द उदाहृतं॥
संहारिणी च शक्तिर्या सासुरी देवता मता॥ इत्यादि।

End. नानापिष्टकमन्नञ्च मोदकं दधिदुग्धकं।
पर्पटी घृतमूली च यथाविभवविस्तरात्॥
पूतान् सम्भृत्य सम्भारान् कृत्वा होममशङ्कितः।
श्रीदुर्गा संप्रसन्ना स्यात् सर्वकर्मार्थसिद्धये॥

Colophon. इत्यङ्गिराकल्पे अङ्गिरःपिप्पलादसंवादे कल्पः समाप्तः।

विषयः। पिप्पलादेन सह अङ्गिरसः संवादेन आसुरीमहामन्त्रनिरूपणादिकं। आसुरीमहामन्त्रस्य अर्थादिकथनं। तन्मन्त्रोद्धारादिविधिकथनं। कुण्डादिलक्षणकथनं। तन्मन्त्रप्रयोगादिविधिकथनं। आत्मपूजाविधिकथनं। आसुरीमहामन्त्रमाहात्म्यादिकथनं। अथ अनिष्टशकुनेऽपि तन्मन्त्रमाहात्म्यादिष्टसिद्धिर्भवतीतिकथनं। होमसामान्यविधिकथनं। भावनाषट्कनिरूपणं। महायन्त्रविधिकथनं। अथ शत्रुवशविधिकथनं। विद्वेषणविधिकथनं। मारणादिविधिकथनं। शूद्रादिवशीकरणविधिकथनं। सम्भारविधिकथनञ्च।

No. 4047. अवधूतगीता। Substance, country-made paper, 10 × 4 inches. Folia, 7. Lines, 9 on a page. Extent, 161 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Correct.

Avadhúta-gítá. A dissertation on the unconditioned.

Beginning. श्रीगणेशाय नमः। ॐ।
अवधूतं द्विजं कञ्चिच्चरन्तमकुतोभयं।
कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्म्मवित्॥
यदुरुवाच।
कुतो बुद्धिरियं ब्रह्मन्नकर्त्तुः सुविशारदा।
यामासाद्य भवांल्लोकं विद्वांश्चरति बालवत्॥

प्रायो धर्म्मार्थकामेषु विवित्सायान्तु मानवाः ।
हेतुनैव समीहन्ते ह्यायुषो यशसः श्रियः ॥ इत्यादि ।

End. लब्ध्वा सुदुर्लभमिदं बहुसम्भवान्ते
मानुष्यमर्थदमपीह + नित्यधीरः ।
तूर्णं यतेत न पतेदनुमृत्यु ताव-
न्निश्श्रेयसाय विषयः खलु सर्व्वतः स्यात् ॥

विषयः। केनचिदवधूतेन सह यदोः संवादेन विवेकोदयकारणादिकथनं। तत्र भूमिपवनाकाशजलाग्निचन्द्रसूर्य्यकपोताजगरसिन्धुपतङ्गमधुकरादिभ्यो धैर्य्यसहिष्णुतादिशिक्षाविधिकथनं। पिङ्गलोपाख्यानकथनञ्च।

No. 4048. यतिवल्लभा। Substance, country-made paper, 10 × 5 inches. Folia, 28. Lines, 10 on a page. Extent, 723 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Yativallabhá. On the proper duty of Yatis.

Beginning. हरिचरणसरोजं मानसे भावयित्वा
परममृतमेतद्दुर्विभाव्यं विभाव्य ।
भवजलनिधिमग्नं विप्रवृन्दं विलोक्य
सदयमिह समर्थं ग्रन्थमेतं करोमि ॥
आश्रमस्य तुरीयस्य शुद्धिहेतोर्द्विजन्मनां ।
क्रियते पद्धतिर्नूनं सदयं विश्वकर्म्मणा ॥

तत्र भारते। चतुर्विधा भिक्षवस्तु कुटीचकबहूदकौ। ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षन्तु सेवमानः पतत्यधः ॥ इत्यादि।

End. विधानमालायामपि वचनान्युदाहृत्य सर्व्वं प्रदर्शितमस्तीत्यधिकजिज्ञासायां तत्रैव द्रष्टव्यमिति संक्षेपः।

इति मृतयतिसंस्कारविचारः ।
यतीनामुपकाराय परितोषाय चात्मनः ।
विश्वकर्म्माकरोद्रम्यां पद्धतिं यतिवल्लभां ॥
यावद्गङ्गादयो नद्यो यावत्सूर्य्यश्च चन्द्रमाः ।
तावत्कालमियं जीयाद्विश्वकर्म्मकवेः कृतिः ॥

Colophon. इति यतिवल्लभा पद्धतिः।

विषयः। सन्न्यासविधिकथनं। तत्र सन्न्यासाधिकारनिरूपणं। मन्त्रदीक्षाधिकारनिरूपणं। सन्न्यासग्रहणयोग्यतिथ्यादिनिरूपणं। तत्र प्रयोगकथनं। विरजाहोमादिविधिकथनं। दण्डलक्षणादिकथनं। सन्न्यासवेषविधानकथनं। तीर्थाश्रमवनादिनामकरणविधिकथनं। अवभृतस्नानादिविधिकथनं। तत्र आहिताग्नेः सन्न्यासग्रहणे विशेषकथनं। प्रैषोच्चारप्रकारकथनं। अथ कुटीचकवहूदकहंसपरमहंसभेदात् सन्न्यासिनां चातुर्विध्यकथनं। आतुरसन्न्यासविधिकथनं। अथ योगपट्टविधिकथनं। अथ यतिधर्म्मकथनञ्च।

No. 4049. अवतारस्तवराजः। Substance, country-made paper, 12 × 4 inches. Folium, 1. Lines, 12. Extent, 11 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Avatára-stavarája. A hymn to Vishṇu, praising his ten incarnations. An extract from the Skanda-puraṇa.

Beginning. श्रीहरिर्जयति।

प्रथमं मीनरूपेण प्रविष्टो जलसागरे।
वेदमुद्धारणं (?) येन स देवः शरणं मम॥
द्वितीये कूर्म्मरूपेण मन्दारो धार्य्यते गिरिः।
समुद्रमन्थने येन स देवः शरणं मम॥ इत्यादि।

End. दशमे कलियुगस्थाने कल्किरूपोऽभवत् + +।
म्लेच्छदर्पविनाशाय स देवः शरणं मम॥

Colophon. इति स्कन्दपुराणे ब्रह्मनारदसंवादे श्रीविष्णोरवतारस्तवराजः समाप्तः।

विषयः। मत्स्यादिदशावतारस्तुतिकथनम्।

No. 4050. आगमसारसङ्ग्रहः। Substance, country-made yellow paper, 17 × 4 inches. Folia, 5. Lines, 10 on a page. Extent, 167 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

A'gama-sára-sañgraha. A summary of the principal tenets and duties enjoined in the A'gamas. By Jogendra.

Beginning. नत्वा गुरुपदद्वन्द्वं योगेन्द्रेण च धीमता ।
नानातन्त्रानुसारेण क्रता तत्त्वतरङ्गिणी ॥
साधूनां मतमाश्रित्य क्रत्वा चर्व्वितचर्व्वणं ।
गुरुपादप्रसादेन साधकानां हिताय वै ॥ इत्यादि ।

End. देवान् गुरून् समभ्यर्च्य वेदशास्त्रोक्तवर्त्मना ।
ज्ञानतो भैरवीचक्रे ज्ञानिनां नैव दूषणं ॥

Colophon. इति योगेन्द्रप्रकाशिते आगमसारसङ्ग्रहे ब्रह्मनिरूपणे तत्त्वतरङ्गिणी नाम द्वितीयोल्लासः समाप्तः ।

विषयः । सदाशिवस्य निर्गुणत्वादिकथनं । बिन्दुस्वरूपादिकथनं । सत्त्वादिगुणस्पर्शाद्ब्रह्मणः सगुणत्वादिकथनं । जीवध्यानप्रकारकथनं । शक्तिस्वरूपादिकथनं । श्रीकृष्णादीनां प्रकृतिमयत्व-कथनं । कुलज्ञानमाहात्म्यकथनं । कुलविन्यासस्वरूपादिकथनं । कौलिकप्रशंसादिकथनञ्च ।

No. 4051. आपूर्व्विकविधिः । Substance, country-made paper, 11 × 3 inches. Folia, 6. Lines, 11 on a page. Extent, 152 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

A'púrvika-vidhi. The preliminary duties of installing a sacred fire. Anonymous.

Beginning. अथ शुचौ समे देशे अग्न्यायतनदेशं शकलेन त्रिः प्राचीनमुल्लिखेत् । त्रिरुदीचीनमथाङ्गिरभ्युक्ष्य शकलं निरस्याप उपस्पृश्य यज्ञीयात् काष्ठादग्निं मथित्वा श्रोत्रि-यागाराद्वा आहृत्येति । इत्यादि ।

End. पार्व्वणे तु समा आहुः केचित् प्रत्यवरोहणे ।
पुनः स्तुत्या परेणैव ब्रद+स्तत् प्रपञ्चनं ॥

Colophon. इत्यापूर्विकविधिः समाप्तः ।

विषयः । दर्व्वीहोमादौ प्रकृतिनिरूपणादिकं । आघारप्रकृत्यादिनिरूपणञ्च ।

No. 4052. भक्तिमार्गमर्य्यादा । Substance, country-made paper, 16 × 4 inches. Folia, 4. Lines, 9 on a page. Extent, 83 ślokas. Character, Nágara. Date, ? Place of deposit, Miraháṭa, Zillá Vardhamána; Chandranátha Chúḍámaṇi. Appearance, fresh. Prose and verse. Incorrect.

Bhaktimárga-maryádá. The pre-eminence of the cult of faith. By Viṭṭhala, son of Ballabha. It attempts to prove that the Bhagavadgítá considers *Bhakti* to be the principal means of obtaining emancipation.

Beginning. पितृपादाब्जयुगलं प्रणमामि कृपामधु ।
यत्कुलं गोकुलेशेन स्वीकृतं कृपया स्वतः ॥
अतस्तद्वदनाम्भोजच्युतगीतामृताम्बुधेः ।
आविर्भावहेतुमीशानुग्रहादिम्मशाम्यहं ॥
स्वयं स्वतत्त्वं हि हरिः पार्थायोपदिशत्यतः ।
तदादौ धृतराष्ट्रस्याभक्तस्य वचसा न हि ॥
उपक्रमो युक्ततरस्तत्पुत्रस्यापि वा कथा ।
पार्थस्यापि विषादोऽयमतद्रूपलतो न हि ॥
— — — — — —।
अत्राधिकाराभावस्य ज्ञापकत्वाच्च लौकिकी कथा युक्ता । इत्यादि ।

End. तदुत्पत्तिरुपदेशेन च तन्निवृत्तिरिति ।
इति श्रीपितृपादाब्जदासेन निज + +ना ।
भक्तिमार्गस्य मर्य्यादा निरुक्ता विट्ठलेन वै ॥

Colophon. इति श्रीविट्ठलकृता भक्तिमार्गमर्य्यादा समाप्ता ।
विषयः । भगवद्गीतायां भक्तिरेव मुख्यत्वेन निरूपितेति निरूपणम् ।

No. 4053. सन्न्यासवरणम् । Substance, country-made paper, 14 × 3½ inches. Folia, 6. Lines, 8 on a page. Extent, 72 ślokas. Character, Nágara. Date, ? Place of deposit, Miraháṭa, Zillá Vardhamána, Chandranátha Chúḍámaṇi. Appearance, fresh. Verse. Incorrect.

Sannyása-varaṇa. It treats of the mode of renouncing the world in order to devote one's self to the service of his God. By Vallabháchárya.

Beginning. पश्चात्तापनिवृत्त्यर्थं परित्यागो विचार्य्यते ।
स मार्गद्वितये प्रोक्तो भक्तौ ज्ञाने विशेषतः ॥
कर्म्ममार्गेण कर्त्तव्यः सुतरां कलिकालतः ।
अत आदौ भक्तिमार्गे कर्त्तव्यत्वाद्विचारणा ॥

श्रवणादिप्रसिद्ध्यर्थं कर्त्तव्यश्चेत् स नेष्यते ।
सहायसङ्गसाध्यत्वात् साधनानाञ्च रक्षणात् ॥ इत्यादि ।

End. तस्मादुक्तप्रकारेण परित्यागो विधीयतां ।
अन्यथा भ्रश्यते स्वार्थादिति मे निश्चिता मतिः ॥

Colophon. इति कृष्णप्रसादेन वल्लभेन विनिश्चितं ।
सन्न्यासवरणं भक्तावन्यथा पतितो भवेत् ॥
समाप्तोऽयं ग्रन्थः । संवत् १८९३ ।

विषयः । भक्त्युपयोगिसन्न्यासविधिनिरूपणम् ।

No. 4054. सिद्धान्तमुक्तावली, व्याख्यासहिता । Substance, country-made paper, 12 × 4 inches. Folia, 12. Lines, 8 on a page. Extent, 308 ślokas. Character, Nágara. Date, ? Place of deposit, Mírháṭa, Zillá Varddhamána; Chandranátha Chúḍámaṇi. Appearance, fresh. Text, verse. Commentary, prose. Incorrect.

Siddhánta-Muktávalí. Vyákhyá-shahitá. By Vallabháchárhya with a commentary by his son Viṭṭhaleśvara Díkshita. Both the father and son were Vaishṇavas. They advocate that the worship of Kṛishṇa was to them the only way to salvation and mental worship, preferable to any other mode of worship. Devotion to Kṛishṇa is superior to the knowledge of truth in leading one to emancipation.

Beginning. व्याख्यायाः ।

प्रणम्य पितृपादाब्जपरागमनुरागतः ।
कृपया विशदीकुर्म्मस्सद्वाङ्मुक्ताफलावलीम् ॥

नत्वा हरिं प्रवक्ष्यामि स्वसिद्धान्तेति । अग्रे वक्ष्यमाणैर्बहुभिर्मिथो विरुद्धैः सिद्धान्तैः शास्त्रार्थसन्देहे तन्निरासया स्वसिद्धान्तरूपं शास्त्रार्थनिश्चयं वक्ष्यामीत्यर्थः । इत्यादि ।

मूलस्य,—
नत्वा हरिं प्रवक्ष्यामि स्वसिद्धान्तविनिश्चयं ।
कृष्णसेवा सदा कार्य्या मानसी सा परा मता ॥ इत्यादि ।

End. मूलस्य,—
भक्त्यभावे + + + + यथा दुष्टैः स्वकर्म्मभिः ।
अन्यथाभावमापन्नास्तस्मात् स्थानाच्च नश्यति ॥

व्याख्यायाः,—

अन्यथा संशयात्मा विनश्यतीति बुद्धिरन्यथा भवेदित्यर्थः ।

इति श्रीपितृपादाब्जपरागरससिक्तहृत् ।

एवं स्वशास्त्रं सर्व्वस्वं मया गुप्तं निरूपितं ।

एतद्बुद्ध्वा विमुच्येत पुरुषः सर्व्वसंशयात् ॥

श्रीविट्ठलसुत्सिद्धान्तवाङ्मालां हृदये दधौ ॥

Colophon. इति श्रीवल्लभाचार्य्यविरचिता सिद्धान्तमुक्तावली समाप्ता ।

विषयः । ज्ञानमार्गादपि भक्तिमार्गस्य श्रेष्ठत्वनिरूपणपूर्व्वकं भगवद्भक्तिमाहात्म्यकीर्त्तनम् ॥

No. 4055. स्मृतिदुर्गभञ्जनम् । Substance, country-made paper, 14 × 3½ inches. Folia, 68. Lines, 7 on a page. Extent, 2,380 ślokas. Character, Bengali. Place of deposit, Pántá, Zillá Varddhamána, Akshayachandra Bhaṭṭácharya. Appearance, fresh. Prose and verse. Correct.

Smṛiti-durga-bhanjana. By Chandraśekhara S'armá, a Várendra Bráhmaṇa who settled at Navadvípa. The work treats of the titles of the S'ráddha ceremonies and of the way of resolving to perform particular ceremonies. The title of the work breathes a martial spirit on the author, for it means the storming of the fortress of the Smṛiti.

Beginning. भजत भजत कृष्णं गोपनारीसतृष्णं

निखिलभुवनवन्द्यं नन्दगोपाभिनन्द्यं ।

सुकृतिहृदयरम्यं प्रेमभक्त्यैकगम्यं

सकललुलितगेहं सच्चिदानन्ददेहं ॥

— — — — — ।

सदानन्दमयीं स्मृत्वा चन्द्रशेखरशर्म्मणा ।

वारेन्द्रान्वयसम्भूतनवद्वीपनिवासिना ॥

श्रीकृष्णप्रीतये गूढशास्त्रार्थस्याभिसन्धितः ।

स्मृतीनां क्रियते दुर्गभञ्जनं बुधरञ्जनम् ॥

अथ तिथिदुर्गभञ्जनं । तत्र राशिचक्रचलत्सूर्य्यावधिकस्वाश्रयविप्रकर्षप्रयोजकतादृशचन्द्रक्रिया तिथिः । तथा हि राशिं परिभ्रमतोर्लक्षयोजनान्तरितोपर्य्यधोभावापन्नयोः सूर्य्याचन्द्रमसोरमावास्यान्तक्षणे समसूत्रपातन्यायेन राश्येकावच्छेदेन सहावस्थानरूपः परसन्निकर्षो भवति । इत्यादि ।

End. नैमित्तिकादीनीति इत्यवचनेन प्रतिप्रसवादिति स्मार्त्तैः समाहितञ्च साधु सङ्गच्छते। इति सर्व्वमनाकुलमिति।

Colophon. इति वारेन्द्रकुलसम्भूतनवद्वीपनिवासिश्रीचन्द्रशेखरशर्म्मविरचिते स्मृतिदुर्गभञ्जने सङ्कल्पादिदुर्गभञ्जनं।

विषयः। तिथिश्राद्धसङ्कल्पादिस्वरूपविवेचनपूर्व्वकं तत्र तत्र व्यवस्थादिनिरूपणम्।

No. 4056. नवरत्नम् सटीकम्। Substance, country-made paper 14 × 4 inches. Folia, 6. Lines, 8 on a page. Extent, 126 ślokas. Character, Nágara. Dáte, ? Place of deposit, Mírabáṭa, Zillá Varddhamána, Chandra nátha Chúḍámaṇi. Appearance, fresh. Text, verse. Commentary, prose. Incorrect.

Nava-ratna. Prakáśa-sahita. The only means of obtaining Bhagaván is by throwing one's self at his feet. The name of the author is not known. The commentator is Viṭṭhala Dikshita. The substance is that those who surrender themselves unconditionally to God are the only persons who have a right to worship Him.

H. P. S.

Beginning. मूलस्य,—

चिन्तासन्तानहन्तारो यत्पदाम्बुजरेणवः।
स्वीयानां तान्निजाचार्य्यान् प्रणमामि मुहुर्मुहुः॥

टीकायाः,—ननु भगवदीयानां कथं चिन्तोद्भवः। इत्यमात्मनिवेदिनो हि भगवद्भजनार्हा नेतरे। तत्र चैहिकपारलौकिकयोरर्थयोर्नावशिष्टं किञ्चिदसमर्पितं। एवं सति देहादिनिर्व्वाहः केन कार्य्यः। इत्यादि।

End. मूलस्य,—

तस्मात् सर्व्वात्मना नित्यं श्रीकृष्णः शरणं मम।
वदद्भिरेवं सततं स्थेयमित्येव मे मतिः॥

टीकायाः,—

यद्दास्यस्यैव मोक्षान्ताः पुमर्था अधरीकृताः।
स कोऽपि पितृपादाब्जरेणुर्मह्यं प्रसीदतु॥

Colophon. इति श्रीविट्ठलेश्वरदीक्षितविरचितो नवरत्नप्रकाशः समाप्तः।

विषयः। आत्मनिवेदनमेव भगवत्प्राप्त्युपाय इति निरूपणम्।

No. 4057. कृष्णभक्तिसुधार्णवः । Substance, country-made paper, 19 × 3½ inches. Folia, 186. Lines, 6 on a page. Extent, 5,826 ślokas. Character, Bengali. Date, ? Place of deposit, Sántipúra, Rámanátha Tarkaratna. Appearance, fresh. Prose and verse. Incorrect.

Kṛishṇa-bhaktí-sudhárṇava. By Rádhámohana Gosvámí, of S'ántipura. Contains short disquisitions on the nature of *Jnána, Vairágya, Prema-bhakti* &c. It contains an enumeration of the Vaishṇava rites for each month of the year. It also contains various interesting information about Vaishṇava religious ceremonies and Vaishṇava doctrines. The fast observed on the eleventh day of the moon is one of the principal topics treated of in this work.

H. P. S.

Beginning. वन्दे राधामुखाम्भोजमधुसम्भोगलम्पटं ।
गोविन्दं परमानन्दं वृन्दाकाननायकं ॥
श्रीलचैतन्यपादाब्जस्यन्दितामृतसद्रसः ।
सन्तर्पयतु संसारतप्तचेतोमधुव्रतं ॥
नानादुःखदवार्द्दितान् भवमहारण्यान्तरस्थायिनः
सम्मूढान् कलिकालजालविवशानालोक्य लोकान् हरिः ।
आविर्भूय सरागभक्तिसुधया सिञ्चन् समाजीवय-
त्यानन्दितसमाकृयान् विलसितः पायादपायात्स नः ॥
नित्यानन्दमनन्तांशं करुणापारसागरं ।
नमामि परमानन्दां तथा वैष्णवमण्डली ं ।
राधामोहनशर्म्माविष्कृतोऽयं मधुरोत्तरः (?) ।
आनन्दयतु भक्तान् श्रीकृष्णभक्तिसुधार्णवः ।
अत्र इह कर्म्मचितो लोकः चीयतेऽमुत्र पुण्यचितो लोकः चीयत इत्यादि श्रुत्या । सुखमैन्द्रियकं स्वर्गे नरक एव वा । इत्यादि ।

End. तदतिक्रमे पुष्यपुनर्व्वसुवसाने दिगियं प्रदर्शितेति श्रीकृष्णभक्तिसुधार्णवे नैमित्तिकविवरणं नामोत्तरविभागः ।

Colophon. श्रीकृष्णभावमधुरामृतलेशलिप्सा-
संप्रेरितेन विहितं किल मोहनेन ।
एतच्च सात्त्वतमतं स्वमतिप्रचार-
मर्य्यादमुत्सुकधिया रुचिरप्रबन्धं ॥

यच्चोक्तमत्र विपरीतमपक्कबुद्ध्या
दीनानुकम्पिसदुदारमतिप्रवीणैः ।
तच्छोधनीयमुररीकृतकृष्णभावै-
र्यत्नैरिदं सविनयं विनिवेदितं मे ॥
समाप्तोऽयं श्रीकृष्णभक्तिसुधार्णवो ग्रन्थः ॥

विषयः । भक्तिस्वरूपविवेचनं । एवं ज्ञानवैराग्यादिस्वरूपविवेचनं । भगवद्भक्तलक्षणादिकथनं । तत्र शूद्रादीनामपि अधिकारविवेचनं । भगवद्भजनविधिविवेचनं । भजनस्थानादिनिरूपणं । दीक्षाविधिविवेचनं । पूजाभेदनिरूपणं । प्रणवार्थनिरूपणं । गायत्र्यर्थनिरूपणं । श्रीकृष्णचरणचिह्ननिरूपणं । राधिकाचरणचिह्ननिरूपणं । भक्तिविरुद्धनिरूपणं । अहंग्रहोपासनादिस्वरूपनिरूपणं । एकादश्यादिव्रतविधिकथनं । प्रसङ्गात् तत्र श्राद्धविधिविवेचनं । पुरुषोत्तममाहात्म्यादिविवेचनं । श्रीकृष्णस्वरूपनिरूपणं । श्रवणविवेचनं । कीर्त्तनविवेचनं । पादसेवननिरूपणं । अर्च्चनविवेचनं । तत्र मन्त्रादिविवेचनं । पूजामाहात्म्यकीर्त्तनं । स्नानविधिकथनं । विशेषेण मानसपूजाविधिकथनं । पूजास्थानादिनिरूपणं । पात्रादिनियमकथनं । पूजाविधिकथनं । जपविधिकथनं । दास्यविधिकथनं । आत्मनिवेदनविधिकथनं । त्रिकालपूजाविधिकथनं । नैमित्तिकविधिकथनं । अथ मासविशेषे क्रियाविशेषविधिनिरूपणं । अथ वैशाखकृत्यनिरूपणं । तत्र प्रातःस्नानविधिकथनं । पुष्परथयात्राविधिकथनं । नृसिंहचतुर्द्दशीविधिकथनं । एवं जैष्ठकृत्यकथनं । तत्र स्नानयात्रादिविधिकथनं । आषाढकृत्यकथनं । तत्र रथयात्राविधिविवेचनं । शयनादिविधिकथनं । एवं श्रावणकृत्यविधिकथनं । भाद्रकृत्यविधिकथनं । विशेषेण जन्माष्टमीविधिविवेचनं । राधाष्टमीविधिकथनं । आश्विनकृत्यविधिकथनं । कार्त्तिककृत्यविधिकथनं । उत्थानयात्राविधिकथनं । रासयात्राविधिकथनं । मार्गशीर्षकृत्यनिरूपणं । पौषकृत्यनिरूपणं । माघकृत्यनिरूपणं । फाल्गुनकृत्यनिरूपणं । तत्र विशेषण दोलयात्राविधिविवेचनं । चैत्रकृत्यनिरूपणञ्च । एकादश्युपवासविधिविवेचनं । उन्मीलन्यादिद्वादशीविधिकथनञ्च ।

No. 4058. **रासप्रमाणम् ।** Substance, country-made paper, 15 × 4 inches. Folia, 5. Lines, 6 on a page. Extent, 86 ślokas. Character, Bengali. Date, ? Place of deposit, Pántá, Zillá Varddhamána, Akshayachandra Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Correct.

Rásapramáṇa. By Kṛishṇa Miśra. Extracts from the Sástras on the sanctity of the Rása festival which is the sport of Kṛishṇa in the company of the milk-maids of Vṛindávana on the full moon of the month of Kárttika. The writer quotes from ancient works to prove the exact time of performing the annual *Rása* ceremony and so on.

Beginning. रासविष्टं हरिं नत्वा श्रीकृष्णो हरितत्त्ववित् ।

कालं तत्प्रीतये वक्ति रासयात्राक्रियोचितं ॥

अथ रासयात्राकालः । विष्णुपुराणे । गोपीपरिवृतो रात्रिं शरच्चन्द्रमनोरमां । गमयामास गोविन्दो रासारम्भरसोत्सुकः । इति । इत्यादि ।

End. अथ भ्रमणक्रमः । शिरसा भ्रामयेद्भक्त्या सप्त वारान् शनैः शनैः । इति । दर्शनफलं यथा । अस्मिन् काले च ये मर्त्या भक्त्या पश्यन्ति केशवं । सर्वपापविनिर्मुक्ताः कृष्णसायुज्यमाप्नुयुरिति ।

Colophon. इति श्रीकृष्णमिश्रविरचितं रासप्रमाणं समाप्तं ।

विषयः । कार्त्तिकपौर्णमास्यां महानिशाव्यापिन्यामेव रासयात्रा कर्त्तव्येति निरूपणं । तदप्राप्तौ तु प्रदोषव्यापिन्यां तस्यां कर्त्तव्येति विवेचनञ्च ।

No. 4059. रासयात्राविवेकः । Substance, country-made paper, 16×4 inches. Folia, 4. Lines, 6 on a page. Extent, 63 ślokas. Character, Bengali. Date, ? Place of deposit, Dhátri-gráma, Zillá Varddhamána, Prasannakumára Bhaṭṭáchárya. Appearance, old. Prose and verse. Correct.

Rása-yátrá-viveka. By Mahámahopádhyáya S'úlapáṇi, who is represented as a Sáhúḍiyána, *i. e.*, belonging to the village of Sáhuḍi bestowed on one of the descendants of the five bráhmaṇs invited by A'disúra, from Kányakubja. The bráhmaṇ belonged to the Bharadvája gotra. The bráhmaṇ belonging to this gráma are still to be found in Bengal. But they are regarded as inferior to Mukhopádhyáyas who belong to a different village but to the same gotra. Súlapáṇi who is quoted by Raghunandana belonged to this village at a time when his clan had not been lowered in the estimation of the Bráhmaṇs. From this work it appears that Súlapáṇi was a Vaishṇava.

H. P. S.

Beginning. नत्वा कृष्णपदद्वन्द्वं सुराणामपि सेवितं ।

विवेको रासयात्रायाः क्रियते शूलपाणिना ॥

स्कान्दे । गोपीभीरासंरम्भे तस्य चान्तर्द्धिकौतुकं । ब्रह्मादिजयसंरूढदर्पकन्दर्पदर्पहा । इति । देवानां रमणं रास इति व्युत्पत्त्या औणादिकस्य बाहुलकान्मकारस्य सकारः । अथ वा ईश्वरस्य मायया स्त्रीसम्भोगो रास इति सिद्धं । इत्यादि ।

End. पौर्णमास्यां निशार्द्धे तु रासे रासेश्वरं प्रभुं ।
दृष्ट्वा नरो लभेज्ज्ञानं रमन्तं विद्येश्वरं ।
वचनमिदं वराहपुराणोक्तं ।

Colophon. इति याज्ञिकियानमहामहोपाध्यायश्रीशुक्लपाणिविरचितो रासयात्राविवेकः समाप्तः ।

विषयः । कार्त्तिकपौर्णमास्यामर्द्धरात्रव्याप्तायामेव रासयात्रा कार्य्येति निरूपणं । तदप्राप्तौ तु प्रदोषव्यापिन्यां पौर्णमास्यां सा करणीयेति निष्कर्षकथनं । यात्रापरिपाटीविधिकथनं । तन्माहात्म्यकीर्त्तनञ्च ।

No. 4060. शङ्करसंहिता । Substance, country-made paper, 16 × 6⅓ inches. Folia, 391. Lines, 13 on a page. Extent, 14,216 ślokas. Character, Nágara. Date, Sk. 1670. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

S'añkara-Sañhitá. The Sañkara-Sañhitá is not mentioned in the preface to the translation of Vishṇu Puráṇa, nor in the index to the Puráṇas by Bábu Janamajaya Mitra. The Bábu had access to nearly all the MSS. of the Puráṇas accessible in Calcutta, and Professor Wilson had nearly as much, and the absence from their lists of the name of S'añkara-Sañhitá shows that it was not known in Bengal at the time. It has likewise not been met with in any of the N.-W. Provinces catalogue; but it has been known to Sanskrit scholars in the Southern Provinces; Mr. Barnell's catalogue of the Tanjore MSS. alludes (page 194,) to several copies, but all in fragments. The contents are very similar, so are the contents of the Sañkara Vilás, (Barnell's) page 203. The largest of the Tanjore MS. contains 14,000 verses. The MS. under notice is not a Southern one but it was directly obtained from Bombay. It contains about 15,000 verses divided into seven parts, each entitled a Káṇḍa, namely, Sambhava Káṇḍa, A'sura Káṇḍa, Víra Kaṇḍa, Yuddha Káṇḍa, Deva Káṇḍa, Daksha Káṇḍa and Upadesá Káṇḍa. In the second chapter of the first káṇḍa, Vishṇu at the request of S'iva, assumes the form of Vyása and composes the eighteen puráṇas for the glorification of different Devas. The Skanda-puráṇa is said to have six sañhitás, Sanat Kumáríya, Súta, Bráhmí, Vaisnavi, S'áṅkarí and Sauri sañhitás. This division of the Puráṇa does not, however, agree with that given in the Náradíya-puráṇ, which names the divisions as *khaṇḍas* and enumerates them as

follows: Máheśvara, Vaishṇava, Bráhma, Kásí, Avanti, Nágara and Prabhása khaṇḍas. The Sambhaba káṇḍa of this Sañhitá goes over the same ground as the Kumára Sambhava with slight differences in the details. The Asura who oppressed the Devas on this occasion is not Táraka alone, but S'ura Padma and others were associated with him. Mahádeva had other sons besides Kárttika, Víra Váhu, Víra Kesári, Víra Mahendra, Víra Chandra, Víra Márttaṇḍa, Vírántaka and Víradhíra. Kárttika was brought from his native place, the S'aravana, a place full of reeds, to Kailása and he was sold and bought again. He fought with Indra and others, killed them and revived them. Nárada killed an animal at a sacrifice and a goat sprung out from its person. The goat disturbed the peace of the three worlds, and Kárttika made the goat his váhana, conveyance. Kárttika then put Brahmá into prison, from which the prisoner was rescued by S'iva. Then S'ivá's sons march forth to fight with Táraka and others. Kárttika kills Táraka. His wives lament his loss, and his son flies to his brother Súrapadma to inform him of what had happened.

(Aśura Káṇḍa). Then follows a description of the birth and education of the Asuras, Táraka and others. Their propitiation of Mahádeva and of obtaining a boon from him. Their conquest of the devas and the oppression of the three worlds. The connected stories of the fall of the Vindya Mountain, the slaughter of Vátápí and the origin of the river Gaṇḍakí are then given.

(Víra Káṇḍa). Kárttika proceeds to Lañká to fight with S'úrapadma.

(Yuddha Káṇḍa) kills him with his whole family.

(Deva Káṇḍa). Kárttikeya is then married. The story of Muchukunda is given to glorify Kárttikeya.

(Daksha Káṇḍa). This káṇḍa contains the description of the well known destruction of Daksha's sacrifice by S'íva.

(Upadeśa Káṇḍa) contains a description of Mount Kailása. It then goes on to find the reason why the Asuras were so troublesome to the Devas. The sacredness of the ashes of cremation, of the rudráksha beeds, of the name of S'iva, of the fast on Mondays, of the various vows in honour of S'iva and his consort Párvati is the theme of a number of chapters. The consequences of devotion to S'iva, of hearing the recitation of S'ivapuráṇa, of acting against, of blaspheming and of worshipping S'iva, are then enumerated and a description given of the 25 forms of S'iva.

Beginning. श्रीगणेशाय नमः । अथ शङ्करसंहिता लिख्यते ।

ॐङ्कारनिलयं देवं गजवक्त्रं चतुर्भुजं ।

पिचिण्डिलमहं वन्दे गजवक्त्रं चतुर्मुखं ॥

सुमुखश्चैकदन्तश्च कपिलो कज(गज)कर्णकः ।

लम्बोदरश्च विकटो विघ्नराजो विनायकः ॥

धूमकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।

वक्रतुण्डः शूर्पकर्णो हेरम्बः स्कन्दपूर्व्वजः ॥

षोड़शैतानि नामानि यः पठेच्छृणुयादपि ।

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ॥

संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ।

सुब्रह्मण्यं प्रणम्याहं सर्व्वज्ञं सर्व्वगं सदा ॥

अभीष्टफलसिद्ध्यर्थं प्रवक्ष्ये नाम षोडश/

प्रथमो ज्ञानशक्त्यात्मा द्वितीयः स्कन्द एव च ॥

अग्निभूश्च तृतीयः स्यात् बाहुलेयश्चतुर्थकः ।

गाङ्गेयः पञ्चमो विद्यात् षष्ठः शरवनोद्भवः ॥

सप्तमः कार्त्तिकेयः स्यात् कुमारः स्यादथाष्टकः ।

नवमः षन्मुखश्चैव बलाकारिर्दश स्मृतः ॥

सेनान्येकादशश्चैव गुहोद्वादश एव च ।

त्रयोदशो ब्रह्मचारी ईशपुत्रश्चतुर्दशः ॥

क्रौञ्चजित् पञ्चदशकः षोडशः शिखिवाहनः ।

एतत्षोडशनामानि जपेत् सम्यक् च सादरं ॥

विवादे दुर्गमे मार्गे दुर्जरीये (?) तथैव च ।

कविले च महाशास्त्रे विज्ञानार्थी फलं लभेत् ॥

कन्यार्थी लभते कन्यां जयार्थी लभते जयं ।

पुत्रार्थिपुत्रलाभश्च धनार्थी लभते धनं ॥

आयुरारोग्यवश्यञ्च धनधान्यसुखावहं ।

हरिः ॐ ।

पुरा काश्यां चतुर्वक्त्रस्तताप परमं तपः ।

स्रष्टुकामः प्रजाः सर्व्वाः कृपया परमेशितुः ॥

तस्मिन् महेशचरणपरिचर्य्यापरायणे ।

मुनयः कतिचित्पुण्ये स्थित्वा गार्हस्थ्य उत्तमे ॥
वैखानसाश्रमे तप्तुं तपः संयतमानसाः ।
प्रापुस्तन्निकटं प्रष्टुं तदर्हस्थानमुत्तमं ॥

End. इह लोके परत्रापि स्कन्दसायुज्यमाप्नुयात् ।
तस्मादहरहर्नित्यं श्रोतव्यमपि शुद्धये ॥
सूतात्मजस्य वचसातिमुनीन्द्रवर्य्याः
सन्तोषवार्द्धिलहरीषु निमग्नचित्ताः ।
सम्भाव्य सूतमपि स्वं स्वमपि विसृज्य
प्रापुस्तदाश्रमपदं त्रिदिवानधिश्रि ॥

Colophon. इति श्रीस्कन्दपुराणे शङ्करसंहितायां शिवरहस्यखण्डे उपदेशकाण्डे पञ्चाशीतितमोऽध्यायः । शङ्करसंहितायां शिवरहस्यखण्डं समाप्तं ।

विषयः । स्कन्दपुराणान्तर्गतशङ्करसंहितायां सप्त काण्डाः सन्ति । तद्यथा सम्भवकाण्डं आसुरकाण्डं वीरकाण्डं युद्धकाण्डं देवकाण्डं दक्षकाण्डं उपदेशकाण्डं । तत्र प्रथमकाण्डस्य प्रथमाध्याये, सूतमुनिसंवादः । द्वितीयाध्याये, विष्णुः शिवेनादिष्टः व्यासरूपेणावतीर्णो भूत्वा अष्टादशपुराणानि प्रणीतवानितिकथनं। अष्टादशपुराणेषु यस्मिन् यस्मिन् पुराणे ब्रह्मादिदेवानामन्यतमस्य प्राधान्यतो-माहात्म्यकीर्त्तनमस्ति तत्तन्नामकीर्त्तनं स्कन्दपुराणान्तर्गतषट्संहितानामकथनञ्च। स्कन्दपुराणान्तर्गतषट्-संहितानामानि यथा, सनत्कुमारीयसंहिता, सूतसंहिता, ब्राह्मी संहिता, वैष्णवी संहिता, शाङ्करी संहिता, सौरी संहिता । तृतीयाध्याये, भवानी शिवनिन्दाहेतोः दाक्षायणीति नाम परिजिहीर्षुः मायया हिमालयकन्यात्वेनाविर्बभूवेतिकथनं । चतुर्थाध्याये, शूरपद्मादिभिरसुरैरुपद्रुतानामिन्द्रा-दिदेवानां ब्रह्मणः समीपे गमनकथनं । पञ्चमाध्याये, ब्रह्मणः सन्निधौ शूरपद्मसिंहवक्त्रतारकासुराणां पराक्रमकथनं इन्द्रादिदेवानां क्लेशविज्ञापनञ्च । षष्ठाध्याये, ब्रह्मा इन्द्रादिदेवैः सह वैकुण्ठं गत्वा शूरपद्मादीनामुपद्रवं वैकुण्ठनाथं विज्ञापयामासेतिकथनं । सप्तमाध्याये, नारायणः ब्रह्मादिदेवैः सह कैलासं गत्वा महादेवं स्तुतिभिः सन्तोष्य असुरकृतदेवपराभवं कथयामास । महादेवः कार्त्तिकेयमुत्पाद्यासुरान् संहरिष्ये इति विष्णुप्रभृतीनाश्वास्य समाधिस्थो बभूवेतिकथनं । अष्टम-नवमदशमाध्यायेषु, शिवसमाधिभङ्गार्थं देवैः प्रार्थितो मदनः कैलासङ्गत्वा समाधिभङ्गोपायमचिन्तय-दितिकथनं । एकादशाध्याये, शिवस्य समाधिभङ्गः मदनस्य भस्मीकरणञ्च । द्वादशाध्याये, कन्दर्पस्य पुनर्जीवनार्थं रतिप्रार्थना, पार्व्वत्याश्छलनार्थं वृद्धब्राह्मणरूपेण शिवस्य हिमालयगमनमितिकथनं । त्रयोदशाध्याये, चतुर्द्दशाध्याये च पार्व्वतीसन्निधौ वृद्धब्राह्मणरूपेण शिवेन शिवनिन्दा कृता तच्छ्रुत्वा पार्व्वती रुष्टा बभूव सदाशिवस्तां कुपितां दृष्ट्वा प्रसाद्य कैलासमगमदितिकथनं । पञ्चदशाध्याये, महादेवः कैलासमागत्य सप्तर्षीन् सस्मार, आगतेषु तेषु पार्व्वत्या सह परिणयनार्थं तान् हिमालयं

प्रेरयामासेतिनिर्देशः। षोडशाध्याये, सप्तदशाध्याये च सप्तर्षयो गौरी महादेवाय दातव्येति हिमालयतत्पत्न्योः सम्मतिं कृत्वा शिवसन्निधौ जग्मुरितिकथनं। १८शे १९शे २०शे २१शे २२शे चाध्याये हरपार्व्वतीविवाहाङ्गकर्म्मानुष्ठानं। २३शे अध्याये, उद्वोढया पार्व्वत्या सह शिवस्य कैलासगमनं। २४शे २५शे २६शे चाध्याये कार्त्तिकेयोत्पत्तिविवरणं। २७शे अध्याये, वीरबाहुः, वीरकेसरी वीरमहेन्द्रः, वीरचन्द्रः, वीरमार्त्तण्डः वीरान्तकः वीरधीरः एषां शिवसुतानां जन्मविवरणं। २८शे अध्याये, कार्त्तिकेयोत्पत्तिः शरवणात् कैलासे तस्यानयनमिति कीर्त्तनञ्च। २९शे अध्याये क्रीडाव्याजेन कार्त्तिकेयस्य विक्रमवर्णनं। ३०शे अध्याये, इन्द्रादिदेवैः सह कार्त्तिकेयस्य युद्धकथनं इन्द्रादीनां पराभववर्णनञ्च। ३१शे अध्याये, कार्त्तिकेयः बृहस्पतिना प्रार्थितो युद्धे मृतान् देवान् पुनर्जीवयामास, आत्मनो विश्वात्मकं रूपञ्च दर्शयामासेतिकथनं। ३२शे अध्याये, कार्त्तिकेयस्य देवसेनापतित्वेनाभिषेकः। नारदकृतयज्ञे आलभ्यपश्वङ्गसम्भूतेनैकेन छागेन त्रिलोकीनां व्याकुलीकरणं कार्त्तिकेयेन च स छागो वाहनः कृतः इति कथनं। ३३शे अध्याये, कार्त्तिकेयेन ब्रह्मणः कारागाररोधकथनं। ३४शे अध्याये, शिवेन ब्रह्मणः कारागाररोधमोचनमितिकथनं। ३५शे ३६शे चाध्याये, कार्त्तिकेयस्य रूपवीर्य्यविभूतिकथनं। ३७शे अध्याये, शूरपद्मप्रभृतीनामसुराणां विनाशाय कार्त्तिकेयवीरबाहुप्रभृतीनां युद्धयात्रा। ३८शे ३९शे अध्याये, तारकासुरेण सह वीरबाहुप्रभृतीनां युद्धवर्णनं। ४०शे अध्याये, वीरबाहोः पराजयवर्णनं। ४१शे ४२शे ४३शे चाध्याये, गुहतारकासुरयोर्युद्धवर्णनं। ४४शे अध्याये, क्रौञ्चतारकासुरवधकथनं। ४५शे अध्याये, क्रौञ्चतारकासुरवधदिवसे ब्रह्मविष्णुप्रभृतिभिर्देवैः सह कार्त्तिकेयस्य हिमालयपर्वते अवस्थितिकथनं। ४६शे अध्याये, तारकासुरपत्नीनां विलापः। असुरेन्द्रनामा तारकासुरस्य सुतः पितुरन्त्येष्टिक्रियादिकं समाप्य पितृव्यस्य शूरपद्मस्य समीपे गत्वा कार्त्तिकेयकृतपितृवधादिवृत्तान्तं कथयामास च इति कथनं। ४७शे अध्याये, कार्त्तिकेयस्य बलविक्रमादिज्ञानार्थं शूरपद्मासुरेण तत्समीपे चारः प्रस्थापितः। ४८श ४९श ५०श अध्यायेषु कार्त्तिकेयादिदेवानां वाराणसीतीर्थादिगमनकथनं। इति सम्भवकाण्डः।

आसुरकाण्डस्य १मे-अध्याये, शूरपद्मसिंहास्यतारकगजवक्त्रादीनामुत्पत्तिकथनं। २ये-अध्याये, शूरपद्मसिंहवक्त्रतारकासुराणां तपस्याविवरणं। ३ये-अध्याये, महादेवात्तेषां वरप्राप्तिविवरणं। चतुर्थाध्यायमारभ्य सप्तमाध्यायपर्य्यन्तं शूरपद्मादिकृतदेवपराजयविवरणं। ८मे-अध्याये, शूरपद्मस्य शक्रादिदेवकृतराज्याभिषेकविवरणं। ९मे-अध्याये, शूरपद्मादीनां उद्वाहादिवंशविस्तारकथनम्। १०मे-अध्याये, शूरपद्मस्य दौरात्म्यकथनं। ११शे अध्याये, विन्ध्यपर्वतस्य पतनविवरणं वातापिवधविवरणञ्च। १२शे अध्याये, शूरपद्मभयात् श्रीकोषाख्यनगरे शच्या सह पलायितस्येन्द्रस्य सन्निधौ देवानामागमनं। १३शे अध्याये, गण्डक्या उत्पत्तिः, महाकालकृतशूरपद्मभगिनीहस्तच्छेदः। १४शे अध्याये, शूरपद्मसमीपे तस्य सखा अजमुख्या आत्मनो हस्तच्छेदवृत्तान्तः

कथितः। १५शे अध्याये, इन्द्रपुत्रजयन्तादिदेवैः सह शूरपद्मसुतभानुकोपाख्यासुरादीनां युद्ध-विवरणं। इत्यासुरकाण्डः।

वीरकाण्डे सप्तमाध्यायाः सन्ति, तेषु शूरपद्मासुरस्य बलवीर्य्याद्यवेक्षणार्थं प्रस्थितस्य वीर-बाहोः प्रत्यागमनानन्तरं तन्मुखात् शूरपद्मासुरस्य बलवीर्य्यादिकं विदित्वा युद्धार्थं सैन्यैः सह कार्त्तिकेयस्य लङ्कागमनमितिकथनं॥ इति वीरकाण्डः।

युद्धकाण्डे पञ्चविंशदध्यायाः सन्ति, तेषु कार्त्तिकेयवीरबाहुप्रभृतीनां शूरपद्मभानुकोपादिभिः सह युद्धवर्णनं। शूरपद्मभानुकोपादीनां निधनकीर्त्तनञ्च। इति युद्धकाण्डः।

देवकाण्डे सप्ताध्याया विद्यन्ते तेषु कार्त्तिकेयोद्वाहविवरणं मुचुकुन्दनृपतेर्जीवनचरितवर्णन-व्याजेन कार्त्तिकेयमाहात्म्यकीर्त्तनञ्च। इति देवकाण्डं।

दक्षकाण्डे चत्वारिंशदध्यायाः सन्ति तत्र दक्षयज्ञविवरणं। ब्रह्मादीनां मध्ये महादेवस्य श्रेष्ठत्ववर्णनञ्च। इति दक्षकाण्डः।

उपदेशकाण्डे, १मे २ये चाध्याये, कैलासवर्णनं। ३य ४र्थ ५म अध्यायेषु असु-रादिदेहोत्पत्तिकारणकीर्त्तनं। ६ष्ठ ७म अध्याययोः अजमुख्या आसुरदेहोत्पत्तिहेतुपूर्वजन्मकर्म्म-कथनं। ८मे अध्याये, मायायाः शूरपद्मादिपुत्रोत्पत्तिनिमित्तकर्म्मकथनं। ९म १०म ११श १२श अध्यायेषु भस्ममाहात्म्यकीर्त्तनं। त्रयोदशाध्यायावधिऊनविंशाध्यायपर्य्यन्तं रुद्राक्षमाहा-त्म्यकीर्त्तनं। विंशाध्यायात् षड्विंशाध्यायपर्यन्तं शिवनाममाहात्म्यकथनं। २७शे अध्याये, सोमवारव्रतविधितन्माहात्म्यकथनं। २८शे अध्याये, आर्द्राव्रतविधिः। २९शे ३०शे चाध्याये, उमामहेश्वरव्रतविधिः। ३१शे अध्याये, केदारव्रतविधिः। ३२शे अध्याये, कल्याणव्रतविधिः। ३३शे अध्याये, शूलव्रतविधिः। ३४शे अध्याये, ऋषभव्रतविधिः। ३५शे अध्याये शुक्रवार-व्रतविधिः। ३६शे अध्याये, विघ्नेश्वरव्रतविधिः। ३७शे अध्याये, कृत्तिकादिव्रतमाहात्म्यकथनं। ३८शे अध्याये, माघमासप्रथमदिवसे चैत्राश्विनमासयोर्भरणीनक्षत्रे च शिवव्रतविधिः। ततः ऊनचत्वारिंशाध्यायात् सप्तचत्वारिंशाध्यायपर्यन्तं शिवभक्तस्य लक्षणादिकथनं। ४८शे अध्याये, शिवपुराणश्रवणफलकीर्त्तनं। ऊनपञ्चाशाध्यायात् सप्तपञ्चाशाध्यायपर्यन्तं शिवद्रोहफलकीर्त्तनं। ५८शे ५९म ६०म अध्यायेषु शिवनिन्दादिफलवर्णनं। एकषष्टितमाध्यायमारभ्य एकाशी-तितमाध्यायपर्यन्तं शिवपूजामाहात्म्यकथनं। ८२मे अध्याये, शिवयोगकथनं। ८३मे ८४मे चाध्याये शिवज्ञानकथनं। ८५मे अध्याये शिवस्य पञ्चविंशतिमूर्त्तिकथनं। इत्युपदेशकाण्डः।

No. 4061. तत्त्वचन्द्रिका। Substance, country-made paper, 16 × 4 inches. Folia, 68. Lines, 14 on a page. Extent, 2,320 ślokas. Character, Bengali. Date, ? Place of deposit, Vegune, Zillá Varddhámana, Sadánanda Bhaṭṭáchárya. Appearance, decayed. Prose. Correct.

Tattva-Chandriká. By Chandra-śekhara. Gives the definition of Brahmá and refutes the arguments of the Chárvákas, Bauddhas, Jainas, Naiyáyikas, Sáñkhyas, S'aivas and Mímáñsakas on the subject of creation. The writer belongs to that school of the Vedántists who believe Jíva to be part of Brahma and he levels his arguments against the Dualists on the one hand and the Pantheists on the other. He ascribes bondages to the result of beginning-less influence, Brahmá Náráyana and Sachchidánanda all these words meaning the same thing.

Beginning. प्रणम्य जानकीनाथं सच्चिदानन्दविग्रहं ।

श्रीचन्द्रशेखरो विप्रः कुरुते तत्त्वचन्द्रिकाम् ॥

अथ ब्रह्म वा इदमग्र आसीत् यत्कारणं तद्ब्रह्मेति लक्षणवाक्येनोक्ते विनापि प्रकरणात् ब्रह्मशब्द आत्मपरः । इत्यादि ।

End. अतो महोपनिषत्प्रतिपादिते नारायण एव सद्ब्रह्मादिशब्दाः पर्य्यवस्यन्तीति सर्व्वमवदातं ।

Colophon. इति श्रीचन्द्रशेखरविरचिता तत्त्वचन्द्रिका समाप्ता ।

विषयः । जगत्कारणतया ब्रह्मलक्षणादिविवेचनं । अत्र चार्व्वाकमतनिरसनं । बौद्धमतनिरसनं । आर्हतमतनिरसनं । तार्किकमतनिरसनं । सांख्यमतनिरसनं । शैवमतनिरसनं । मीमांसकमतनिरसनञ्च । ब्रह्मणः सविशेषत्वनिरूपणं । तत्र मायावादनिरसनं । जीवस्य ब्रह्मांशत्वनिरूपणं । तदन्यमतनिरसनं । तत्त्वमस्यादिश्रुतीनां तात्पर्य्यकथनं । तत्र शुद्धाद्वैतमतोपपादनं । द्वैतवादनिरसनं । अद्वैतवादनिरसनञ्च । मोक्षस्वरूपादिविवेचनं । अनादिवासनयैव जीवस्य बन्धादिकथनं । सच्चिदानन्दादिशब्दानां प्रत्येकमर्थकथनं । ब्रह्मणः तत्स्वरूपत्वकथनञ्च । नारायण एव भगवद्ब्रह्मशब्दादिवाच्य इति निरूपणञ्च ।

No. 4062. **क्षेमकुतूहलम्, वा पाकशास्त्रम् ।** Substance, country-made paper, 14 × 5 inches. Folia, 75. Lines, 8 on a page. Extent, 1,788 ślokas. Character, Nágara. Date, ? Place of deposit, Sántipura, Rámanátha Tarkaratna. Appearance, new. Verse. Incorrect.

Kshema-kutúhalam. By Kshema S'armá, the son of Manmatha, belonging to the Vaidya caste. The chapters are styled *Utsavas* or "Feasts." There are twelve of these in the work. The writer has consulted the following authors. Gaurí, Nala, Vágbhaṭa, Bhíma, Hárita and Suśruta. The work treats of the art of cookery. It shows that the

Hindus besides eating the numerous vegetables were in the habit of eating the flesh of numerous animals, such as, goat, sheep, stag, &c. The different processes of cooking flesh have been fully given. The date appears to be 1415 of the Vikrama era. The work was finished ou the 13th day of the waning moon in the month of Kárttika. It is an elaborate treatise on Hindu cookery. H. P. S.

Beginning. कपोलतलनिर्गतप्रमदवारिधारालसत्-
षड़ङ्घ्रिकुलकाकलीकलितमञ्जुकोलाहलः ।
गिरीशतनयो गुरुः सकलसिद्धिवारान्निधि-
र्भिनत्तु दुरितानि वः सततमोदकादः सदा ॥
— — — — — — ।
भारद्वाजकुलाम्भोधौ वलक्षा+क्षयोर्द्वयोः ।
द्विजराजततिर्जाता निष्कलङ्का स+क्षपा ॥
सन्नाहगूढ़ान्वयभूषणोऽभूत्
स लक्ष्मणो लक्षणपूर्णगात्रः ।
भिषग्वरो राक्षसराजधान्यां
विभीषणं यो विगदं व्यधत्त ।
— — — — ।
गौरीमतञ्च नलवाग्भटभीमसूक्तिं
हारीतसुश्रुतमतं रविसिद्धपाकम् ।
क्षेमो भिषग्वरसुधीरवलोक्य सम्यग्-
ग्रन्थं व्यधत्त खलु क्षेमकुतूहलाख्यम् ॥
इष्टदेवनमस्कारस्ततो वंशप्रशंसनम् । इत्यादि ।

End. नन्दन्तां नीतिभाजः सकलवसुमतीज++पान्तु विश्वं
दुर्वृत्ता यान्तु नाशं भवतु वसुमती शस्यसम्पन्नदेशा ।
नीरं यच्छन्तु मेघाः कलयतु सुकविः काव्यकौशल्यलीला-
मव्याद्व्याजभाजं परहरदुरितं क्षेमशर्म्माणमीशः ॥
वाणाकाशयुतेनाब्दे वत्सरे विक्रमाङ्किते ।
ऊर्ज्जे शुक्लत्रयोदश्यां ग्रन्थः पूर्णोऽयमैन्दवे ॥

इति श्रीनरवैद्यमन्मथात्मजक्षेमशर्म्मविरचिते क्षेमकुतूहले ग्रन्थे गोरसपालकादिप्रशंसनो नाम द्वादशोत्सवः ।

Colophon. इति पाकशास्त्रं समाप्तं ।

विषयः। ग्रन्थकर्त्तुः प्रशस्तिकथनं। अथ महानसनिर्म्माणविधिकथनं। चुल्लीनिर्म्माणविधि-
कथनं। मृण्मयभाण्डादिप्रशंसाकीर्त्तनं। पक्वद्रव्याणां पात्रान्तरे स्थापनविधिकथनं। महानसोपयो-
ग्योपकरणकथनं। विषादिपरिहाराय तत्र चकोरादिरक्षणविधिकथनं। सूपकारादिप्रशंसाकीर्त्तनं।
ऋतुविशेषे भक्ष्याभक्ष्यविधिकथनं। अथ दिनचर्य्याविधिकथनं। भोजनविधिकथनं। भोक्तृविधि-
कथनं। आसनविधिकथनं। भोजनपात्रविधिकथनं। आचमनोदकादिविधिकथनं। परिवेषकल-
क्षणादिकथनं। रन्धनविधिकथनं। तत्र सूपविधिकथनं। शुद्धकुल्माषविधिकथनं। माषविधिक-
थनं। सामान्यतो घृतविधिकथनं। गव्यादिविधिकथनञ्च। अन्ननिरूपणं। पर्पटविधिकथनं। पटो-
लफलविधिकथनं। ताहड़ीविधिकथनं। क्षारविधिकथनं। कर्चरीविधिकथनं। मूलकविधि-
कथनं। आर्द्रकविधिकथनं। हरिद्राविधिकथनं। अथ सर्व्वव्यञ्जनपरिभाषाकथनं। उद्भूलनविधि-
कथनं। वर्णकरणविधिकथनं। शिखरिणीपानकयोर्विधिकथनं। मांसरन्धनविधिकथनं। सुखि-
न्नमांसविधिकथनं। कोमलसुगन्धविधिकथनं। अजमांसविधिकथनं। वर्क्करविधिकथनं। पठोरा-
विधिकथनं। छिल्लीधिपाविधिकथनं। मेषमांसविधिकथनं। गड्डुरविधिकथनं। मृगीमांसविधि-
कथनं। मृगमांसविधिकथनं। छिक्कारजविधिकथनं। शशकमांसविधिकथनं। पाठीमांसविधिक-
थनं। सावरमांसविधिकथनं। रोहविधिकथनं। वराहविधिकथनं। प्रलेहविधिकथनं। गौरीगौर-
प्रलेहविधिकथनं। समोसाविधिकथनं। पूरणप्रलेहविधिकथनं। शुक्लवर्णप्रलेहविधिकथनं। पीत-
हरित-रक्तादिप्रलेहविधिकथनं। भ्रष्टमांसविधिकथनं। परिशुष्कविधिकथनं। तन्दूरविधिकथनं।
सुस्वादुतन्दूरविधिकथनं। कुशूलपक्वतन्दूरविधिकथनं। पुटपाकविधिकथनं। पलपुटपाकविधिक-
थनं। वष्ठनप्रलेहविधिकथनं। मांसेण्डरीविधिकथनं। मधुरमांसपाकविधिकथनं। मुण्डरन्धनवि-
धिकथनं। अन्त्ररन्धनराजिकामांसविधिकथनं। मांसपूरितवार्त्ताकुविधिकथनं। पक्षिमांसविधि-
कथनं। महाबलपाकविधिकथनं। बलभूतिपाकविधिकथनं। अनूपजखाद्यविधिकथनं। तित्ति-
रिविधिकथनं। लावकविधिकथनं। कपोतविधिकथनं। मयूरविधिकथनं। हिताहितविधिकथनं।
अथ मत्स्यपाकविधिकथनं। तत्र गन्धनाशनविधिकथनं। मत्स्यप्रलेहविधिकथनं। मत्स्यखण्डप्रले-
हविधिकथनं। मत्स्यपिष्टिकविधिकथनं। मत्स्यपूरणविधिकथनं। मत्स्यपुटपाकविधिकथनं। मद्गु-
रमत्स्यविधिकथनं। रोहितपाकविधिकथनं। पालासिमत्स्यविधिकथनं। पाठीनविधिकथनं। गण्डी-
विधिकथनं। मत्स्यमुण्डकविधिकथनं। मत्स्येण्डेरीविधिकथनं। सूक्ष्ममत्स्यविधिकथनं। मत्स्यसामा-
न्यगुणकथनं। अथ शाकविधिकथनं। वृन्ताकादिविधिकथनं। बिम्बीफलविधिकथनं। शिम्बीवि-
धिकथनं। एवं तोरयी-चचेण्डा-तुम्बी-डिडिश-विल्व-कुष्माण्ड-राजिक-ढोड़ी-कण्टकारिका-कारवल्ली-
कर्कोटक-करीर-कपिकच्छु--उडुम्बर--आर्द्रक--कर्कटी-एरण्ड-कुटज-कदली--राजमाषकादिफलपाकवि
धिकथनं। अथ पत्रशाकविधिकथनं। तत्र देवदाली-चणक-शतपुष्पादिशाकविधिकथनं। अथ पुष्प-

शाकविधिकथनं। तत्र करीर-कारीर-कुटज-शोभाञ्जनपुष्पादिपाकविधिकथनं। अथ पल्लवपाकविधिकथनं। अथ सन्धानकविधिकथनं। अथ वटिकावटकादिविधिकथनं। अथ पिष्टान्नविधिकथनं। अथ फेणिकाविधिकथनं। तत्र नवनीतफेणिकादिविधिकथनं। अथ लड्डुकविधिकथनं। तत्र दधिलड्डुकादिविधिकथनं। अथ चित्रमोदकादिविधिकथनं। अथ दुग्धविधिकथनं। तत्र क्षीरदल-क्षणिगर्भकादिविधिकथनं। अथ मण्डकविधिकथनं। तत्र अङ्गारकर्कर्य्यादिविधिकथनं। अथ अपूपविधिकथनं। तत्र वदरकर्णपूरिकादिविधिकथनं। अथ खण्डखर्ज्जूरविधिकथनं। कर्पूरनालिकादिविधिकथनं। पक्वान्नविधिकथनं। सट्टकादिविधिकथनं। आम्रपल्लवमुकुलादिप्रकारकथनं। अथ गोरसपानकादिविधिकथनं। अथ घोलकादिविधिकथनं। अथ रसालादिविधिकथनं। अथ भोजनान्तविधिकथनं। आचमनादिविधिकथनं। धूपादिविधिकथनं। अथ अजीर्णोपशमनविधिकथनं।

No. 4063. मर्मप्रकाशः। Substance, country-made paper, 16 × 4 inches. Folia, 200. Lines, 10 on a page. Extent, 5,250 ślokas. Character, Nágara. Date, ? Place of deposit, Dhátrí-gráma, Zilla Varddhamána, Prasannakumára Bhaṭṭáchárya. Appearance, new. Prose. Incorrect.

Marma-prakás'a. A commentary by Nágessa, a dependent of the Rájá of S'ṛingavera, on the well-known but very difficult work on Sanskrit rhetoric, entitled Rasagaṅgádhara by Jagannátha Paṇḍitarája.

Beginning. नत्वा गङ्गाधरं मर्मप्रकाशं तनुते गुरुम्।
रसगङ्गाधरमणेरतिगूढार्थसंविदे॥
याचकानां कल्पतरोररिकक्षहुताशनात्।
नागेशः शृङ्गवेरेशरामतो लब्धजीविकः॥

प्रारिप्सितप्रतिबन्धकदुरितशमनाय शृङ्गारालम्बनादिविभावतया तद्देवतात्वेन च समुचितमेष्टदेवतावस्तुनिर्देशरूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातॄश्रोतॄणामनुषङ्गतो मङ्गलाय च निबध्नाति स्मृतापीति। कादम्बिनी मेघपंक्तित्वेन अध्यवसिता कृष्णमूर्त्तिः। विलक्षणश्यामलत्वात् सकलमेघकार्य्यकरत्वाच्च। अत एव मेघत्वेनाध्यासः। इत्यादि।

End. सुवर्णपदार्थमाह रूपमिति। कातरादीनां प्रश्नगतमिति। मत इत्यादि।

Colophon. आकूतमभिप्राय। इति शिवम्।

विषयः। जगन्नाथपण्डितराजकृतरसगङ्गाधरस्य व्याख्यानम्।

No. 4064. वक्रोक्तिपञ्चाशिका। Substance, country-made paper, 13 × 3 inches. Folia, 22. Lines, 12 on a page. Extent, 693 ślokas. Character, Nágara. Date, ? Place of deposit, Vegune, Zilla Barddhamána, Sadánanda Bhaṭṭácharya. Appearance, decayed. Text, verse and commentary. Prose. Correct.

Vakrokti-páṇcháśiká. Fifty stanzas containing a dialogue between Hara and Párvatí. The work was composed by Ratnákara, a great poet of Káshmír, who wrote an epic entitled Hara Vijaya. He had the literary title of Vágíśvara Vidyádhipatí. The commentator is Vallabha Deva, son of A'nanda Deva, the minister who appears to have lost his life in battle. Vallabha has left commentaries on S'iśupálabadha and other well-known poems.

Beginning. सव्यालम्बनमेतदद्य भवतो निःस्नेह मुञ्चाम्यहं
सव्यालं विजहीहि सुन्दरि वनं निःस्नेहता नास्ति मे ।
नैवं वक्ष्यसि वनं ननु जलं मूर्ध्ना मयैवोह्यते
वक्रोक्त्येति हिमाद्रिजामवचसं कुर्व्वन् हरः पातु वः ॥
तां हालाहलभृत्करोषि मनसो मुर्च्छां समालिङ्गितो
हालां नैव बिभर्मि नैव च हलं मुग्धे कथं हालिकः ।
सत्यं हालिकतैव ते समुचिता सक्तस्य गोवाहने
वक्रोक्त्येति जितो हिमाद्रिसुतया स्मेरो हरः पातु वः ॥
टीकायाः ।
वागीश्वरीं नमस्कृत्य गणानाञ्च तथेश्वरम् ।
वक्रोक्तिवर्णने शास्त्रे पञ्जिका क्रियते लघु॥

सव्यालम्बनं वामभागावस्थानं । सव्यालं व्यालैः दुष्टसत्त्वैः सहितं वनञ्च । दन्त्यौष्ठ्ययोर्हि शब्दालङ्कारेषु यमकवक्रोक्त्यादिषु न तथा इत्यादि ।

End. वक्रोक्तिपञ्चाशतिमित्यमेनां
यो भावयेन्मत्सररिक्तबुद्धिः ।
स्पष्टोत्तराद्युक्तिषु काव्यबन्धे
भवेत्स रत्नाकरवत्प्रवीणः ॥
टीकायाः ।

रत्नाकरः कविवरो हरविजयकाव्यकारः तद्वत्प्रवीणः कुशलः स्यात् ।
सुनुरानन्ददेवस्य रणभूव्योम्नि भास्वतः ।

वक्रोक्तिवर्णने रात्रे टिप्पणं वल्लभो व्यधात् ॥

Colophon. इत्यमात्यवरानन्ददेवसूनुशिशुपालवधाद्यनेककाव्यटीकाकर्तृश्रीवल्लभदेवकृतया टिप्पण्या समेता श्रीबालबृहस्पत्यनुजीविनो वागीश्वराङ्कस्य विद्याधिपत्यपरनाम्नो हरविजयमहाकाव्यकर्तुः काश्मीरदेशोद्भवराजानकश्रीरत्नाकरमहाकवेः कृतिर्वक्रोक्तिपञ्चाशिका समाप्ता ।

विषयः । वक्रोक्तिव्याजेन पार्वतीपरमेश्वरयोरन्योन्यं परिहासवर्णनम् ।

No. 4065. न्यायदीपकः । Substance, country-made paper, 14 × 4½ inches. Folia, 86. Lines, 17 on a page. Extent, 4,906 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipur, Rámanátha Tarkaratna. Appearance, very decayed. Prose. Correct.

Nyáya-dípaka. A gloss on Vátsáyana's *bháshya* (commentary) on the Nyáya Sútras of Gautama by one Miśaruka.

Beginning. प्रणम्य पुण्डरीकाक्षमक्षपादं गुरूनपि ।
श्रीमता मिश्ररुकेण क्रियते न्यायदीपकः ॥

प्रेक्षावत्प्रवृत्त्यौपयिकाभिधेयव्यापारप्रयोजनजिज्ञासायां भगवताक्षपादेन प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इति प्रथमं सूत्रितं । प्रमाणादिपदार्थानां तत्त्वं ज्ञायते अनेनेति तत् प्रमाणादिपदार्थतत्त्वज्ञानं न्यायशास्त्रं । तस्मान्निःश्रेयसस्यात्यन्तिकदुःखाभावस्याधिगम इति प्रयोजनं । तत्त्वज्ञापनं व्यापारः । प्रमाणादितत्त्वमभिधेयञ्च दर्शितं । अथास्य शास्त्रस्य उद्देशलक्षणपरीक्षारूपप्रवृत्तित्रये प्राथमिकः पदार्थ उद्देशोऽपि कृतः । अत्र परे सूत्रोत्थानमपि न सहन्ते । इत्यादि ।

End. अनुक्तयाद्यमज्ञानाद्यननुभाषणावसरे — — — मिति । सिद्धान्तमभ्युपेत्य नियमात् कथाप्रसङ्गः—सिद्धान्त इति सूत्रं । अपगतः सिद्धान्तो यस्मा — — — ।

Colophon. अतः परं खण्डितत्वात् परिसमाप्तिसूचकवाक्यं नास्ति ।

विषयः । न्यायसूत्रवात्स्यायनभाष्यस्य व्याख्यानम् ।

No. 4066. न्यायरत्नाकरः । Substance, country-made paper, 16 × 4 inches. Folia, 150. Lines, 8 on a page. Extent, 3,725 ślokas. Character, Bengali. Date, ? Place of deposit, Vegune, Zilla Barddhamána, Sadánanda Bhaṭṭáchárya. Appearance, fresh. Prose. Incorrect.

Nyáya-Ratnákara. By Pártha-sárathí Miśra. A commentary on the *śloka-várttika* by Kumárila Bhaṭṭa which again explains the Savara-bháshya on the Mímáñsá aphorisms of Jaimini.

Beginning. नमो जैमिनिऋषये मीमांसासूत्रकाराय ।

श्लोकवार्त्तिकमारिभुस्तस्याविघ्नसमाप्तये ।

विश्वेश्वरं महादेवं स्तुतिपूर्व्वं नमस्यति ॥

विशुद्धेति । विद्यागुरूणां स्तुतिनमः कुर्वन् वार्त्तिकारम्भं प्रतिजानीते । अभिवन्द्येति । सम्प्रति लोकयात्रामाद्रियमाणो विदुषामनुनयं करोति । तदिति । परीक्षकाणामिदानीं माध्यस्थ्यमर्थयते । न चात्रेति । दोषदृष्टिपरायणानामसन्नपि दोषः प्रकाश्यते । अतो मध्यस्थाः परीक्षध्वमिति । दुर्ज्जनानिदानी + + ख्या दमयति । इत्यादि ।

End. तेन प्रकरणार्थमुपसंहरति । इति बौद्धधर्म्मोपदर्शनतात्पर्य्यतो नैवावगतमेवंवादिनि । इत्याह युक्त्यानुपेतामिति ।

Colophon. इति श्रीपार्थसारथिमिश्रविरचिते न्यायरत्नाकरे निरालम्बनवादः ।

विषयः । भट्टकुमारिलकृतमीमांसासूत्रीयशावरभाष्यश्लोकवार्त्तिकस्य व्याख्यानम् ।

No. 4067. प्रायश्चित्तकुतूहलम् । Substance, country-made paper, 18 × 5 inches. Folia, 203. Lines, 8 on a page. Extent, 3,232 ślokas. Character, Bengali. Date, ? Place of deposit, Vegune, Zilla Barddhamána Sadánanda Bhaṭṭáchárya. Appearance, fresh. Prose and verse. Incorrect.

Práyaśchitta-kutúhalam. By Rámachandra Bhaṭṭa. A treatise on expiatory ceremonies on the model of S'úlapáni's well-known work the Práyaśchitta-viveka. It treats of various kinds of sins and the mode of expiating them.

Beginning. नवीननीरदश्यामं नत्वा श्रीश्यामसुन्दरं ।

तन्यते रामचन्द्रेण प्रायश्चित्तकुतूहलम् ॥

तत्राङ्गिराः ।

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।

तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतं ॥

अत्र प्रायः शब्देनाभोजनमात्रमुच्यते । तत्रात्र विशिष्टं तपः शास्त्रविहितमन्यं प्राजापत्यादि । इत्यादि ।

End. त्रैवर्णिके साग्नेर्विप्रस्य चान्द्रायणं क्षत्रियवैश्ययोः साग्न्योः पराक इत्यर्थः ।

Colophon. इति भट्टश्रीरामचन्द्रकृतौ प्रायश्चित्तकुतूहलं समाप्तं । सम्पूर्णोऽयं ग्रन्थः ।

विषयः । प्रायश्चित्तलक्षणादिकथनं । नरकनिरूपणं। प्रायश्चित्तानुष्ठाननिर्णयः । कामाकाम-

विकल्पकथनं । पापोद्देश्यकथनं । अतिपातककथनं । महापातककथनं । अनुपातककथनं । उपपातककथनं । जातिभ्रंशकरादिकथनं । तन्नतानिरूपणं । ब्रह्महत्यादिप्रायश्चित्तकथनं । पतितसंसर्गादिप्रायश्चित्तकथनं । पतितोत्पन्नप्रायश्चित्तकथनं । अथ गोवधप्रायश्चित्तकथनं । रोधादिनिमित्तकगोवधप्रायश्चित्तकथनं । क्षत्रियादिवधप्रायश्चित्तकथनं । प्रतिलोमजादिवधप्रायश्चित्तकथनं । स्त्रीवधप्रायश्चित्तकथनं । गर्भवधप्रायश्चित्तकथनं । गजाश्वमार्ज्जारादिवधप्रायश्चित्तकथनं । पक्षिविशेषवधप्रायश्चित्तकथनं । मत्स्यादिप्रायश्चित्तकथनं । अभक्ष्यभक्षणप्रायश्चित्तकथनं । रजकान्त्यजकापालिकचण्डालाद्यन्नभक्षणप्रायश्चित्तकथनं । वृथामांसादिभक्षणप्रायश्चित्तकथनं । लशुनपलाण्डुभक्षणादिप्रायश्चित्तकथनं । अगम्यागमनादिप्रायश्चित्तकथनं । मूत्रादिपानप्रायश्चित्तकथनं । रहस्यादिप्रायश्चित्तकथनं । व्रतविधिकथनं । तत्र क्षत्रियादिषु व्यवस्थाकथनं । अनुग्रहविधानकीर्त्तनञ्च ।

No. 4068. विद्वच्चित्तप्रसादिनी । Substance, country-made paper, 14 × 3 inches. Folia, 22. Lines, 7 on a page. Extent, 414 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipura, Rámanátha Tarkaratna. Appearance, new. Prose. Incorrect.

Vidvachchitta-prasádiní. A commentary on S'aṅkaráchárya's well-known treatise entitled Shaṭpadí Stotra. By Kavi Sarojánandatírtha a disciple of Vaikuṇṭhánandatírtha. The commentator consulted the commentaries on the work existing in his time.

Beginning. नत्वा रामं रमानाथं श्रीकृष्णं शङ्करं तथा ।
करिष्यामीह षट्पद्याव्याख्यानं सुगमाक्षरं ।

इह खलु जीवान् वेदविरुद्धकर्म्मानुष्ठानोत्पन्नदुरितदावानलविदग्धान्तःकरणान् विषयरसवड़िशाक्रष्टहृदयतया विमुखान् समुद्दिधीर्षुर्भगवान् श्रीमच्छङ्कराचार्य्यः षट्पदीस्तोत्रं प्रणिनाय । तत्र विषयासवप्रमादापहृतविवेकानां विष्णुविप्रगुरुज्येष्ठेष्वविनयात् दुरितोत्पत्तिमाकलय्य तन्निवृत्तिरेव तावत् प्रार्थ्यते—अविनयमिति । इह खलु मण्डलधराः सम्राजश्च ताड़नदण्डनादिभिरपराधं क्षमन्ते । इत्यादि ।

End. तथा चास्याः पाठात् सर्व्वेषां मङ्गलं भवतीत्युक्तं ।
टीकाकारमतं ज्ञात्वा विद्वच्चित्तप्रसादिनी ।
कृता तत्त्वप्रबोधाय षट्पद्या विवृतिः शुभा ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीवैकुण्ठानन्दतीर्थस्य शिष्येण श्रीमत्परमहंसपरिव्राजकाचार्य्येण कविसरोजानन्दतीर्थेन रचिता विद्वच्चित्तप्रसादिनी समाप्ता ।

विषयः । शङ्कराचार्य्यकृतषट्पदीस्तोत्रस्य व्याख्यानम् ।

No. 4069. सुगमावृत्तिः। Substance, country-made paper, 10 × 4 inches. Folia, 36. Lines, 19 on a page. Extent, 1,710 ślokas. Character, Nágara. Date, Sm. 1847. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Sugamá-vṛitti. A commentary on the Gauṭamaprichchhá. It is dated Samvat 1318.

Beginning. वीरं जिनं प्रणम्यादौ बालानां सुखबोधिका ।
श्रीमद्गौतमपृच्छायाः क्रियते वृत्तिरद्भुता ॥

नमिऊण तिउनाहमिति । व्याख्या । नत्वा तीर्थनाथं जानन् तथा गौतमः भगवन्तं अबोधानबोधार्थं धर्माधर्मफलं वक्ष्ये । इत्यादि ।

End. एतदर्थं यः शृणोति वाचयति तस्य पुरुषस्य पापं न भवति । पश्चात् मोक्षसुखं भुनक्ति । अतो भव्यलोकैरियं गौतमपृच्छा पठनीया श्रोतव्या च ॥

श्रीजिनहर्षसूरीणां सुशिष्याः पाठकवराः ।
श्रीमत्सुमतिहंसाख्य तच्छिष्यैर्मतिवर्द्धनैः ॥
पाठकपदसंयुक्तैः कृता चेयं कथानिका ।
श्रीगौतमस्य पृच्छायाः सुगमा सुखबोधिका ॥
सिन्धौ रामे मुनौ चन्द्रवर्षेऽस्मिन् मार्गशीर्षके ।
श्रीमत्+जगत्तारिण्यां नगर्याञ्च शुभेऽहनि ॥

Colophon. इति श्रीगौतमपृच्छायाः सुगमावृत्तिः सम्पूर्णतामगमत् । संवत् १८४७ ।
विषयः । गौतमपृच्छाभिधानजैनप्रकरणस्य व्याख्यानम् ।

No. 4070. ग्रहयज्ञप्रयोगः। Substance, country-made paper, 10 × 3 inches. Folia, 28. Lines, 9 on a page. Extent, 440 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

Grahayajṇa-prayoga. A gloss on Aśvaláyna's Gṛihya Sútra.

Beginning. श्रीगणेशाय नमः ।

अथ ग्रहयज्ञप्रयोगः । यजमानः स्नात्वा नित्यकर्म निर्वर्त्य मौहूर्त्तिकोक्तौ देशकालौ सङ्कीर्त्य अयनादिनित्यकालेषु संकल्पयेत् । ग्रहानुकूल(ग्रहयज्ञ)सिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्ये । इत्यादि ।

End. बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रचोदितं ।
तस्य तावति शास्त्रार्थे कृते सर्व्वः कृतो भवेत् ॥

इति वचनात्। एवमन्येषामपि यदि स्वगृह्यादावुक्तस्तदा स एव। येषां गृह्यादौ नोक्तः। तैः याज्ञवल्क्यादिस्मृत्युक्तः मत्स्यपुराणाद्युक्तो वानुष्ठेयः। स्मृत्यादेः साधारण्यादिति दिक्।

Colophon. इति ग्रहयज्ञप्रयोगः समाप्तः।

विषयः। आश्वलायनीयगृह्यपरिशिष्टानुसारेण बह्वृचां नवग्रहयागप्रयोगकथनम्।

No. 4071. ग्रहमखप्रयोगः। Substance, country-made paper, 9 × 4 inches. Folia, 20. Lines, 10 on a page. Extent, 325 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

Graha-makha-prayoga. On the details of domestic rights.

Beginning. श्रीगणेशाय नमः।

यजमानः कृतनित्यक्रियः देशकालौ स्मृत्वा मम सहकुटुम्बस्य सपरिवारस्यायुरारोग्यैश्वर्य्याद्यभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं अमुककर्म करिष्ये। तदङ्गस्वस्तिपुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धञ्च कर्म करिष्ये। इत्यादि।

End. यथाशक्ति विप्रान् भोजयित्वाशिषो गृहीत्वा पूर्णतां वाचयित्वा कर्म्मेश्वरार्पणं कृत्वा सुहृद्भिः सह भुञ्जीतेति।

Colophon. इति ग्रहमखप्रयोगः।

विषयः। पद्धतिकथनम्।

No. 4072. गणपत्युपनिषत्। Substance, country-made paper, 10 × 4 inches. Folia, 6. Lines, 5 on a page. Extent, 29 ślokas. Character, Nágara. Date, ? Place of deposit. Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Gaṇapatyupanishat. On the divinity of Gaṇesa.

Beginning. श्रीगणेशाय नमः।

ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्त्तासि। त्वमेव केवलं धर्त्तासि। त्वमेव केवलं हर्त्तासि। त्वमेव सर्व्वं खल्विदं ब्रह्मासि। त्वं साक्षादात्मासि। इत्यादि।

End. महाविघ्नात् प्रमुच्यन्ते महादोषात् प्रमुच्यते (?)। स सर्व्वविद्भवति य एवं वेदेति। ॐ शान्तिः शान्तिः शान्तिः।

Colophon. इति गणपत्युपनिषत् समाप्ता।

विषयः। गणेश एव सर्व्वजगत्कारणं परं ब्रह्मेति निरूप्य तन्मन्त्रादिकथनम्।

No. 4073. गायत्रीसहस्रनामस्तोत्रम् । Substance, country-made paper, $5\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 25. Lines, 7 on a page. Extent, 98 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Gáyatrí-sahasra-náma-stotra. A hymn in a thousand epithets of the holy verse Gáyatryi. Anonymous.

Beginning. श्रीगणेशाय नमः ।

नारद उवाच ।

भगवन् देव देवेश सर्व्वशास्त्रविशारद ।

श्रुतिस्मृतिपुराणानां रहस्यं तन्मुखाच्छ्रुतं ॥

सर्व्वपापहरं देव केन स्याद्ब्रह्मवर्च्चसं ।

केन वा ब्रह्मविज्ञानं किन्नु वा मोक्षसाधनं ॥

ब्राह्मणानां गतिः केन केन वा मृत्युनाशनं ।

ऐहिकामुष्मिकफलं केन वा ब्रह्मसम्भवः ॥ इत्यादि ।

End. इदं रहस्यममलं मयोक्तमृषिसत्तम ।

पठनात् ब्रह्मसायुज्यं प्राप्नुवन्ति न संशयः ॥

Colophon. इति गायत्रीसहस्रनामस्तोत्रं समाप्तं ।

विषयः । स्तुतिव्याजेन गायत्र्याः नामसहस्रकीर्त्तनम् ।

No. 4074. गोभिली नाम परिशिष्टम् । Substance, country-made paper, $9\frac{1}{2} \times 4$ inches. Folia, 13. Lines, 8 on a page. Extent, 198 ślokas. Character, Nágara. Date, Sm. 1645. Place of deposit, Calcutta, Government of India. Appearance, decayed. Verse. Generally correct.

Gobhilí-pariśishṭa. An appendix to the aphorisims of Gobhila on the domestic rites of the Hindus.

Beginning. देवदानवगन्धर्व्वाः पिशाचोरगराक्षसाः ।

पीड्यन्ते ग्रहपीड़ायां किं पुनर्भुवि मानवाः ॥

आदित्ये द्वादशे चैव रावणः सगणो हतः ।

अष्टमेन शशाङ्केन हिरण्यकशिपुर्हतः ॥

अङ्गारकेण वक्रेण रामो राज्याद्विवासितः ।

पाण्डवा बुधपीड़ायां विकर्म्मणि नियोजिताः ॥ इत्यादि ।

End. आयुश्च विद्या च तथा सुखञ्च
धर्म्मार्थलाभो बहुपुत्रता च ।
शत्रुक्षयं राजसुपूजितञ्च
तुष्टा ग्रहाः सर्व्वमेतद्दन्तु (?) ॥

Colophon. इति गोभिलाचार्य्यकृतं गोभिली नाम परिशिष्टं समाप्तम् । संवत् १६४५ ।

विषयः । स्थानविशेषस्थितानां ग्रहाणां शुभाशुभजनककलकथनपूर्व्वकं तत्र तेषां शान्तिविधिकथनं । तत्र समिधादिलक्षणकथनं ग्रहयागमन्त्रादिकथनञ्च ।

No. 4075. गुरुगुणषट्त्रिंशिका, वा गुरुगुणषट्त्रिंशत्षट्त्रिंशिकासूत्रम्, कुलदीपिकाख्यविवृतिसहिता । Substance, country-made paper, 10 × 4 inches. Folia, 19. Lines, 21 on a page. Extent, 1,582 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Text, verse. Mágadhí. Commentary. Prose and verse Sanskrit. Correct.

Guru-guṇa-shaṭtriñśiká, or Guru-guṇa-shaṭtriñśat-shaṭtriñśiká-sútra, Kuladípikákhya-vivṛiti-sahitá. On the virtues of Guru in 36 stanzas, with the gloss of Ratnaśekhara. The text in Prakrit and the gloss in Sanskrit.

Beginning. टीकायाः,—

ॐ नमः सिद्धाय ।
श्रीमदर्हत्पदं जीयान्महोदयमहोज्ज्वलं ।
जगत्त्रितयसाम्राज्यं यत्प्रसादर्द्धिवर्णिका ॥
कलाकुलनयज्ञानसम्पद्विस्तारकारकः ।
श्रीयुगादिजिनो भूयात् भविनां भूरिभूतये ॥
— — — — — ।
श्रीवज्रसेनाभिधसूरिराजैः
सुसूत्रधारैरिव यैर्व्यधायि ।
अयं जनोऽप्यश्मसमोऽभिवन्द्य-
स्तेभ्यो गुरुभ्योऽस्तु मम प्रणामः ॥

— — — — इह विशिष्टसमयानुसारतो मङ्गलार्थमभीष्टदेवतानमस्काराविभाविकां सम्बन्धादिगर्भाञ्च सूत्रस्येमामादिगाथामाह वीरं। इत्यादि।

मूलस्य,—

वीरस्स पएप णमिउण सिरि गो अम पसुह गणहराणं च।

गुरुगुणछत्तीसीउं छत्तीसं कित्तइ सं स॥

End. सिरिवयरासण सुह गुरुसीसेणं विरइयं कुलगमेयं।

पढ़िजणममढभावा भव्वाणवं उ कल्लाणं॥

Colophon. इति श्रीगुरुगुणषट्‌त्रिंशिका समाप्ता।

टीकायाः।

कुलकार्थानुसारिणां प्राणिनामाशीर्वचनमाह सिरीति सुगमं।

समाप्ता चेयं श्रीगुरुगुणषट्‌त्रिंशत्षट्‌त्रिंशिकासूत्रकुलदीपिका॥

श्रीमद्बृहद्गच्छपयोजहंसः समस्तवादीन्द्रशिरोऽवतंसः।

प्रज्ञापराभूतसुरेन्द्रसूरिर्जीयाज्जगत्यां गुरुदेवसूरिः॥

— — — — — —।

तत्पट्टनायकाः श्रीहेमतिलकसूरयस्तदादेशात्।

श्रीरत्नशेखराख्यः शिष्यो लिखति स्म विष्टतिमिमां॥

विषयः। तत्र गृणाति सद्धर्ममिति गुरुः। स च गुणवानेव तत्त्वतो विशुद्धसम्यक्तत्त्वावबोधजनकसद्धर्मपरायण एव देशनादिदानाय समर्थो भवति। गुणा हि खलु दर्शनचारित्रादयो यद्यप्यनन्ता एव, तथापि देशनाकथाधर्मभावनादिचतुष्टयरूपाः षट्‌त्रिंशत्संख्यया परिकलिताः पूर्वसूरिभिः। तत्र देशना चतुर्विधा यथा आक्षेपिणी, विक्षेपिणी, संवेगिनी, निर्वेदनी चेति। अथ चतुर्विधकथानिरूपणम्। ताश्च अर्थकथा, कामकथा, धर्मकथा, सङ्कीर्णकथा चेति। तथा धर्मोऽपि दानधर्मः, शीलधर्मः, तपोधर्मः, भावधर्मश्चेति चतुर्विधः। भावना च, ज्ञानभावनादर्शनभावना-चारित्रभावना-वैराग्यभावनाभेदात् चतुर्विधा। अथ स्मारणाकथनं। वारणाकथनं। नोदनाकथनं। प्रतिनोदनाकथनञ्च। एवं क्रमेण आर्त्तध्यानकथनं। रौद्रध्यानकथनं। धर्मध्यानकथनं। शुक्लध्यानकथनं। एवं सम्यक्चारित्र्यादिनिरूपणञ्च।

No. 4076. गुणमालाटीका। Substance, country-made paper, 10 × 4 inches. Folia, 49. Lines, 17 on a page. Extent, 2,600 ślokas. Character, Nágara. Date. ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Guṇa-málá-ṭíká. A commentary on the Jaina treatise called the Guṇa-málá.

Beginning. श्रीश्रुतदेवताये नमः ।

प्रत्यक्षीकृत्य मुक्ताविव मुचिरुचिरं मौक्तिकं येन लोके
मध्येऽलोकं समस्तैर्वसुभिरुपचितो दर्शितश्चारुदृग्भ्यः ।
नित्ये भव्याध्वनीनावलिरम्तपदं येन वाङ्मात्रतोऽपि
स श्रीसिद्धार्थसूनुस्त्रिजगदधिपतिर्मानसं मे पुनातु ॥

(टीका ।) स श्रीसिद्धान्तसूनुः सिद्धार्थराजसूनुः त्रिजगदधिपतिः त्रिभुवननायकः मे मम मानसं चित्तं पुनातु पवित्रीकरोतु । स इति कः । येन मध्यम् अलोकम् । इत्यादि ।

End. तन्मनोगतभावांश्च जानाति । इत्येवमेकविंशतिर्गुणाः श्रावकाणामपि व्याख्याताः । समाप्तश्चासौ गुणमालाग्रन्थः श्रीविक्रमार्कन्टपराज्यपदात् ससुद्रभूमिद्विरात्रिपतिभिः प्रमिते ।

श्रीखरतरगणनाथाः श्रीजिनभक्तिसूरिभक्तिभृतः ।
सिद्धान्ततत्त्वनिधयो जयन्ति जिनावशे सूरिवराः ॥
यद्वदननिर्गतगिरः सुरगुरुगिरमधरयन्ति मधुरिमा ।
यशसा धवलितजगतो जयन्ति जिनलाभसूरीन्द्राः ॥
श्रीक्षेमकीर्तिवाचकवंशे जिनहर्षनाममुनिराजः ।
सुखवर्द्धनाभिधानस्तच्छिष्या वाचका विदिताः ॥
तच्छिष्या विदितदया दयादिसिंहाख्यवाचका विबुधाः ।
तच्चरणरेणुरञ्जितमौलिरयं रामविजयाख्यः ॥
श्रीजिनलाभयतीन्द्रैरादिष्टः पाठकः क्षपापटुभिः ।
गुणमाला + + ग्रन्थो लसत सतां कण्ठपीठेऽसौ ॥
— — — — — — ।

Colophon. इति श्रीगुणमालाटीका समाप्ता ।

विषयः । गुणमालाभिधानजैनसन्दर्भस्य व्याख्यानम् ।

No. 4077. गुरुसहस्रनामस्तोत्रम् । Substance, country-made paper, $12\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 6. Lines, 7 on a page. Extent, 118 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Generally correct.

Guru-sahasra-náma-stotra. A thousand epithets strung in a hymn in praise of Guru. An extract of the Sanmohana Tantra.

Beginning. अथ गुरुसहस्रनामस्तोत्रं । श्रीसूत उवाच ।

कैलासशिखरासीनं चन्द्रखण्डविभूषितं ।

पप्रच्छ विनया भक्त्या गौरी नत्वा वृषध्वजं ॥

श्रीदेव्युवाच ।

भगवन् सर्व्वधर्म्मज्ञ सर्व्वशास्त्रविशारद ।

केनोपायेन च कलौ लोकार्त्ता (?) यान्ति सद्गतिं ॥

श्रीमहादेव उवाच ।

अस्ति गुह्यतरं देवि ज्ञानमेकं सनातनं ।

अतीव च सुगोप्यञ्च कथितुं नैव शक्यते ॥

End. गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।

महेश्वरात्परं नास्ति गुरुरित्यभिधीयते ॥

Colophon. इति संमोहनतन्त्रे पार्व्वतीहरसंवादे श्रीगुरुसहस्रनामस्तोत्रं समाप्तं ।

विषयः । गुरोः सहस्रनामकथनं ।

No. 4078. श्रीगुरुस्तोत्रं । Substance, country-made paper, 13 × 3½ inches. Folium, 1. Lines, 11 Extent, 20 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India, Appearance, Fresh, Verse, Incorrect.

S'ríguru-stotra. A hymn in praise of Guru. An extract from the Nigama-sára.

Beginning. श्रीमहादेव उवाच ।

साम्प्रतं वद मे कान्ते श्रीगुरोः स्तोत्रमुत्तमं ।

येनानुष्ठितमात्रेण नरो योगित्वमाप्नुयात् ॥

श्रीदेव्युवाच ।

शृणु शङ्कर वक्ष्यामि स्तोत्रमत्यन्तदुर्लभम् ।

स्तोत्रेणानेन विधिना भवाब्धिञ्च तितर्त्ति ह ॥

अस्य श्रीगुरोः स्तोत्रस्य परं ब्रह्म ऋषिर्गायत्रीच्छन्दः श्रीगुरुः परं ऋषिरूपि (देवता) मुक्त्यर्थे विनियोगः ।

End. अत्यन्तदुर्लभं ह्येतत् न वदेत् पशुसन्निधौ ।

वदन्नरकमाप्नोति यदि साक्षान्महेश्वरः ॥

Colophon. इति निगमसारे सर्व्वागमोत्तमोत्तमे पार्व्वतीशिवसंवादे शतसाहस्र्यां संहितायां निगमशास्त्रे सहसारे श्रीगुरोः परं ब्रह्मस्तोत्रं सम्पूर्णम् ।

विषयः । श्रीगुरोः स्तुतिकथनं ।

No. 4079. श्रीगुरुकवचं । Substance, country-made paper, 13 × 3 inches. Folia, 2. Lines, 11 on a page. Extent, 30 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

S'rí Guru-kavacha. An amulet bearing the name of Guru. An extract from the Nigama-yoga-sára.

Beginning. श्रीमहादेव उवाच ।

वद कान्ते श्रीगुरोर्मे कवचं परमं शुभम् ।
श्रोतुमिच्छामि देवेशि कृपया मे प्रकाशय ॥
श्रीदेव्युवाच ।
महादेव महावाहो सुचिसि(?) त्वं कुलेश्वर ।
सर्व्वं ते विदितं वत्स इदं नैव प्रकाशितं ।

End. कौलिकानां कुलाचारे योगिनां योगसाधने ।
सम्मतं कवचं दिव्यं सर्व्वसिद्धिमवाप्नुयात् ॥

Colophon. इति निगमयोगसारे सर्व्वागमोत्तमोत्तमे पार्वतीशिवसंवादे शतसाहस्र्यां संहितायां निगमशास्त्रे सहसारे श्रीगुरोः परं ब्रह्म कवचं नाम दशमपरिच्छेदः ।

विषयः । श्रीगुरोः कवचकथनं ।

No. 4080. गुरुकवचं । Substance, country-made paper, $13\frac{1}{4} \times 3\frac{1}{2}$ inches. Folium, 1. Lines, 10. Extent, 37 ślokas. Character, Bengal. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Guru-kavacha. On the same subject as the preceding, but by a different author. An extract from the Samayá Tantra.

Beginning. श्रीदेव्युवाच ।

सेवका वहवो नाथ कुलधर्मपरायणाः ।
जायन्ते त्यक्तजीवाशाः शवोपरि चितोपरि ॥

तेषां प्रयोगसिद्ध्यर्थं स्वरक्षार्थं विशेषतः ।
इच्छामि बहुशो देव कथयस्व दयानिधे ॥
श्रीशिव उवाच ।
शृणु देवि महाप्राज्ञे कवचं सर्वसिद्धिदं ।
श्रीगुरोः कृपया देवि सद्विद्या यदि लभ्यते ॥

End. पठेद्वा पाठयेद्वापि शृणोति श्रावयेदथ ।
सर्वसिद्धीश्वरो भूत्वा देववद्विहरेद्भुवि ॥

Colophon. इति समयातन्त्रे श्रीगुरोः कवचं समाप्तं ।

विषयः । श्रीगुरुकवचकीर्त्तनं ।

No. 4081. गुरुपङ्क्तिकवचं । Substance, country-made paper, $13\frac{1}{4} \times 3\frac{1}{2}$ inches. Folium, 1. Lines, 6 on a page. Extent, 10 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Guru-pañkti-kavacha. On the succession of Gurus.

Beginning. ईश्वर उवाच ।

अस्य श्रीगुरुपङ्क्तिकवचस्य और्वच्यवनभार्गवजामदग्न्याप्नुवदृषिः गुरुर्देवता सर्वकामसिद्ध्यर्थे विनियोगः ।

ऐं पातु मस्तके नित्यं सर्वकामफलप्रदं ।
ऐं श्रीं पातु ललाटे च सर्वसिद्धिप्रदायकं ॥

End. पठनाद्धारणाद्देवि सर्वसिद्धिः प्रजायते ।
प्रातःकाले पठेन्नित्यं पूजाकाले विशेषतः ॥

Colophon. इति श्रीगुरुतन्त्रे गुरुपङ्क्तिकवचं समाप्तम् ।

विषयः । गुरुपंक्तिकवचकथनम् ।

No. 4082. गुरुकुण्डली । Substance, country-made paper, $19\frac{1}{4} \times 3\frac{1}{4}$ inches. Folium, 1. Lines, 19 on a page. Extent, 65 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

Guru-kuṇḍalí. Mystical diagrams consecrated to Guru. An extract from the Guru Tantra.

Beginning. नमः सरस्वत्यै । अथ बृहस्पतिभाषितकुण्डली लिख्यते । अथ मन्त्रो यथा ।

ॐ धुक् धुक् स्वाहा। अनेन मन्त्रेण सप्तवाराभिमन्त्रितां कठिनीं गृहीत्वा उत्तरदक्षिणतः पूर्वपश्चिमतः सप्तसप्तसमेतं ऊनपञ्चाशन्मण्डलं भूमौ लिखेत्। तत्र सविन्दून् ऊनपञ्चाशदक्षरान् विन्यसेत्। ततस्तत्कुलस्यापि शिशोर्हस्तेन पूर्वोक्तमन्त्रेण सप्तधा तां कठिनीमभिमन्त्र्य स्वकीयकार्य्यस्य शुभाशुभं मनसि विचिन्त्य कोष्ठानामेककोष्ठे पातयित्वा शुभाशुभं वक्तव्यं।

तदाह।

अकारेण यशोऽदृष्टं धनलाभं सुखं तथा।

अचिराल्लभते कामं भूमिलाभश्च दृश्यते॥

अ।

आकारेण शोकतापौ विरोधः सततं भवेत्।

धनहानिर्भयञ्चैव क्लेशश्चैव प्रजायते॥

आ।

End. हकारे चिरकल्याणं शुभश्च सततं भवेत्।

धनधान्यं धेनुवत्सं प्रभुत्वञ्च सदा लभेत्॥

ह।

Colophon. इति बृहस्पतिभाषितगुरुकुण्डली समाप्ता,

विषयः। ऊनपञ्चाशत्कोष्ठानामन्यतमेषु मन्त्रपाठपूर्वकं स्वकुलजबालकद्वारा कठिनीपातेन शुभाशुभनिर्देशः।

No. 4083. गुरुसहस्रनामस्तोत्रं। Substance, country-made paper, 13 × $3\frac{1}{2}$ inches. Folia, 9. Lines, 8 on a page. Extent, 133 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Generally correct.

Guru-sahasra-náma-stotra. On the same subject as the preceding. An extract from the Nigama Yoga-sára.

Beginning. ॐ नमो गुरवे तस्मै। श्रीमहादेव उवाच।

अपरं श्रोतुमिच्छामि कान्ते मत्प्राणवल्लभे।

स्तोत्रं सहस्रनामाख्यं श्रीगुरोः कुलभैरवि॥

कृपया कथयेशानि स्तोत्रं परमदुर्लभम्।

श्रीदेव्युवाच।

शृणु शङ्कर वक्ष्यामि स्तोत्रं ब्रह्मप्रदायकं।

तव स्नेहेन बद्धाहं कथयामि सुनिश्चितम्।

End. न स्वं दर्शयेद्देव प्राणान्तेऽपि च गौरिज (?)। इति ज्ञात्वा सावहिते (साव-हिता) स्वयोनिरिव (स्वयोनिमिव) गोपयत्।

Colophon. इति श्रीनिगमयोगसारे सर्वागमोत्तमोत्तमे शतसाहस्त्र्यां संहितायां निगम-शास्त्रे सहस्रारे श्रीगुरोः सहस्रनामकथनमेकादशः परिच्छेदः।

विषयः। गुरोः सहस्रनामकथनं।

No. 4084. कुवलयानन्दखण्डनम्, वा अलङ्कारसारस्थितिः। Substance, country-made paper, 11 × 5 inches. Folia, 13. Lines, 13—15 on a page. Extent, 590 ślokas. Character, Nágara. Date, Sᴍ. 1856. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Kuvalayánanda-khaṇḍana or Alañkára-sára-sthiti. A rhetorical disquisition on differences of opinion regarding the Kuvalayánanda. By Bhímasena Dikshita who flourished in the reign of Ajit Siñha of Jodhapus.

Beginning. (प्रथमतः षट् पत्राणि न सन्ति।)

इत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिरिति मूलोदाहरणापर्य्यालोचन-निबन्धनं चक्रवर्त्तिभट्टाचार्य्यवाचस्पतिमिश्राद्यनेकव्याख्यातृव्याख्यानविरुद्धञ्चेत्यनादेयं। इत्यादि।

End. काव्यप्रकाशकारव्यवस्थापिताः श्रीदेवनाथतर्कपञ्चाननश्रीमहामहोपाध्यायगो-विन्दश्रीजयरामन्यायपञ्चाननाद्यनेकविद्वद्व्याख्याता एक+ +र्थालङ्कारा एवोपकुर्व्वन्तीत्यनवद्यं।

संवद्वि—हितिधरह्माव्यङ्किते श्रावणे
प्राक्पचे नवमी शनैश्चरयुता जाताहिदेशे मरौ।
भूप—श्रीमदजीत (?) सिंहविलसच्छ्रीयोधपूर्व्वे पुरे
क्लृप्ता दीक्षितभीमसेणसुधियालङ्कारसारस्थितिः॥

Colophon. इति श्रीकुवलयानन्दखण्डनोपनामकालङ्कारसारस्थित्यभिधः समाप्तः। शुभं भूयात्। संवत्। १८५६।

विषयः। आप्पयीदीक्षितकृतकुवलयानन्दाभिधेयालङ्कारसन्दर्भोक्तानां केषाञ्चिदभिनवाल-ङ्कारलक्षणानां तथा केषाञ्चनप्राचीनानाञ्च दोषप्रदर्शनम्।

No. 4085. ज्योतिषमणिमाला। Substance, country-made paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 5. Lines, 11 on a page. Extent, 157 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Jyotisha-maṇi-málá. On astrological calculations.

Beginning. श्रीगणेशाय नमः ।

गणेशं भारतीं वन्दे गुरुपादाम्बुजं तथा ।
वक्ष्ये वै पूर्वशास्त्रोक्तं ग्रहराशिगतं फलं ॥१॥
सहजदशमषष्ठे लाभगे याति सूर्य्ये
धनयशोन्वपमान्यः सर्व्वकार्य्येषु सिद्धिं ।

End. राहङ्कं रवेर्मङ्कं (?) लग्नस्याङ्कं च योजयेत् ।
त्रिभिर्भागैर्विजानीयात् समे स्त्री विषमे नरः ॥

इतिमन्तः शुभग्रहैर्दृष्टसमन्यतेषु खल्वाख्या वातः (?) प्रवदन्ति सन्तः ।

Colophon. इति ज्योतिषमणिमाला समाप्ता ।

विषयः । लग्नादीनामन्यतमेषु ग्रहविशेषाणां स्थितिवशात् शुभाशुभफलकीर्त्तनं । गोचरादिफलकीर्त्तनञ्च ।

No. 4086. ज्वरशान्तिः । Substance, country-made paper, $9\frac{1}{2} \times 4$ inches. Folia, 2. Lines, 10 on a page. Extent, 38 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Correct.

Jvara-śánti. On the cure of fevers according to Garga-Saṅhitá.

Beginning. श्रीगणेशाय नमः । अथ ज्वरशान्तिः । आचम्य प्राणानायम्य देशकालौ संकीर्त्य अस्य रोगिणः शरीरे उत्पन्नोत्पत्स्यमानामज्वरपित्तज्वरश्लेष्मज्वरादिसकलरोगनिरसनपूर्व्वकं सद्यआरोग्यावाप्त्यर्थं ज्वराधिपतिमहारुद्रप्रीत्यर्थं गर्गसंहितोक्तां सनवग्रहमखां ज्वरशान्तिं करिष्ये ।

End. कर्म्मसाद्गुण्याय (कर्म्मवैगुण्यशान्त्यर्थं) ब्राह्मणान् भोजयेत् । यस्य स्मृत्येति विष्णुं स्मरेत् ।

Colophon. इति ज्वरशान्तिः । श्रीगजाननार्पणमस्तु ।

विषयः । गर्गसंहितोक्तज्वरशान्तिप्रयोगः ।

No. 4087. जैमिनीयसूत्रवृत्तिः । Substance, country-made paper, $11\frac{1}{2} \times 4$ inches. Folia, 16. Lines, 10 on page. Extent, 40 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Jaiminíya-sútra-vṛitti. Commentary on the aphorisms of Jaiminí on astrological calculations. By Krishtáṇanda Sarasvatí.

Beginning श्रीमहागणपतये नमः ।

भूमानं पुरुषार्थसारमखिलाधारं प्रकाशं परं

सीमानं भवसागरस्य सकलानन्दामृताम्भोनिधिं ।

सन्मानं सततं प्रमाणपदवीदूरं विदूरं हृदि

स्वात्मानं श्रुतिशेखरैकहृदयं स्फूर्त्तिस्वरूपं श्रये ॥

भावयामि हृदि श्रीमद्गोपालानन्ददेशिकान् ।

श्रीमत्स्वयम्प्रकाशार्य्यान् श्रीश्रीधरगुरूनपि ॥

— — — — — — ।

उपदेशमित्यादि । जैमिनीयं सूत्रनिकरमयं जातकम् इत्यादि ।

End. अन्यत्र स्वासमाप्तेरनुक्रमेणैव गणना । इति ।

Colophon. इति श्रीकृष्णानन्दसरस्वतीविरचितायां जैमिनीयसूत्रवृत्तौ प्रथमस्याध्यायस्य प्रथमः पादः ।

विषयः । जैमिनिसूत्राभिधानफलितज्योतिषनिबन्धस्य प्रथमाध्यायप्रथमपादमात्रस्य व्याख्यानम् ।

No. 4088. जनमारशान्तिप्रयोगः । Substance, country-made paper, 11 × 4½ inches. Folia, 3. Lines, 9 on a page. Extent, 38 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Janamára-śánti-prayoga. On certain mystic rites for the purpose of overcoming epidemics performed according to directions given by Garga.

Beginning. श्रीगणेशाय नमः । अथ जनमारशान्तिः । विधानमालानुसारेण जनमारशान्तिं करिष्यन् आदौ स्नात्वा कृतनित्यक्रियः शिवालयं विप्रैः सह गत्वा देवं प्रणिपत्य तदग्रे षोडश-द्वादशाष्टहस्तान्यतममानेन देवयजनभूमिं सम्पाद्य मण्डपं कृत्वा तस्मिन् कुण्डं स्थण्डिलं वा इत्यादि ।

End. धर्ममङ्गलगीतैर्न्दृत्यैर्वेद + + ख्यानश्रवणेन च तं दिवसं नयेदिति ।

Colophon. इति विधानमालास्थगर्गोक्तकारिकानुसारी जनमारशान्तिप्रयोगः ।

विषयः । मारीभयनिवारणार्थं गर्गोक्तविधानेन शान्तिप्रयोगकथनम् ।

No. 4089. इष्टिकालः । Substance, country-made paper, 9 × 4 inches. Folium, 1. Lines, 32. Extent, 64 ślokas. Character, Nágara.

Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

Ishṭi-kála. On appropriate times for the performance of sacrifices. By Paṇḍita Dámodara.

Beginning. अथेष्टिकालः । गोभिलः । पचान्ता उपवस्तव्याः पचाद्योऽभियष्टव्या इति । उपवासोऽन्वाधानं । तत्र मध्याह्ने तत्पूर्व्वे वा पर्व्वप्रतिपत्सन्धौ तद्दिने यागः ।

End. शेषखण्डितत्वात् परिसमाप्तिसूचकवाक्यं न विद्यते ।

Colophon. यागकर्त्तव्यतासमयनिरूपणम् ।

No. 4090. हायनरत्नम् । Substance, country-made paper, $12\frac{1}{2} \times 5$ inches. Folia, 68. Lines, 9—10 on a page. Extent, 2,066 ślokas. Character, Nágara. Date, Sk. 1744. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Háyana-ratna. Astrological calculations. By Balabhadra, son of Dámodara. Written in the year 1551 of some era the name of which is lost owing to a *lacuma*.

Beginning. श्रीगणेशाय नमः ।

अथ तन्वादिद्वादशभावविचारः ।
उक्तञ्च यादवेन ।
भावं परस्यानधिगम्य धीमान्
दृष्टेऽपि वक्तुं स हि नो हि तत् चमः ।
तथैव तन्वादिजभावजातं
शुभाशुभं तद्विदणोम्यथाहं ॥

द्वादशभावानां संज्ञा उक्ता समरसिंहेन । तनु १ धन २ सहज ३ सुहृत् ४ सुत ५ रिपु ६ जाया ७ मृत्यु ८ धर्म्म ९ कर्म्मा—य १०,११ व्यया १२ इति द्वादशभावाः । कार्य्य-स्थानानि लग्नाद्या इति ।

End. ततोऽब्दप्रवेशः कुण्डलीसहितो लेख्यः । इति वर्षपत्रलेखनक्रमः ।

निर्मथ्य स ताजिकशास्त्रसिन्धुं
समुद्धृतो हायनरत्नसंज्ञः ।
सद्वर्षपत्रीकरणोद्यतानां
ज्योतिर्विदां कण्ठविभूषणाय ॥
— — — — ।

हृग्वीपतिमहावीरश्रीमत्याद्विहुजातिके ।
श्रीराजमहलस्थेन मया ग्रन्थो विनिर्म्मितः ॥
— — — — — ।
भूवाणाचकुभि१५५१र्भवे + + मितिर्ग्रन्थस्य तां वेत्ति यः ।
तं मन्ये गणितद्वयाब्जकमलप्रोद्बोधने भास्करम् ॥

Colophon. इति श्रीमद्दैवज्ञवर्य्यपण्डितदामोदरात्मजबलभद्रविरचिते हायनरत्ने मासप्रवेशादिविचारोऽध्यायोऽष्टमः समाप्तः ।

शाके १७४४ ।

विषयः । सामान्यतो भावविवेचनपूर्व्वकं तनुधनसहजादिद्वादशभावफलादिकथनं । ग्रहादीनां दशानयनादिविधिकथनं । मासप्रवेशानयनविधिकथनं । वर्षपत्रलेखनादिक्रमकथनञ्च ।

इति शम् ।

No. 4091. हयग्रीवस्तोत्रं । Substance, country-made paper, 8 × 3½ inches. Folia, 8. Lines, 6 on a page. Extent, 72 ślokas. Character, Nágara. Date, Sm. 1911. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Hayagríva-stotra. A hymn to Hayagríva. By Veṅkaṭanátha Vedántáchárya.

Beginning. श्रीहयग्रीवाय नमः । अथ संकल्पः । श्रीभगवदाज्ञया भगवत्प्रीतिद्वारा सकलविद्यासिद्ध्यर्थं यथाशक्ति हयग्रीवमन्त्रस्य जपं करिष्ये । अथ ऋषिच्छन्दोदेवताः ।

End. वागर्थसिद्धिहेतुं पठन् हयग्रीवसंस्तुतिं भक्त्या ।
कवितार्किककेशरिणा वेङ्कटनाथेन विरचितामेतां ॥

Colophon. इति श्रीसर्वतन्त्रस्वतन्त्रस्य (स्वतन्त्र) श्रीमद्वेङ्कटनाथवेदान्ताचार्य्यकृतिहयग्रीवस्तोत्रं समाप्तं । काश्यां मध्ये संवत् १९११ फाल्गुनमासे कृष्णपक्षे ।

विषयः । हयग्रीवस्य न्यासध्यानमन्त्रकथनं तत्स्तुतिकीर्त्तनञ्च ।

No. 4092. हरिद्राचूर्णविधानधारणमाहात्म्यम् । Substance, country-made paper, 12 × 5½ inches. Folia, 3. Lines, 12 on a page. Extent, 48 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, decayed. Verse. Incorrect.

Haridrá-chúrṇa-vidhána-dháraṇa-máhátmya. Of sectarial marks with turmeric.

Beginning. श्रीमते रामानुजाय नमः ।

ब्रह्मसंहितायां मुनय ऊचुः ।

किं स्थानमूर्द्धपुण्ड्राणां किं द्रव्यं काश्च देवताः ।

को मन्त्रः किं फलं ब्रह्मन् किं कर्त्तव्यं तदुत्तरम् ॥

ब्रह्मोवाच ।

मत्पुत्त्रो नारदो योगी पुरा मत्सन्निधौ हरिम् ।

पृष्टवान् परया भक्त्या तदेवाहं ब्रवीमि वः ॥

नारद उवाच ।

वासुदेव जगन्नाथ भगवन् पुरुषोत्तम ।

किं मुख्यं वैष्णवानान्तु वैष्णवत्वविधायकम् ॥ इत्यादि ।

End. मदङ्गलेपनं पुण्यं धृत्वा करतले पुनः ।

संप्रोक्ष्य विष्णुगायत्र्या द्वादशा+न वा पुनः ॥

Colophon. इति श्रीब्रह्मसंहितायां श्रीहरिद्राचूर्णविधानधारणमाहात्म्यं समाप्तम् ।

विषयः । हरिद्रारागेण ऊर्द्धपुण्ड्रकरणविधिकथनम् । तन्माहात्म्यादिकथनञ्च ।

No. 4093. हरितालिकापूजा । Substance, country-made paper, 10 × 4 inches. Folia, 2. Lines, 9 on a page. Extent, 32 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Haritáliká-pújá. On directions regarding the performance of the Haritáliká.

Beginning. श्रीगणेशाय नमः ।

अथ हरितालिकापूजा लिख्यते ।

विधाय बालुकालिङ्गमर्चयन्तीं महेश्वरम् ।

पूर्णेन्दुवदनां ध्यायेद्धरितालीं शिवप्रियाम् ॥

(ध्यानम् ।)

आवाहयामि वरदां हरितालीं शिवप्रियाम् ।

शिवेन सह पूजार्थं यन्त्रसन्निहिता भव ।

उमामहेश्वराभ्यां नमः । आवाहनार्थे अक्षतान् समर्पयामि । इत्यादि ।

End. फलाष्टकसमायुक्तं सताम्बूलं सदक्षिणम् ।

वायनं (?) द्विजवर्य्याय ददामि हरितालिके ॥

षायन(?)मन्त्रः ।

Colophon. इति हरितालिकापूजा समाप्ता ।

विषयः । हरितालिकापूजायामितिकर्त्तव्यताकथनम् ।

No. 4094. हरितालिकाव्रतकथा । Substance, country-made paper, 9 × 4½ inches. Folia, 5. Lines, 10 on a page. Extent, 118 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Very incorrect.

Haritáliká-vrata-kathá. A legend regarding the origin of the above fast. An extract from the last section of Bhavishya-Puráṇa.

Beginning. वामाङ्के च विभाति भूधरसुता देवापगा मस्तके
भाले बालविधुर्गले च गरलं यस्योरसि व्यालराट् ।
सोऽयं भूतिविभूषणो + + + सर्व्वाधिपः सर्व्वदा
सर्व्वाशापरिपूरकः + × + + श्रीशङ्करः पातु वः ॥
मन्दारमालाकुलितालकायै
कपालमालाङ्कितशेखराय ।
दिगम्बरायै च दिगम्बराय
नमः शिवायै च नमः शिवाय ॥
कैलासशिखरे रम्ये गौरी पृच्छति शङ्करम् ।
गुह्याद्गुह्यतरं लोके कथयस्व महेश्वर ॥ इत्यादि ।

End. यदक्षरपदभ्रष्टं मात्राहीनन्तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद त्वं महेश्वर ॥

Colophon. इति भविष्योत्तरपुराणे उमामहेश्वरसंवादे हरितालिकाव्रतकथा समाप्ता ।

विषयः । शिवाशिवयोः संवादेन हरितालिकाव्रतविधिकथनं । तत्कथाकीर्त्तनञ्च ।

No. 4095. हिल्लाजदीपिका, वा हिल्लाजताजिकम् । Substance, country-made paper, 9 × 4 inches. Folia, 11. Lines, 10 on a page. Extent, 110 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Hillája-dípiká, or Hillája-tájika. Astronomical calculations according to Romaka and other astronomers. By Nṛiśiñha Daivajna.

Beginning. श्रीगणेशाय नमः ।

श्रीशार्ङ्गिधाद्दगिरिशादिकमौलिकोटि
सङ्घट्टिताङ्घ्रिकमलं विमलाङ्गकान्तिं ।
विघ्नौघवृन्ददलनं स्मरणं नराणां
वन्दे गजाननमुमाप्रियसूनुमेकं ।

— — — — ।

श्रीरोमकप्रभृतिखिन्दिककोविदैर्य-
च्छास्त्रे पुरा प्रकथितं किल ताजिकाख्ये ।
च्छिल्लाजताजिकमिदं प्रकटीकरोमि
गूढार्थतः पृथगिदं न कृतं यदन्यैः ॥
कलियुगे घटते किल ताजिकं
स्वनुभवावहमेतदनाकुलं ।
सुविमलैः सुमनोहरवृत्तकै-
रविदुषामतिबुद्धिविवृद्धये ॥ इत्यादि ।

End. खिन्दिकादिमताडुक्तं ताजिकं वीच्य यत्नतः ।
च्छिल्लाजदीपिकां नानावृत्तैश्च सुगमां स्फुटां ॥

+ + + + + ।

Colophon. इति श्रीनृसिंहदैवज्ञविरचिता च्छिल्लाजदीपिका समाप्ता ।

विषयः । रोमकमतानुसारेण भावसाधनादिविधिकथनपूर्व्वकं प्रश्नगणनादिप्रकारकथनम् ।

No. 4096. हिल्लाजताजिकम् । Substance, country-made paper, 11 × 4½ inches. Folia, 15. Lines, 9 on a page. Extent, 350 ślokas. Character, Nágara. Date, Sm. 1915. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Very incorrect.

Hillája-tájika. On astrological calculations.

Beginning. श्रीगणेशाय नमः ।

वर्षलग्नपरन्ध्रेशश्चतुर्थो निधनान्तगैः ।
मुन्थेशो यत्र गो+त्र तद्वर्षे मरणं ध्रुवं (?) ॥
चन्द्रोपान्वितो(?)रन्ध्रे लग्नेशो+गतोऽस्तगे ।
तद्वर्षे च भवेन्मृत्युः पुत्रमानधनादिकं ॥ इत्यादि ।

End. वर्षेशे चार्कपुत्रे निजभवनगते स्वोच्चगे वाचकेन्द्रे
कर्म्मेशे वीर्ययुक्ते शुभग्रहसहिते भूपतुल्यं स्ववंशे ।
नूनं शत्रोर्विनाशो विविधसुखकरं पुत्रपौत्रादिकञ्च
+ + +भूपार्थलाभं सकलग्रहकृतं रिष्टयोगादिनाशं ।

Colophon. इति श्रीहिल्लाजताजिकं सम्पूर्णम् ।

संवत् १९१५ ।

विषयः । ग्रहाणामुच्चनीचाद्यवस्थानविशेषेण शुभाशुभफलकथनम् ।

No. 4097. चित्रमीमांसागूढार्थप्रकाशिका । Substance, country-made paper, 10 × 4½ inches. Folia, 7. Lines, 11 on a page. Extent, 154 ślokas. Character, Nágara. Date, Sm. 1840. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Chitra-mímáñsá-gúḍártha-prakáśiká. A commentary on Válkṛishṇa Paiguṇḍa's poem called Gúḍárthaprakáśiká.

Beginning. (प्रथमपत्रं नास्ति ।) इत्यस्य वाच्यस्य सङ्ग्रहः । यद्वा चाचित्रस्य तस्यैव प्रतीपेऽपि उपमेयस्योपमानत्वकरणेन तदुत्कर्षबुद्धिकृत एव चमत्कारः । क्वचिदहमेव गुरुरित्यादौ च हालाहलादितिरस्कार एव सः । इत्यादि ।

End. ताराकवक्रेषु इति । छत्राकेषु इत्यर्थः । शेषं स्फूटमिति शिवम् ॥

Colophon इति श्रीमत्पायगुण्डोपाख्यबालकृष्णविरचिता चित्रमीमांसागूढार्थप्रकाशिका परिपूर्णा ।

संवत् । १८४० ।

विषयः । चाप्ययीदीक्षितकृतचित्रमीमांसाभिधानालङ्कारसन्दर्भस्य व्याख्यानम् ।

No. 4098. कृत्यमञ्जरी । Substance, country-made paper, 10 × 4½ inches. Folia, 65. Lines, 10 on a page. Extent, 600 ślokas. Character. Nagara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Kṛitya-maṇjarí. A digest of the Smriti rules regarding Feasts and Fasts during a year. By Vápu Bhaṭṭa of Phanasé on the south bank of Krishna in the S'aka year 1640.

Beginning. श्रीगणेशाय नमः ।

नत्वा विघ्नहरं देवं व्यासादींश्च मुनीश्वरान् ।
श्रिया युक्तं महाविष्णुं पार्वत्या सहितं शिवं ॥
आलोच्य बहुशो ग्रन्थान् कौस्तुभादीन् सतां मुदे ।
वापूभट्टेन विदुषा क्रियते कृत्यमञ्जरी ॥
चैत्राद्यमान्तमासेषु सन्ति कृत्यानि भूरिशः ।
चतुर्विधानि तान्याहुर्नित्यत्वादिविभेदतः ॥
करणे तु फलं नोक्तं दोष उक्तो विलोपने ।
तानि नित्यानि वर्षादौ तैलाभ्यङ्गविधिर्यथा ॥
अर्द्धोदयादि योगेषु कृत्यानि विहितानि च ।
नैमित्तिकानि तान्याहुर्ग्रहणादौ च पर्वणि ॥
फलप्रदर्शनं यत्र न लोपे दोषदर्शनं ।
तानि काम्यानि चैत्रादौ प्रपादानविधिर्यथा ॥
—— —— —— —— ।

अथ चैत्रशुक्लप्रतिपन्निर्णयः । सा च संवत्सरारम्भे सूर्योदयव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तावव्याप्तौ वा पूर्व्वैव । इत्यादि ।

End. यमः ।

मानसे नियमे लुप्ते स्मरेद्विष्णुमनामयं । इति ।
सर्व्वं शिवं । इति प्रायश्चित्तानि ॥
समाप्ता च कृत्यमञ्जरी ॥
कृष्णाया दक्षिणे तीरे क्षेत्रे सप्तर्षिसंज्ञके ।
खवेदरसभूशाके मासयोः पौषमाघयोः ॥
केलकारोपनाम्नेयं फणशीग्रामवासिना ।
वापूभट्टेन संक्षेपान्निर्म्मिता कृत्यमञ्जरी ॥
अनया प्रीयतां देवो भगवान् कमलापतिः ।
कृत्यान्येतानि कुर्व्वन्तु प्रत्यब्दं भूसुरादयः ॥

Colophon. इति श्रीमच्चित्तपावने केलकारोपाभिधमहादेवात्मजवापूभट्टविरचिता कृत्यमञ्जरी समाप्ता ।

विषयः । चान्द्रसौरादिमासेषु कृत्यानां विधिनिरूपणं । तत्र नित्यनैमित्तिकादिलक्षणकथनं । अथ चैत्रशुक्लप्रतिपन्निर्णयः । तत्र संवत्सरारम्भकथनमुखेन तैलाभ्यङ्गस्य नित्यत्वकथनं ।

पञ्चाङ्गश्रवणादिविधिकथनं। आचारात् ब्रह्मध्वजपूजादिकथनञ्च। एवंक्रमेण श्रीरामनवम्यादिविधिकथनं। दोलोत्सवविधिकथनं। दमनारोपविधिकथनं। प्रतिमासं व्यतीपाते सुवर्णदानविधिकथनं। संक्रान्तिनिर्णयः। प्रतिपदादिषु कुष्माण्डादिभक्षणनिषेधकथनं। अथ वैशाखमासकृत्यनिरूपणं। तत्र स्नानादिविधिकथनं। अक्षयतृतीयाविधिकथनं। परशुरामजयन्तीविधिकथनं। नृसिंहचतुर्द्दशीविधिकथनं। एवंक्रमेण ज्यैष्ठादिकृत्यनिरूपणं। अथ अधिमासकृत्यनिरूपणं। अथ ग्रहशान्तिविधिकथनं। ग्रहणनिमित्तदोषशान्त्यर्थं प्रायश्चित्तविधिकथनञ्च।

इति शम्॥

No. 4099. कपिलसूत्रभाष्यम्। Substance, country-made paper, $8\frac{1}{2} \times 6$ inches. Folia, 91. Lines, 17—18 on a page. Extent, 1,195 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Kapilasútra-bháshya. A commentary on the Apho risims of the Sáṅkhya system.

ॐ तत्सत्।

Beginning. अथासुरिर्नाम कश्चिद्ब्राह्मणश्चिविधेन दुःखेनाभिभूयमानः तत्कारणं साङ्ख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैरिति। ऋषिं प्रसूतं कपिलं यत्तमग्रे ज्ञानैर्विभर्ति जायमानञ्च पश्येदिति च श्रवणमवगम्य परमर्षिपञ्चमभगवत्कपिलमुपसन्नः शरणं तदपनोदकतत्त्वजिज्ञासुः। स होवाच। भगवान् शिष्ययोग्यतां वितर्कयन् साङ्ख्यतन्त्रमात्मानात्मविवेकं द्वाविंशतिसूत्रैकाध्यायं चतुष्पादं। तद्याचिख्यासितस्यादिममेतत्सूत्रम्। अष्टौ प्रकृतय इति।

End. एतदिति साङ्ख्यशास्त्रं विवेकप्रोद्बोधकं योगानुशासनमितियावत्। परं यथातया समुक्तपञ्चविंशतितत्त्वसमाम्नायनिबन्धनं याथातथ्यमित्युपसंहरति जिज्ञासवे शिष्यायासुरये ज्ञानार्थमन्येभ्योऽपीत्यतः स्यादित्युत्सर्गनियोगः कृत इति।

इति साङ्ख्यभाष्ये चतुर्थपादः।

Colophon. इति श्रीसाङ्ख्याचार्य्यकपिलसूत्रभाष्ये प्रथमाध्यायः प्रयोजनसमाम्नायो नाम तावत् समाप्तः।

विषयः। तत्त्वसमासाभिधानसाङ्ख्यसूत्रस्य व्याख्यानम्।

No. 4100. कल्पतरुव्याख्या। Substance, country-made paper, 15×5 inches. Folia, 51. Lines, 11 on a page. Extent, 2,314 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India, Appearance, fresh. Prose. Incorrect.

Kalpataru-vyákhyá. A commentary on the Vedánta Kalpataru.

श्रीगुरुभ्यो नमः ।

Beginning. गुरुभिरुपदिष्टमर्थं विस्मृतमपि तत्र बोधितं प्राज्ञैः ।
अवलम्ब्य शिव + + + यथामति व्याकरोमि कल्पतरुं ॥
कल्पतरुमुपकुर्य्यां कमधिकमाकाङ्क्षितार्थमुपहृत्य ।
मद्वृत्तिरेवार्थैर्मम मतिमोहं परिष्कर्त्तुं ॥
यावन्तो निविशन्ते विदुषां व्याख्यानचातुरीभेदाः ।
सर्वेषामयमवकाशं ददाति + + + पुष्पकवत् ॥
इत्यमिहातिगभीरे कियदाशयवर्णनं मया क्रियते ।
तुष्यन्ति ततो विबुधाः कतिपयरत्नग्रहादिवाम्बुनिधेः ॥

वियदिति । अत्र प्रत्यगिति ब्रह्मविशेषणेन शास्त्रस्य विषयं प्रदर्श्य तत्र सर्व्वेषां वेदान्तानां समन्वयः प्रथमाध्यायार्थः । इत्यादि ।

End. स्मृत्यादिभिश्चेति स्मरति । अपि च स वह्निरुभयथापि स्मृतेराचाराच्च, आचारदर्शनादित्यादिसूत्रे—अतः परं खण्डितम् ।

विषयः । वेदान्तकल्पतरुनामकभामतीटीकाया व्याख्यानम् ।

No. 4101. गणहोमः । Substance, country-made paper, $8\frac{1}{2} \times 4$ inches. Folia, 8. Lines, 9 on a page. Extent, 109 ślokas. Character Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Gaṇahoma. A description of Gaṇahoma according to Baudháyana.

श्रीगणेशाय नमः ।

Beginning. पापापनोदकामः पूर्वाह्णे गृह्याग्निं प्रतिष्ठाप्य प्राणानायम्य समस्तपापक्षयार्थमशेषकर्म्मानुष्ठानयोग्यतासिद्ध्यर्थं च गणहोमं करिष्ये । तत्र सविता देवता चरुर्हविः—इत्यादि ।

End. त्वमग्ने अयास्यया सन्मनसाहितः । अयासन् हव्यमूहिषे या नो धेहि भेषजं स्वाहा । अग्नये अयसे इदम् ॥

Colophon. इति गणहोमः ।

विषयः । बौधायनोक्तविधिना गणहोमविधानकथनम् ।

No. 4102. वैश्वानर्य्यः । Substance, country-made paper, 8½ × 4 inches. Folia, 3. Lines, 9 on a page. Extent, 50 ślokas. Character Nágara. Date, ? Place of deposit, Calcutta, Government of India Appearance, old. Prose. Incorrect.

Vaiśvánaryya. Rules regarding Vaiśvánarya sacrifice, according to Baudháyana.

अथ वैश्वानर्य्यः ।

Beginning. वैश्वानरो न ऊत्या प्रयातु परावतः । अग्निरुक्थेन वाहसा स्वाहा । अग्नये वैश्वानरायेदं । इत्यादि ।

End. कर्म्मान्ते सर्पिःपायसेन ब्राह्मणान् भोजयित्वा तेभ्यो गोहिरण्यादि दत्त्वा पूतः सर्वकर्म्मार्हो भवति । दशपूर्व्वान् दशावरानात्मानञ्च पुनातीत्याह भगवान् बौधायनः ।

Colophon. इति वैश्वानर्य्यः समाप्तः ।

विषयः । बौधायनोक्तविधिना वैश्वानर्य्यविधानकथनम् ।

No. 4103. वृद्धयवनम् । Substance, country-made paper, 10 × 4⅓ inches. Folia, 110. Lines, 12—13 on a page. Extent, 3,849 ślokas. Character Nágara. Date, ? Place of deposit, Calcutta, Government of India Appearance, decayed. Verse. Incorrect.

Briddha-yavana. A Civil astrology.

Beginning. प्रथमतः सप्तपदाधि न सन्ति ।

नवांशमित्रस्वगृहोपगम्य
स्वभावग्रह्यादिदशा प्रदस्य ।
स + + + पापफला प्रदिष्टा
द्वाभ्यां फलं वच्मि मतं मुनीनाम् ॥
रवेर्दशायामतितेजसोजः
प्राप्नोति मा + + + + + + ।
धनानि चामीकरताम्रशस्तं
सञ्जायते बन्धुसुखं शुभानाम् ॥
इत्यादि ।

End. सूर्य्यारजीवा जनयन्ति मर्त्यं
स्थानेऽष्टमे सत्यधर्मोविहीनम् ।

विशालमांसं कृपणस्वभावं
व्यवायिकं कामनिपीड़िताङ्गम् ॥
सूर्य्यारशुक्राष्टमगा मनुष्यं
कुर्वन्ति शौचप्रणयेन हीनम् ।
नितान्तमतिग्रसुरुप्रभावं
भयाकुलं कीर्तिविवर्जितञ्च ॥ १८ ॥

Colophon. अतः परं खण्डितत्वात् परिसमाप्तिसूचकवाक्यं नास्ति ॥

विषयः। आयुर्दायादिनिरूपणं । दशानिरूपणं । अन्तर्दशानिरूपणं । अष्टवर्गफलकथनं । सूर्य्यदर्शनचारकथनं । एवं चन्द्रदर्शनादिचारकथनं । रव्यादिचारकथनं । तनुस्थानादिचिन्तनं । धनस्थानचिन्तनं । सहजस्थानचिन्तनं । बन्धुस्थानचिन्तनं । सुतस्थानचिन्तनं । रिपुस्थानचिन्तनं । कलत्रस्थानचिन्तनं । मृत्युस्थानचिन्तनं। धर्म्मस्थानचिन्तनं । लाभस्थानचिन्तनं। व्ययस्थानचिन्तनं। लग्नदर्शनचारकथनं । अनफायोगकथनं । सुनफायोगकथनं । दुरुधरायोगकथनं । लग्नाश्रययोगकथनं । धनाश्रययोगकथनं । सहजाश्रययोगकथनं । सुखाश्रययोगकथनं । सुताश्रययोगकथनं । शत्र्वाश्रययोगकथनं । कामाश्रययोगकथनं ।

No. 4104. प्रौढ़प्रतापमार्तण्डः वा कालनिर्णयसङ्ग्रहः। Substance, country-made paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 44. Lines, 10 on a page. Extent, 1,143 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose and verse. Correct.

Prauḍha-pratápa-mártaṇḍa, or Kála-nirṇaya-sañgraha. A digest of various Feasts and Fasts. By Pratáprudra.

Beginning. श्रीगणेशाय नमः ।

वन्देऽहं सच्चिदानन्दपरमानन्दमव्ययम् ।
लोकाधीशधराधारमायालवकविग्रहम् ॥
देशः कश्चिदिहोत्कलोऽस्ति जलधेस्तीरे विशिष्टो महान् ।
अध्यास्तेऽयमुमेश्वरस्त्रिगुणभृद्दारुस्वरूपी हरिः ॥
विप्रेन्द्रा निवसन्ति यत्र सुखिनः सच्छासनैरन्विताः ।
कर्म्मब्रह्मपरायणा दिशि दिशि प्रख्यातसत्कीर्त्तयः ॥
चित्रोत्पलेति तस्मिन् भाति नदी या जनौघानाम् ।

दृष्टिस्पृष्टावगाहनपानैर्दुरितं विनाशयति ॥
तीरे विशिष्टमणिमण्डपवेदिसौध-
शोभाविनिर्ज्जितसुरेन्द्रगृहाथ तस्याः ।
— — — — — ।
तत्राभूत्कपिलेश्वरो गजपतिः श्रीसूर्यवंशे महान्
उद्यद्भानुसहस्रकान्तिरतुलप्रौढ़प्रतापोदयः ।
दानेन चिपति स्म दैन्यमसकृद्विद्यावतां यः सुहृ-
च्छूराणां परिपन्थिपार्थिवलसत् सैन्यञ्च वैण्योपमः ॥
महीपवेस्तस्य महानुभावः सुतोऽभवच्छ्रीपुरुषोत्तमाख्यः ।
मान्यः स्वयं विष्णुरिवावतीर्णो गुणैरुदारैरुपलक्ष्य + मुस् ॥
— — — — — ।
तदात्मजन्मा चरितार्थनामा प्रतापरुद्रो जयति चितीन्द्रः ॥
औदार्यसौन्दर्यविवेकधैर्य्यदयानयाज्ञामितशौर्य्ययुक्तः ।
— — — — — — — ।
सोऽयं कृती समयनिर्णयमादरेण न्यायश्रुतिस्मृतियथानुगतं विशिष्टम् ॥
विश्वोपकारहृदयोऽखिलधर्म्मवित्त्यै श्रीमत्प्रतापन्टपतिर्मितमातनोति ॥
हेमाद्रिकृतकल्पद्रुरत्नाकरमिताचराः ।
माधवीयानन्तभट्टनिबन्धस्मृतिचन्द्रिकास् ॥
स्मृत्यर्थसारापरार्कपारिजातादिकांस्तथा ।
कालादर्शं देवदाननिबन्धं परिशिष्टकम् ॥
मन्वादिनिर्मितान् ग्रन्थान् पुराणाणि च सर्वशः ।
एतानन्यान् निबन्धांश्च दृष्ट्वा नूतपुरातनान् ॥
श्रीमत्प्रतापरुद्रेण कालनिर्णयसङ्ग्रहः ।
प्रौढ़प्रतापमार्त्तण्डसंज्ञकोऽयं विरच्यते ॥

ननु निर्णयो नाम परस्परविरुद्धार्थानां स्मृत्यादिवाक्यानां विरोधपरिह.रेणार्थावधारणम् । इत्यादि ।

End. सुभद्रापूजा । एवमभ्यञ्जनं कुर्य्यात् कुमारीणां प्रयत्नतः।
कञ्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाचतादिभिः ॥

Colophon. नानाविधैर्भक्ष्यभोज्यैः——इतः परं खण्डितम् ।

विषयः । निर्णयलचणादिविवेचनम्। श्रुतिस्मृतिसदाचाराणां प्रामाण्यनिरूपणं। धर्म्मस्वरूप-

विवेचनं। श्रुत्यादिद्वैधे समाधानादिकथनं। संक्षेपेण ग्रन्थप्रतिपाद्यकथनं। तत्र समयनिरूपणं। दिनविभागकथनं। एकभक्तादिनिर्णयः। प्रतिपन्निरूपणं। संवत्सरारम्भविधिकथनं। तिलकव्रतनिर्णयः। आरोग्यव्रतविधिः। विद्याव्रतविधिः। करवीरव्रतविधिः। महद्व्रतविधिः। मौनव्रतविधिः। अशोकव्रतविधिः। धान्यव्रतविधिः। द्वितीयानिर्णयः। बालेन्दुव्रतविधिः। नेत्रविधिः। अशून्यशयनव्रतविधिः। आरोग्यव्रतकल्पः। तृतीयानिरूपणं। हिन्दोलकविधिः। गौरीसौभाग्यशयनविधिः। रम्भाव्रतविधिः। विष्णुस्तुतिव्रतविधिः। कोटीश्वरीव्रतविधिः। उमामहेश्वरव्रतविधिः। अवियोगव्रतविधिः। रसकल्यादिविधिः। चतुर्थीनिर्णयः। गौरीपूजाविधिः। दूर्वागणपतिविधिः। सिद्धिगणेशविधिः। चन्द्रदर्शननिर्णयः। नागव्रतविधिः। वरदकृच्छ्रचतुर्थीविधिः। गौरीकुष्माण्डाङ्गारकादिव्रतविधिः। पञ्चमीनिर्णयः। हयपूजाविधिः। विषापहपञ्चमीविधिः। नागपञ्चमीविधिः। शान्तिव्रतविधिः। श्रीपञ्चमीव्रतविधिः। षष्ठीनिर्णयः। कुमारव्रतविधिः। चम्पाषष्ठीविधिः। कपिलषष्ठीविधिः। कार्त्तिकेयव्रतविधिः। दारिद्र्यहरषष्ठीविधिः। पुत्रषष्ठीविधिः। सप्तमीनिर्णयः। सूर्य्यव्रतविधिः। शर्करासप्तमीविधिः। अमुक्ताभरणादिविधिः। अचलासप्तम्यादिविधिः। कामदासप्तमीविधिः। कल्याणसप्तमीविधिः। अष्टमीनिर्णयः। अशोकाद्यष्टमीविधिः। जन्माष्टमीजयन्तीव्रतादिविधिः। दूर्वाष्टमीविधिः। महालक्ष्मीव्रतविधिः। दुर्गाष्टमीव्रतविधिः। कुण्डमण्डपनिरूपणं। रुक्मिणीव्रतविधिः। शिवपूजाविधिः। भीष्मतर्पणविधिः। बुधाष्टमीव्रतविधिः। नवमीनिर्णयः। श्रीरामनवमीनिरूपणं। नित्यत्वकाम्यत्वविचारः। वैशाखनवमीविधिः। दुर्गापूजाविधिः। भद्रकालीव्रतविधिः। रथनवम्यादिविधिः। दशमीनिर्णयः। दशहराविधिः। दशावतारव्रतविधिः। अपराजिताव्रतविधिः। सार्व्वभौमव्रतविधिः। एकादशीनिर्णयः। श्राद्धकृद्भोजनादिनियमः। प्रातःकृत्यविधिः। शयनैकादशीविधिः। विजयैकादशीविधिः। प्रबोधन्यादिनिरूपणं। धरणीव्रतविधिः। द्वादशीनिर्णयः। आमर्द्दकीविधिः। श्रवणद्वादशीविधिः। वत्सद्वादशीविधिः। त्रयोदशीनिर्णयः। कामपूजाविधिः। यमदीपविधिः। प्रदोषव्रतविधिः। शैवव्रतविधिः। चतुर्द्दशीनिर्णयः। दमनकविधिः। पवित्रारोपणविधिः। अनन्तव्रतविधिः। दीपोत्सवविधिः। यमतर्पणविधिः। ब्रह्मव्रतविधिः। कूर्म्मव्रतविधिः। शिवचतुर्द्दशीव्रतविधिः। पौर्णमासीनिर्णयः। वैशाखीविधिः। एवं कार्त्तिक्यादिविधिः। रक्षाबन्धनविधिः। उपाकर्म्मविधिः। उत्सर्गनिरूपणं। सावित्रीव्रतविधिः। कोजागरव्रतविधिः। वृषोत्सर्गविधिः। भीष्मपञ्चकविधिः। षट्कृत्तिकाव्रतविधिः। होलिकोत्सवविधिः। अमावस्यानिर्णयः। सावित्रीव्रतनिर्णयः। सुखरात्रिविधिः। बलिपूजाविधिः। गोक्रीडाविधिः। नीराजनविधिः। अर्द्धोदयव्रतविधिः। ज्येष्ठापूजाव्रतविधिः। रविवारव्रतविधिः। व्यतीपातव्रतविधिः। भद्राव्रतविधिः। नक्षत्रोपवासविधिः। ग्रहणनिर्णयः। संक्रान्तिनिर्णयः। मलमासनिर्णयः। नदीरजोनिर्णयः। प्रथमरजोदर्शने शुभाशुभकथनं। अगस्त्यार्घविधिकथनं। दर्शश्राद्धविधिः। अपरपक्षश्राद्धविधिः। क्षयाहश्राद्धविधिः। आमश्राद्धविधिः।

प्रेतश्राद्धविकल्पकथनं। वृद्धिश्राद्धविधिः। इष्टिकालादिनिरूपणं। श्राधानादिकालनिर्णयः। शान्तिविधिः। पुंसवनादिविधिः। प्रकीर्णककथनं। विष्णुभक्तलक्षणादिकथनं। तुलसीमाहात्म्यकथनं। पुरुषोत्तममाहात्म्यकथनं। नैवेद्यभक्षणमाहात्म्यादिकथनं। रहस्यकृतपापप्रायश्चित्तादिकथनं। कलिवर्जनीयकथनञ्च। इति शम्।

No. 4105. अनेकार्थकोशः। Substance, country-made paper, 11½ × 7 inches. Folia, 51. Lines, 21—23 on a page. Extent, 8,068 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Generally correct.

Anekártha-kośa. A standard Dictionary of Synonyms and Antonyms in Sanskrit.

Beginning. श्रीगणेशाय नमः।

पातु वोऽधिधरं (?) दूरविकीर्णकरशीकरः।
दुःखवीजच्छिदे वर्षत्करका इव विघ्नजित्॥
विषमपदविषधराली निहत्य सङ्गृह्य शेवधिविशेषात्।
सकलजनसुलभविभवान् कश्चन निर्मत्सरः कुरुते॥
भागुरिकात्यहलायुधदुर्गामरसिंहशाश्वतादिकृतान्।
कोशान् निरीक्ष्य निपुणं धन्वन्तरिनिर्मितं निघण्टुञ्च॥
लिङ्गानुशासनानि च विचार्य लक्ष्यं महाकवीनाञ्च।
कुरुतेऽनेकार्थानां शब्दानां मङ्खकः कोशम्॥
यथासम्भवकाण्डादिक्रमादक्षरसंख्यया।
करामलकवत् साक्षादेष भासिष्यते सताम्॥
— — — — — — ।
को धाचकात्मवातेषु कं शिरोऽम्बुसुखेषु तु।
एकाक्षराः। इत्यादि।

End. तिरोऽन्तर्द्धौ तिर्यगर्थे मिथोऽन्योन्यं रहस्यपि।
जन्मप्राकाश्ययोः प्रादुरथोवुभ्रनिकारयोः।
तत्त्वं सुख्यत्वमञ्जसा॥

Colophon. इति सान्ताः॥

विषयः। एकाक्षरादिक्रमेण ककारान्तादिशब्दानामनेकार्थकथनम्।

No. 4106. कुण्डमण्डपसिद्धिः वा कुण्डसिद्धिः, व्याख्यासहिता। Substance, country-made peper, 10 × 4 inches. Folia, 31. Lines, 9 on a page. Extent, 721 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Kuṇḍa-maṇḍapa-siddhi, or Kuṇḍa-siddhi, Vyákhyá-sahita. Some Sáma hymns designed for reading on altars, with explanations. By Biṭṭhala Díkshita.

मूलस्य।

Beginning. गाढ़ध्वान्तमनेकभानुजठरे राजत्कलाधारिणि
प्रोदञ्चच्छफरीयुगं दरदलत्पद्मे + चीरावलिः।
स्वर्णोत्तुङ्गगिरिद्वयाचरचरी दीना कलिन्दात्मजा
पश्यास्वर्य्यमिदं शिवामिति वदन् स्मेरः शिवः पातु वः॥
कृष्णाचिगोत्रे नितरां पवित्रे पवित्रकर्म्माजनि बूवशर्म्मा।
तत्सूनुना विट्ठलदीक्षितेन विरच्यते मण्डपकुण्डसिद्धिः॥
हतोर्द्धवाद्दोः समभूगतस्य कर्त्तुः शरांशप्रपदोच्छ्रितस्य।
यो वा स हस्तोऽस्य जिनांशकोऽपि स्यादङ्गलं तत्र दिभांशकाये (?)॥ इत्यादि।

टीकायाः।

श्रीगणेशाय नमः।

मत्तमतङ्गजवदनं सादितविघ्नावलीसदनं
गौरीहरयोः स्तोकं पालितलोकं हृदालम्बे॥१॥
कल्याणि वाणि निजपाणिसरोजयुग्मं संयोज्य देवि करवाणि तव प्रणामं।
मत्तुण्डमण्डलल्लसद्रसनाङ्गनं ते नृत्याय नित्यमिदमस्तु रसानुषिक्तं॥ १॥
सन्तानकल्पतरुमण्डपमण्डितायां कुण्डोल्लसज्ज्वलनकाञ्चनवेदिकायां।
सीतारघूद्वहकराकलितैकपाणिर्वैवाहहोमसमये दिशताच्छुभानि॥
कुण्डमण्डपसंसिद्धेर्विवृतिं लिखितोक्तिषु।
प्राचीनवाक्यसन्दर्भं सन्दर्शयितुमारभे॥

इहजगति शिष्टाः ग्रन्थारम्भे स्वेष्टदेवतास्मरणमाशीरूपं मङ्गलमाचरन्ति। तस्मान्माध्यन्दिनीयो विट्ठलशर्म्मा कुण्डसिद्धिं चिकीर्षुः स्वेष्टदेवतास्मरणमाशीरूपं मङ्गलमाचरति शार्दूलविक्रीडितेन गाढ़मिति। स्मेरः सहासः शिवः वो युष्मान् पातु रक्षतु। इत्यादि।

मूलस्य।

End. इति मण्डपकुण्डसिद्धिमेतां रुचिरां विट्ठलदीक्षितो व्यधत्त।
अधिकाशिनगर्य्युमेशतुष्ट्यै विबुधः शोधयतादिमां विचार्य्य॥

शशिगुणतिथिमणे + × शाके वरेण्ये
विभवशरदि रम्ये मासि शस्ये तपस्ये ।
असमशरहतिद्वे पुष्यपचे वलचे
कमलनयनतिथ्यां भानुमद्वारवत्यां ॥

टीकायाः ।

अथमेति पूर्व्वश्लोकेनान्वयः ।
ग्रन्थे परोक्ते मम दूषणोक्त्या किं वा गुणोक्त्या विदुषा विचार्य्यं ।
ग्रन्थे मदुक्ते षदसद्विशेष्यं सर्वस्तु सर्वं न हि वेद कश्चित् ॥
सट्टीकार्य्यां मत्कृतिर्निर्मलेयं कश्मादेवं पण्डितान् प्रार्थयेऽहं ।
चीरं पेयं नीरमेतद्विहाय को वा विज्ञं हंसमभ्यर्थयेत ॥

Colophon. इति सङ्गमनेरस्थविट्ठलदीक्षितविरचिता स्वकृतकुण्डसिद्धिव्याख्या समाप्ता।

मूलस्य विषयः । मण्डपकुण्डयोर्निर्म्माणविधिकथनमुखेन हस्तादिमानपरिभाषाकीर्त्तनं । तत्र प्राचीसाधनविधिकथनं । शङ्कुसमत्वादिसाधनविधिकथनं । एवं प्रतीच्यादिसाधनविधिकथनं । स्तम्भमण्डपपरिमाणादिकथनं। तत्र द्वारमानकथनं । वेदिमानकथनञ्च । तुलापुषादौ विशेषकथनं । निवेशनविधिकथनं । स्तम्भोपरिकाष्ठनिवेशनविधिकथनं । मण्डपच्छादनविधिकथनं । तोरणादिविधिकथनं । फलकादिनिवेशनविधिकथनं । ध्वजादिनिवेशनविधिकथनं। कुण्डनिवेशनविधिकथनं । कर्म्मविशेषे कुण्डविशेषविधिकथनं। कुण्डनिर्म्माणविधिकथनं। तत्र चेत्रफलानयनादिविधिकथनं । खातलक्षणादिकथनं । मेखलादिविधिकथनं । अथ कुण्डकरणाशक्तौ स्थण्डिलविधिकथनञ्च ।

टीकाया विषयः । निजकृतकुण्डसिद्धिनामकसन्दर्भस्य व्याख्यानम् ।

इति शम् ।

No. 4107. कुष्माण्डहोमः । Substance, country-made paper, 8½ × 4 inches. Folia, 8. Lines, 9 on a page. Extent, 153 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Kushmáṇḍa-homa. On a fire-offering with pumpkins as directed by Bodháyana.

Beginning. श्रीगणेशाय नमः ।

यजुषाध्वर्यवं कार्य्यं ऋक्सामाथर्वणैः क्रमात् ।
तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात् ॥

अथाग्नौनाशास्यमानः सर्वदुरितक्षयकामः सर्वप्रायश्चित्तरूपकुष्माण्डैर्जुहुयात्। अमावास्यायां पौर्णमास्यां वोपक्रमः। इत्यादि।

End. अग्न्याधेये पूर्णाहुतिं हुत्वा कुष्माण्डैर्जुहुयात्॥
पूतो देवलोकान् समश्नुते इति ब्राह्मणं॥

Colophon. इति कुष्माण्डहोमः॥

विषयः। बौधायनोक्तविधिना कुष्माण्डहोमविधिकथनम्।

No. 4108. कोकिलाव्रतम्। Substance, country-made paper, 10 × 4½ inches. Folia, 8. Lines, 10—11 on a page. Extent, 225 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Kokilá-vrata. On the Kokilávrata as described in the Varáha-puráṇa.

Beginning. श्रीः।

आषाढ़पौर्णमास्यामारभ्य कोकिलाव्रतं। तदुक्तं हेमाद्रौ भविष्ये। आषाढ़पौर्णमास्यान्तु सन्ध्याकाले ह्युपस्थिते। संकल्पयेन्मासमेकं श्रावणे प्रत्यहं × हं। स्नानं करिष्ये नियता ब्रह्मचर्य्यस्थिता सती। भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयामिति। अस्य नक्तव्रतत्वात् सायाह्नव्यापिनी ग्राह्या। इत्यादि।

End. न च ताराबलं चन्द्रो न मौढ्यं गुरुशुक्रयोः।
कुयोगदर्शनं नास्ति कोकिलाया व्रते शुभे॥

Colophon. इति कोकिलाव्रतं।

विषयः। वराहपुराणानुसारेण कोकिलाव्रतविधिकथनं। तत्र व्रतकालादिकीर्त्तनञ्च। तथा नारदीयपुराणानुसारेण तदुद्यापनविधिकथनञ्च।

No. 4109. कालनिर्णयचन्द्रिका। Substance, country-made paper, 10 × 5 inches. Folia, 142. Lines, 12 on a page. Extent, 3,821 ślokas. Character, Nágara. Date, Sm. 1816. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Kálanirṇaya-chandriká. The division of time for religious ceremonies.

Beginning. श्रीमहागणाधिपतये नमः।

अथ चान्द्रसावनसंवत्सरनिर्णयः। तत्र ब्रह्मसिद्धान्ते। चान्द्रसावनसौराणां मासानान्तु प्रभेदतः। चान्द्रसावनसौरास्तु त्रयः संवत्सरा अपीति शुक्लप्रतिपदादिदर्शान्त एव चान्द्रो मासः। पुरुषेच्छया

त्रिंशद्दिनात्मकः सावनः। एकस्मिन् राशौ सूर्यो यावत्कालं तिष्ठति स सौरः। अतएवोक्तं तत्रैव। चान्द्रः शुक्लादिदर्शान्तः सावनः त्रिंशता दिनैः। एकराशौ रविर्यावत्कालं मासः स भास्करः। इति।

End. तथा च स्मृत्यन्तरेषु।
ग्रहणालभ्ययोगेषु चातुर्मास्यव्रतेषु च।
श्रीशैले च गयाक्षेत्रे मूढदोषो न लभ्यते।

Colophon. इति मिश्रपण्डितसीतारामसूरिविरचिता कालनिर्णयचन्द्रिका समाप्ता।
संवत् १८१९।

विषयः। चान्द्रसावनसौरसंवत्सरनिरूपणं। विवाहादौ सौरादिमासव्यवस्थाकथनं। अयननिर्णयः। एवमृतुमासादिनिरूपणं। तत्र अधिमासक्षयमासनिरूपणं। तत्र तत्र कर्त्तव्याकर्त्तव्यनिरूपणं। मलमासे यद्वर्ज्यमुक्तं तद्गुरुशुक्रयोरस्तादिष्वपि वेदितव्यमितिकथनं। गुरुशुक्रयोर्मौढ्यादिलक्षणकथनं। तिथ्याद्युत्पत्तिनिरूपणं। कालविभागकथनं। तत्र शुद्धादिलक्षणं। खण्डाखण्डनिरूपणं। एकभक्तनिर्णयः। नक्तादिविधिकथनं। नक्षत्रव्रतकालनिरूपणं। अयाचितनिर्णयः। प्रतिपदादिनिरूपणं। देवीपूजनविधिकथनमुखेन आश्विनशुक्लसप्तम्यादिविधिकथनं। द्वितीयादिषु कृत्यविधिकथनं। अथ यागविषये इष्टिकालनिरूपणं। तत्र सन्धिपरिज्ञानविधिकथनं। अथ श्राद्धकालनिरूपणं। पिण्डपितृयज्ञादिनिरूपणं। नित्यश्राद्धविधिकथनं। मन्वन्तरादिनिरूपणं। युगाद्यानिरूपणं। संक्रान्तिनिरूपणं। व्यतीपातवैधृतिनिरूपणं। महालयनिरूपणं। जीवत्यपि मातुले दौहित्रकृतमातामहश्राद्धविधिकथनं। श्राद्धाङ्गतर्पणविधिकथनं। पिण्डदानस्थानादिनिरूपणं। अष्टकाश्राद्धकालनिरूपणं। पार्वणश्राद्धविधिकथनं। ग्रहणकालनिरूपणं। प्रत्याब्दिकश्राद्धादिकालनिरूपणम्। वृद्धिश्राद्धविधिकथनं। गर्भाधानविधिकथनं। रजस्वलास्नानविधिकथनं। अथ चूडामणियोगकथनं। अथ समुद्रस्नानकालकथनं। अथ अर्द्धोदययोगकथनं। कपिलषष्ठीयोगकथनं। चम्पाषष्ठीयोगकथनं। गजच्छायादिकथनञ्च।

इति शम्॥

No. 4110. कल्पद्रुकलिका। Substance, country-made paper, 11 × 4½ inches. Folia, 181. Lines, 13 on a page. Extent, 6,142 ślokas. Character. Nágara. Date, Sm. 1860. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Kalpadru-kálikâ. On days suited for particular ceremonies. An explanation of the Jain Kalpasútra.

Beginning. श्रीगुरुभ्यो नमः।
श्रीवर्द्धमानस्य जिनेश्वरस्य जयन्तु सद्वाक्यसुधाप्रवादाः।

येषां श्रुतिस्पर्शनजप्रसत्तेर्भव्याभवेयुर्विमलात्मभासः ॥
श्रीगौतमो गणधरः प्रकटप्रभावः सल्लब्धिसिद्धिनिधिरञ्चितवाक्प्रबन्धः ।
विघ्नान्धकारहरणे तरणिप्रकाशः साहाय्यकृद्भवतु मे जिनवीरशिष्यः ॥
कल्पद्रुकल्पसूत्रस्य सदर्थफलहेतवे ।
ऋतुराजेव सद्योग्या कलिकेयं प्रकाश्यते ॥

श्रीकल्पसूत्रस्य गम्भीरार्थस्य श्रीगुरुप्रसादात् अर्थः क्रियते। यथा चैत्रमासे कोकिला मधुरं वक्ति, तत्र सहकारमञ्जरी कारणं। यत्र रजः सूर्यमण्डलमाच्छादयति, तत्र पवनस्य माहात्म्यं। यत्र मण्डूको महाभुजङ्गमस्य वदनं चुम्बति, तत्र मणेः प्रभावः — — — —
तत्रादौ श्रीकल्पसिद्धान्तस्य अधिकारत्रयवाचिकेयं गाथा, पुरिमेति। प्रथमतीर्थङ्करचरमतीर्थङ्करयोरित्यादि।

End. आशां कुर्व्वतां सतां श्रेयः कल्याणं सर्व्वदा भवतु। इति श्रीकल्पकल्पद्रुकलिकायां साधुसामाचारीव्याख्यानं सम्पूर्णम्।

श्रीकल्पसूत्रवरनाममहागमस्य गूढार्थभावसहितस्य मनोहरस्य।
लक्ष्मीनिधेर्विहितवल्लभकामितस्य व्याख्यानमाप नवमं परिपूर्त्तिभावम् ॥
श्रीमज्जिनादिकुशलः कुशलस्य कर्त्ता गच्छे बृहत्खरतरे गुरुराड्बभूव।
शिष्यश्च तस्य सकलागमतत्त्वदर्शी श्रीपाठकः कविवरो विनयप्रभोऽभूत् ॥
विजय तिलकनामा पाठकस्तस्य शिष्यो
भुवनविदितकीर्त्तिर्वाचकः क्षेमकीर्त्तिः।
प्रचुरविहितशिष्यः प्र×ता तस्य शाखा
सकलजगति जाता क्षेमधाटी ततोऽसौ ॥
पाठकौ च तपोरत्नतेजोराजौ ततोऽवरौ।
भुवनादिमकीर्त्तिश्च वाचको विशदप्रभः ॥
सद्वाचकोऽभवदशेषगुणाम्बुराशि-
र्हर्षादिकुञ्जरगणिर्गुरुतान्वितश्च।
श्रीलब्धिमण्डनगणिर्वरवाचकश्च
सद्बोधसान्द्रहृदयः सुहृदां वरेण्यः ॥
लक्ष्मीकीर्त्तिः पाठकः पुण्यमूर्त्ति-
र्भास्वत्कीर्त्तिर्भूरिभाग्योदयश्रीः।
शिष्यो लक्ष्मीवल्लभस्तस्य रम्यां
वृत्तिं चक्रे कल्पसूत्रस्य चैताम् ॥

Colophon. इति श्रीकल्पसूत्रकल्पद्रुकलिकायां लक्ष्मीवल्लभविरचितायां नवमं व्याख्यानं सम्पूर्णम् । संवत् १८९० ।

विषयः । जैनकल्पसूत्रस्य व्याख्यानम् ।

No. 4111. कुण्डमण्डपे पश्चिमद्वारसामानि । Substance, country-made paper, 8 × 3½ inches. Folia, 10. Lines, 8 on a page. Extent, 112 ślokas. Character. Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Kuṇḍa-maṇḍape-paśchima-dvárasáma. Sáma hymns appropriate to the western gate of an altar.

Beginning. श्रीगणेशाय नमः ।

अथ कुण्डमण्डपे पश्चिमद्वारसामानि ।

ॐ । उक्तं दध्यो वा सूतमा १२४ साम् ।

षष्ठमं ना । रिया २ पा १२४ साम् ॥ इत्यादि ।

End. ज्योतो वा १२ हाउ । वा । धर्मा मवद्भिर्भुवनेषु

Colophon. चकाद्त् ॥ इट् । इड़ा १२४५ ॥ ॥

विषयः । तुलापुरुषादौ कुण्डमण्डपस्य पश्चिमद्वारि स्थितस्य उद्गातुः पठनीयसामकथनम् ।

No. 4112. सूर्य्यसहस्रनामस्तोत्रं । Substance, country-made paper, 6½ × 3½ inches. Folia, 11. Lines, 8 on a page. Extent, 120 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Correct.

Súryya-sahasranáma-stotra. A hymn in praise of the god Suryya in 1000 epithets. An extract from the Bhavishyotara puráṇa.

Beginning. श्रीगणेशाय नमः ॥

विश्वविद्विश्वजित् कर्त्ता विश्वात्मा विश्वतोमुखः ।

विश्वेश्वरो विश्वयोनिर्नियतात्मा जितेन्द्रियः ॥

कालाश्रयः कालकर्त्ता कालहा कालनाशनः ।

महायोगी महाबुद्धिर्महात्मा सुमहाबलः ॥

End. हिरण्यगर्भो मार्त्तण्डस्तिमिरातपनो (तिमिरातपनो) रविः ।

तमिस्रहन्ता सुभगो गोपतिः श्रीपतिर्हरिः ॥

Colophon. इति श्रीमद्भविष्योत्तरपुराणे सुमन्तुशतानीकसंवादे सूर्य्यसहस्रनामस्तोत्रं सम्पूर्णम् ।

विषयः । सूर्य्यसहस्रनामकथनं ।

No. 4113. भवानीसहस्रनामस्तोत्रं । Substance, country-made paper, 7½ × 8½ inches. Folia, 33. Lines, 7 on a page. Extent, 252 ślokas. Character, Nágara. Date, Sk. 1707 Sm. 1836. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Generally correct.

Bhavání-sahasranáma-stotra. A hymn to Bhavání in 1000 epithets as given in the Rudrayámala Tantra.

Beginning. श्रीगणेशाय नमः ।

कैलासशिखरे रम्ये देवदेवं महेश्वरं ।
ध्यानोपरतमासीनं प्रसन्नमुखपङ्कजं ॥
सुरासुरशिरोरत्नरञ्जिताङ्घ्रियुगं प्रभुं ।
प्रणम्य नन्दिको देवं कृताञ्जलिरभाषत ॥
नन्दिकेश्वर उवाच ।
देव देव जगन्नाथ संशयोऽस्ति महान् मम ।
रहस्यं किञ्चिदिच्छामि प्रष्टुं त्वां भक्तवत्सल ॥
देवतायास्त्वया कस्याः स्तोत्रमेतद्दिवानिशं ।
पठ्यतेऽविरतन्नाथ त्वत्तः किमपरः परः ॥
इति पृष्टस्तदा शम्भुर्नन्दिकेन जगद्गुरुः ।
प्रोवाच भगवानीशो विकाशनेत्रपङ्कजं ॥
ईश्वर उवाच ।
साधु साधु गणश्रेष्ठ पृष्टवानसि मात्र यत् ।
स्कन्दस्यापि हि यद्गोप्यं रहस्यं कथयामि ते ॥

End. देवानां देवतायाश्च ब्रह्माद्यैर्या च पूजिता ।
भूयात् सा वरदा लोके साधूनां विश्वमङ्गला ॥

Colophon. इति श्रीरुद्रयामले महागुप्तसारे शिवनन्दिकेश्वरसंवादे भवानीसहस्रनामस्तोत्रं सम्पूर्णं ।

विषयः । भवानीसहस्रनामकीर्त्तनं ।

No. 4114 जीवच्छ्राद्धप्रयोगः। Substance, country-made paper, 8½ × 3½ inches. Folia, 7. Lines, 7 on a page. Extent, 65 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Jívachchhráddha-prayoga. On the rituals for the performance of the S'ráddha for the living. By Náráyaṇa Bhaṭṭa, son of Rámeśvara Bhaṭṭa. Compiled from the Brahma and other Puráṇas.

Beginning. श्रीगणेशाय नमः॥

अथ ब्रह्मपुराणोक्तमार्गेण जीवच्छ्राद्धप्रयोगः। पुण्यदेशकालधनव्यवसाये समुच्च(च)ये सति स्वस्यान्यस्य जीवच्छ्राद्धं कुर्य्यात्। तत्र पुत्राद्यौर्द्ध्वदेहिककर्त्तरि सत्यपि कार्य्यमिति केचित्। अन्ये तु तदभाव एव वदन्ति। तत्र यथाशक्ति सर्व्वप्रायश्चित्तव्रणधेनुपायसधेनुघृतपात्रतिलपात्रदशदान-वैतरणीधेनुदानानि शक्त्या कृत्वा कुर्य्यात् कृष्णद्वादश्यां कृतोपवासस्त्रयोदश्यां कृतनित्यक्रियः।

End. दक्षिणा च सुवर्णमारभ्य यथाशक्ति एतच्चेर(?)धेनुवदविरोधात्तत् सामान्यादितरेतरेषु तथात्वमिति ज्ञेयमिति।

Colophon. इति श्रीरामेश्वरभट्टसुतनारायणभट्टकृतौ ब्रह्मपुराणाद्यनुसारेण जीवच्छ्राद्ध-प्रयोगः। जीवत्क्रियाविधिः समाप्तः।

विषयः। जीवतः श्राद्धकरणनियमः।

No. 4115. ज्वरशान्तिः। Substance, country-made paper, 10½ × 4½ inches. Folium, 1. Lines, 22. Extent, 21 ślokas. Character, Nágara, Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Jvara-śánti. Charms for the cure of fever. Anonymous.

Beginning. श्रीगणेशाय नमः। अथ ज्वरशान्तिः। अस्य रोगिणः शरीरे उत्पन्नोत्पत्स्यमाना-मज्वरपित्तज्वरवातज्वरश्लेष्मज्वरादिसकलरोगनिरसनपूर्व्वकं सद्य आरोग्यावाप्त्यर्थं ज्वराधिपतिमहारुद्र-प्रीत्यर्थं गर्गसंहितोक्तां सनवग्रहमखां ज्वरशान्तिं करिष्ये। पुण्याहवाचनादि आचार्य्यादिकं वृणुयात्।

End. शं नः पद्योनाशान्तिः। ज्वरशान्तिः। भूयसीं दक्षिणां दातुमहमुत्सृजे।

Colophon. इति शान्तिसारे ज्वरशान्तिप्रयोगः।

विषयः। ज्वरशान्तिकथनं।

No. 4116. विश्वप्रकाशिकापद्धतिः। Substance, country-made paper, 11 × 4½ inches. Folia, 241. Lines, 11 on a page. Extent, 8,676 ślokas.

Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Viśvaprakáśiká-paddhati. An elaborate digest of various rites, ceremonies and expiations. By Viśvanáth Bhaṭṭa the son of Purushottama Bhaṭṭa, the grandson of Trivikrama and the great-grandson of Náráyaṇácháryya belonging to the Paraśara gotra. Viśvanáth had two sons Náráyaṇa and Káśínátha.

Beginning. नारायणाय नमः। रामाय नमः। निर्व्विघ्नमस्तु।
श्रौतस्मार्त्तक्रिया यस्य + + + राधनं मतम्।
स नस्तत्र स्थिरां भक्तिं विदधातु परः पुमान्॥
वाणीं हरिहरार्कादीन् ग्रहान् ब्रह्मगुरून् पितॄन्।
गणाधिपं सूत्रकारमापस्तम्बं नमाम्यहम्॥
ज्यायांसं भ्रातरं कृष्णं नत्वा पद्धतिसिद्धये।
विश्वप्रकाशिकाख्या हि रच्यते पद्धतिः शुभा॥
आदौ नारायणाख्यार्य्यः श्रेष्ठे गोत्रे पराशरे।
उत्पन्नः पण्डितः श्रीमान् वेदवेदाङ्गपारगः॥
त्रिविक्रमाख्यस्तत्सूनुर्विद्वान् मान्यश्च सर्व्वतः।
तत्सुतोऽभूद्द्विजश्रेष्ठो भट्टश्रीपुरुषोत्तमः॥
मीमांसादिषु शास्त्रेषु वेदान्तेषु कृतश्रमः।
सद्धर्मनिरतः शुद्धो ज्योतिःशास्त्रविशारदः॥
श्रीविश्वनाथस्तत्पुत्रः षट्कर्मनिरतः शुचिः।
यस्तु द्विजानामाज्ञाकृज्ज्योतिःशास्त्रेषु सम्मतः॥
यस्य माता + + + का यस्य भार्य्या च पार्व्वती।
त्रिवर्गे वानुकूलेऽस्य ——————— ॥
नारायणाख्यो यत्पुत्रः काशीनाथः प्रियस्तथा।
गुरुशुश्रूषणरतौ सत्कर्मनिरतौ च तौ॥
शुचि + + + + +मौ भार्गवे स्वातितारे
योगे सिद्धे विलग्ने धनुषि च दिवसे दण्डयुग्मावशिष्टे।
बुद्धिस्थेज्ये घुनार्के + × + बुधसिते कर्कट + तुलेन्दौ
दुश्चिक्यस्थानकेतौ तमसि नवमगे विश्वनाथः प्रजातः॥
श्रीमद्बोधायनार्य्यप्रभृतिनिगदितानेकसूत्रार्थवक्ता
मीमांसान्यायविद्वद्धृदयकुमुदिनीचन्द्रमा(मः) श्लिष्टमौलिः।

श्रौतस्मार्त्त + + + धिषणीभूसुरत्नं परेषां
स्वाचारैः स्थापयन् स जयति गुणनिधिर्दैवविद्विश्वनाथः ॥
का+विश्वप्रकाशाख्या विश्वनाथेन पद्धतिः ।
आश्रित्यापस्तम्बमतं सूत्रमार्गाद्विरच्यते ॥
यथाश्रुतं यथादृष्टं यथाज्ञानं तथैव च ।
सर्व्वकर्म्मेह वेदोक्तं मानयन्तु हि सज्जनाः ॥
गर्भाधाने चरुर्भक्ष्यः स च सीमन्तकर्मणि ।
होम + + + + + ग्राबनस्तस्मान्निबध्यते ।

End. शेषखण्डितत्वात् समाप्तिसूचकवाक्यं नास्ति ।

विषयः । विवाहादिकर्मसु स्वस्तिवाचनक्रमः तस्य मन्त्रकथनञ्च । अङ्कुरार्पणविधिः । प्रोक्ष-अप्रतिसरविधिः । कङ्कणमोचनविधिः । गौर्य्यादिमातृकापूजाविधिः । इड़ावाचनप्रयोगः । नान्दी-मुखश्राद्धविधिः । आग्नेयाधिमुखविधिः । अग्निहोत्रविधिः । जयादिहोमप्रयोगः । (अतः विंशत्य-चाणि न सन्ति ।) ततो ग्रहयज्ञप्रयोगः । ग्रहशान्तिः । विनायकशान्तिविधिः तत्प्रयोगश्च । प्रथम-रजःचरणे शुभाशुभसमयनिर्देशः । रजस्वलायाः शुद्धिविधिः । अशुभसमये नारीणां प्रथमरजोदर्शने तस्य शान्तिकथनं । ततो गर्भाधानक्रमः । पुंसवनं । सीमन्तोन्नयनं । जातकर्म । शीघ्रप्रस-वोपायकथनं । सूतिकाषष्ठीपूजाप्रयोगः । प्रसूतिस्नानविधिः । नामकरणं । निष्क्रमणं । कर्णवेधः । अन्नप्राशनं । चूड़ाकरणं । उपनयनं । श्रावणकर्मप्रयोगः । उपाकर्मविधिः । प्राजापत्यं । प्राजापत्य-व्रतोत्सर्जनं । सौम्यव्रतं । सौम्यव्रतोत्सर्जनं । आग्नेयव्रतं । आग्नेयव्रतोत्सर्जनं । गोदानव्रतं । समाव-र्त्तनं । अथ प्रवरनिर्णयः । समानप्रवरादिविवाहे प्रायश्चित्तविधिः । मृगारेष्टिः । पवित्रेष्टिः । कुष्माण्डहोमविधिः । तत्प्रयोगः । गणहोमः । कृच्छ्रलक्षणं । प्राजापत्यकृच्छ्रं । अतिकृच्छ्रं । सौम्य-कृच्छ्रं । सान्तपनकृच्छ्रं । यतिसान्तपनकृच्छ्रं । महासान्तपनं । पर्णकृच्छ्रं । फलादिकृच्छ्रं । तप्त-कृच्छ्रं । महातप्तकृच्छ्रं । शीतकृच्छ्रं । जलकृच्छ्रं । चान्द्रायणं । यावकव्रतं । गोमुखप्रसवशान्तिः । शिशोर्दशनजननिमित्तशान्तिः । एवं मूलानक्षत्रजननशान्तिः । अश्लेषाजननशान्तिः । ज्येष्ठाजन-नशान्तिः । गण्डजननशान्तिः । वैधृतिव्यतीपातसंक्रान्तिजननशान्तिः । चन्द्रसूर्य्योपरागजननशान्तिः । यमलजननशान्तिः । पुत्रकामेष्टिविधिः । पुत्रप्रतिग्रहविधिः । विवाहादौ निषिद्धसमयकथनं । विवाहे लग्नादिविचारः । तरुपुत्त्रविधिः । मनुष्याणां तृतीयविवाहे अर्कविवाहविधिः । लुप्तसंव-त्सरनिर्णयः । अधिमासनिर्णयः । मलमासव्रतविधिः तत्कथा च । अर्द्धोदययोगकथनं । ग्रहणवेध-शान्तिः । पल्लीपतनसरटारोहणफलं । अङ्गस्पन्दनदोषशान्तिः । अश्विन्यादिनक्षत्रेषु ज्वरोत्पत्तौ तस्य भोगकालादिनिर्णयः । तत्र ज्वरोत्पत्तिजनितदोषशान्तिकथनञ्च । वास्तुनिवेशः । वास्तूपयोगिध्वजादि-फलं । द्वारनिर्णयः । लग्नादिविशेषस्थग्रहविशेषेषु गृहारम्भे शुभफलं । गृहप्रवेशविधिः । वास्तु

पूजाविधिः । तड़ागवास्तुपूजाविधिः । वाटिकावनवास्तुविधिः । प्रासादवास्तुविधिः । तड़ागप्रतिष्ठाविधिः। ग्रहशान्तिः । सर्पबलिः । ईशानबलिः । शिवप्रतिष्ठाविधिः। (अत्र पत्रद्वयं न विद्यते ।) ततो गर्भिणीमृतप्रायश्चित्तविधिः । रजखलामृतप्रायश्चित्तविधिः । त्रिपुष्करयोगः । त्रिपुष्करादिशान्तिविधिः । पर्णनरदाहः । औपासनाग्निसन्ध्याप्रयोगः । विधुराणां दाहे उत्तपनाग्निविधिः । ब्रह्मचार्य्यादीनां दाहे कपालाग्निविधिः । दक्षिणायनकृष्णपक्षरात्रिमरणप्रायश्चित्तं। मुमूर्षोः सुखेन प्राणोत्क्रमणार्थं गोदानविधिः । कायिकादित्रिविधदोषसंसर्गदोषपरिहारार्थं दशदानादिविधिः। सहगमनविधिः । अन्त्येष्टिप्रयोगः। दशपिण्डदानविधिः। नग्नप्रच्छादनश्राद्धविधिः। नवश्राद्धविधिः। अस्थिसञ्चयविधिस्तत्प्रयोगश्च । दशमदिनकृत्यनिर्णयः। एकादशाहकृत्यं द्वादशाहादिकृत्यसपिण्डीकरणप्रयोगः । त्रयोदशाहकृत्यं । वैतरणीगोदाने विशेषकथनं । मासिकश्राद्धविधिः । एकोद्दिष्टविधिकश्राद्धविधिः । अपरपक्षश्राद्धप्रयोगः । अष्टकादिश्राद्धविधिः । अग्नौकरणविस्मृतिप्रायश्चित्तं । अमावास्याश्राद्धविधिः । पिण्डपितृयज्ञविधिः । गजच्छायाकथनं । तत्र चन्द्रसूर्य्योपरागादौ च श्राद्धविधिः । कपिलषष्ठीमाहात्म्यं । महालयाश्राद्धप्रयोगः । गयाश्राद्धविधिः । संक्रान्तिपुण्यकालनिर्णयः । तीर्थश्राद्धविधिः । अतः परं खण्डितम् ।

No. 4117. उद्योतः, वा, काव्यप्रदीपविद्योतः । Substance, country-made paper, 12 × 3½ inches. Folia, 184. Lines, 8 on a page. Extent, 7,432 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Udyota or Kávya-pradípavidyota. Notes on a commentary on the Govinda Ṭhakkura's Kávyapradípa. By Nágeśa Bhaṭṭa the son of S'iva Bhaṭṭa by Sati. The work was written under the patronage of Ráma the king of S'ṛingavera.

Beginning. श्रीगणेशाय नमः ।

याचकानां कल्पतरोररिपक्षहुताशनात् ।
शृङ्गवेरपुराधीशरामतो लब्धजीविकः ॥
नागेशभट्टः कुरुते प्रणम्य शिवया शिवम् ।
काव्यप्रदीपविद्योतमतिगूढ़ार्थसंविदे ॥

स्रोतुमौचित्ये हेतुः । वचनेत्यादि विशेषस्य तान्त्रिकाणां व्यवहार उन्नेयः । प्रारम्भ आद्या कृतिः स तावदव्यवहितपूर्व्वकालत्वमपि मङ्गलस्य सूचितम् । तादृश्या अपि वैरिदेवताले फलादात्वादाह सेव्यमानायाश्चेति । ग्रन्थकृता इति शेषः । कविवाणा देवतात्वाभावादाह ।

End. काव्यलक्षणं कार्य्यं लक्ष्यते स्वरूपतो विशेषतश्च ज्ञाप्यते अनेनेति प्रकृतग्रन्थरूपमिति शिवम् ।

शृङ्गवेरपुराधीशरामप्रेरणयादरात् ।
सद्युक्तिमुक्तासन्दर्भैर्विदग्धश्रुतिमनोहरैः ॥
सेतौ नागेशवदेऽस्मिन्नलङ्कारमहोदधेः ।
सतां मतिः सञ्चरतां यावच्चन्द्रदिवाकरौ ॥
काव्यप्रदीपकोद्योतः शिवयोरर्पितो मया ।
यन्निर्मितौ सखायौ मे जातः सम्प्रति भा + + ॥

Colophon. इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्ट(?) कृते काव्यप्रदीपोद्योते दशम उल्लासः । शुभमस्तु ।

विषयः । गोविन्दठक्कुरकृतकाव्यप्रदीपाभिधानकाव्यप्रकाशपरिष्टित्तिव्याख्यानस्य व्याख्यानम् ।

No. 4118. षडब्दप्रायश्चित्तादिपद्धतिः, वा क्रियापद्धतिः । Substance, country-made paper, $8\frac{3}{4} \times 3$ inches. Folia, 26. Lines, 5 on a page. Extent, 251 ślokas. Character, Nágara. Date, Sm. 1818. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Shaḍabda-práyaśchittádi-paddhati alias **Kriyá-paddhati.** Expiations for accidents, and omissions of different rites and ceremonies.

Beginning. श्रीगणेशाय नमः । आतुरकाले षड़ब्दप्रायश्चित्तविधिः । आचमनं । प्राणायामः । श्रीविष्णवे नमः । प्रथमं सभासद्ब्राह्मणानां पादप्रक्षालनं । अत्र प्रयोगः । प्रायश्चित्तपरार्थं सभ्यब्राह्मण एतत्ते पाद्यं एष वोऽर्घ्यः पूजापादप्रक्षालनं आचमनीयं ।

End. ततो वपनं । वपनदिवसप्रथमेऽथवा तृतीये पञ्चमे सप्तमे नवमे दशमे वा श्राद्धात् पूर्वं वपनं । तत एकादशाहे । संवत् १८१८ ।

Colophon. समाप्तिवाक्यं न विद्यते ।

विषयः । षड़ब्दप्रायश्चित्तप्रयोगः । वैतरणीगोदानप्रयोगः । ऋणधेनुदानप्रयोगः । मोक्षधेनुदानप्रयोगः । तिलाद्यष्टमहादानप्रयोगः । अन्नादिषोड़शोपदानप्रयोगः । अश्वदानप्रयोगः । महिषीदानप्रयोगः । वृषदानप्रयोगः । दण्डदानादिप्रयोगः । मृतस्य दशाहे दशपिण्डदानप्रयोगः ।

No. 4119. पदार्थप्रकाशः । Substance, country-made paper, 10×4 inches. Folia, 66. Lines, 10 on a page. Extent, 1,500 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India Appearance, old. Prose. Generally correct.

Padártha-prakáśa. An exposition of the Prátiśákhya of Kátyána of the Káṇva S'ákhá by Ananta Bhaṭṭa the son of Nágadeva by Bhágírathí.

Beginning. (प्रथमपत्रं नास्ति ।)

प्रतिशाख्यं श्रौतस्मार्त्तप्रातिशाख्यादिसूत्रस्याभावात् । क्वापि देशेऽनुपलम्भात् । सर्वदेशीयानामेकेनैव सूत्रेण कर्मानुष्ठानदर्शनाच्च । न केवलमेतदेव सूत्रैकलगमकलं । इत्यादि ।

End. इत्याह स्वरसंस्कारयोः प्रतिष्ठापयिता भगवान् कात्यायनः ।
उत्पत्तिञ्च विनाशञ्च भूतानामागतिं गतिं ।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥
इति भगवच्छब्दार्थः । शेषं सुगमं ।
इदं हृद्गिरित्युक्तार्थं ।
वेदवेदाङ्गविदुषानन्तभट्टेन सादरं ।
परेषामुपकाराय भाषितं प्रातिशाख्यकं ॥
अम्बा भागीरथी यस्य नागदेवात्मजः सुधीः ।
तेनानन्तेन रचितं प्रातिशाख्यस्य वर्णनं ॥
असाधु साधु वा पद्यं ग्रन्थेऽस्मिन् यन्मयोदितं ।
तत्सर्वं चम्यतां सन्तः श्रीमन्तः काण्वशाखिनः ॥
न पाण्डित्याभिमानेन न च वित्तस्य लिप्सया ।
ग्रन्थोऽयं रचितः किन्तु रमानाथस्य तुष्टये ॥

Colophon. इति श्रीमदनन्तभट्टविरचिते श्रीमत्कात्यायनप्रणीतप्रातिशाख्यभाष्ये पदार्थप्रकाशेऽष्टमोऽध्यायः समाप्तः ।

विषयः । कात्यायनकृतकाण्वशाखीयप्रातिशाख्यस्य व्याख्यानम् ।

No. 4120. मूल्याध्यायः, वा मूल्यसङ्ग्रहः । Substance, country-made paper, 10 × 4 inches. Folia, 7. Lines, 8 on a page. Extent, 114 ślokas. Character, Nágara. Date, Sk. 1756. Place of deposit, Calcutta, Government of India Appearance, fresh. Prose and verse. Generally correct.

Múlyádhyáya ALIAS **Múlya-saṅgraha**. A summary of the fines ordained in the Smṛitis for various ceremonial rites by Bápú Bhaṭṭa.

Beginning. श्रीगणेशाय नमः ।

अथ मूल्याध्यायप्रारम्भः । अथ दक्षिणा उच्यते । उक्तदक्षिणादानाशक्तौ उक्तद्रव्याभावे वा विभ-

वानुसारेण तन्मूल्यं देयं । तदाह कात्यायनः । द्वाविंशत्पणिका गावश्चतुःकार्षापणो वरः । वृषे षट् कार्षापणका श्चष्टावनडुहि स्मृताः । दश कार्षापणा धेनावश्वे पञ्चदशैव तु । हिरण्ये कार्षापणकः पणा नव तथाधिकाः । इत्यादि ।

End. देयमिति बौधायनीये । कन्दमूलफलादीन्यपीति ग्रन्थान्तरे ।
इति गोपालभाष्यादीन्यालोक्य विदुषां मुदे ।
वापूभट्टेन संक्षेपात् कृतोऽयं मूल्यसङ्ग्रहः ॥

Colophon. इति मूल्याध्यायः समाप्तः । शाके १७५९ ।

विषयः । दक्षिणादाने तत्तद्द्रव्यासम्पत्तौ यथोक्तमूल्यदानं कर्त्तव्यमिति मूल्यस्वरूपनिरूपणादिकम् । तत्र गोमूल्यादिनिरूपणं । पणकार्षापणादिनिरूपणम् । वृषभादिमूल्यनिरूपणम् । अश्वमूल्यनिरूपणम् । हिरण्यमूल्यनिरूपणं । वस्त्रमूल्यकथनम् । छागमूल्यकथनम् । अविमूल्यकथनम् । वृषलीमूल्यकथनम् । निष्कमूल्यकथनम् । गजमूल्यकथनम् । रथमूल्यकथनम् । गृहमूल्यकथनम् ।

No. 4121. महादेवपरिचर्य्याप्रयोगः । Substance, country-made paper, 8 × 4 inches. Folia, 9. Lines, 9 on a page. Extent, 177 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Mahádeva-paricharyyá-prayoga. Rules for the service of Mahádeva. By Sureśvara.

Beginning. श्रीगणेशाय नमः ।

अथ बोधायनसूत्रानुसारी संक्षेपतो महादेवपरिचर्य्याप्रयोगः । विस्तरस्तु व्याख्यायां द्रष्टव्यः । तत्रादौ प्रातः स्नात्वा होमान्तं नित्यं विधाय तत्पश्चाच्छुचौ देशे गोमयेनोपलिप्य ततः पूजासिद्ध्यर्थम्—इत्यादि ।

End. तेन प्रत्यवायपरीहारः फलावाप्तिश्च जायते इति ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीशान्ताश्रमरघुरामतीर्थभगवत्पादपूज्यशिष्यसुरेश्वरस्वामिविरचितोऽयं श्रीमहादेवपरिचर्य्याप्रयोगः समाप्तः ।

विषयः । बोधायनमतानुसारेण महादेवपूजापद्धतिकथनम् ।

No. 4122. लघुविवरणम् । Substance, country-made paper, 10 × 4 inches. Folia, 19. Lines, 9 on a page. Extent, 417 ślokas. Character, Nágara, Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Laghu-vivaraṇa. A commentary of the Kálamádhavíya.

Beginning. श्रीगणेशाय नमः ।

सुरासुरैरर्चितपादपीठो दूर्वाङ्कुरैर्यः स्तुतिभिर्मुनीन्द्रैः ।
स्तुतो महाविघ्नविनाशनाय गणाधिपं तं प्रणतोऽस्मि नित्यम् ॥
व्याख्याय माधवाचार्य्यो धर्मान् पाराशरानथ ।
तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः ॥
व्यामूढानामिह तनुभृतां जाह्नवीतीर्थमेकम्
विद्यातीर्थं प्रकृतिविमलं सद्विवेकोदयानाम् ।
सर्वेषां तत् प्रथमसुखदं भारतीतीर्थमाऊ-
स्त्ह्लावान्मे विमलमनसो निर्णये शक्तिरस्ति ॥
सर्थो व्युत्क्रम्यते श्लोकैरखिलो निर्विनीषितः ।
तावतैवानुतिष्ठासुर्निः + + + प्रवर्त्तताम् ॥
— — — — — — ।

प्रथमे वादे साङ्ख्यमतमाश्रित्य कालशब्दवाच्यः कश्चित्पदार्थो नास्तीति पूर्वपक्षीकृत्य वैशेषिकमतमाश्रित्य तत्सद्भावः साधितः । द्वितीये तस्य कालस्य ज्योतिःशास्त्रादिसिद्धत्वादनिर्णेयत्वमाशङ्क्य कर्माङ्गत्वाकारेण इत्यादि ।

End. आरनालं तथा क्षीरं कन्दुकं दधि सक्तवः ।
रसेन पक्वं तैलञ्च न कदाचित् प्रदुष्यति ॥
यथोदयादितो यश्च दिनानां नवकं ध्रुवम् ।
माङ्गल्येषु समस्तेषु ग्रहणे चन्द्रसूर्य्ययोः ॥

Colophon. इति कालमाधवीयकारिकालघुविवरणं समाप्तम् ।

विषयः । माधवाचार्य्यकृतकालमाधवनामसन्दर्भस्य मतमवलम्ब्य विरचितानां तत्कारिकाणां व्याख्यानम् ।

Colophon. इत्यष्टमस्य सप्तमे द्वादशो वर्गः । इति देवीसूक्तभाष्यं । शाके । १७२८ ।

विषयः । देवीसूक्तस्य व्याख्यानम् ।

No. 4164. दशाङ्गललिताव्रतम्, वा दशरथललिताव्रतम् । Substance, country-made paper, 10 × 4½ inches. Folia, 3. Lines, 14—15 on a page. Extent, 51 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Daśáṅga-lalitá-vrata or **Daśaratha-lalitá-vrata.** The process of performing the religious ceremony named *Dasháṅga-lalitá-vrata* as given in the Uttara Khaṇḍa of the Bhavishyapuráṇá.

Beginning. श्रीगणेशाय नमः ।

अथ दशरथललिताव्रतं लिख्यते । तत्र देशकालौ स्मृत्वा मम पत्न्या आचरितस्य दशरथललिताव्रतस्य साङ्गतासिद्ध्यर्थं मम इह जन्मनि जन्मान्तरे वा सौभाग्यावाप्त्यर्थं पुत्रपौत्राद्यभिवृद्ध्यर्थञ्च श्रीललितादेवीप्रीत्यर्थं उद्यापनाख्यं कर्म्म करिष्ये । अथवा प्रतिवार्षिकपूजनमहं करिष्ये तदङ्गत्वेन ॥ इत्यादि ॥

End. तस्माद्दशरथा नाम ललिता भुवि कीर्त्तिता ।
एतत्ते कथितं राजन् दशाङ्गललिताव्रतम् ॥
य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
अश्वमेधसहस्रस्य फलं तस्य भवेद्ध्रुवम् ॥

Colophon. इति श्रीभविष्योत्तरे कृष्णयुधिष्ठिरसंवादे दशाङ्गललिताव्रतं सम्पूर्णम् ।

विषयः । दशाङ्गललिताव्रतस्य प्रयोगादिकथनम् ।

No. 4165. जीर्णोद्धारविधिः । Substance, country-made paper, 12 × 6 inches. Folia, 3. Lines, 15 on a page. Extent, 125 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose and verse. Incorrect.

Jírṇoddhára-vidhi. The process of repairing palaces, images of gods and goddesses as given in the work of Trivikrama.

Beginning. श्रीगणेशाय नमः ।

अथ प्रासादप्रतिमयोर्वा जीर्णोद्धारः त्रिविक्रमोक्तो वक्ष्यमाणचालनविधिः कर्त्तव्यः । अथवा गर्भागारजीर्णोद्धारमध्ये क्रियते । तत्र सङ्कोचत्वात् पूर्व्वस्थापितदेवता—इत्यादि ।

End. असुरैर्मुनिभिर्देवैस्तत्त्वविद्भिः प्रतिष्ठितम् ।
जीर्णं वाप्यथवा भग्नं विधिनापि न चालयेत् ॥

Colophon. इति त्रिविक्रमः । इति जीर्णोद्धारविधिः समाप्तः ।

विषयः । त्रिविक्रमोक्तप्रकारेण देवताप्रासादध्वजवाहनादीनां जीर्णोद्धारविधाननिरूपणम् । तत्र प्रयोगकीर्त्तनञ्च ।

No. 4166. कपर्द्दिकारिका । Substance, country-made paper, 10 × 4 inches. Folia, 4. Lines, 11 on a page. Extent, 132 ślokas. Character, Nágara. Date, Sm. 1824. Place of deposit, Yoḍásnáko, Calcutta, Bábu Pratápachandra Ghosha. Appearance, old. Verse, few prose. Generally correct.

Kapardi-káriká. The process of performing *pitṛimedha* or śráddha ceremony as given in the Kapardíbháshya of the sútras of Ápastamba.

Beginning. श्रीगणेशाय नमः ।

आपस्तम्बमुनिं नत्वा प्रयोगः पैतृमेधिकः ।
न्यायं कपर्द्दिभाष्योक्तमनुसृत्याभिधीयते ॥

इदानीं प्रयोगं वक्तुमुपक्रमते ।

आहिताग्नेरिहाध्वर्युः प्राप्ते मरणसंशये ॥
अग्न्यगारे विहृत्याग्नींस्तूष्णीं नित्यांस्तु धारयेत् ।

ततः किं कुर्य्यादित्यत आह । इत्यादि ।

End. यम इत्यादिशेषेण स्तुवन्त्यभिमुखा यमम् ।
मनसाभीप्सितानर्थान् कुर्व्वन्तः प्राप्नुवन्ति तान् ॥

Colophon. इति कपर्द्दिकारिका । संवत् । १८२४ ।

विषयः । आपस्तम्बीयकपर्द्दिभाष्यानुसारिण्या कारिकया पैतृमेधिकप्रयोगादिकीर्त्तनम् ।

No. 4167. प्रयोगरत्नमाला, वा सोमसङ्ग्रहः। Substance, country-made paper, 9 × 4 inches. Folia, 129. Lines, 10—11 on a page. Extent, 3,360 ślokas. Character, Nágara. Date, Sm. 1846. Place of deposit, Yoḍásnáko, Calcutta, Bábu Pratápachandra Ghosha. Appearance, new. Prose, few verse. Correct.

Prayoga-ratna-málá. The processes of performing various ceremonies such as Agnishtoma, Soma sacrifice, &c.

Beginning. श्रीगणेशाय नमः।

उमासुतं विघ्नराजं विघ्नानान्तु निवारकम्।
नमाम्यहं ग्रन्थपूर्त्त्यै सततं भक्तिसंयुतः॥

स्वर्गकामो ज्योतिष्टोमेन यजेतैककामः सर्व्वकामो वा युगपत्कामयेताश्वारश्यत्नो वा वसन्ते ज्योतिष्टोमेन यजेताग्निष्टोमः प्रथमयज्ञोऽतिरात्र एके समामनन्ति। वसन्ते ज्योतिष्टोमेन यजेत। तस्य तिथ इत्यादि।

End. तत्राह। सुत्याया यावदग्निहोत्रमभ्य × यात्वारमग्निहोत्रप्रभृतीन्यग्निहोत्रापतिपन्नानि जुहुयान्न यथाप्रकृति जुहुयादिति॥

Colophon. समाप्तोऽग्निष्टोमप्रयोगः। (अत्र ग्रन्थपरिसमाप्तिसूचकवाक्यं नास्तीति ज्ञेयम्।)

विषयः। यज्ञेषु अग्निष्टोमस्य प्राथम्यकथनमुखेन तदारम्भकालनिरूपणं। सोमपानाधिकारादिनिरूपणं। अत्राधानदीक्षाकालादिकथनं। अथ सैतिकर्त्तव्यताकाग्निष्टोमपद्धतिकथनञ्च।

No. 4168. उत्पन्नैकादशीमाहात्म्यम्। Substance, country-made paper, 10 × 5 inches. Folia, 7. Lines on a page? Extent, 120 ślokas. Character, Nágara Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Utpannaikádasí-máhátmya. Ekádas'í issued out of the body of Vishṇu sleeping in the cave of Sinhavatí without taking food, as he despaired of successfully resisting Mura, a demon, the son of Tálaketu. Ekádaśí killed Mura. The fast on the eleventh day of the moon confers special merit.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥

अर्ज्जुन उवाच।

उपवासस्य नक्तस्य चैकभक्तस्य मे प्रभो।
किं पुण्यं किं फलञ्चैव ब्रूहि सर्व्वं जनार्द्दन॥

श्रीकृष्ण उवाच ।

हेमन्ते चैव संप्राप्ते मासि मार्गे च शोभने ।

कृष्णपक्षे च या पार्थ द्वादशी तामुपोषयेत् ॥ इत्यादि ।

End. ब्रह्महत्यादिपापानि नश्यन्ति मनुजाधिप ।

एकादशीं विना राजन् नास्ति पापप्रमोचनम् ॥

Colophon. इति श्रीमत्स्यपुराणे उत्पन्नैकादशीमाहात्म्यं समाप्तम् ॥

विषयः । एकादशी-माहात्म्य-कथनमुखेन नक्तैकभक्तोपवासादिषु फलभेदकीर्त्तनम् । नक्तादि कालनिरूपणम् । तालकेतुतनयस्य मुरदानवस्य शौर्य्यवीर्य्यादि-वर्णनपूर्व्वकं तेन सह युध्यमानस्य विष्णोः तत्पराक्रमासहिष्णुतया सिंहवत्याख्यगुहायां कृतापयानस्य सुप्तस्य च शरीरात् समुद्भूतया एकादश्या मुरनाशन-वृत्तान्तकीर्त्तनम् । एकादश्यै वरदानादिवृत्तान्तकीर्त्तनञ्च ।

No. 4169. सोमयाजमानम् । Substance, country-made paper, 11 × $4\frac{1}{2}$ inches. Folia, 18. Lines, 12 on a page. Extent, 662 ślokas. Character, Nágara. Date, ? Place of deposit, Yoḍásánko, Calcutta, Bábu Pratápachandra Ghosha. Appearance, old. Prose. Generally correct.

Soma-yája-mánam. A treatise on the Soma sacrifice.

Beginning. श्रीगणेशाय नमः ।

अथ सोमयाजमानम् । दर्भेष्वासीनो दर्भा + रयमाणः पवित्रासह प्राणानायम्य ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरसाम्ना द्वादशशतदक्षिणेन सोमेनाहं यक्ष्ये । विद्युदसीत्यप उपस्पृश्य अस्मिन् ज्योतिष्टोमे सोमे प्रवाचं त्वामहं वृणे इति । इत्यादि ।

End. पूर्णाहुतिं जुहोति सैषेष्टिः सन्तिष्ठते । सायमग्निहोत्रं जुहोति प्रातर्होमः सन्तिष्ठते ऽग्निष्टोमः ॥

Colophon. इति सोमयाजमानं समाप्तम् ।

विषयः । सोमयजमानप्रयोगकीर्त्तनम् ।

No. 4170. त्रिकाण्डमण्डनम्, वा आपस्तम्बसूत्रध्वनितार्थप्रकाशिका । Substance, country-made paper, $10\frac{1}{2}$ × $4\frac{3}{4}$ inches. Folia, 83. Lines, 32 on a page. Extent, 385 ślokas. Character, Nágara. Date, ? Place of deposit, Yoḍásánko, Calcutta, Bábu Pratápachandra Ghosha. Appearance, old. Verse. Generally correct.

Trikáṇḍa-maṇḍana, OR **A'pastamva-sútra dhvanitártha-prakáśiká**. The purport of Apastamba's sútras given in the form of kárikás or verses, by Trikáṇḍa Maṇḍana Bháskara Miśra, Son of S'ríkumára Svámí, a great controversialist.

Beginning. श्रीगणेशाय नमः ।

श्रियं वागीश्वरीं देवीं संप्रणम्य विनायकम् ।
गुरुञ्च सोमयागस्य प्रयोगः प्रवितन्यते ॥
तत्राकारकालादि प्रथमं प्रतिपाद्यते ।
सूत्रान्तरमतं वच्ये सोमयागं क्वचित् क्वचित् ॥
प्रसङ्गादग्नि-होत्रेष्टि-पश्वाधानोपयोगि यत् ।
तत्रापि लेशतः किञ्चित् प्रवच्ये तत्र तत्र च ॥ इत्यादि ।

End. अनेकाचार्य्यसिद्धान्ताः सौकर्य्याय निरूपिताः ।
देशकाल-वयोऽवस्था-शक्तिभेदात्त्ववस्थिताः ॥
पुनराधिप्रसङ्गेन किञ्चिदत्र निरूपितम् ।
प्रायश्चित्तान्तरं वच्ये स्वस्थाने बहु विस्तरम् ॥

Colophon. इति श्रीवादि-मुद्गरकुठार-श्रीकुमारस्वामि-सुतत्रिकाण्डमण्डन-भास्करमिश्र-सोमयाजि-कृतापस्तम्बसूत्र-ध्वनितार्थकारिकासु पुनराधाननिमित्तनिर्णयं नाम तृतीयं काण्डम् ॥

(अतः परं केचन श्लोकाः प्रकीर्णकतया उपलभ्यन्ते ।)

विषयः । प्रथमकाण्डे सोमयागीयोपोद्घातकथनमुखेन तदधिकारनिरूपणम् । तत्र नित्यकाम्य-नैमित्तिकभेदेन अधिकारस्य चातुर्व्विध्यनिरूपणम् । कालादिनिरूपणम् । तत्र पुनः श्रौतार्थवाद-कल्पत्वेन विधेति कथनञ्च । द्वितीये काण्डे मुख्याभावे प्रतिनिधिविवेचनम् । तृतीये काण्डे मुख्याभावे प्रतिनिधिनाप्यननुष्ठितासु क्रियासु उपघातक्रिया-लोपापेचा-प्रमादरूप-पुनराधान-कारणविवेचनम् ।

No. 4171. पदप्रकाशिका, वा त्रिकाण्डमण्डनविवरणम् । Substance, country-made paper, $10\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 83. Lines, 10—12 on a page. Extent, 1,246 ślokas. Character, Nágara. Date, ? Place of deposit, Yoḍásánko, Calcutta, Bábu Pratápachandra Ghosha. Appearance, old. Prose and verse. Generally correct.

Padaprakáśiká OR **Trikáṇḍa Maṇḍana Vivaraṇa.** A commentary on the above.

Beginning. भुजगा भुजगा यस्य वामगा वामलोचना ।
सर्व्वदः सर्व्वदा दिश्यात् सशिवः स शिवः शिवम् ॥

उच्चैर्गतिर्जगति सिध्यति धर्म्मतश्चेत्
तत्र प्रमा च वचनैः कृतकेतरैश्चेत् ।
तेषां प्रकाशनदशा च गुरोः सकाशात्
तस्मात् तमेनमहमादरतो नमामि ॥
व्याख्यानपेक्षः सुधियां निबन्धो
व्याख्यात्यपेक्षोऽल्पधियां निबन्धः ।
दुरूहशब्दार्थविधानयुक्ता
सा चेद् वृथा तद्ग्रथनप्रयासः ॥
त्रिकाण्डमण्डनव्याख्यामतः पदप्रकाशिकाम् ।
स्फुटां स्फुटप्रबोधाय कुर्वे संक्षिप्य युक्तिभिः ॥

चिकीर्षितस्य ग्रन्थस्य प्रत्यूहापोहद्वारा — — — निबद्धंस्वाभिधेयं प्रतिजानीते श्रिय-मित्यादिना । नन्वन्वयव्यतिरेकाभ्यां व्यभिचारान्मङ्गलस्य समाप्तिं प्रति विघ्नध्वंसं प्रति ॥ इत्यादि ।

End. कालादीनां पृथगुपदेशवैयर्थ्यात् । अवश्यानुष्ठानप्रसङ्गाच्च । + + + + पुनराधानकर्म्मणीत्यादिवैयर्थ्याच्चेति संक्षेपः ।

Colophon. इति त्रिकाण्डमण्डनविवरणे ।

विषयः । भास्करमिश्रसोमयाजिकृतत्रिकाण्डमण्डनस्य व्याख्यानम् । (ग्रन्थेऽस्मिन् द्वितीयकाण्ड-विवरणं खण्डितमित्यवधेयम् ।

No. 4172. अदुःखनवमीव्रतम्, तत्प्रयोगश्च । Substance, country-made paper, 9 × 4 inches. Folia, 5. Lines, 10 on a page. Extent, 90 ślokas. Character, Nágara. Date, Sm. 1866. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

Aduhkha Navamívratam. A ceremony performed on the ninth day of the waxing moon with the object of destroying sorrow.

Beginning. श्रीगणेशाय नमः ।
अथ वटसावित्रीव्रतम् । इदं त्रयोदशीमारभ्य कर्त्तव्यम् ।
ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे ।
व्रतं त्रिरात्रमुद्दिश्य त्वहोरात्रं स्थिरा भवेत् ॥
वटसेचनं प्रत्यहं कर्त्तव्यम् । वटं संपूज्य त्रिदिनमपःकुम्भेन सेचयेत् । इत्यादि ।

End. सर्व्वदुःखहरं लोके सर्व्वपापविशोधनम् ।
भर्त्तुर्दारिद्र्यशमनं किमन्यच्छ्रोतुमर्हथ ॥

Colophon. इति श्रीस्कन्दपुराणे व्यासऋषिसंवादे अदुःखनवमीव्रतम्। संवत् १८९६ ।
विषयः । अदुःखनवमीव्रतविधिकथनम् । तत्प्रयोगकथनञ्च ।

No. 4173. अदुःखनवमीव्रतम् । Substance, country-made paper, 11 × 4 inches. Folia, 4. Lines, 13 on a page. Extent, 100 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Aduhkha Navamívratam. The same as above.

Beginning. श्रीगणेशाय नमः ।

अथ अदुःखनवमीव्रतम्। नवमी शुक्लपक्षेमावापि परैव ग्राह्या। देशकालौ स्मृत्वा मम इह जन्मनि जन्मान्तरे च भर्त्रा सह सकलपातकादिदुःखनाशार्थं कल्पोक्तफलावाप्त्यर्थं श्रीपार्वतीशङ्करप्रीत्यर्थं गौरीपूजाञ्च करिष्ये ॥ इत्यादि ।

End. नान्यच्छुभतरं चास्मादिह लोके परत्र च ।
इतः श्रेष्ठतरं लोके किमन्यच्छ्रोतुमिच्छसि ॥

Colophon. इति श्रीपद्मपुराणे व्यासऋषिसंवादे अदुःखनवमीव्रतकथानकं समाप्तम् ।
विषयः । पद्मपुराणोक्तविधानेन अदुःखनवमीव्रतनिरूपणम् । तत्प्रयोगकथनञ्च ।

No. 4174. सङ्ग्रहणदीपिका । Substance, country-made paper, 10 × $4\frac{1}{2}$ inches. Folia, 11 on a page. Extent, 1,179 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Samgrahaṇa-dípiká A commentary on the S'rauta Sútra of A'svaláyana. Chapter II by Tippú Bhatta the Son of Rámbhatta.

Beginning. श्रीगणेशाय नमः ।

प्रथमेऽध्याये दर्शपूर्णमासौ व्याख्यातौ विध्यन्तस्य विहितौ । अथेदानीं द्वितीयाध्याये पवनेष्ट्यादिचातुर्मास्यान्ता या इष्टयः ता उच्यन्ते ॥ पौर्णमासेष्टिपद्मसोमा उपदिष्टास्तैरमावास्यायां पौर्णमास्येन यजेत । इत्यादि ।

End. आसां याज्यानुवाक्यास्तु प्रकृत्याग्रयणोदिताः ।
अवस्थानादिकं संस्थाजपान्तं पौर्णमासवत् ॥

Colophon. इत्याश्वलायनश्रौतसूत्रे श्रीमद्याकरोपनामक-रामभट्टात्मज-तिप्पूभट्टेन विरचितायां सङ्ग्रहणदीपिकायां द्वितीयोऽध्यायः समाप्तः । श्रीरस्तु ।

विषयः। आश्वलायनश्रौतसूत्रस्य व्याख्यानम्। (अत्र द्वितीयाध्यायमात्रं वर्त्तते।)

No. 4175. पशुमैत्रावरुणः। Substance, country-made paper, 9×3 inches. Folia, 8. Lines, 7 on a page. Extent, 108 ślokas. Character, Nágara. Date, Sk. 1,715. Calcutta, Government of India. Appearance, old. Prose Incorrect.

Pasumaítrávaruṇa. The Sacrifice entitled Paśumaitrávaruṇa.

Beginning. श्रीगणेशाय नमः।

मित्रावरुणयोस्त्वा वाङ्भ्यां प्रशास्त्रोप्रशिखाप्रतिगृह्णाम्यवक्रो विथुरो भूयासम्। इति प्रतिगृह्य दण्डं। उत्तरेण होतारमतिव्रजेद्दक्षिणेन दण्डं हरेत्। न चानेन संस्पृशेत् इत्यादि।

End. पितृणां समिदसि स्वत्योर्मायाहि स्वाहा।
सोमस्य समिदसि दुरिष्टेर्मायाहि स्वाहा।
ॐ च मे स्वरश्च मे० नमः॥

Colophon. इति पशुमैत्रावरुणः समाप्तः। शाके १७१५॥

विषयः। पशुमैत्रावरुणेष्टिविधिकथनम्।

No. 4176. पशुहौत्रम्। Substance, country-made paper, 9×3 inches. Folia, 7. Lines, 7 on a page. Extent, 97 ślokas, Character, Nágara. Date, Sk. 1,715. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Paśuhautra. On animal sacrifices.

Beginning. श्रीगणेशाय नमः।

पशाविष्टिरुभयतोऽन्यतरतो वाग्नेय्यां वा+ग्नावैष्णवी वा आग्नेयस्य नित्ये याजानुयाज्यानुवाक्ये शेषं प्रकृतिवत्। इत्यादि।

End. स्विष्टकृतः। इळामग्ने पुरुद० स्तो१। ये२ स्वदष्टस्वव्यास नि० सि। विश्वा अग्ने इ० ना१ वौ२०॥ इति सन्तिष्ठते॥

Colophon. पशुहौत्रं समाप्तम्॥ शाके १७१५॥

विषयः। पश्विष्टिहौत्रविधिकथनम्।

No. 4177. पशुबन्धप्रयोगः। Substance, country-made paper, $10 \times 4\frac{1}{2}$ inches. Folia, 18. Lines, 11 on a page. Extent, 518 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Pasubandha-prayoga. The method of performing the ceremony of tying animals to the sacrificial staff.

Beginning. श्रीगणेशाय नमः। ॐम्।

अथ पशुबन्ध उच्यते। तस्य उदगयने पूर्व्वपक्षे देवनक्षत्रे रेवत्यां वा अमायां वा यजनीये वानुष्ठानं। तस्याद्ये प्रयोगे पूर्व्वेद्युर्नान्दीमुखं रात्रावुदकशान्तिं प्रतिसरबन्धञ्च कुर्य्यात्। श्वः स्नानादिपञ्चकं कुर्य्यात्।

End. पूर्णाहुतिं जुहोति। सप्त-ते अग्ने समिधः सप्तजिह्वाः सप्तर्षयः सप्तधा प्रियाणि। सप्तहोत्राः सप्तधा त्वा यजति सप्तयोनीरापृण स्वा घृतेन स्वाहा। अग्नये सप्तवत इदम्। यजमानः गां वरं दद्यात्। सन्तिष्ठते पशुबन्धः।

विषयः। पशुबन्धयागस्य प्रयोगकथनम्।

No. 4178. पुनराधेयप्रयोगः। Substance, country-made paper, 8×9 inches. Folia, 4. Lines, 11 on a page. Extent, 104 ślokas. Character, Nágara. Date, Sk. 1,660. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Punarádheya-prayoga. The method of rekindling the sacred fire.

Beginning. श्रीगणेशाय नमः।

अथ पुनराधेयप्रयोगः। आधानानन्तरं संवत्सरादर्व्वाक् यस्य पुत्रभ्रातृधनस्य वा हानिः स्वशरीरे महाव्याध्युत्पत्तिर्भवति स उद्वासनेष्टिपूर्व्वकं पुनराधेयं कुर्य्यात्।

End. पुनराधेये कृते संवत्सरात् पुरा पूर्व्वोक्तमनीते (?) पुनराधेयं कुर्य्यात्। तत्र पञ्चकपालेष्ट्यां स्विष्टकृतमवदाय तिस्रः स्रुवाहुतीर्जुहोति। केतः सकेतः सुकेतस्तेन आदित्या आज्यं जुषाणावियन्तु स्वाहा। आदित्येभ्य इदम्।

Colophon. इति बौधायनोक्तपुनराधेयप्रयोगः। कालोत्तरमाह सत्याषाढः मापस्तम्बश्च (?)। वर्षासु शरदि वाधत्ते रोहिणी पुनर्वसू अनुराधास्वेति। इति पुनराधेयनक्षत्राणि। शाके १६६० कालयुक्तनाम संवत्सरे वैशाखशु+समाप्तं पुस्तकम्।

विषयः। पुनराधेयप्रयोगकथनम्।

No. 4179. प्रश्नभैरवः। Substance, country-made paper, 9 × 3 inches. Folia, 14. Lines, 7 on a page. Extent, 244 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Praśnabhairava. A work on fortune-telling by means of questions. The astrologer calculates the good fortune or otherwise of men by noting the time, place of putting the question, and the surrounding circumstances.

Beginning. श्रीगणेशाय नमः।

अथ प्रश्नभैरवः।

शीतांशुलग्नेश्वरवित्तनाथाः

परस्परं संयुतवीच्चितास्च।

धनत्रिकोणोदयगा यदा स्यु-

स्तदार्थलाभं प्रवदेन्नराणाम्॥

लग्नलाभपती लग्ने लाभे लग्नपयोभपौ।

लग्ने लाभाधिपो वापि लाभो लग्नाधिपो भवेत्॥

इत्यादि।

End. अयमर्थोऽग्रिमस्लोकेनाह। रात्राविति। रात्रावित्युपलक्षणं बहुप्रश्ने ज्ञेय-मित्यर्थः। कुजादीनां क्रमेण विवक्षितस्य पूर्व्वोक्तमेव॥

Colophon. समाप्तोऽयं ग्रन्थः॥

विषयः। प्रश्नगणनप्रकारकथनम्। तत्र प्रथमतो लग्नादिनिरूपणविधिकथनम्। लाभ-प्रश्नकथनम्। ऋणलाभप्रश्नकथनम्। भविष्यत्कार्य्यप्रश्नकथनम्। अचरमात्राप्रश्नकथनम्। मूक-प्रश्नकथनम्। दृष्टिप्रश्नकथनम्। चिन्ताप्रश्नकथनम्। मुष्टिप्रश्नकथनम्। वस्तुनिर्णयविधिकथनम्। आगमानागमप्रश्नकथनम्। विस्मृतपतितप्रश्नकथनम्। जातिप्रश्नकथनम्। नौकाप्रश्नकथनम्। अधिकारप्रश्नकथनम्। आश्रयप्रश्नकथनम्। पदनिर्व्वाहप्रश्नकथनम्। परराज्यप्राप्तिप्रश्नकथनम्। बधविषयप्रश्नकथनम्। पत्रोत्तरप्रश्नकथनम्। बन्धमोक्षप्रश्नकथनम्। शीघ्रमुक्तिप्रश्नकथनम्। वादिप्रश्नकथनम्। युद्धप्रश्नकथनम्। द्यूतप्रश्नकथनम्। गुप्तधनप्रश्नकथनम्। दुर्गभङ्गप्रश्नकथनम्। वैद्यप्रश्नकथनम्। सौख्यप्रश्नकथनम्। तीर्थयात्राप्रश्नकथनम्। व्रतग्रहणप्रश्नकथनम्। विवाह-प्रश्नकथनम्। अन्नजलादिप्रश्नकथनम्। इति शम्।

No. 4180. नक्षत्रसत्रसूत्रव्याख्या। Substance, country-made paper, 9½ × 5 inches. Folia, 45. Lines, 11 on a page. Extent, 1,206 ślokas. Character, Nágara. Date, Sk. 1,753. Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose. Incorrect.

Nakshatra-satra-sútra-vyákhyá. A *bháshya* commentary on the *sútras* of Baudháyana relating to the sacrifices to the asterisms. The book was written in the year 813 of some unknown era by Devabhadra, son of Balabhadra, belonging to the race of Gangádhara Páthaka the son of Rámachandra, belonging to the tribe of Nágaras known for their love of sacrifices. The author refers to Garga and others who wrote on sacrifices and to Kapardí and others who came after them, to Gopálakáriká, Devánantaprayoga, to the prayogas by Keshava and Annata who followed Apastamba, and to the Kátíya Bháshya.

Beginning. श्रीगणेशाय नमः। श्रीगुरुभ्यो नमः।

श्रीविघ्नेशं मुनिं बौधायनं कात्यायनं गुरुम्।
अस्मदुद्दृढजनानान्तु गुरुञ्च हरिशङ्करम्॥
यागकालविवेक्तारं गङ्गाधरन्तु पाठकम्।
पितरं बलभद्रञ्च भागीरथीन्तु मातरम्॥
गर्गादियाज्ञिकान् स्वीयान् कपर्दादीन् परानपि।
प्रणम्य मनसा वाचा कर्म्मणापि च भक्तितः॥
तैत्तिरीयश्रुतिं मूलं प्रायश्चित्तप्रदीपकम्।
देवानन्तप्रयोगञ्च तथा गोपालकारिकाम्॥
प्रयोगौ केशवानन्तावापस्तम्बानुसारिणौ।
ग्रन्थानेतान् सुसङ्गृह्य निजबुद्ध्या विमृश्य च॥
बौधायनोक्तनक्षत्रसत्रसंज्ञाध्वरस्य तु।
सूत्रभाष्यमहं कुर्व्वे कातीयानुगतन्त्विदम्॥

सूत्रम्। अथातो नक्षत्रेष्टिर्व्याख्यास्यामः। अत्रायमथशब्द आनन्तर्य्ये। तत्र अगारपविश्रेष्टिभ्याम्। इत्यादि।

End. यस्य श्रमः समुत्पन्नो भाष्यस्यास्य विलेखने।
यज्ञभोक्ता विभुस्तेन प्रीयतां परमेश्वरः॥
नेत्रेन्दुवसुमे वर्षेऽसिते नभसि भास्करे।
पितृभे च द्वितीयायां सूत्रभाष्यमिदं कृतम्॥

नक्षत्रसूत्रभाष्येऽस्मिन् देवभद्रकृते वरे ।
पङ्क्तिशतौ सपञ्चाशद्ग्रन्थसङ्ख्येयमीरिता ॥

Colophon. इति श्रीमत्सत्त-याज्ञिक-नागरजातीय-पाठक-श्रीरामचन्द्रसूनु गङ्गाधर पाठक वंश-सम्भूत-पाठक-श्रीबलभद्रात्मज-देवभद्रकृतौ बोधायनमुनि प्रणीत-प्रायश्चित्त-सूत्रान्तर्गत-नक्षत्र-सत्र-सूत्र-भाष्ये द्वितीयखण्डम् ॥

समाप्तञ्च नक्षत्रसत्रसूत्रभाष्यम् ।
बोधायनोक्त-नक्षत्र-सत्र-संज्ञाध्वरस्य तु ।
सूत्रभाष्यं कृतं + + श्रुतिसूत्रादिसम्मतम् ॥
शाके १७५३ ॥

विषयः । बौधायनीय-नक्षत्र-सत्र-सूत्राणां व्याख्यानम् ।

No. 4181. नक्षत्रसत्रप्रयोगः । Substance, country-made paper, 8 x 4 inches. Folia, 39. Lines, 11 on a page. Extent, 795 ślokas. Character, Nágara. Date, Sk. 1,674. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Nakshatra-satra-prayoga. The process of performing sacrifices in honour of, and for the propitiation of the various asterisms. The asterisms given in this work belong to the Krittiká series. There are other sacrifices also, namely, those for the new moon, the moon, the day and night, the dawn, the sun, the Áditya, the Vaishnaví and the Fire. The author follows Baudháyana, who mentions these sacrifices in the chapter on expiation in his work.

Beginning. श्रीगणेशाय नमः ।

अथ नक्षत्रेष्टयः । ताश्च पुरोडाशभेदनादिनिमित्ते आयुष्मत्यः कर्त्तव्या इति नैमित्तिकविधिविषयत्वलाभाय प्रायश्चित्तप्रकरणे बौधायनेनोक्ता अपि काम्या भवन्ति । अन्ते तेनैव नक्षत्रसत्रेण इत्यादि ।

End. पुनरालम्भवर्ज्जं ब्राह्मणतर्पणान्तं प्रकृतिवत् । ततोऽनेन नक्षत्रसत्रेण यज्ञपुरुषः प्रीयतामिति वैश्वानरेष्टिः ।

Colophon. इति नक्षत्रसत्रप्रयोगः समाप्तः । शाके १६७४ ॥

विषयः । तत्र उपोद्घातप्रकरणे बहुविधपापक्षयकामेन नक्षत्रसत्रेण यष्टव्यमिति निरूपणपूर्व्वकं तत्तत्कालकथनं संकल्पादिविधिकीर्त्तनञ्च । अथ प्रयोगकथनम् । तत्र कृत्तिकेष्टिकथनम् । रोहिणीष्टिकथनम् । मृगशीर्षेष्टिकथनम् । आर्द्रेष्टिकथनम् । पुनर्वस्विष्टिकथनम् । तिष्येष्टि-

कथनम् । अश्लेषेष्टिकथनम् । मघेष्टिकथनम् । पूर्व्वफल्गुणीष्टिकथनम् । उत्तरफल्गुणीष्टिकथनम् । हस्तेष्टिकथनम् । स्वातीष्टिकथनम् । विशाखेष्टिकथनम् । अनुराधेष्टिकथनम् । पौर्णमासीष्टिकथनम् । ज्येष्ठेष्टिकथनम् । मूलेष्टिकथनम् । पूर्व्वाषाढ़ेष्टिकथनम् । उत्तराषाढ़ेष्टिकथनम् । अभिजिदिष्टिकथनम् । श्रवणेष्टिकथनम् । धनिष्ठेष्टिकथनम् । शततारेष्टिकथनम् । प्रौष्ठपदेष्टिकथनम् । उत्तरप्रौष्ठपदेष्टिकथनम् । रेवतीष्टिकथनम् । अश्विनीष्टिकथनम् । भरणीष्टिकथनम् । अमावास्येष्टिकथनम् । चान्द्रमसीष्टिकथनम् । अहोरात्रेष्टिकथनम् । औषसेष्टिकथनम् । सूर्य्यनक्षत्रेष्टिकथनम् । आदित्येष्टिकथनम् । वैष्णवीष्टिकथनम् । वैश्वानरेष्टिप्रयोगकथनञ्च । इति ।

No. 4182. **निशि-भार्गवव्रतोद्यापनम् ।** Substance, country-made yellow-paper, $11\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 2. Lines, 9 on a page. Extent, 50 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Niśi-bhárgava-vratodyápana. The process of closing the performance of the Bhárgava-brata to be performed on Fridays as given in the Padmapuráṇa in a dialogue between Nárada and Garuḍa.

Beginning. श्रीव्यङ्कटेशाय नमः । नारद उवाच ।

अथान्यदपि (मे) ब्रूहि येनाहं प्राप्नुयाम् पदम् ।
असवलां (अचलां) विष्णवे भक्तिं पुत्रसौभाग्यसम्पदः ॥
गरुड़ उवाच ।
भृगुवारे व्रतं पुण्यं कथ्यमानं निबोध मे ।
श्रावणे चैत्रे वैशाखे ज्यैष्ठे वा मार्गशीर्षके ।
प्रथमे भृगुवारे च गृह्णीयाद्व्रतमुत्तमम् ॥

End. प्रतिमन्त्रञ्च जुहुयाद्घृतमष्टोत्तरं शतम् ।
बलिदानं ततः कृत्वा कृत्वा पूर्णाहुतिं ततः ॥
ब्राह्मणान् भोजयेत् पश्चाद्यथावित्तानुसारतः ।
दश वा पञ्च वा सप्त तिस्रो वा एक (?) एव वा ॥
एकाप्यशक्तेन तथा कन्या भोज्या सुवासिनी ।
अलङ्कारादिकं सर्व्वं यथा-वित्तानुसारतः ।
यथाशक्त्या च तासां वै दद्यात् कञ्चुकवाससी ॥

Colophon. इति श्रीपद्मपुराणे नारदगरुड़संवादे निशि-भार्गवव्रतोद्यापनं समाप्तम् ।

विषयः । भार्गवव्रतविधिः तस्योद्यापनविधिश्च।

No. 4183. युवदीपिका वा, नीतिमञ्जरीभाष्यं मूलसहितम्। Substance, country-made paper, $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 9. Lines, 10 on a page. Extent, 224 ślokas. Character, Nágara. Date, Sm. 1871. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and Verse. Generally correct.

Nítimaṇjarí-bháshya *alias* **Yuvadípiká Múlasáhita.** By Dyádvivedí. He is the grandson of Mukunda Dvívedí of Ananda, a place largely inhabited by brahmans. He is the author both of the text and of the commentary. The work was completed on the first day of the waxing moon in the month of Mágha in Sk. 1,550. The author was a young man when he wrote this work and it is named Yuvadípiká. He could recite the vedas in 11 different ways. It treats of the respect to be shown to the preceptor, father and other persons. The commentary explains the text and the mantras of the Rigveda quoted therein.

Beginning. श्रीगणेशाय नमः।

दिवाकरं प्रणम्यादौ मुकुन्दञ्च द्विवेदिनम्।
वेदवेदान्ततत्त्वज्ञं स्मृतिज्ञं दीक्षितं प्रभुं॥
तस्य नप्ता युवा यज्वा युवधर्म्मोऽल्पबुद्धिमान्।
एकादशप्रकारैस्तु संहितापाठतत्परः॥
वसंश्च श्रीमदानन्दे सुरभूसुरमण्डिते।
तेनेयं रचिता यस्मात्तन्नाम युवदीपिका॥
विलोक्य संहितामध्य × इतिहासान् पुरातनान्।
कृता वै धर्म्मसंयुक्ता श्लोकैर्बह्वा सुबुद्धिदा॥

"एकादशप्रकारैस्तु संहिता पाठतत्परः। इति पूर्व्वमुक्तम्। ते के प्रकाराः कस्मिन् ग्रन्थे पठिताः ? उच्यते। चरणव्यूहे उक्ताः। तत्र ऋग्वेदस्याष्टौ प्रकारा भवन्ति।

End. ततो विद्वत्प्रार्थना।

विना वित्तं केशवमीश्वरं वा न विद्यते वेदकृतो बुधोऽन्यः।
अतः सुधीभिश्च विचिन्त्य शोध्यं वक्तुं क्षमो ऽस्मां च यतोऽल्पबुद्धिः॥

विन्दुपञ्चपञ्चाङ्कैक (विन्दुपञ्चपञ्चैकाङ्क) मिते संवति दुन्दुभौ। वत्सरे माघशुक्लादावकरोद्या (?)। तिथाविमां। अङ्कानां वामतो गतिरित्युक्तत्वात्। विन्दुपञ्चपञ्चाङ्केन (?) वामगणितेन संवत् पञ्चदशपञ्चाशे माघशुक्लादौ सं १५५५. (१५५०) दुन्दुभौ तिथौ प्रतिपदि यद्विवेद इमां नीतिमञ्जरीं सभाष्यामकरोत्।

Colophon. इति श्रीमद्व्यासद्विवेदकृते नीतिमञ्जर्य्याख्ये भाष्येऽष्टमाष्टकः समाप्तः (?) संवत् १८७१।

विषयः। ऋग्वेदीयचर्चाश्रावकचर्चकादीनां सोदाहरणलक्षणकथनम्।

No. 4184. निगमतत्त्वसारः। Substance, country-made yellow paper, $12\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 15. Lines, 5 no a page. Extent, 437 ślokas. Character, Bengali. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Nigama-tattvasára. Contains 4 *Patalas* more than in 407 noticed in Vol. I, p. 232. It treats of the essence of knowledge and of the primary principles of the process of using mantras, of hymns and amulets, of the method of reading Chaṇḍí, of the fixing of the mind in any one of the five vital airs, of the purification of the first principles, of the purification of Sambídá, the vital principle of association with the good. In the last Chapter the unknown writer says that, in the Kaliyuga, the best method of worship is by Bírabháva, *i. e.*, by the use of animal food, wine and women.

Beginning. ॐ नमः शिवाय।

कैलासशिखरे रम्ये नानारत्नविभूषिते।
आनन्दभैरवो देवः पप्रच्छानन्दभैरवीम्॥
श्रीआनन्दभैरव उवाच।
निगमागमशास्त्राणि मया त्वयि प्रकाशितम्।
तेषां मध्ये सारभूतं वद कान्ते कुलेश्वरि॥

End. एतद्गुप्तञ्च माहात्म्यं त्वन्मुखात् संश्रुतं मया।
अद्यप्रभृति देवेशि तव दासो भवाम्यहम्॥

Colophon. इति निगमतत्त्वसारे एकादशः पटलः।

विषयः। १मे, २ये च पटले, तत्त्वसारज्ञानसारकथनं। ३ये पटले, मन्त्रादिसाधनकथनं। ४र्थे, ५मे च पटले, स्तवकवचसाधनकथनं। ६ष्ठे पटले, चण्डीपाठक्रमकथनं। ७मे पटले, प्राणापानादिपञ्चवायूनामन्यतमेषु मनःसंयोगे मनसः क्रियाभेदकथनं। ८मे ९मे, च पटले, पञ्चतत्त्वशोधनं। १०मे पटले, संविदाशोधनं। ११शे पटले, सत्संसर्गकरणकथनं, कलौ दिव्यादिभावत्रयमध्ये वीरभावप्रशंसा, दीपनीकथनञ्च।

No. 4185. नागवलिप्रयोगः, वा, प्रतापनारसिंहः। Substance, country-made yellow paper, 18 × 3¼ inches. Folia, 12. Lines, 8 on a page. Extent, 174 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Nágavali-prayoga, *alias* **Pratápa-nárasiñha.** On the sacrifices to and purification of serpents. The work appears to be a part of a much larger work entitled Pratápa Nárasinha on Samskáras or purificatory ceremonies by Rudradeva the son of Náráyána Bhatta of Tero (?)

Beginning. श्रीः ॥ प्रतिक (प्रतीप) नागोपद्रवनिवृत्त्यै नागबलिः कार्य्यः। अत्र कालः गुरुशुक्रास्तदा (गुरुशुक्रास्त) रहिते पौर्णमास्यायां (पौर्णमास्यां) पञ्चम्यां अश्लेषायुक्तदिने वा कुर्य्यात्। तत्राधिकारार्थं चतुर्द्दशकृच्छ्रांश्चरेत्। तत्र प्रयोगः।

End. कृत्वा सर्पस्य संस्कारमनेन विधिना नरः।
विरोगो जायते क्षिप्रं सन्ततिं लभते शुभाम् ॥

Colophon. इति तैरोनारायणभट्टात्मजरुद्रदेवकृते प्रतापनारसिंहाख्ये संस्कारप्रकाशे नागवलिप्रयोगः। बौधायनोक्तः।

विषयः। सर्पसंस्कारप्रयोगः सर्पबलिप्रयोगश्च।

No. 4186. न्यायकन्दली। Substance, country-made paper, 11 × 8 inches. Folia, 201. Lines, 27 on a page. Extent, 6,750 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Correct.

Nyáya-Kandalí. A commentary, on the Padártha-dharma-samgraha, a *bháshya* commentary on the Vaiśeshika system of Hindu Philosophy, by S'rídhara Bhatta of Bhúrisríshti or Bhursut a place in the district of Howrah which was a place noted for the learning and piety of its brahmans from very ancient times. It was the chief place in Dhakshiṇa Ráṛha during the Hindu period. Krishṇa Miśra in his celebrated drama the Prabodha-chandrodaya makes a bráhmana of Bhúriśreshthika represent the character of Dambha or Brahmanic pride. In recent times too, Bhursut enjoyed celebrity by being the birth-place of Bhárat-chandra the great Bengali

poet of Rájá Krishna-chandra's court. Srídhara was the daughter's son of Baladeva the son of Jagadánanda. The book was written in the year 913 of some era which the author does not mention. But as Bikrama's era was current among pandits in those days the date may belong to that era. The book has been mentioned in Bühler's Report of a tour in search of Sanskrit MSS. in Cashmere and curiously enough it is a standard work of philosophical study in that remote country. S'rídhara wrote the commentary at the request of Páṇḍudás. The book was written long before the rise of the modern school of Nyáya Philosophy.

Beginning. ॐ नमः सरस्वत्यै । ॐ नमः शिवाय ॥
अनादिनिधनं देवं जगत्कारणमीश्वरम् ।
प्रपद्ये सत्यसङ्कल्पं नित्यविज्ञानविग्रहम् ॥
ध्यानैकतानमनसो विगतप्रचाराः
पश्यन्ति यं कमपि निर्मलमद्वितीयम् ।
ज्ञानात्मने विघटिताखिलबन्धनाय
तस्मै नमो भगवते पुरुषोत्तमाय ॥

ग्रन्थारम्भेऽभिमतां देवतां शास्त्रस्य प्रणेतारं गुरुं श्लोकस्य पूर्व्वार्द्धेन नमस्यति। प्रणम्य हेतुमिति। कर्म्मारम्भे हि देवता । गुरवश्च नमस्क्रियन्ते इति शिष्टाचारोऽयं। फलञ्च नमस्कारस्य विघ्नोपशमः । तावदयमफलः । इत्यादि ।

End. उपसंहरति तस्मादिति । समवायः सविज्ञेयः स्वातन्त्र्यप्रतिरोधकः ।

Colophon. इति भट्टश्रीश्रीधरकृतायां न्यायकन्दलीटीकायां समवायपदार्थः समाप्तः।
सुवर्णमयसंस्थाना रम्या सर्व्वोत्तरस्थितिः ।
सुमेरोः शृङ्गवीथीव टीकेयं न्यायकन्दली ॥
अक्षीणा निजपक्षेषु ख्यापयन्ती गुणोजसाम् ।
परप्रसिद्धसिद्धान्तान् दलति न्यायकन्दली ॥
आसीद्दक्षिणराढ़ायां द्विजानां भूरिकर्म्मणाम् ।
भूरिसृष्टिरितिग्रामो भूरिसृष्टिजनाश्रयः ॥
अम्भोराशेरिवैतस्माद्बभूव क्षितिचन्द्रमाः ।
जगदानन्दनाद्वन्द्यो बृहस्पतिरिव द्विजः ॥
तस्माद्विशुद्धगुणरत्नमहासमुद्रा-
द्विद्यालतासमवलम्बनभूरुहोऽभूत् ।

सच्छाशयो विविधकीर्त्ति-नदीप्रवाह-
प्रस्यन्दनोत्तमबलो बलदेवनामा ॥
तस्याभूद्भूरियशसो विशुद्धकुलसम्भवा ।
अधो + त्यर्चितगुणा गुणिनो गृहमेधिनी ॥
सच्छायः स्थूलफलदो बहुशाखो द्विजाश्रयः ।
तस्यां श्रीधर इत्युच्चैरर्थिकल्पद्रुमादभूत् ॥
असौ विद्याविदग्धानामसूत प्रहर्षोचिताम् ।
षट्पदार्थहितामेतां रुचिरां न्यायकन्दलीम् ॥
अधिके दशोत्तरे नव शतवर्षे श्रीन्यायकन्दली रुचिरा ।
रचिता श्रीपाण्डुदासयाचितभट्टश्रीश्रीधरेणेयम् ॥
समाप्तेयं पदार्थप्रवेशन्यायकन्दली टीका ।
कृतिस्तत्र भवतो भट्टश्रीश्रीधरस्येति ॥ शुभम् ॥

विषयः । प्रशस्तपादाचार्य्यकृतपदार्थधर्म्मसङ्ग्रहाभिधानवैशेषिकसूत्रभाष्यस्य व्याख्यानम् ।

No. 4187. भूम्यादिदानप्रयोगः। Substance, country-made yellow-paper, 9 × 4 inches. Folia, 11. Lines, 9 on a page. Extent, 185 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose, and Verse. Generally correct.

Bhúmyádi-dána-prayoga, *alias* **Pratiśraya-dána**. Treats of the process of making gifts of land, houses, temples and religious houses.

Beginning. श्रीगणेशाय नमः । अथ महीदानं । कौर्म्मे ।
गोचर्म्ममात्रं भूखण्डं अधिकं वा स्वशक्तितः ।
त्रिधा सदक्षिणां कृत्वा दत्वा शिवपुरं व्रजेत् ॥
त्रिधेकसुवर्णरूपा दक्षिणा त्रिधेत्यर्थः ।

End. भविष्यपुराणेऽपि । प्रतिश्रये सुविस्तीर्णे कारिते सजले धने ।
दीनानाथजनार्थाय वद किं न कृतं भवेत् । प्रतिश्रयो धर्म्मशाला ।

Colophon. इति प्रतिश्रयदानम् ।

विषयः महीदानप्रयोगः । गृहदानविधिः । वास्तुशान्तिप्रयोगः । गृहदानप्रयोगः । मठदानविधिः । प्रतिश्रयदानविधिः ।

No. 4188. प्रयागस्नानविधिः। वा प्रयागस्नानादिप्रयोगः। Substance, country-made paper, 9 × 4 inches. Folia, 8. Lines, 7 on a page. Extent, 112 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and Verse. Incorrect.

Prayága-snánavidhi, alias Prayága-snána-prayoga. The process of performing ablutions at Prayága. The writer follows Hemádri in his compilation.

Beginning. श्रीगणपतये नमः।

ॐ नमो देवदेवाय शितिकण्ठाय दण्डिने।
रुद्राय चापहस्ताय चक्रिणे वेधसे नमः॥
सरस्वती च सावित्री वेदमाता गरीयसी।
सन्निधात्री भवत्वत्र तीर्थे पापप्रणाशिनी॥
इत्युच्चार्य्य नमस्कृत्वा स्नानं कुर्य्याद्यथाविधि॥ इत्यादि।

End. ततो गायत्र्या अभ्युक्ष्य भूमौ मृदं निधायाचम्य देशकालादिकं स्मृत्वा स्नानमहं करिष्ये इति संकल्प्य मृदं कुशोदकेनाभ्युक्षेत्। ततो दिक्षु मृदं क्षिपेत्।

Colophon. इति प्रयागस्नानविधिः समाप्तः।

विषयः। हेमाद्र्युक्तविधिना प्रयागस्नानविधानप्रयोगकथनम्।

No. 4189. पुनराधेयसूत्रम्। Substance, country-made paper, 9 × 4 inches. Folia, 3. Lines, 9 on a page. Extent, 46 ślokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Punarádheya-sútra. The process of rekindling the sacred fire after its extinction from any accident.

Beginning. श्रीगणेशाय नमः।

अग्नीन् पुनराधास्यमानो भवति। तदाहुः। कृतयजुः सम्भृतसम्भारो भवति न सम्भृत्याः सम्भारानयजुः कार्य्यमित्यथो खलु सम्भृत्या एव सम्भाराः कार्य्यं यजुः पुनराधेयस्य समृध्या इति।

End. तृतीयमाधानमथापथापक्षताग्नेर्नष्टारणिकस्य च ब्राह्मौदनेनैव प्रतिपद्यते सिद्धमग्न्याधेयम्॥

Colophon. पुनराधेयसूत्रं समाप्तम्।

विषयः। पुनराधानविधायकसूत्रस्य व्याख्यानम्।

No. 4190. पार्षदसूत्रम् । (परिशिष्टम् ।) Substance, country-made paper, 14 × 5 inches. Folia, 15. Lines, 15 on a page. Extent, 653 ślokas. Character, Nágara. Date, Sm. 1693, Sk. 1559. Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose and Verse. Generally correct.

Párshada-sútra. (Pariśishṭa.) This is one of the oldest works on Vedic orthæpi. It is attributed to S'auṇaka. It treats of the letters of the alphabet, of their pronunciation, of grammatical technicalities, of the names given to letters from the peculiarities of their pronunciation, of the various methods of reciting the Vedas, of metre, &c.

Beginning. श्रीगणेशाय नमः ।

परावरे ब्रह्मणि यं सदाङ्ग-
वेदात्मानं वेदनिधिं मुनीन्द्राः ।
तं पद्मगर्भं परमं त्वादिदेवं
प्रणम्यचं लक्षणमाह शौनकः ॥
अकाराकारावि उ ए ओ ऐ औ
पदाद्यन्तयोर्नलृकारः स्वरेषु ।
आकारादीन् दीर्घरूपान् द्वितीयान्
ह्रस्वेषु पञ्चस्वपि तानि सन्ति ॥
कखौ गघौ ङ च छा जझौ ञ
टठा डढौ ण तथा दधौ न ।
पफौ बभौ म य र ल वा व
शषसाः क्ᳵ पᳶ इति वर्णशक्तिक्रमश्च ॥

अष्टौ समानाक्षराण्यादितस्ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि । इत्यादि ।

End. लघ्वक्षराणां लघुवृत्ति सर्व्वं
लघ्वक्षरं जागतमेव विद्यात् ।
यदाक्षरं वेद विशेषमेतं
भूतानि च त्रैष्टुभ-जागतानि ॥
सर्व्वाणि रूपाणि च भक्तितो यः
स्वर्गं जयत्येभिरथामृतत्वम् ।
स्वर्गं जयत्येभिरथामृतत्वम् ॥

Colophon. इति पार्षदे लक्षणग्रन्थे षष्ठे पटले तृतीयोऽध्यायः। समाप्तमेतत्परिशिष्टम्। संवत् १६९२ वर्षे। शाके १५५९।

विषयः। ऋचां लक्षणादिनिरूपणम्। तत्र वर्णराशिक्रमकथनम्। तेषामुच्चारणस्थानादि-कथनम्। प्रगृह्यादिपरिभाषाकथनम्। संहितापदप्रकृत्यादिनिरूपणम्। स्पर्शघोषादिनिरूपणम्। द्वित्वादिनिरूपणम्। क्रमादिनिरूपणम्। पारायणविधिकथनम्। छन्द-आदिनिरूपणम्। इति शम्॥

No. 4191. पुरुषसूक्ताराधनविधिः। Substance, country-made paper, 11 × 4 inches. Folia, 1. Lines, 13 on a page. Extent, 55 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Correct.

Purusha-súktárádhana-vidhi. This is a portion of the Bridad Brahma Samhitá. It treats of the method of worshipping the Purusha Súkta and of the merit to be derived from its recital.

Beginning. श्रीगणेशाय नमः।

वत्स उवाच।

विधिं पुरुषसूक्तस्य समाराधनवर्त्मना।
वक्तुमर्हथ नो यूयं कृपाङ्कुरितचेतसः॥

ते ऊचुः।

नारायणोऽस्य सूक्तस्य कर्त्ता वक्ता पिता स्वयम्।
तथापि चाभिधास्यामः श्रूयतामेकचेतसा॥
सम्प्राप्य चार्थतो मन्त्रं श्रीमदष्टाक्षरं परम्।
विधिना पौरुषं सूक्तं गृह्णीयात्परमादरात्॥
अष्टादशर्क्षचोपेतं प्रणवाद्यं हरिप्रियम्।
सूक्तं नारायणोद्भूतं तस्याराधनसिद्धये॥ इत्यादि।

End. सूक्तं प्रजपताश्चात्र व्यतीयुर्नः शतं समाः॥
श्रीवत्सो विष्णुधर्मा च सम्प्राप्यानेककारणम्।
प्रणिपत्योत्थितौ तावन्नारायणमपश्यताम्॥

Colophon. इति श्रीबृहद्ब्रह्मसंहितायां सुदर्शनगीतायां श्रीवत्सचरिते पुरुषसूक्ताराधन-विधिर्नाम द्वादशोऽध्यायः॥

विषयः। ऋषीणां राज्ञे श्रीवत्साय पुरुषसूक्ताराधनविधिकथनम्। श्रीसूक्तपाठादिमाहात्म्य कीर्त्तनञ्च।

No. 4192. पक्षहोमविधिः। Substance, country-made paper, 9 × 4 inches. Folia, 1. Lines, 23 ślokas. Character, Nágara. Date ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and Verse. Incorrect.

Paksha-homa-vidhi. The method of performing the Paksha-homa for the purpose of removing all sorts of dangers and difficulties.

Beginning. श्रीगणेशाय नमः।

ॐ पक्षहोमविधिः। स्वाशक्तेन स्रुतकादिविघ्नसम्भवे पक्षहोमः कार्य्यः। तदाह मरीचिः।

शरीरापाटवं यस्य भयाद्वार्त्तिः प्रजायते।
तथान्यास्वपि चापत्सु पक्षहोमोविधीयते॥

कृतपक्षहोमस्य चापन्निवृत्तौ स एवाह।

पक्षहोमं तथा कृत्वा मध्ये तस्मान्निवर्त्तितः।
होमं पुनः प्रकुर्य्याच्चेत्तदा दोषो न विद्यते—इति। इत्यादि।

End. उत्तमोऽग्निधृतः कुण्डे स्यात्मरोपस्तु मध्यमः।
समिदारोपणन्त्वन्त्यस्तस्मात्कुण्डे विधारयेत्॥

Colophon. इति पक्षहोमविधिः समाप्तः॥

विषयः। सर्व्वापत्क्षयकामेण पक्षहोमः कार्य्य इति तद्विधानकथनम्॥

No. 4193. पञ्चक्रोशीमाहात्म्यम्। Substance, country-made paper, 12 × 5 inches. Folia, 9. Lines, 16 on a page. Extent, 394 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Pancha-krosí-máhátmya. On the spiritual benefit to be derived by a residence within the area of five krośas or the holy area of Benares.

Beginning. श्रीविश्वेश्वरो विजयते।

श्रीदेव्युवाच।

देवदेव महादेव भक्तानामभयप्रद।
काशीवासः सुगहनः पापिनां धनलोभिनाम्॥
विषयासक्तमनसां न सुखाय कदाचन।
सुखाय सर्व्वलोकानां प्रवृत्तिः कथिता कलौ॥
विषयैः परितुष्टानां जीवनं नान्यथा भवेत्।

प्रायश्चित्तान्तरं देव वदस्व यदि मन्यसे ॥
प्रायश्चित्तविहीनस्य यातना जायते ध्रुवम् ॥
बिभेमि दीनान् मनुजान् दृष्ट्वा शास्त्रपराङ्मुखान् ॥
तानप्युद्दर देवेश शठान् स्वेच्छापरिग्रहान् ।
श्रीमहादेव उवाच ।
साधु पृष्टं त्वया देवि चेत्रपावकृतां नृणाम् ।
निस्तारः स्याद्यथा मङ्क्षु प्रायश्चित्तेन येन चि ॥
प्रायश्चित्तविहीनानां यातना बहुदुःखदा ।
तस्मात् सर्व्वप्रयत्नेन प्रायश्चित्तं समाचरेत् ॥ इत्यादि ।

End. अविमुक्तं समासाद्य न त्यजेन्मोक्षकामुकः ।
क्षेत्रन्यासं दृढं कृत्वा वसेद्धर्म्मपरः सदा ॥
क्षेत्रन्यासपराणान्तु महतामप्यनुकालजैः ।
भागैः सहायतां यातौ द्विशावः परमां गतिम् ॥
यथा पतिव्रता नारी भर्त्तारमनुगच्छति ।
तथा साहसमालम्ब्य काशीमनुगतोभवेत् ॥
गुरुद्रोहपरोयस्तु + + द्रोहपरस्तथा ।
न तस्य काशी सिध्येत बहुभिः साधनैर्युता ॥
क्षेत्रसन्न्यासिनामेव क्रमः प्रोक्तो मयानघे ।
प्रदक्षिणायास्तु महान्महापापहरः परः (?) ॥

Colophon. इति श्रीब्रह्मवैवर्त्ते पञ्चक्रोशीमाहात्म्य, चतुर्थोऽध्यायः ॥

विषयः । पञ्चक्रोशीप्रदक्षिणविधिकथनमुखेन काशीमाहात्म्यादिकथनम् ।

No. 4194. पर्य्यङ्काशौचविधिः । Substance, country-made paper. 9 × 4 inches. Folia, 6. Lines 9 on a page. Extent, 88 ślokas. Character, Nágara. Date, Sk. 1750. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and Verse. Generally correct.

Paryyáṅk-śáucha-viddhi. Method of performing the ceremony of renouncing the world, of holding the holy rod and of similar subjects.

Beginning. श्रीगणेशाय नमः ।

ॐ भूः सावित्रीं प्रविशयामि ॥ तत् सवितुर्वरेण्यं । ॐ भुवः सावित्रीं प्रविशयामि । भर्गो-

देवस्य धीमहि । ॐ स्वः सावित्रीं प्रविशयामि । धियो योनः प्रचोदयात् ॥ ॐ भूर्भुवः स्वः सावित्रीं प्रविशयामि । सर्व्वां गायत्रीं जपेत् । इत्यादि ।

End. ततो गुरुणा विधिन्यासपूर्वकं शङ्खेन शिष्यशिरसि अभिषेकं कृत्वा वस्त्र-गन्ध-माल्य-धूप-दीपादि-नानाविध नैवेद्यैः संपूज्य स्तोत्राणि पठेत् ॥

Colophon. इति पर्य्यङ्काशौचविधिः समाप्तः ।

विषयः । सन्न्यासग्रहणविधिकथनम् । तत्र दण्डग्रहणकथनम् । तत्प्रयोगकीर्त्तनञ्च ।

No. 4195. पूर्त्तप्रकाशः । (प्रतापनारसिंहः ।) Substance, country-made paper, 12 × 3½ inches. Folia, 126. Lines, 7 on a page. Extent, 1,476 ślokas. Character, Nágara. Date, Sk. 1731. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and Verse. Incorrect.

Púrtta-prakáśa. (Pratápa-nárasinha) by Rudradeva. This forms one of the books of the series entitled Pratápa Nárasinha mentioned in No. 4185? It treats of the ceremonies for the purpose of, consecrating tanks, wells, gardens, temples and so on. The writer was a resident of Pratisthápanapura (Allahabad (?))

Beginning. श्रीगणेशाय नमः ।

नारसिंहं नमस्कृत्य गुरुंश्चैव विशेषतः ।
भारद्वाजकुलोत्पन्नस्तोरोनारायणात्मजः ॥
नाम्ना वै रुद्रदेवस्तु श्रीन्दसिंहदयान्वितः ।
प्रतापनारसिंहाख्यं वक्ष्ये पूर्त्तप्रकाशकम् ॥

पूर्त्तइति कर्म्मनामधेयम् । बौधायनेन सेतुबन्ध-नदी-खात-तड़ाग-पुष्करिणी-वापी-कूप-देवगृह-प्रासाद वसतीना-मोषधिवनस्पतीनाञ्च पूर्त्तं भवतीति पूर्त्तत्वेनाभिधानात् । तथा श्रीमन्नैमिषारण्यवासिरामचन्द्रेण स्वकृतकुण्डश्लोकदीपिकायामिष्टापूर्त्तेष्विति प्रथमश्लोकव्याख्यायाम् इष्टं यागादिः पूर्त्तं वापीकूपतड़ागारामादीति व्याख्यातत्वाच । इत्यादि ।

End. इति पूर्त्तप्रकाशे अभ्यङ्गादिप्रमाणम् ।

तोरोनारायणसुतो रुद्रदेवो महासुधीः ।
ग्रन्याननेकान् संवीक्ष्य सारमुद्धृत्य यत्नतः ॥
प्रतापनारसिंहाख्ये ग्रन्थे पूर्त्तप्रकाशकम् ।
समाप्तमकरोत् तच विदुषां प्रीतये सदा ॥

बालानां सुलभो + + प्रयोगोऽयं निरूपितः ।
रुद्रदेवेन च श्रीमान् नृसिंहः प्रीयतामिति ॥

Colophon. इति प्रतिष्ठापन-पुरवासि-तोरोनारायण-तनज-रुद्रदेवेन कृते प्रतापनारसिंहाख्ये पूर्त्तप्रकाशः समाप्तः । शाके १७३१ ।

विषयः । पूर्त्तलक्षणादिकथनम् । पूर्त्तनिर्म्माणादिफलकथनम् । सेत्वादीनां विनष्टानां पुनःकरणे फलश्रुतिकथनम् । विशेषेण जलाशयप्रशंसाकीर्त्तनम् । कूपादिनिर्म्माणविधिकथनम् । वाप्यादिलक्षणकथनम् । जलाशयारम्भकालादिनिरूपणम् । तदुत्सर्गकालकथनम् । जलाशयशुद्धिविधिकथनम् । शवादिसंस्पृष्टकूपादिजलपानप्रायश्चित्तकथनम् । वाप्यादिभेदन-प्रायश्चित्तकथनम् । जलाशयाद्युत्सर्गविधिकथनम् । तत्र वारुणमण्डलादिविधिकथनम् । बौधायनोक्तप्रकारेण जलाशयोत्सर्गप्रयोगकथनम् । । बह्वृचां तत्र विशेषकथनम् । आरामोत्सर्गप्रयोगादिकथनम् । अश्वत्थोपनयनप्रयोगादिकथनम् । देवतायतनाद्युत्सर्गप्रयोगकथनम् । देवमूर्त्तिप्रतिष्ठाप्रयोगकथनम् । शालग्रामलक्षणादिकथनम् । शिवलिङ्गलक्षणादिकथनम् । चलार्चास्थापनविधिकथनम् । इति शम् ।

No. 4196. नन्दिसूत्तं । वा नन्द्यध्ययनसूत्रम् । Substance, country made paper, 13×5 inches. Folia, 19. Lines, 13 on a page. Extent, 741 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and Verse. Incorrect.

Nandi-sútta, or Nandyadhyayana-súttra. In Jaina Prákrit. Doing good to others is the result of purity of mind. One can do good in two ways (1) by gifts and (2) by advice. Gifts may produce bad results but teaching the doctrines of Jina can never do so. The religion of Jina promises merit to those who read its scriptures and also to those who reform their characters according to its dictates. Those again can reform their characters who have virtue and excellence, and who attentively read the Jaina scriptures.

Beginning. ॐ नमः श्रीपञ्चपरमेष्ठिभ्यः ।
जयइ जगाजीयजोणीवियाणउ जगगुरु जगाणन्दो ।
जगणाहो जगबंधु जयइ जगप्पियामहो भयवम् ॥
जयसुयाणं पभवो तित्थयराणं अपच्छिमो जयइ ।
जयइ गुरुलोगाणं जयइ महप्पा महावीरः ॥
भद्दं सव्वजगज्जोयगस्सं भद्दं जिणस्स वीरस्स ।
भद्दं सुरासुरनमं सियस्स भद्दं धुयरयस्स ॥

गुणगह्वणभवणसुयरयणभरियदंसणविसुद्धरच्छागा ।
सङ्घनगर भद्दं ते अक्खड़ चरित्तपागारा ॥
इत्यादि ।

End. आदिकर पुरिस तालेय चरित्तियाउसभसेणस्स ।
अणुसा उणमणीणमणीणामणीवचणाए ॥
भावोपभावणं पदारोप तदुभय व्हि यं मच्छाया ।
पणाउमग्गोय कप्पोय सम्बरह निज्भर ॥

Colophon. — — — — — णंदी समत्तो । शुभम् ॥

विषयः । अथ परमानन्दरूपश्रेयःपदमधिरोढुकामेन तदवाप्तये स्वपरसमानभावेन परोपकाराय यतितव्यम् । तत्रापि महत्यामाशयविशुद्धौ परोपकृति कर्तुं शक्यते इत्याशयविशुद्धिप्रकर्षसम्पादनाय विशेषतः परोपकारे यत्न आस्थेयः । परोपकारश्च द्विधा । द्रव्यतो भावतश्च । ततो द्रव्यतो विविधान्नपानधनकाञ्चनादिप्रदानजनितः । स चानैकान्तिकः । कदाचित् ततो विसूचिकादिदोषसम्भवः । प्रकृतोपकारासम्भवात् कियत्कालमात्रस्थायित्वाच्च । भावतो जिनप्रणीतधर्मसम्पादनजनितः । स चैकान्तिकः । कदाचिदपि ततो दोषासम्भवात् । आत्यन्तिकश्च । परम्परया शाश्वतिकमोक्षसौख्यसम्पादकत्वात् । जिनप्रणीतोऽपि धर्मो द्विधा । श्रुतधर्मश्चारित्रधर्मश्च । तत्र श्रुतधर्मः स्वाध्यायः, चारित्रधर्मः क्षान्त्यादिरूपो दशविधः श्रमणधर्मः । तत्र श्रुतधर्मसम्पत्समन्विता एव प्रायश्चारित्रधर्माभ्युपगमयथावत्परिपालनसमर्था भवन्तीति तत्तद्धर्मस्य प्राशस्त्यकथनमुखेन दानादिधर्मनिरूपणम् ॥

No. 4197. नागबलिः । Substance, country-made paper, 9×4 inches. Folia, 14. Lines, 9 on a page. Extent, 204 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and Verse. Correct.

Nágavali. Serpents should not be killed but they should be propitiated. The present work gives the process of propitiating serpents as given in Vidhána-Párijáta a well-known *Smriti* work.

Beginning. श्रीगणेशाय नमः ।
अथ नागबलिः । तत्र शौनकः ।
अथ वक्ष्यामि सर्पस्य संस्कारविधिमुत्तमम् ।
सिनीवाल्यां पौर्णमास्यां पञ्चम्यां कारयेत् ततः ।
अश्लेषाऋक्षयुक्तायामन्यस्यां वापि कारयेत् ॥

कृतसर्पबधो विप्रः पूर्व्वजन्मनि चेह वा ।
अनेकदुःखजालानि प्राप्नोति सततं नरः ॥
सन्ततिप्रतिबन्धश्च जातापत्यं विनश्यति ।
तस्य शान्तिं प्रवक्ष्यामि येन सम्पद्यते सुखम् ॥
स्नात्वागत्य ततो ब्रह्मदण्डं दद्याद् द्विजातये ।
बधं प्रख्यापयेच्चापि चरेत् कृच्छ्रांश्चतुर्द्दश ॥
इत्यादि ।

End. कृतस्य कर्म्मणः साङ्गतासिद्धये ब्राह्मणभोजनं भूयोदानञ्च विधाय, "यस्य स्मृत्या च — प्रमादात् कुर्व्वतां कर्म्म" इति विष्णुं स्मरेत् । अनेन सर्पसंस्काराख्येन कर्म्मणा सर्पाधिनाथोऽनन्तः प्रीयताम् । ततः सुहृद्युतो भुञ्जीतेति ।

Colophon. इति नागबलिप्रयोगो विधानपारिजातोक्तः समाप्तः ।

विषयः । सर्पबधदोषकीर्त्तनपूर्व्वकं तच्छान्तये नागबलिः कार्य्य इति विधानकथनानन्तरं विधानपारिजातोक्तक्रमेण तत्प्रयोगकथनम् ॥

No. 4198. परभूप्रकरणं, वा परभूकथा । Substance, country-made yellow paper, $9\frac{1}{4} \times 4$ inches. Folia, 17. Lines, 10 on a page. Extent, 340 ślokas. Character, Nágara. Date, Sk. 1732. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Parabhú-prakaraṇa, alias Parabhú-kathá. The work was written during the reign of Rájá Sháhu the grandson of the great S'ivají. It contains a description of the ten purificatory ceremonies of the Parabhú race to which Rájá Sháhu's writer Govinda Ráya belonged. It gives the origin of the Parabhú race also.

Beginning. श्रीगणेशाय नमः ।
श्रीसिद्धिसहितं + + प्रणम्य गणनायकम् ।
केनचिद्विदुषा रच्या लिख्यते परभूकथा ॥

स्वस्तिश्रीमद्राजाधिराजचूड़ामणिभोंसलवंशावतंसे श्रीशम्भुराजात्मजश्रीशाहूराजे सप्तर्षिराजधान्यां मुख्यप्रधानबालाजीवाजीरायसाहाय्येन निर्बाधमासमुद्रजगतीतलराज्यं कुर्व्वति सति कायस्थजात्यन्तर्गतपरभूजातीयो राजलेखको गोविन्दरायनामा राज्ञः प्रीतिपात्रमासीत् । तदनुजो बावुरायनामा च । अथ कस्मिंश्चिद्दिवसे गोविन्दरायः करहाटकजातीयमखगर्व्वं मूर्त्तिमन्तं दम्भमिव स्थितं अतिलोभिनमतिमत्सरिणं आटलोपाख्यवावदेवभट्टनामानं आहूय एवमेवमप्रार्थयत ।

End. इत्थं यत् परभूदत्तमभूच्छाद्दौ प्रशासति ।

स्मृत्यर्थं तत् पत्रिकाभि(पत्रिकाभि)रबध्नन् कोपिण्डताः (केऽपि पण्डिताः) ॥

Colophon. इदं परभूप्रकरणं समाप्तम् । श्रीशके १७३२ शुक्लनामसंवत्सरे आषाढ़-शुक्लाष्टम्यां इदं पुस्तकं ज्योतिषीत्युपनामगोविन्दात्मजप्रभाकरेण लिखितम् ।

विषयः । परभूजातीयस्य गोविन्दरायनामकस्य राजलेखकस्य स्वजातीयानां दशविधसंस्कारार्थमुद्यमादिकथनम् । परभूजातीयस्योत्पत्त्यादिकथनञ्च ।

No 4199. न्यायसङ्ग्रहः । Substance, country-made paper, 10×4 inches. Folia, 2. Lines, 17 on a page. Extent, 68 ślokas and 10 Aksharas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India, Appearance, fresh. Prose. Correct.

Nyáya-sangraha. The rules of interpretation applicable to the Jaina work on Sanskrit grammar entitled Siddha Hema Chandra and also to other works of similar nature. It was written by Hema Hansa Gaṇi, the pupil of Ratna S'ekhara, the head of a Jaina Gachchha who was himself the pupil of Soma Sundara the Lord of the learned Divines of the Jainas.

Beginning. ॐरूपाय नमः श्रीमद्धेमव्याकरणाय च ।

श्रीसोमसुन्दरगुरूत्तंसाय च नमो नमः ॥

अथ ये तु शास्त्र×चिता लोकप्रसिद्धाश्च न्यायास्तदर्थं यत्नः क्रियते । स्वं रूपं शब्दस्याशब्दसंज्ञा । सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्य । ऋतो—इत्यादि ।

End. शिष्टनामनिष्पत्तिप्रयोगधातूनां सौत्रत्वाल्लक्ष्यानुरोधाद्वा सिद्धिः ॥

Colophon. इति श्रीसिद्धहेमचन्द्रव्याकरणस्यन्यायसङ्ग्रहः ॥

श्रीसूरीश्वरसोमसुन्दरगुरोर्निःशेषशिष्याग्रणी-

र्गच्छेन्द्रः प्रभुरत्नशेखरगुरुर्देदीप्यते साम्प्रतम् ।

तच्छिष्याणवहेमहंसगणिना श्रीसिद्धहेमाभिधे

न्याया व्याकरणे विलोक्य सकलाः संसङ्गृहीता इमे ॥

प्रत्यक्षरं गणनया ग्रन्थेऽस्मिन् न्यायसङ्ग्रहे ।

श्लोकानामष्टषष्टिः स्यादधिका च दशाक्षरी ॥ इति शम् ।

विषयः । सिद्धहेमव्याकरणोक्तानां न्यायानां यथाक्रमेण सङ्कलनम् । तदसमुचितानां केषाञ्चिदन्येषाञ्च सङ्ग्रहः ।

No. 4200. न्यायमञ्जूषान्यासः। Substance, country-made paper, 10×4 inches. Folia, 57. Lines, 17 on a page. Extent, 3270 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India, Appearance, fresh. Prose. Correct.

Nyáya-mañjúshá-nyása. A commentary on the above by the same author.

Beginning. त्रैलोक्याह्लादहेतुश्रीसोमसुन्दरमूर्त्तये ।
नमः श्रीसिद्धचक्राय जगज्ज्येष्ठाय तायिने ॥
न्यायाध्वन्यध्वगानां दिशि दिशि सुयशोऽद्यापि रामादिराज्ञां
न्यायोपात्तानि वित्तान्यसमसुखकराण्यत्र चामुत्र चापि ।
न्याय्यत्वादेव जय्यं न खलु खलगिरां शासनं जैनचन्द्रं
तन्नित्यं न्यायवृत्तिं श्रुभपदफलदामाश्रियध्वं बुधेन्द्राः ॥

इह तावत् सुगृहीतनामधेयप्रभु श्रीहेमचन्द्राचार्य्यैः स्वोपज्ञसंस्कृतशब्दानुशासनबृहद्वृत्तिप्रान्ते सप्तपञ्चाशन्न्यायाः समुच्चीयन्ते। तस्मात्तेषाञ्चानित्यत्वमुपेक्ष्य व्याख्योदाहरणज्ञापकानामेव प्रज्ञापना कनीयसी टीका कैश्चित् प्राचीनानूचानैश्चक्रे। साम्प्रतन्तु पूर्व्वसमुच्चितानां इत्यादि।

End. धातुरत्र दर्शित इत्यतः प्राय इत्युक्तं सङ्ग्रहश्लोकेष्वेकोनविंशार्य्यायां ++ योगस्यात्यप्रयत्नोच्चार्य्यत्वम्। तत्पूर्व्वंश्च (?) शङ्कानिरासार्थम्। शेषं निगदसिद्धम् ॥

Colophon. इति स्वकृतन्यायमञ्जूषायां तृतीयवक्ष×रकन्यासः ॥
श्रीसूरीश्वरसोमसुन्दरगुरोर्निःशेषशिष्याग्रणी-
र्गच्छेन्द्रः प्रभुरत्नशेखरगुरुर्देदीप्यते साम्प्रतम् ।
तच्छिष्याणुकहेमहंसगणिना स्वन्यायमञ्जूषिका-
न्यासेनालमकारि चित्ररचनाचारुत्वमाबिभ्रता ॥
कल्याणमस्तु ।

विषयः। न्यायसङ्ग्रहापराभिधानस्वकृतन्यायमञ्जूषायाः सोदाहरणव्याख्यानम्।

No. 4201. माघमाहात्म्यम्। Substance, country-made paper, 9×4½ inches. Folia, 2. Lines, 12 on a page. Extent, 54 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India, Appearance, new. Verse. Incorrect.

Mágha-máhátmya. The sacredness of the month of Mágha, a plunge in a holy river in the morning in which produces great merit. This is written in the form of a Puráṇa.

Beginning. श्रीगणेशाय नमः ।

आरब्धे नैमिषारण्ये मुनयो ब्रह्मवादिनः ।
आजग्मुरखिलास्तत्र सत्रं द्वादशवार्षिकम् ॥
असितो देवलश्चैव सुमन्तुः पैल एव च ।
सुमतिर्वामदेवश्च जाबालिः काश्यपो भृगुः ॥
पर्व्वतः शरभङ्गश्च सुतीक्ष्णो+श्च एव च ।
आपस्तम्बश्च माण्डव्यः सत्यः कात्यायनस्तथा ॥
रथीतरोऽङ्गिराश्चैव कपिलो रैभ्य एव च ।
मुद्गलो गौतमश्चैव कण्वः कौण्डोऽत्रिरेव च ॥
धूम्रो हरीतकः शङ्कुः पृथुर्मङ्किश्च सङ्कृतिः ।
कौण्डिन्यो निध्रुवश्चैव कणादो गर्ग एव च ॥
कौशिको गालवो बभ्रुः शुकः शक्तिः पराशरः ।
शिनिर्विभाण्डकः पङ्कुर्बुधो बौधायनो वसुः ॥
जमदग्निर्भरद्वाजो धूम्रपानश्च भार्गवः ।
— — — — — — — — — — ॥
आगत्य नैमिषारण्यमशेषगुणसंयुतम् ।
क्रतुमारेभिरे सत्रं गोमतीतीरभूतले ॥
एतस्मिन्नेव काले तु सूतः पौराणिकोत्तमः ।
पुण्यं तमाययौ देशं दीर्घसत्रदिदृक्षया ॥
इत्यादि ।

End. यथावन्माघमाहात्म्यं वक्ता श्रोता च दुर्लभः ।
वयं यूयञ्च सुलभा वक्तुं श्रोतुञ्च शक्तितः ॥
स माघमासोऽखिलपापशत्रुः
सौभाग्यहेतुः सकलार्थदायी ।
निमज्जनाद्यत्र विभातकाले
नवासुवल्लोककुटुम्बिनः स्युः ॥ (?)

Colophon. इति श्रीमाघमाहात्म्यम् ।

विषयः । माघमासे स्नानदानादिमाहात्म्यकीर्त्तनम् ।

No. 4202. कर्कटव्रतं वा, सङ्कटव्रतम् । Substance, country-made-yellow paper, 10 × 2¾ inches. Folia, 5. Lines, 5 on a page. Extent, 75 ślokas. Character, Nágara. Date, Sm. 1883. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Karkaṭa-vrata. The process of performing a religious ceremony on the 4th day of the waning moon in the month of *Kártika.*

Beginning. श्रीगणेशाय नमः ।
श्रीसूत उवाच ।
अरण्ये वर्त्तमानं तं पाण्डुपुत्रं युधिष्ठिरम् ।
सबान्धवं सुखासीनमाययौ व्यासमादरात् (व्यास आदरात्) ॥
तं दृष्ट्वा मुनिशार्दूलं व्यासं प्रत्युद्ययौ नृपः ।
मधुपर्कञ्च सार्घ्यञ्च कृत्वा तस्मै नमस्कुरु (?) ॥
अद्य मे सफलं जन्म भवतां गमनेन वै ।
ये क्लेशा मम सञ्जाता वने वननिवासिनः ।
ते सर्व्वे विलयं जाता भवतां दर्शनेन वै ॥

End. ब्राह्मणान् भोजयेत् पश्चात् चमस्वेति विसर्जनम् ॥
त्यक्तशठ्यो जितक्रोधो लोभदम्भविवर्जितः ।
प्रतिमासन्तु यः कुर्य्यात्त्रीणब्दानेकमेव च ।
न दारिद्र्यं भवेत्तस्य सङ्कटं न भवन्ति हि ॥

Colophon. इति श्रीनारदीयपुराणे कार्त्तिककृष्णचतुर्थीसङ्कटनाम्नी व्रतकथा समाप्ता ।
संवत् १८८३ ।

विषयः । सङ्कटव्रतविधिकथनं तत्कथाकथनञ्च ।

No. 4203. मुद्राकरणम् । Substance, country-made paper, 20½ × 4½ inches. Folia, 4. Lines, 6 on a page. Extent, 141 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Generally correct.

Mudrákaraṇa. Mystic signs made with fingers of the hand. The fingers are so placed as to form the figures of cow, &c. The signs differ in the worship of different deities.

Beginning. अथ मुद्राः । मुद्रामुत्पत्तिमाह (मुद्राया उत्पत्तिमाह) तन्त्रे ।
मोदनात् सर्व्वदेवानां द्रावणात् पापसन्ततेः ।

तस्मान्मुद्रेति सा ख्याता सर्व्वकर्म्मार्थसाधिनी ॥
अथ मुद्राः प्रवक्ष्यामि सर्व्वतन्त्रेषु कल्पिताः ।
याभिर्विरचिताभिश्च मोदन्ते सर्व्वदेवताः ॥
अर्च्चने जपकाले च ध्याने काम्ये च कर्म्मणि ।
ध्याने चावाहने शङ्खे प्रतिष्ठायाञ्च रक्षणे ॥
नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते ।
स्थाने मुद्राः प्रद्रष्टव्याः स्वस्वलक्षणलक्षिताः ॥

End. बद्ध्वा तु योनिमुद्रां वै मध्यमे कुटिले कुरु ।
अङ्गुष्ठे तु तदग्रे तु मुद्रेयं भूतिनी मता ॥
वाममुष्टिं विधायाथ + + + तर्ज्जनीं ततः ।
प्रसार्य्य तर्ज्जनीमुद्रा निर्द्दिष्टा वज्रपाणिना ॥

Colophon. इति मुद्राकरणं समाप्तम् ॥

विषयः । देवताभेदे मुद्राभेदकथनं तासां लक्षणकथनञ्च ।

No. 4204. मृत्युञ्जयतन्त्रम् । Substance, country-made paper, $13 \times 4\frac{1}{2}$ inches. Folia, 16. Lines, 5 on a page. Extent, 300 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Mrityuñjaya-tantra. One of the original Tantras. The Principal interlocutors are Hara and Párvatí and the subjects treated of are the origin of the human body, how it represents the Universe and the definitions of Yoga terms.

Beginning. ॐ नमः श्रीगुरवे ।
अन्नदाता च (?) कर्त्ता च सर्वदा यौवनान्वितः ।
सर्वशास्त्रार्थतत्त्वज्ञो देवविप्राग्निपूजकः ।
जातिस्मरो महाप्राज्ञश्चिरायुः सर्वतत्त्ववित् ॥
अभ्यासं ज्ञानयोगञ्च देवीभक्तिरतः सदा । (?)
नाकाले मरणं भित्त्वा नच शोकेन युज्यते ॥
देव्युवाच ॥
कथयस्व महादेव प्रसादं कुरु शङ्कर ।
येन ज्ञानेन मोक्षः स्यात् संक्षेपाद्वक्तुमर्हसि ॥

End. खण्डितशेषत्वात् समाप्तिसूचकं वाक्यं नास्ति ।

विषयः । १ म अध्याये, देहोत्पत्तिक्रमकथनं, देहस्य ब्रह्माण्डरूपताप्रदर्शनञ्च । २ य, ३ य, ४ र्थ अध्यायेषु, आसनं, प्राणसंरोधः, प्रत्याहारः, धारणा, ध्यानं, समाधिः, एतेषां षण्णां योगाङ्गानां लक्षणादिकथनम् ।

No. 4205. मातृकाभेदतन्त्रम् । Substance, country-made yellow paper, $12\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 27. Lines, 6 on a page. Extent, 586 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Mátrikábheda-tantra. One of the original *tantra* works. The interlocutors are Bhairava and Chaṇḍiká. It treats of the process of turning inferior metals into silver, &c., of reducing mercury to ashes, of the impurity of anything offered to S'hiva, of the benefits of drinking and similar topics treated of in Tántric works.

Beginning. ॐ नमः परमदेवतायै ।

कैलासशिखरे रम्ये नानारत्नोपशोभिते ।
पप्रच्छ परया भक्त्या भैरवं परमेश्वरम् ॥
श्रीचण्डिकोवाच ।
त्रिपुरापूजनं नाथ स्वर्णरत्नैर्विशेषतः ।
कलिकाले सर्वरत्नं गुप्तभावं तथा मणिः ॥
केनोपायेन देवेश स्वर्णरत्नादि लभ्यते ।
तद्वदस्व विशेषेण यथा रत्नादिकं भवेत् ॥

End. शृणु देवि प्रवक्ष्यामि साधिकायाश्च लक्षणम् ।
दिव्यशक्तिर्वीरशक्तिर्गुरुशक्तिस्तथापरा ॥
कुलशक्तिः कामिनी च नवशक्तिः कुमारिका ।
श्रीगुरुं पूजयेद्भक्त्या स्वदेहदानपूर्वकम् ॥
अन्यथा तु स्वदेहस्य निग्रहो जायते ध्रुवम् ।
सप्तजन्मनि सा देवि पुंश्चली जायते ध्रुवम् ॥

Colophon. इति मातृकाभेदतन्त्रे चण्डिकाशङ्करसंवादे चतुर्दशः पटलः ।

विषयः । १ म पटले, रौप्यनिर्म्माणोपायादिकथनम् । २ य पटले, सन्तानोत्पत्तिनियमकथनम् । ३ य पटले, कुण्डलिनी भोगान् भुङ्क्ते न जीव इति ज्ञानपूर्वकभोजनस्य मोक्षसाधनत्व-

कथनं, देहान्तःस्थकुण्डादिकथनञ्च। ४ र्थ पटले, शिवनिर्म्माल्यस्याग्राह्यत्वनिर्द्देशे हेतुनिर्द्देशः, मद्यपानप्रशंसा च। ५ म पटले, पारदभस्मीकरणोपायकथनं, तद्भस्ममाहात्म्यकथनञ्च। ६ ष्ठ पटले, चन्द्रसूर्य्यग्रहहरहस्यकथनं, चामुण्डाया मन्त्रकथनं, तस्या आराधनविधिः। ७ म पटले, त्रिपुराया मन्त्रपूजास्तवकवचादिकीर्त्तनम्। ८ म पटले, पारदशिवलिङ्गपूजामाहात्म्य, पारदशिवलिङ्गनिर्म्माणोपायकथनञ्च। ९ म पटले, वराहवत्सदाहनियमः, तस्य द्रव्यान्तरयोगेन भक्षणात् कुष्ठरोगशान्तिकथनम्। १० म पटले, वर्णात्मकमन्त्रस्य शब्दब्रह्ममयत्वादिकथनम्। ११ श पटले, देव्यै प्रासादमण्डपकूपादिदानविधिः, वेदिभेदे यज्ञोपवीतपरिमाणञ्च। १२ श पटले, शालग्राम-यन्त्रादीनां पूजाधारत्वकथनं, आधारभेदे पूजाफलभेदकथनञ्च, शिवपूजामाहात्म्यादिकीर्त्तनञ्च। १३ श पटले, मन्त्रजपार्थं गाणपत्यादिभेदे मालाभेदकथनं, मालाया ग्रन्थिप्रकारकथनञ्च। १४ श पटले, दिव्यवीरपशुभेदेन त्रिविधभावकथनम्।

No. 4206. अञ्जननिदानम्। Substance, country-made paper, 13 × 4 inches. Folia, 21. Lines, 5 on a page. Extent, 333 ślokas. Character. Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Correct.

Anjana-nidána. A medical work attributed to Agnibesha to whom Charakácháryya addresses his celebrated work. This is a short treatise giving within the compass of 333 verses the pathology of various deseases. As the eye-paint clears the eye, so the author expects this work will clear the intellects of physicians, clouded by reading a large number of big books.

Beginning. श्रीगणेशाय नमः।

अबोधतिमिरच्छन्नचक्षुषां भिषजां कृते।
स्वच्छं करोत्यग्निवेशो ग्रन्थमञ्जनमाख्यया॥
दोषरोषो रुजां हेतुस्तत्प्रकोपे तु कारणम्।
प्रत्येकं हीनमिथ्यातियोगः कालार्थकर्म्मणाम्॥

अथ वातस्य कारणमाह।

कटुतिक्तकषायपयोदहति-
श्रमरूक्षहिमान्नभयानशनैः।
स्मरजागरहुल्करणास्रगमै-
रपि कुप्यति वेगबधैरनिलः॥

अथ वातस्योपद्रवमाह।

इत्यादि।

End. विद्वन्तु हस्विक्रेनाङ्गं ज्वलदङ्गारभागि च ।
सदाहरङ्मोहमन्यद्यथा खतुषमुन्नयेत् ॥
इति विषरोगावलोकः ।
अतिविस्तरपुस्तकपाठहठ-
प्रतिहस्ततया धृतभूरिभयम् ।
नगनानलहङ्मित ७७७ पद्यकृतं
भिषजामिदमञ्जनमस्तु मुदे ॥
चकार चतुरोचितं तदिदमग्निवेशोऽञ्जनं
परोपकृतये कृतं परमिदं रुजाज्ञापकम् ।
ततः समुदितैः सदा सुकृतराशिभिस्तुष्यतां
तुषारगिरिकन्यकापरिवृढः स योषित्सुतः ॥

Colophon. इति श्रीअग्निवेशाचार्य्यविरचितं श्रीवैद्यकग्रन्थे अञ्जननिदानं सम्पूर्णम् ॥

विषयः । वायुपित्तकफानां कारणकथनम् । तेषामुपद्रवादिकथनम् । तत्तद्दोषादिलक्षणकथनञ्च । प्राग्रूपादीनां लक्षणादिकथनम् । ज्वरादिलक्षणकथनम् । द्वन्द्वज्वरादिलक्षणकथनम् । विषमज्वरादिकथनम् । असाध्यज्वरादिलक्षणकथनम् । अतीसारलक्षणकथनम् । श्वास-कासाग्निमान्द्य-पाण्डुरोग-शोथ-कुम्भ-कामला-मूर्च्छापस्मार-प्रमेह मूत्रकृच्छ्र-वात-स्थौल्य-कार्श्य-हृद्रोग-कुष्ठोदरव्रण-भग्न-भगन्दर-नाड़ीव्रण-विद्रधि-विसर्प-मसूरिका-स्फोटकादिलक्षणादिकथनम् । प्रसूतिरोगकथनम् । प्रदरादिरोगकथनम् । शिरोरोगादिकथनम् । विषरोगादिकथनञ्च । इति शम् ।

No. 4207. पञ्चमसङ्ग्रहटीका । Substance, country-made paper, 9 × 3 inches. Folia, 351. Lines, 15 on a page. Extent, 19, 687 ślokas. Character, Nágara. Date, Sm. 1712. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Pañchama-sañgraha-ṭíká. The Sanskrit commentary by Malaya-giri, one a Jaina work entitled *Panchasamgraha* in Prákrit.

Beginning. ॐ नमः श्रीवीतरागाय ।
समस्तकर्म्मद्रुमदाहदावं
स्वज्ञानविज्ञातजगत्स्वभावम् ।
विधूतनिःशेषकुतीर्थमानं
प्रणम्य देवं जिनवर्द्धमानम् ॥
संसारकूपोदरमग्नजन्तु-
स्तोमोद्धृतौ हस्तमिवावलम्ब्यम् ।

जैनागमं वाहितशेषशास्त्र-
न्यग्भावमापूर्णयथार्थवादम् ॥
विष्टणोमि पञ्चसङ्ग्रहमतिनिपुणगभीरमत्यल्पबुद्धिरपि ।
शास्त्रान्तरटीकातो गुरुपदेशाच्च सुखबोधम् ॥

इह शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्त्तमानाः सन्त इष्टदेवतानमस्कारपुरःसरमेव प्रवर्त्तन्ते । नचायमाचार्य्यो न शिष्ट इति शिष्टसमयपरिपालनाय, तथा श्रेयांसि बहुविघ्नानि भवन्ति । उक्तञ्च ।

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।
अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः ॥

इदञ्च प्रकरणं सम्यग्ज्ञानहेतुत्वात् श्रेयोभूतमतो माभूदत्र विघ्न इति विघ्नविनायकोपशान्तये चेष्टदेवतानमस्कारं, तथा प्रेक्षापूर्व्वकारिणः प्रयोजनादिविरहे प्रवर्त्तन्ते, ततः प्रेक्षावतां प्रवृत्त्यर्थं प्रयोजनादिकञ्च प्रतिपिपादयिषुरादाविमां गाथामाह ॥ नेमि ऊणेति ।

End. समासतः संक्षेपतः प्रक्षिप्तभविकजनानुकम्पया भणितम ।
जयति सकलकर्म्मक्लेशसम्पर्कमुक्त-
+ + विततविमलज्ञानसम्भारलक्ष्मीः ।
प्रतिनिहतकुतीर्थाशेषमार्गप्रवादः
शिवपदमधिरूढ़ो वर्द्धमानो जिनेन्द्रः ॥
गणधरदृष्टं जिनभाषितार्थमखिल + + भङ्गनयकलितम् ।
परतीर्थानुमतमा + + मभिगन्तुं शासनं जैनम् ॥
बह्वर्थमल्पशब्दं प्रकरणमेतद्विट्टणता + खिलम् ।
यदवापि मलयगिरिणा सिद्धान्तना + + लोकः ॥
अर्हन्तो मङ्गलं सिद्धा मङ्गलं मम साधवः ।
मङ्गलं मङ्गलं धर्म्मस्तान् मङ्गलमशिश्रियम् ॥

Colophon. इति मलयगिरिविरचिता पञ्चसङ्ग्रहटीका समाप्ता ।
व्योमाभोगसरोवरे सुरसरित्पूरेण पूर्णे स्फुर-
त्तारामण्डलपुण्डरीकनिकरे भास्वन्निशानायकौ ।
यावच्चक्रचकोरयोः सुखकरौ नक्तन्दिवं भ्राम्यतः
श्रेयः कर्म्मणि तावदस्तु कृतिनां सौवस्तिकः पुस्तकः ॥

ग्रन्थाग्रं । १८०५० ॥ संवत् १७१२ वर्षे, शाके १५७७ प्रवर्त्तमाने ॥

विषयः । पञ्चसङ्ग्रहाभिधानजैननिबन्धस्य व्याख्यानम् ।

No. 4208. पञ्चाशकटीका। Substance, country-made paper, 11 × 3½ inches. Folia, 177. Lines, 15 on a page. Extent, 9,110 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Pancháśaka-ṭíká. Haribhadra Súri's great work, the Pancháśaka Sútra, is well-known. It has many commentaries, one of the largest being known as the Brihadvyákhyá. The present commentary follows that one closely.

Beginning. सद्दृष्टीनां समस्तार्था गोभिर्यस्य प्रकाशिताः ।
तं नत्वा श्रीमहावीरतीग्मरश्मिं तमोऽपहम् ॥
बृहद्व्याख्यानुसारेण वृत्तिं वक्ष्ये समासतः ।
पञ्चाशकाख्यशास्त्रस्य धर्मशास्त्रशिरोमणेः ॥

इह हि विस्फुरन्निखिलातिशयतेजोधामनि दुःषमाकालविपुलजलदपटलावलुप्यमानमहिमनि नितरामनुपलक्षीभूतपूर्व्वगतादिबहुतमग्रन्थसार्थतारकानिकरे पारगतगदितागमाम्बरे षडुत्तमबोधलोचनतया सुगटहीतनामधेयो भगवान् श्रीहरिभद्रस्तथाविधपुरुषार्थसिद्ध्यर्थम्—इत्यादि ।

End. श्रीहरिभद्राचार्य्यकृतताप्रकरणस्य सूचिता । विरहाङ्कत्वात् तस्येति गाथार्थः । एकोनविंशतितमपञ्चाशकवृत्तिः समाप्ता । समाप्ता चेयं शिष्यहिता नाम सितपटपटलप्रधानवाचनिकपुरुषप्रवरचतुर्दशसंख्यप्रकरणप्रबन्धप्रणयनसुगटहीतनामधेयश्रीहरिभद्रसूरिविरचितपञ्चाशकाख्यप्रकरणटीकेति ।

Colophon. (अतःपरं टीकाकर्त्तुः प्रशस्तिरेका वर्त्तते । सा तु खण्डितत्वादसमाप्तेति उपेक्षिता ।)

विषयः । हरिभद्रसूरिकृतपञ्चाशकसूत्राभिधानजैनप्रकरणस्य व्याख्यानम् ।

No. 4209. पञ्चाक्षरमाहात्म्यम् । Substance, country-made paper, 10 × 3 inches. Folia, 16. Lines, 8 on a page. Extent, 240 ślokas. Character, Nágara. Date, Sm. 1688. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Correct.

Pancháksharа-máhátmya. The sacredness of the S'aiva mantra in five letters given in the Linga Purána.

Beginning. श्रीगणपतये नमः ।
भवानीतनयोद्योतनयनानन्दकारक ।
काशीवासिजनाघौघहारिन् ढुण्ढे नमोऽस्तु ते ॥

जयति जयति काशी काशितज्ञानराशिः
शिवहरिहरधातृश्रीगणेशाम्बिकानाम् ।
निवसतिरियमाद्या तां भजध्वं भजध्वं
स्मरत नमत शूद्रां शूद्रये कीर्त्तयध्वम् ॥
ऋषय ऊचुः ।
युगानि युगमानञ्च युगधर्म्माः सनातनाः ।
युगेषु लोकचरितं सूतसम्यभिरादितः ॥
इत्यादि ।

End. यः पठेच्छृणुयाद्वापि स याति परमां गतिम् ।
यः श्रावयेद्द्विजान् शूद्रान् पञ्चाक्षरविधिक्रमम् ।
दैवे कर्म्मणि पित्रे च शिवलोके महीयते ॥

Colophon. इत्यादिमहापुराणे लैङ्गे पञ्चाक्षरमाहात्म्यं समाप्तम् ॥ संवत् । १९८८ ।

विषयः । शिवस्य लिङ्गपुराणोक्तपञ्चाक्षरमन्त्रमाहात्म्यादिकीर्त्तनम् ।

No. 4210. रुद्रभाष्यम् । Substance, country-made paper, 14×4 inches. Folia, 19. Lines, 11 on a page. Extent, 284 ślokas. Character, Nágara. Date, Sm. 1862. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Correct.

Rudra-bháshya. A commentary by Mátridatta on the rules for bathing Rudra as given in Baudháyana. The author has adopted the clebrated couplet *Yasya Niśvasitam Vedáh*, &c., used in Sáyana's and Mádhava's commentaries on Vedic works.

Beginning. श्रीगणेशाय नमः ।
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्म्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथातो रुद्रस्नानविधिं व्याख्यास्याम इति । अथ शब्दोऽधिकारार्थः । रुद्रस्नानविधिव्याख्यान मारभ्यते इत्यर्थः । अतः शब्दो हेत्वर्थः । पापक्षयादिकर्म्मणामधिकारिणामभिलषितसाधनापेक्षया यतः अत इति योजना । रुद्रस्नानविधिमित्यत्र रुद्रस्य स्नानमिति षष्ठीतत्पुरुषः ॥ इत्यादि ।

End. तद्दशांशेन सप्तसप्ततिन्यूनचतुश्चत्वारिंशत्सहस्राणि आहुतयो भवन्तीति इत्याह भगवान् बौधायन इति ॥

Colophon. इति मातृदत्तीयं रुद्रभाष्यं समाप्तम् । संवत् १८६२ ।

विषयः । बौधायनीय-रुद्रसूत्रचतुष्टयस्य व्याख्यानम् ।

No. 4211. श्रीरामपद्धतिः । Substance, country-made paper, 11 × 4 inches. Folia, 8. Lines, 12 on a page. Extent, 259 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

S'rírámapaddhati. The process of worshipping Ráma.

Beginning. श्रीगणेशाय नमः ।

श्रीगुरुं सहजानन्दं संसारार्णवतारकम् ।

श्रीरामरूपिणं मूर्ध्नि भावयेऽहं पुनः पुनः ॥

साधको ब्राह्मे मुहूर्त्ते उत्थाय रात्रिवासः परित्यज्य बद्धपद्मासनः शिरस्यधोमुखसहस्रदलकमल-मध्यस्थवर्णकर्णिकान्तःस्थचन्द्रमण्डलान्तर्गतहंसपीठे—इत्यादि ।

End. मूलेन विर्व्यापकं कृत्वा शेषं निर्माल्यं नैवेद्यं भक्तेभ्यो दत्वा किञ्चित् स्वयं गृहीत्वा सुखं विहरेदिति श्रीरामपद्धतिः ।

Colophon. (अस्य पुरश्चरणं षट्लक्षजपः ।)

विषयः । श्रीरामस्य पूजाविधिकथनादिकम् ।

No. 4212. प्रयोगवैजयन्ती । (पशुप्रश्नीया ।) Substance, country-made paper, 12 × 4 inches. Folia, 54. Lines, 9 on a page. Extent, 1,042 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Prayoga-vaijayantí. A commentary by Mahádeva on the Hiraṇyakeśí Sútra. The present work confines itself to the fourth chapter entitled the Paśupraśna.

Beginning. श्रीगणेशाय नमः ।

हविर्यज्ञेषु नियतोपक्रमास्तु निरूपिताः ।

दर्शाद्या इष्टिपर्य्यन्तास्त्वारोऽथ निरूप्यते ॥

नित्याभ्यासः पशुः पूर्वमनित्याभ्यासकर्म्मतः ।

चातुर्मास्येभ्य एवैवं सौत्रामण्याश्च पूर्व्वतः ॥

प्रश्ने चतुर्थे ऐन्द्रा + निरूढो विकृतेः सह ।

सर्व्वेभ्यः कामेभ्यः पशुबन्धोऽपि विधीयमानो दर्शितो बोधायनेनार्थवादकफलकः । आपस्तम्बे-नाच पक्षेषु प्रथमप्रश्ने प्रथमपटल एवाधिकारिनिर्णयो दर्शपूर्णमासवदेव इत्तोऽतो न व्याख्यायते ॥ इत्यादि ।

End. न्यायव्याख्याने सूत्रतात्पर्य्यं दर्शितम् । अतोऽग्रत्सूत्रे अयमेव प्रकारो ज्ञेयः ।
न्यायोपदेशयोः केचिद्विकल्पं ब्रुवते न तत् ।
युक्तं न्यायोऽनुमानन्तु श्रुतितुल्यं कथं भवेत् ॥

Colophon. इति श्रीसत्याषाढ़हिरण्यकेशिसूत्रव्याख्यायां प्रयोगवैजयन्त्यां महादेवकृतायां चतुर्थे षष्ठप्रश्ने पञ्चमः पटलः ॥ प्रश्नश्च समाप्तः ॥

विषयः । हिरण्यकेशीयषष्ठप्रश्नसूत्रस्य व्याख्यानम् ।

No. 4213. पाकयज्ञादिनिर्णयः । Substance, country-made paper, 8×3 inches. Folia, 5. Lines, 10 on a page. Extent, 90 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Pákayajnádi-nirṇaya. By Chandra-Chúra, the son of Umá-śaṅkara and the grandson Dharmeśvara. It treats of the sacrifices performed with cooked food. S'hráddha is the only ceremony in which for some hundreds of years cooked food has been used and so this work treats of Shráddha only.

Beginning. श्रीगणेशाय नमः ।
अपराह्णे प्राचीनावीती कृतप्राणायामः प्रथमप्रयोगे पिण्डपितृयज्ञमारम्भेत् तेन मासि मासि यक्ष्ये इति । ततः पिण्डपितृयज्ञेन यक्ष्ये इति सङ्कल्प्य—इत्यादि ।

End. अतः पिण्डानभ्यवहरेत् । ब्राह्मणं वा प्राशयेत् ।
सन्तिष्ठते पिण्डपितृयज्ञ इत्यलं भूयसा ॥

Colophon. धर्मेश्वरात्मजश्रीमदुमाशङ्करसूनुना ।
कृतोऽयं चन्द्रचूड़ेन पाकयज्ञादिनिर्णयः ॥ श्रीरस्तु ।

विषयः । संक्षेपेण पिण्डपितृयज्ञाभिधानश्राद्धविधिकथनम् ।

No. 4214. ऋष्यनुक्रमः । Substance, country-made paper, 13×4 inches. Folia, 12. Lines, 11 on a page. Extent, 330 ślokas. Character, Nágara. Date, Sm. 1863. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Rshyanukrama. An index of Rishis to the Rigveda S'ákala S'ákhá. This is in prose, and appears to be a different work from No. 2112 noticed in the year 1881-82.

Beginning. श्रीगणेशाय नमः ।

अथ ऋग्वेदशाकलशाखासंहिताया ऋष्यनुक्रमो लिख्यते । अग्निमीळे पुरोहितम् । मधुच्छन्दाः वैश्वामित्रः ॥ १०१ ॥ द्युत्तरशत-ऋक्पर्य्यन्तमित्यर्थः । एवं सर्व्वत्र । इन्द्रं विश्वा अवीवृधन् । जेता माधुच्छन्दसः । १८ । अग्निं दूतं वृणीमहे । मेधातिथिः काण्वः । १४२ । कस्य नूनं कतमस्यामृतानां । शुनःसेफ आजीगर्तिः । कृत्रिमो देवरातः वैश्वामित्रः ॥ ९७ ॥ इत्यादि ।

End. ऋतञ्च सत्यञ्चाभीद्धात् । अघमर्षणो माधुच्छन्दः । ३ । संसमिद्युवसे वृषन् । संवनन आङ्गिरसः । ४ । दशमं मण्डलम् । ऋक्सङ्ख्या १०५८ ॥

Colophon. इति शाकलसंहितायां ऋष्यनुक्रमः समाप्तः । संवत् १८६१ ।

विषयः । ऋग्वेदशाकलशाखीयासु ऋक्षु प्रत्येकं ऋषिकथनम् । ऋक्सङ्ख्याकथनञ्च ।

No. 4215. सौभाग्यकवचम् । Substance, country-made paper, 10 × 4 inches. Folia 6. Lines, 9 on a page. Extent, 70 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Saubhágya-kavacha. An amulet for obtaining the love of the husband.

Beginning. श्रीगणेशाय नमः । इदानीं सौभाग्यकवचमुच्यते ।

श्रीदेव्युवाच ।

कैलासशिखरे रम्ये सुखासीनं सुरार्चितम् ।
गिरिशं गिरिजा नत्वा स्तोत्रैर्वेदार्थगर्भितैः ॥
प्रणम्य परया भक्त्या ततोऽपृच्छत् कृताञ्जलिः ।
रहस्यं रक्षणकरं सर्वसम्पत्करं वद ॥

ईश्वर उवाच ।

एतत् सौभाग्यकवचं रहस्यातिरहस्यकम् ।
सौभाग्यकवचं देवि शृणु सौभाग्यदं परम् ॥
शिखायां सततं पातु महात्रिपुरसुन्दरी ।
शिरः कामेश्वरी नित्या तत्पूर्व्वं भगमालिनी ॥ इत्यादि ।

End. वश्यं भवति शीघ्रेण त्रैलोक्यं सचराचरम् ।
भूपालमहिला भूपाः किमु मायाविमोहिताः ॥

Colophon. इति नित्याषोड़शकार्णवे सौभाग्यकवचं नाम समाप्तम् ।

विषयः । शिवाशिवयोः संवादे नराणां सौभाग्यप्राप्त्युपायकथनम् ।

No. 4216. रुद्रन्यासः। Substance, country-made paper, $9\frac{1}{2} \times 3$ inches. Folia, 20. Lines, 7 on a page. Extent, 247 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Rudra-nyása. Mystic figures made with the hands in honour of Rudra.

Beginning. श्रीगणेशाय नमः।

हरि ॐ। अथातः पञ्चाङ्गरुद्राणां न्यासपूर्व्वकं जपहोमार्चनाभिषेकविधिं व्याख्यास्यामः। याते रुद्र शिवा तनूरघोरा पापकारिणी। तया नस्तनुवाशंत मया गिरिशत् ताभिचाकशीहि। शिखायै नमः। ॐ अस्मिन् महत्यर्णवेऽन्तरीचे भवा अधि। तेषां शिरसे स्वाहा। इत्यादि।

End. तन्नो रुद्रः प्रचोदयात्। ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदा शिवोम्। उत्तरतस्वच्छेश्वराय नमः निर्म्माल्यं विसृज्य। ॐ नमो भगवते रुद्राय। इति

विषयः। पञ्चाङ्गन्यासपूर्व्वकं महारुद्रप्रयोगकथनम्।

No. 4217. रामनामलेखनविधिः। Substance, country-made paper, 11×3 inches. Folia, 4. Lines, 7 on a page. Extent, 50 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India Appearance, new. Verse. Incorrect.

Rámanáma-lekhana-vidhi. This is said to be a part of the great *tántric* work entitled Rudra Yámala. It treats of the method of writing Ráma's name.

Beginning. श्रीगणेशाय नमः।

श्रीदेव्युवाच।
भगवन् सकला विद्याः श्रुतास्वाधिगता मया।
इदानीं श्रोतुमिच्छामि यत् त्वं लिखसि भैरव॥
ईश्वर उवाच।
ब्रह्मादिविबुधैः सर्वैः पृष्टो न कथितं मया।
तवाग्रे कथयाम्यद्य यतस्त्वं प्राणवल्लभा॥
न देयं परशिष्येभ्यो नास्तिकेभ्यो नचेश्वरि।
नाम्नशूषारतानाञ्च नैवानर्थप्रदायिनाम्॥ इत्यादि।

End. एतन्नामैव सर्वस्वं यदुक्तं तव वल्लभे ।
समासेन मया प्रोक्तं किमन्यच्छ्रोतुमर्हसि ॥

Colophon. इति श्रीरुद्रयामले गौरीश्वरसंवादे रामनामलेखनविधिपटलं सम्पूर्णम् ।

विषयः । रामनामलेखनविधिकथनम् । तत्सङ्ख्याविशेषे फलविशेषकीर्त्तनञ्च ।

No. 4218. रोगशान्तिः । Substance, country-made paper, 9×4 inches. Folia, 9. Lines, 9 on page. Extent, 198 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Rogaśánti. The consequences of getting fever in different days of the moon, and in different asterisms, and the method of getting rid of them by propitiatory ceremonies.

Beginning. श्रीगणेशाय नमः ।

अथ बौधायनोक्ता ज्वराद्युत्पत्तौ शान्तयः । प्रतिपदि कष्टं सद्दे + + दिनान्यष्टादश । अग्निर्देवता । अग्निरस्मीति पूजामन्त्रः । हैमी प्रतिमा । घृतधूपो घृतदीपश्च । यथा सम्भवं नैवेद्य- घृतं होमद्रव्यं शान्तिर्भवति । इत्यादि ।

End. अष्टाविंशतिदिनानि क्रमात् पीड़ा । अन्ते सुखं । आश्लेषामघापूर्वाषाढ़ा- पूर्वभाद्रपदासु पक्षे मृत्युरपि सम्भाव्यते । इति श्रीः ।

विषयः । प्रतिपदादितिथिविशेषे नक्षत्रविशेषे च ज्वराद्युत्पत्तौ तत्र तत्र भोगकालादि- कथनम् । प्रत्येकं शान्तिप्रकारकीर्त्तनञ्च ।

No. 4219. पिष्टपशुमीमांसा । Substance, country-made paper, 7×4 inches. Folia, 18. Lines, 11 on a page. Extent, 311 ślokas. Character, Nágara. Date, Sm. 1785. Place of deposit, Calcutta. Government of India. Appearance, fresh. Prose and verse. Incorrect.

Pishṭa-paśu-mímámsá. By Náráyana Paṇḍit, son of Viśvanáth Súri. It treats of animal sacrifices though it teaches that killing animals is to produce evil consequences.

Beginning. श्रीगणेशाय नमः ।

श्रीमत्पूर्णगुणार्णवस्य वदनात् साक्षात्परब्रह्मणो
नि + ता चतुराननादिदिविषद्वृन्दैः शिरोभिर्धृता ।

या लोकवितयं निजेष्टविषये सम्यङ्नियुङ्क्ते तथा
निष्ठा + नयति स्वके + जननी सा मे प्रमाणं श्रुतिः ॥

इह खलु नानाविधदुःखसङ्कटदुर्गमे संसारकान्तारे निमग्नानामल्पास्थिरसुखखद्योतिकासु द्योतमानास्वपि मनःप्रसादमनासादयतामधिकारिणां तन्निवृत्तये परमानन्दावाप्तये च सकलश्रुतिस्मृतीतिहासपुराणानां तदुपकरणीभूतब्रह्ममीमांसायाश्च सकलपुरुषार्थोत्तममोक्षप्रदभगवत्स्वरूपज्ञापनार्थं प्रवृत्तिरिति तत्त्वम्। इत्यादि।

End. तेषामेवेदं हृदयङ्गमोऽस्त्वित्यखिलमतिमङ्गलम्।
सर्व्वयज्ञेश्वरोऽनेन सर्व्वयज्ञफलप्रदः।
सर्व्वयज्ञैकभुग्विष्णुः प्रीयतां पुरुषोत्तमः॥

Colophon. इति श्रीमद्विद्वन्मुकुटरत्नश्रीविश्वनाथसूरिसूनु-नारायणपण्डितोन्नीता पिष्टपशुमीमांसा समाप्ता। संवत् १७८५।

विषयः। तत्र अनादिवासनामलिनचित्तानामपरिपक्वकषायाणां विना विषयवैराग्यं न प्रवृत्तिः। तदर्थञ्च विषयानित्यत्वमुपदिश्यमानमपि तावच्चेतसि न प्रतिबिम्बते यावन्न तत्रत्यं मालिन्यमपसरतीत्यत आदर्शस्येवान्तःकरणस्य शुद्धिरपेक्षितेति तदर्थं नित्यनैमित्तिककर्म्मविषयः प्रवर्त्तन्ते। कर्म्मणा ह्यन्तःकरणशुद्धौ सत्यां तत्र शुद्धादर्शइव शास्त्रार्थोपदेशः प्रतिफलति। तथाच श्रुतिः। कर्म्मणा ज्ञानमाप्नोति ज्ञानेनामृतो भवतीति। तच्च कर्म्म द्विविधम्। विहितानुष्ठानं प्रतिषिद्धवर्ज्जनञ्चेति। तेषु तेषु च कर्म्मसु सत्यधिकारे अननुष्ठानात् प्रणश्यत्यधिकारः। तत्र अर्थी खलु सामर्थ्यमपेक्षते। सामर्थ्यं पुनर्द्विविधम्। अथ सहकारिसामर्थ्याच्च पदार्थानां विचित्रशक्तिमत्त्वासद्भावः। तत्र कलौ अग्निहोत्राद्यनुष्ठानावश्यकतानिरूपणम्। तत्रापि सम्भावितानर्थहेतुहिंसाविषयान् छागादिपशून् अविधाय तत्स्थाने तत्तद्देवताकान् पिष्टपशून् वा घृतपशून् वा कृत्वा यागं समापयेदिति पिष्टपशुविधिविवेचनम्।

No. 4220. पारायणस्तोत्रम्। Substance, country-made paper, 10 × 4 inches. Folia, 1. Lines, 11. Extent, 12 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Correct.

Páráyaṇa-stotra. Páráyana is a technical religious term. It means reciting a book from the beginning to the end. The present work treats of the beauty and excellence of Tripurá Sundarí, a form of Kálí worshipped in one of the three Mandalas, into which the Tantras divide India.

Beginning. श्रीगणेशाय नमः ।

शिवां पद्मासनारूढ़ां शुद्धस्फटिकसन्निभाम् ।

वन्दे वाग्देवतां देवीं महात्रिपुरसुन्दरीम् ॥

शैलाधिराजतनयां शङ्करप्रियवल्लभाम् ।

अवणेन्दुनिभां (?) वन्दे महात्रिपुरसुन्दरीम् ॥

सर्व्वलोकप्रियकरीं सर्व्वभूतेषु संस्थिताम् ।

सर्व्वैश्वर्य्यप्रदां वन्दे महात्रिपुरसुन्दरीम् ॥ इत्यादि ।

End. इति त्रिपुरसुन्दर्य्या इष्टकं यः पठेन्नरः ।

तस्य श्री-राय्-रारोग्यसत्सन्तान-समृद्धिदम् ॥

Colophon. इति ज्ञानार्णवे पारायणस्तोत्रं सम्पूर्णम् ॥

विषयः । स्तुतिकथनव्याजेन त्रिपुरसुन्दर्य्या रूपगुणमाहात्म्यादिकथनम् ॥

No. 4221. फाल्गुनकृष्णचतुर्थीव्रतम् । Substance, country-made paper, $9 \times 4\frac{1}{2}$ inches. Folia, 5. Lines, 13 on a page. Extent, 76 ślokas, Character, Nágara. Date, Sm. 1837. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

Phálguna-kṛiśhṇa-chaturthí-vrata. The religious ceremony to be performed on the fourth day of the waning moon. This is said to be a part of the Brihannáradiya Purána.

Beginning. श्रीगणेशाय नमः ।

अरण्ये वर्त्तमानं तं पाण्डुपुत्रं युधिष्ठिरम् ।

सबान्धवं सुखासीनमाययौ व्यास आदरात् ॥

तं दृष्ट्वा मुनिशार्दूलं व्यासं प्रत्युद्ययौ नृपः ।

मधुपर्कयुतं चार्घ्यं दत्त्वा तस्मै ह्युवाच तम् ॥

अद्य मे सफलं जन्म भवतागमनं कृतम् ॥ इत्यादि ।

End. एवमुक्त्वा ततो व्यासस्तत्रैवान्तरधीयत ।

युधिष्ठिरस्तु तत् सर्व्वमकरोन्मुनिभाषितम् ॥

तेन व्रतप्रभावेण स्वराज्यं प्राप्तवान् ध्रुवम् ।

हत्वा रिपुगणान् सर्व्वानवाप्तः सकलां महीम् ॥

बुभुजे मेदिनीं राजा पुत्रपौत्रसमन्वितः ॥

Colophon. इति श्रीबृहन्नारदीये फाल्गुनकृष्णचतुर्थीव्रतं समाप्तम् ॥
संवत् । १८२७ ।

विषयः । फाल्गुनकृष्णचतुर्थीव्रतविधिकथनम् । तत्कथाकीर्त्तनञ्च ।

No. 4222. मेघमाला । Substance, country-made paper, 13 × 4 inches. Folia, 22. Lines, 11 on a page. Extent, 576 ślokas. Character, Nágara. Date, Sм. 1865. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Megha-málá. An astrological work treating of the knowledge of months, days and *tithis*. It treats of the process of foretelling rains prognosticating famines, &c.

Beginning. श्रीगणेशाय नमः ।

अथ मेघमालायाः प्रारम्भः ।

अथातः संप्रवक्ष्यामि फलं योगसमुद्भवम् ।
माासवारतिथीनाञ्च सम्यग्ज्ञानप्रकाशकम् ॥
प्रतिपदि रविवारश्चैत्रमासे यदि स्या-
न्न भवति बहुवृष्टिर्दुःखिता लोकसंघाः ।
अमृतकिरणवारो ज्ञा + + वाक्पतीनां
भवति ननु धरित्री शस्यतो + मिपूर्णा ॥ इत्यादि ।

End. मीनान्ते वृश्चिकान्ते च वृषे कुम्भे च मेषगे ।
यावत् सौरिर्गुरो तिष्ठेत् तावद्दुर्भिक्षलक्षणम् ॥
शनिरङ्गारको भानुरमावस्यान्तु माधवे ।
दुर्भिक्ष + + + घोरं प्रेतपूर्णा वसुन्धरा ॥

Colophon. इति कालान्तरेण शुभाशुभलक्षणं सम्पूर्णं । इति मेघमालायां मयूरचित्रकं समाप्तम् । संवत् १८६५ ।

विषयः । भविष्यद्वृष्टिज्ञानोपायकथनम् । भाविदुर्भिक्षादिज्ञानोपायकीर्त्तनञ्च ।

No. 4223. प्रयोगरत्नमाला । Substance, country-made paper, 9 × 4 inches. Folia, 42. Lines, 9 on a page. Extent, 622 ślokas. Character. Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Prayogaratna-málá. This is the name given to the commentary to the sacrificial section of Apastamba's work. The present commentary is by Vishnu Bhatta. There is another commentary of the same name or the same work by Caṇḍapa. The codex before us contains the commentary on the Agnihotra Praśna only.

Beginning. श्रीगणाधिपतये नमः ।

ॐ नमो भगवते सदाशिवाय नमः ।

यो वेदवपुराचारावयवो दर्शनेन्द्रियः ।

मामीश्वरन्तराखे तं विज्ञानं गुरुं भजे ॥

कर्म्मब्रह्माध्वनीनस्य मन्त्रिभूपतिभूपतेः ।

व्याख्याग्निहोत्रप्रश्नस्य विष्णुभट्टेन तन्यते ॥

अग्न्याधेयानन्तरमग्निहोत्रं व्याचिख्यासुरधिकारं दर्शयति । अग्निहोत्रं व्याख्यास्यामः । अग्निहोत्रशब्दः कर्म्मनामधेयं । इत्यादि ।

End. सत्यवादिनोराजन्यस्य जुहुयाद्वाग्निहोत्रमध्वर्य्युरिति ।

इत्थं राजाग्निहोत्रान्तमन्त्रतन्त्रसुगन्धिभिः ।

सूक्तिप्रसूनैः पुष्णातु पुमर्थान् पुरुषोत्तमः ॥

Colophon. इत्यापस्तम्बीयाध्वरतन्त्रसूत्रतन्त्रव्याख्यायां प्रयोगरत्नमालायां षष्ठे प्रश्ने चतुर्थः पटलः । शुभं भूयात् ।

विषयः । आपस्तम्बीयाग्निहोत्रप्रश्नसूत्रस्य व्याख्यानमुखेन प्रयोगकथनम् ।

No. 4224. प्रदोषव्रतप्रयोगः । Substance, country-made paper, 10 × 3½ inches. Folia, 6. Lines, 14 on a page. Extent, 220 ślokas. Character. Nágara. Date, ? Place of deposit, Calcutta, Government of India, Appearance, decayed. Verse. Correct.

Pradosha-vrata-prayoga. Treats of a ceremony to be performed by females at dusk for obtaining good fortune. This is said to be a part of the Skandapurána.

Beginning. श्रीगणेशाय नमः ।

अथ प्रदोषोद्यापनम् । स्कान्दे पार्व्वत्युवाच ।

देव केन विधानेन प्रदोषोद्यापनं बुधैः ।

विधातव्यं नरैःस्त्रीभिः सन्तानसुखसिद्धये ॥

ईश्वर उवाच ।
त्रयोदश्यां मन्दवारे तदुद्यापनमाचरेत् ।
आचार्य्यं वरयेदादौ ब्राह्मणांस्तु त्रयोदश ॥
तेषां सम्पूजनं कुर्य्यान्मण्डलं तत्र कारयेत् ।
वेदिका तत्र कर्त्तव्या मण्डपे च सुशोभने ॥ इत्यादि ।

End. भवेन्न तस्य दारिद्र्यं जन्मान्तरशतेष्वपि ।
ज्ञानैश्वर्य्यसमायुक्तः सोऽन्ते शिवपुरं व्रजेत् ॥

Colophon. इति श्रीस्कन्दपुराणे ब्रह्मोत्तरखण्डे प्रदोषव्रतकथा समाप्ता ।

विषयः । स्त्रीभिः धनधान्यसन्तानाद्यर्थं प्रदोषव्रतानुष्ठानं कर्त्तव्यमिति तद्व्रतमाहात्म्यकथनमुखेन तस्य विधानकथनम् । तदुद्यापनविधिकथनम् । तद्व्रतकथाकीर्त्तनञ्च ।

No. 4225. **रामसहस्रनामस्तोत्रम् ।** Substance, country-made paper. 14 × 1½ inches. Folia, 11. Lines, 10 – 12 on a page. Extent, 277 ślokas, Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India, Appearance, new. Verse. Incorrect.

Ráma-sahasranáma-stotra. The thousand names of Ráma as given in Rudra Yámala tantra in a dialogue between Rudra and Párvatí.

Beginning. श्रीगणेशाय नमः । श्रीरामचन्द्राय नमः ।
कैलासशिखरे रम्ये' नानाधातुविचित्रिते ।
नानाद्रुमलताकीर्णे नानापक्षिगणावृते ॥
नानापक्षिलतागुल्मवेष्ठिते प्रमथावृते ।
देवदानवगन्धर्व्वकिन्नरैरुपशोभिते ॥
मन्दमारुतसंवीते पार्व्वतीपरमेश्वरौ ।
उपविश्य कथां शश्वच्चक्रतुस्तौ मुदान्वितौ ॥
भक्त्या शम्भुं प्रणम्याथ पार्व्वती परिपृच्छति ।
देवदेव महेशान सर्वागमविशारद ॥
त्वमेव शरणं नाथ त्राहि मां दुःखसागरात् ।
नाम्नां सहस्रं रामस्य ब्रूहि मे प्रमथाधिप ॥ इत्यादि ।

End. रामभद्रप्रसादेन विमला नाम पार्वती ।
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिञ्च विन्दति ॥

Colophon. इति श्रीरुद्रयामले रुद्रपार्वतीसंवादे रामसहस्रनामस्तोत्रं सम्पूर्णम् ।

विषयः । शिवाशिवयोः संवादेन श्रीरामस्य गुणमाहात्म्यादिप्रकटनपूर्वकं तस्य सहस्रनामकथनम् ।

No. 4226. महान्यासः । Substance, country-made paper, 10×4 inches. Folia, 17. Lines, 8 on a page. Extent, 272 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Mahányása. The process of reciting the S'atarudrí Súkta.

Beginning. श्रीगणेशाय नमः ।

अस्य रुद्रस्य प्रश्नस्यानुष्टुप्छन्दसः अघोर ऋषिः सङ्कर्षणमूर्त्तिस्वरूपो योऽसावादित्यः परपुरुषः स एष रुद्रो देवता अग्निक्रतुचरमायामिष्टिकायां शतरुद्रीयजपे विनियोगः । (?)

End. अग्निर्वायुः सूर्य्यश्चन्द्रमा दिश आपः पृथिव्योषधिवनस्पतय इन्द्रः पर्ज्जन्य ईशान आत्मा पुनर्मे नयोदश । उत्तरन्यासः । सुसारथि० । हृदयाय० । यज्ञेन० । शिरसे० । + + + । शिखायै० । श्रीः ।

Colophon. अतःपरं खण्डितम् ।

विषयः । महारुद्रप्रयोगविधिकथनम् ।

No. 4227. विश्वेश्वराष्टकम् । Substance, country-made paper, 7×4 inches. Folia, 5. Lines, 5 on a page. Extent, 23 ślokas Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Viśveśvaráshṭaka. Eight verses in honor of Viśveśvara the presiding deity of Benarés.

Beginning. श्रीविश्वेश्वराय नमः ।

गङ्गातरङ्गरमणीयजटाकलापं
गौरीनिरन्तरविभूषितवामभागम् ।
नारायणं प्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ १ ॥
वाचामगोचरममेयगुणस्वरूपं
वागीशविष्णुसुरसेवितपादपीठम् ।

वामेन विग्रहभरेण कलत्रवन्तं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ १ ॥

End. श्रीविश्वनाथ करुणाकर शूलपाणे
शम्भो गिरीश शशिशेखर चन्द्रमौले ।
श्रीनीलकण्ठ मदनान्तक विश्वमूर्त्ते
गौरीपते मयि निधेहि कृपाकटाक्षम् ॥ ८ ॥
वाराणसीपुरपतेः परमेश्वरस्य
व्यासोक्तमष्टकमिदं पठते मनुष्यः ।
विद्याः श्रियं विपुलसौख्यमनन्तकीर्त्तिं
सम्प्राप्य देहनिलयं लभते च मोक्षम् ॥ ९ ॥

Colophon. इति वेदव्यासविरचितं श्रीविश्वेश्वराष्टकं समाप्तम् ।

विषयः । स्तुतिव्याजेन श्रीमद्विश्वेश्वरस्य रूपगुणमाहात्म्यादिवर्णनम् ॥

No. 4228. मणिकर्णिकाष्टकम्। Substance, country-made paper, 7×3 inches, Folia, 5. Lines, 5 on a page. Extent, 23 ślokas. Character Nágara. Date, ? Place of deposit, Calcutta, Government of India Appearance, new. Verse. Generally correct.

Manikarnikáshṭaka. Eight verses in honor of Maṇikarṇiká the sacred burning ground at Benares by the great S'ankarácharya.

Beginning. श्रीमणिकर्णिकादेव्यै नमः ।
त्वत्तीरे मणिकर्णिके हरिहरौ सायुज्यमुक्तिप्रदौ
वादं तौ कुरुतः परस्परमुभौ जन्तोः प्रयाणोत्सवे ।
मद्रूपो मनुजोऽयमस्तु हरिणा प्रोक्तः शिवस्तत्क्षणे
तन्मध्याद्भृगुलाञ्छनो गरुड़गः पीताम्बरो निर्गतः ॥ १ ॥
इन्द्राद्यास्त्रिदशाः पतन्ति नियतं भोगक्षये ते पुनः,
जायन्ते मनुजास्ततोऽपि पशवः कीटाः पतङ्गादयः ।
ये मातर्मणिकर्णिके तव जले मज्जन्ति निष्कल्मषाः
सायुज्येपि किरीटकौस्तुभधरा नारायणाः स्युर्नराः ॥ २ ॥

End. कृच्छ्रैः कोटिशतैः स्वपापनिधनैर्यच्चाश्वमेधैः फलं
तत्सर्वं मणिकर्णिकास्नपनजं पुण्यप्रतिष्ठं भवेत् ।

स्नात्वा स्तोत्रमिदं नरः पठति यः संसारपाथोनिधिं
तीर्त्त्वा पल्वलवत् प्रयाति सदनं तेजोमयं ब्रह्मणः ॥ ८ ॥

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचितं मणिकर्णिकाष्टकं समाप्तम् ।

विषयः । स्तोत्रव्याजेन मणिकर्णिकामाहात्म्यादिकथनम् ।

No. 4229. **अन्नपूर्णाष्टकम् ।** Substance, country-made paper, 7×3 inches. Folia, 5. Lines, 5 on a page. Extent, 23 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government, of India, Appearance, new. Verse. Incorrect.

Annapúrnáshṭaka. Eight verses in honor of Anna Púrná by the same author.

Beginning. श्रीमदन्नपूर्णायै नमः ।
नित्यानन्दकरी वराभयकरी सौन्दर्य्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी ।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥
नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमानविलसद्वक्षोजकुम्भान्तरी ।
काश्मीरागुरुवासितारुचिकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

End. सर्वत्राणकरी महावलकरी विश्वेश्वरी श्रीधरी
साक्षान्मोक्षकरी निरामयकरी विद्यार्थविद्याधरी ।
आयुः-कीर्त्ति-यशः-पराक्रमकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचितं श्रीमदन्नपूर्णाष्टकस्तोत्रं समाप्तम् ।

विषयः । स्तुतिकथनव्याजेन अन्नपूर्णाया माहात्म्यादिकीर्त्तनम् ।

No. 4230. **प्रदोषव्रतनिर्णयः ।** Substance, country-made paper, 11×4 inches. Folia, 5. Lines, 9 on a page. Extent, 81 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose, and Verse.

Pradoshavrata-nirṇaya. Treats of a ceremony to be performed on the thirteenth day of the moon at dusk, the principal ceremonial being the worship of Śiva. This appears to be a part of the Brahmottara Khaṇḍa of the Skanda Purána.

Beginning. श्रीगणेशाय नमः ।

अथ प्रदोषनिर्णयः । तत्र प्रदोषव्रतं ब्रह्मोत्तरखण्डे ।

पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा ।
घटिका त्रिरस्तमयात् पूर्वं स्नानं समाचरेत् ॥
शुक्लाम्बरधरो भूत्वा वाग्यतो नियमान्वितः ।
कृतसन्ध्याजपविधिः शिवपूजां समारभेत् ।

अत्र त्रयोदशी प्रदोषव्यापिनी ग्राह्या । तत्रैव पूजाविधानात् । प्रदोषप्रमाणं स्कान्दे ।

त्रिमुहूर्त्तः प्रदोषः स्याद् भानावस्तंगते सति ॥

मदनरत्ने व्यासः ।

नक्तान्तु तत्र कर्त्तव्यमिति शास्त्रविनिश्चयः । इति ।

End. अस्मिन् दिवा नक्तभोजने उत्तमोत्तमसुहूर्त्तः मध्यमोपान्तः । ततः प्राचीनो जघन्य इति ।

Colophon. इति दिवासौरनक्तप्रदोषनिर्णयः ।

विषयः । चतुर्दश्यां शिवपूजाव्रते प्रदोषनिरूपणम् । तत्र नक्तादिकालनिरूपणम् । त्रयोदश्यां शिवव्रतारम्भकालादिनिरूपणम् । वारादियोगे प्रदोषविधिकथनञ्च । इति शम् ।

No. 4231. प्रशस्तिकाप्रकरणम् । वा प्रशस्तिविधिपरम्परा । Substance country-made paper, 10×4 inches. Folia, 5. Lines, 7 on a page. Extent, 70 ślokas. Character. Nágara. Date, ? Place of deposit, Calcutta, Government of India, Appearance, new. Prose and Verse. Incorrect.

Praśastiká,-prakaraṇa, or Praśasti-vidhi-parampará. A letter-writer or rather the form of writing superscriptions to letters.

Beginning. श्रीगणेशाय नमः ।

अथ प्रशस्तिकाप्रकरणम् । तत्र प्रशस्तिनाम्नः पूर्व्वं श्रीशब्दसङ्ख्यानियम उक्तोऽभियुक्तैः ।

षड्गुरोः स्वामिनः पञ्च द्वौ भृत्ये चतुरो रिपौ ।

श्रीमब्दास्तु त्रयो मित्रे एकैकं पुत्रं भार्य्ययोः (?) ॥

तत्रादौ राज्ञः प्रशस्तयः। स्वस्ति श्रीमत्समस्तानन्दमन्दिरगुणवृन्दसुन्दरमुकुन्दपदारविन्दमकरन्दविन्दुमिलितमानसवशंवदसकलपुरुषार्थेषु सकलार्थिमनोरथवितरणदक्षीकृतकल्पद्रुमादिदर्पेषु (?)। इत्यादि।

End. स्वस्ति श्रीमदुद्दामप्रेमहेमभूषितास्मदादि भक्तजनेषु प्राणप्रकृतिषु नेत्रयोरधिष्ठानेषु कर्णयोरधिदैवेषु गिरामागारेषु नैयायिकेष्विव प्रकटितसकलप्रमाणेषु श्रीमद्गुरुचरणसरोजेषु।

Colophon. इति प्रशस्तिविधिपरम्परा समाप्ता।

विषयः। प्रशस्तिलेखनविधिकथनम्।

No. 4232. नृसिंहपरिचर्य्या। Substance, country-made yellow paper, 9¾ × 3½ inches. Folia, 6. Lines, 9 on a page. Extent, 126 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Nṛisiñhaparicharyyá. On the worship of Nṛisinha. An incarnation of Vishnu and the method of placing the Pavitra or Strainer in his hand at the time of worship. This appears to be a part of a *Tantrik* work as its chapters are entitled *Patalas*.

Beginning. श्रीगणेशाय नमः।

अथ श्रौतस्मार्त्तमार्गेण नृसिंहोपासकानां बौधायनोक्तसंगृह्य महासंहितादि वा (?) गुणोपसंहृतिन्यायात् पवित्रादिविधिं ब्रुवे। श्रावणेसिं हैमेन न रौप्येषा (?) ताम्रेण वा पवित्राणि कार्य्याणि।

End. श्रीभूते तत्तन्मूलमन्त्रेण देवाय दमनकं समर्प्य महापूजां कृत्वा देव देवेति कर्म्म निवेद्य गुर्वादीन् संपूज्य बन्धुभिः सह भुञ्जीतेति सायं साधारणो विधिः। विशेषतस्तु तत्तत्कल्पोक्तो गृहीतव्यः।

Colophon. इति नृसिंहपरिचर्य्यायां पञ्चमः पटलः।

विषयः। नृसिंहपरिचर्य्यायां पवित्रारोपणविधिस्तत्प्रयोगः नृसिंहपूजा चाभिहिता।

No. 4233. निर्णयसिन्धुः, वा निर्णयकमलाकरः। Substance, country-made paper, 17 × 6½ inches. Folia, 176. Lines, 17 on a page. Extent, 11,963 ślokas. Character, Nágara. Date, Sм. 1822. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and Verse. Generally correct.

Nirṇaya-sindhu *alias* **Nirṇaya-kamalákara**. This work was compiled in the year 1638 of the Vikrama era corresponding to 1572 A. D., by Kamalákara the son of Rámakrishṇa, the grandson of Bhatta Náráyaṇa and the great-grandson of Ráméśvara. It is a standard work on Hindu law in the North Western Provinces and the Punjab. It treats of the auspicious moments for the performance of various Hindu ceremonies and the method and occasion of performing them. It treats of the Saṃskáras or the ceremonies for the purification of the soul of a brahmana, of the ceremonies for the consecretion of temples, images, wells, tanks, trees, &c., and of the daily and occasional duties of brahmans.

Beginning. श्रीगजाननगुरुसरस्वतीभ्यो नमः ।
कारुण्यैकनिकेतं रामं सीतालतायुक्तम् ।
विश्वामित्रान्ववायव्रततिसमालम्बशाखिनं वन्दे ॥
लक्ष्मीसहायं कल्पद्रुतलरञ्जितगोकुलम् ।
बर्हापीडं घनश्यामं महः किञ्चिदुपास्महे ॥
वेदार्थधर्म्मरक्षार्थे मायामानुषरूपिणम् ।
पितामहं हरिं वन्दे भट्टनारायणाह्वयम् ॥
यत्पादसंस्मृतिः सर्वमङ्गलप्रतिभूर्मता ।
तान् भट्टरामकृष्णाख्यान् श्रीतातचरणान् नुमः ॥
सर्वकल्याणसन्दोहनिदानं यत्पदद्वयम् ।
युनदीसोदरामम्बामुमाख्यां नौमि सादरम् ॥
बिन्दुमाधवपादाब्जमालम्बीकृतविग्रहम् ।
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥
हेमाद्रिमाधवमते प्रविचार्य्य सम्य-
गालोच्य तत्त्वमथ तीर्थकृतां परेषाम् ।
श्रीरामकृष्णतनयः कमलाकराख्यः
काले यथामति विनिर्णयमातनोति ॥
सन्ति यद्यपि विद्वांसस्तन्निबन्धाश्च कोटिशः ।
तथाप्यमुष्य वैदग्धीं किञ्चिद्विज्ञातुमीशते ॥

तत्र संक्षेपतः कालः षोढ़ा ।

End. तद्विधिरन्यश्च विशेषः प्रागुक्त इत्यलं बहुना ॥

एवं निरूपितमिदं गहनन्तु धर्म-
तत्त्वं विचार्य्य वचनैश्च नयैश्च सम्यक् ।
तद्दोषदृष्टिमपहाय विवेचनीयं
विद्वद्भिरित्यविरतं प्रणतोऽस्मि तेषु ॥
— — — — — — — ।
यो भाट्टतन्त्रगहनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्म्मभेत्ता ।
योऽत्र श्रमः किल कृतः कमलाकरेण
प्रीतोऽमुनास्तु सुकृती बुधरामकृष्णः ॥
श्रीभट्टरामेश्वरसूरिसूनु श्रीभट्टनारायणसूरिसूनोः ।
श्रीरामकृष्णस्य सुतः कृतीमं व्यधान्निबन्धं कमलाकराख्यः ॥
नानानिर्णयवक्त्रान्निर्णयसिन्धुः प्रोच्यतां विबुधैः ।
निर्णयसरोजवक्त्रान्निर्णयकमलाकरोऽप्यस्तु ॥
वसुधातुऋतुभूमिते गतेऽब्दे
नरपतिविक्रमतोऽथ याति रौद्रे ।
तपसि शिवतिथौ समापितोऽयं
रघुपतिपादसरोरुहेऽर्पितश्च ॥
जगति सकलविद्यासिन्धुसुष्टि + वानां
परभणितिपरीक्षा युज्यते सज्जनानाम् ।
तदिह मम + बन्धे दूषणं भूषणं वा
यदि भवति विदग्धैस्तद्ध्रुवश्यं विमृश्यम् ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणश्रीमद्रामेश्वरभट्टसूरिसूनुनारायणभट्टसूत विद्वन्मुकुटहीराङ्कुरश्रीरामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिन्धौ तृतीयः परिच्छेदः समाप्तः । समाप्तश्चायं निबन्धः । संवत् १८२२ ॥

विषयः । अब्दशब्दनिर्वचनपूर्वकं अब्दभेदनिरूपणम् । अयननिर्णयः । ऋतुनिर्णयः । मासभेदादिनिरूपणम् । वेधस्वरूपादिकथनम् । एकभक्तनिरूपणादिकम् । अयाचितादिनिर्णयः । नक्तव्रतनिरूपणम् । व्रताधिकारिनिरूपणम् । तत्कालादिनिरूपणम् । तदुद्यापने विशेषकथनम् । व्रतत्यागे प्रायश्चित्तकथनम् । व्रतत्यागप्रायश्चित्तकथनम् । रजस्वलादेर्व्रते प्रतिनिधिविवेकः । प्रतिपदादितिथिस्वरूपकथनपूर्वकं तत्र तत्र कृत्यविशेषकथनम् । तत्र एकादशीव्रताशक्तौ भक्ष्यनिरूपणम् । व्रतघ्ननिरूपणपूर्वकं तत्र तत्र प्रायश्चित्तकथनम् । अव्रतघ्नादिनिरूपणम् । सूतकादौ व्रतविधि-

कथनम्। अष्टमहाद्वादशीनिरूपणम्। हरिवासरनिरूपणम्। व्यतीपातादिलक्षणकथनम्। इष्टिकालनिरूपणम्। अन्वारम्भणीयादिनिरूपणम्। विकृतिनिर्णयः। सोमकालनिर्णयः। आधानकालनिर्णयः। पिण्डपितृयज्ञनिरूपणम्। निरग्नेर्दर्शनिरूपणम्। साग्निकनिरग्निकस्वरूपादिकथनम्। ग्रहणनिरूपणम्। पुरश्चरणादिविधिकथनम्। समुद्रस्नानविधिकथनादिकम्। अथ चैत्रादिक्रमेण द्वादशमासकृत्यनिरूपणम्। तत्र तत्र विशेषेण चैत्रे नवरात्रविधिकथनम्। श्रीरामनवमीनिरूपणम्। दोलोत्सवनिर्णयः। वैशाखे समुद्रस्नानविधिकथनम्। बौद्धावतारनिर्णयः। ज्यैष्ठे रम्भाव्रतादिकथनम्। आषाढे रथोत्सवादिविधिकथनम्। शाकादिव्रतविधानम्। तप्तमुद्राधारणादिविधिकथनम्। कोकिलाव्रतविधिकथनम्। श्रावणे उपाकर्मविधिकथनादिकम्। रक्षाबन्धनादिविधिकथनम्। हयग्रीवोत्पत्तिकथनादिकम्। भाद्रे गोप्रसवशान्तिकथनम्। जन्माष्टमीविवेचनम्। प्रतिमासकृष्णाष्टमीविधिकथनम्। वामनावतारनिर्णयः। दुग्धव्रतादिकथनम्। आश्विने, महालयाश्राद्धनिरूपणम्। अन्वष्टकाविधिकथनम्। नवरात्रविधिकथनम्। कुमारीपूजनविधिकथनम्। चण्डीपाठविधिकथनम्। वेदपारायणविधिकथनम्। उपाङ्गललिताव्रतादिकथनम्। बलिहोमादिविधिकथनम्। शतचण्डीविधिकथनम्। सहस्रचण्डीविधिकथनम्। नवरात्रपारायणविधिकथनम्। विजयादशमीकृत्यकथनम्। कार्त्तिके कार्त्तिकस्नानादिविधिकथनम्। तुलसीकाष्ठमालाविधिकथनम्। द्विदलव्रतादिकथनम्। अलक्ष्मीनिःसारणविधिकथनम्। गोक्रीड़नविधिकथनम्। बोधनीविधिकथनम्। मत्स्यावतारनिर्णयः। त्रिपुरोत्सवविधिकथनम्। काम्यवृषोत्सर्गविधिकथनम्। मार्गशीर्षे दत्तात्रेयोत्पत्तिनिर्णयः। अष्टकादिविधिकथनम्। पौषे, उत्सर्जनविधिकथनम्। अर्द्धोदययोगनिरूपणम्। माघे, स्नानविधिकथनम्। प्रयागस्नानविधिकथनम्। श्रीपञ्चमीविधिकथनम्। रथसप्तमीविधिकथनम्। फाल्गुने,—शिवरात्रिविधिकथनम्। होलिकाविधिकथनम्। वसन्तोत्सवविधिकथनम्। चूतकुसुमप्राशनविधिकथनम्। प्रथमरजोदर्शने तिथ्यादिफलकथनम्। तत्र तत्र शान्तिकथनम्। गर्भाधानविधिकथनम्। आतुरस्नानादिविधिकथनम्। पुंसवनसीमन्तोन्नयनादिविधिकथनम्। सूतिकागारप्रवेशादिविधिकथनम्। जातकर्मादिविधिकथनम्। षष्ठीपूजादिविधिः। दत्तपुत्रग्रहणादिविधिः। यमयोः संस्कारविधिकथनम्। नामकर्मदोलारोहदुग्धपानकर्णवेधताम्बूलभक्षणादिविधिकथनम्। निष्क्रमणविधिकथनम्। उपवेशनविधिकथनम्। अन्नप्राशनविधिकथनम्। अब्दपूर्त्तिविधिकथनम्। कटिसूत्रबन्धविधिकथनम्। चौलविधिकथनम्। पञ्चशिखिविवेचनम्। विद्यारम्भविधिकथनम्। धनुर्विद्यारम्भविधिकथनम्। उपनयनविवेचनम्। तत्र ज्येष्ठमासादिविवेकः। पुनरुपनयनकालनिरूपणम्। कुण्डगोलकादेरुपनयनविधिकथनम्। भिक्षाविधिकथनम्। संस्कारलोपे प्रायश्चित्तकथनम्। युगपत्संस्कारविधिकथनम्। सन्ध्याविधिकथनम्। उपनयनाग्निविधिकथनम्। ब्रह्मयज्ञारम्भविधिकथनम्। ब्रह्मदण्डादिविधिकथनम्। संस्कारलोपप्रायश्चित्तकथनम्। ब्रह्मव्रतलोपे प्रायश्चित्तकथनम्। उपवीतनाशे प्रायश्चित्तकथनम्। समावर्त्तनविधिकथनम्। स्नातक-

व्रतकथनम्। कुरिकाबन्धकथनम्। विवाहनिरूपणम्। मातुलकन्यापरिणयनिरूपणम्। दत्तक-सापिण्ड्यनिरूपणम्। गोत्रप्रवरनिर्णयः। कुम्भविवाहविधिकथनम्। अश्वत्थविवाहविधिकथनम्। विष्णुमूर्त्तिदानानन्तरविवाहविधिकथनम्। सोदरयोर्विवाहनिर्णयः। ऋतुमतीविवाहविधिकथनम्। ऋतुप्रायश्चित्तकथनम्। पैशाचादिविवाहविधिकथनम्। विवाहमण्डपादिविधिकथनम्। वाग्दानोत्तरं वरस्य देशान्तरादिगमने विधिनिरूपणम्। कन्यादानादिविधिकथनम्। गृहप्रवेशहोम-विधिकथनम्। औपासनारम्भकालनिरूपणम्। द्विरागमनकालादिनिरूपणम्। आधानादिविधि-कथनम्। परिवेदनविधिविवेचनम्। शूद्रसंस्कारविधिकथनम्। जलाशयादिविधिकथनम्। कूपाद्युत्सर्गविधिकथनम्। वृक्षारोपणादिविधिकथनम्। मूर्त्तिप्रतिष्ठादिविधिकथनम्। प्रतिमाभेद-कथनम्। शिवलिङ्गभेदादिकथनम्। तत्र तत्र अधिकारनिरूपणम्। त्रिपुण्ड्रादिविधिकथनम्। रुद्राक्षधारणादिविधिकथनम्। जीर्णोद्धारविधिकथनम्। पुष्पादेः पर्य्युषितत्वादिविवेचनम्। अथ कृषिकालादिनिरूपणम्। धान्यसङ्ग्रहादिविधिकथनम्। नववस्त्रालङ्कारादिधारणनिरूपणम्। गजाद्यारोहणनिर्णयः। नृत्यारम्भनिरूपणम्। राजदर्शनविधिकथनम्। क्रयविक्रयादिनिरूपणम्। सेतुबन्धनादिविधिकथनम्। गजदन्तच्छेदादिविधिकथनम्। निःक्षेपकालनिरूपणम्। ऋणमोक्षादि-विधिकथनम्। राजमुद्रादिविधिकथनम्। नौकाकृत्यनिरूपणम्। शयनासनभोगविधिकथनम्। श्मश्रुकर्म्मनिर्णयः। नवान्नविधिकथनम्। नवफलादिभक्षणविधिकथनम्। होमनिरूपणम्। ज्वरादिशान्तिविधिकथनम्। भैषज्यकालनिरूपणम्। अथ दन्तधावनादिविधिकथनम्। स्नानादि-विधिकथनम्। गृहारम्भकालनिरूपणम्। कलिवर्ज्ज्यनिरूपणम्। अथ श्राद्धलक्षणादिकथनम्। गयाश्राद्धादिविधिकथनम्। श्राद्धनिषिद्धदेशादिकथनम्। श्राद्धकालादिनिरूपणम्। स्त्रीश्राद्धे विशेष-कथनम्। वैश्वदेवविधिकथनम्। नित्यश्राद्धविधिकथनम्। रात्रौ श्राद्धविधिकथनम्। श्राद्धानुकल्प-विधिकथनम्। वृषोत्सर्गविधिकथनम्। एकोद्दिष्टपार्व्वणादिविधिविवेचनम्। अथ तर्पणविधिकथनम्। तीर्थश्राद्धादिविधिकथनम्। तत्र वपनादिविधिविवेचनम्। अथ अशौचनिरूपणम्। अनुगमना-दिविधिकथनम्। आत्मघाते प्रायश्चित्तकथनम्। नारायणबलिविधिकथनम्। सन्न्यासिमरणादौ विधिकथनम्। पर्णनरदाहादिविधिकथनम्। प्रेताधानादिविधिकथनम्। उदकदानादिविधि-कथनम्। अस्थिसञ्चयनादिविधिकथनम्। नवश्राद्धविधिकथनम्। एकादशाहकृत्यनिरूपणादिकम्। मासिकसपिण्डीकरणादिकथनम्। प्रथमाब्दे निषिद्धादिकथनम्। रजस्वलादिमरणे विशेषकथनम्। विधवाधर्म्मनिरूपणम्। सन्न्यासग्रहणविधिकथनम्। यतिधर्म्मनिरूपणम्। यतिसंस्कारविधिकथनम्। द्वादशाब्दादूर्द्ध्वं मेलनविधिकथनञ्च॥ इति शिवम्॥

No. 4234 अनिला, वा प्रयोगदीपिका। Substance, country-made paper, 12 × 4½ inches. Folia, 44. Lines, 10 on a page. Extent, 886 ślokas. Character, Nágara. Date, Sm. 1601. Place of deposit, Calcutta, Government of India. Appearance, old, Prose and Verse. Incorrect.

Anilá, or Prayogadípiká. The method of performing ceremonies of Darśa Paurṇamása, &c., in accordance with the interpretation of the Apastambíya Sútras by Dhúrtta Svámí. By Keśava an inhabitant of Tálabrinda.

Beginning. श्रीगणेशाय नमः ।

गङ्गाप्रवाहपरिपूतजटाकलापं
क्रीडत्फणीन्द्रचकितेन्दुमणिप्रभाभिः ।
प्रक्षालितस्फुटिततक्षकहारबन्ध-
प्रश्नेन कालविषकण्ठहरं नमामि ॥

आपस्तम्बीयसूत्रस्य धूर्त्तस्वामिव्याख्यानुसारेण शास्त्रान्तरसिद्धानपेक्षितानविरुद्धानप्युपसंहृत्य दर्शपूर्णमासावारभ्याग्निचयनपर्य्यन्तानां कर्म्मणां प्रयोगवृत्तिः क्रियते । सोमान्तानि नित्यान्यनु- + + र्थिना कर्त्तव्यानि—इत्यादि ।

End. सन्तिष्ठेते दर्शपूर्णमासौ चौनवर्ज्जं ।
एषा त्रैविद्यवृद्धेन तालवृन्दनिवासिना ॥
केशवेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

Colophon. इति दर्शपूर्णमासानिला समाप्ता ।
संवत् १६०१ ।

विषयः । आपस्तम्बसूत्रस्य धूर्त्तस्वामिव्याख्यानुसारेण दर्शपूर्णमासप्रयोगकथनम् ।

No. 4235. प्रवासविधिः । Substance, country-made paper, 9 × 4 inches. Folia, 4. Lines. 8–9 on a page. Extent, 38 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose, and Verse. Incorrect.

Pravása-vidhi. Treats of the ceremonies to be performed by a brahman who has taken the vow of maintaining the sacred fire throughout his life, on the occasion of his going to a distant place for the purpose of a long sojourn.

Beginning. श्रीगणेशाय नमः ।

अथ प्रवासविधिः । अग्नीन् विहृत्य प्रज्वाल्य सर्व्वान् आचम्य प्राणानायम्य प्रवासविधिं करिष्ये इति सङ्कल्प्य वाग्यतस्तीर्थेन प्रविश्य आहवनीयवायव्यां समीपे तिष्ठन् उपतिष्ठते । शंस्यपश्न् मे पाहि । एवं गार्हपत्यम् । इत्यादि ।

End. विहृताग्निश्चेत् प्रत्यग्निं मन्त्राहुतिः। आगमोत्तरमनेनैव उपस्थानं। परि-समूहनादि पूर्व्ववत्।

Colophon. इति प्रवासविधिः।

विषयः। अग्निहोत्रिणः प्रवासगमने आहवनीयादिविधिनिरूपणम्। तत आगमने पुनस्तद्विधिकथनम्। प्रकारान्तरेण उपस्थानविधिकथनञ्च।

No. 4236. पुनःसन्धानम्। Substance, country-made paper, 9 × 4 inches. Folia, 5. Lines, 7–8 on a page. Extent, 70 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Punah-sandhána. The rekindling of the sacred fire at the end of a long sojourn.

Beginning. श्रीश्रीगणेशाय नमः।

अथ पुनःसन्धानम्। आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य विच्छिन्नदिनादारभ्य एतावन्तं कालं गृह्याविच्छेदजनितप्रत्यवायपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थममुकप्रायश्चित्तममुकप्रत्याम्नाय-द्वारा श्रीपरमेश्वरप्रीत्यर्थं—इत्यादि।

End. समानतन्त्रकश्चेद्द होमद्वयमिदं भवेत्।

Colophon. इति पुनःसन्धानं समाप्तम्॥ शाके १७१६।

विषयः। विच्छिन्नस्य अग्नेः पुनः सन्धानविधिकथनम्।

No. 4237. पुरुषार्थचिन्तामणिः। (विवाहप्रकरणम्।) Substance, country-made paper, 12 × 5 inches. Folia, 20. Lines, 11 on a page. Extent, 617 ślokas. Character. Nágara. Date, ? Place of deposit, Calcutta, Government of India, Appearance, Fresh. Prose and Verse. Incorrect.

Purushártha-chintámani. Seems to be a series of Hindu law compilations by Vishnu Bhatta surnamed Áṛabalí. The present Codex treats of marriage only, and as it shows a special interest in proving the validity of marriage with maternal uncle's daughter, a custom prevailing in Southern India the work seems to have been compiled for that country.

Beginning. श्रीः ।

अथ विवाहोऽभिधीयते । तत्र दक्षः ।

वेदानधीत्य यत्नेन पाठतो ज्ञानतस्तथा ।
समावर्त्तनपूर्व्वन्तु लक्षण्यां स्त्रियमुद्वहेत् ॥
अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः ।
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते हि सः ॥

मनुः ।

गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि ।
उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम् ॥ इति ।

याज्ञवल्क्योऽपि ।

अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्व्विकां कान्तामसपिण्डां यवीयसीम् ॥ इत्यादि ।

End. इतरो दाक्षिणात्य इतरस्मिन् उत्तरदेशे मातुलसम्बन्धं कुर्व्वन् दुष्यति, न स्वदेशे । तथेतर उदीच्य इतरस्मिन् दक्षिणदेशे सीधुपानादि कुर्व्वन् दुष्यत्येवेति सुधीभिर्विभावनीयमिति दिक् ।

Colophon. इति श्रीमदाढ़वल्युपनामकविष्णुभट्टकृतपुरुषार्थचिन्तामण्यन्तर्गतसापिण्ड्यविचारः समाप्तः ।

विषयः । विवाहयोग्यकन्यालक्षणादिनिरूपणमुखेन विस्तरतः सापिण्ड्यविवेककथनम् । दाक्षिणात्यानां मातुलकन्यापरिणयनस्य धर्म्यत्वव्यवस्थापनञ्च ।

NO. 4238. पञ्चमाश्रमविधिः । Substance, country-made paper 10 × 4½ inches. Folia, 2. Lines, 10 on a page. Extent, 27 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose and Verse. Incorrect.

Pan̲chamáśrama-vidhi. By S'aṃkarácháryya. The four stages of the life of a Brahman are well known. This work treats of a fifth stage, namely, a stage in which a brahman should give up the badges of the fourth stage, his walking staff, his water-pot, &c., and travel all alone like a child or a lunatic or a goblin. This stage is sometimes called the *Paramahaṃsa* stage.

Beginning. श्रीगणेशाय नमः ।

अथ पञ्चमाश्रमविधिं व्याख्यास्यामः । तत्र दण्डादिविसर्ज्जनक्रममाह । उदगयनोत्तममासादि-

प्रभदिने प्रातराह्निकादिकं सम्पाद्य गुरोर्वन्दनपूर्व्वकं तदाज्ञया ब्राह्मणद्वारा तूष्णीमग्निं प्रज्वाल्याभ्यर्च्य ब्रह्ममुद्रां शिथिलीकृत्य जुहुयात् ।

End. यत्किञ्चित्स्नानसन्ध्यादिजपध्यानादितत्परः ।
क्षुत्पिपासानिवृत्त्यर्थमन्नोदकपरायणः ॥
परदारपरद्रव्यधातुस्पर्शविवर्ज्जितः ।
एकाकी सञ्चरेद्भूमौ बालोन्मत्तपिशाचवत् ॥

Colophon. इति शङ्कराचार्य्यविरचितपञ्चमाश्रमविधिः ।

विषयः । सन्न्यासोत्तरं दण्डकौपीनादिपरित्यागरूपपञ्चमाश्रमग्रहणविधिकथनम् । तत्र अग्नौ दण्डनिःक्षेपादिविधिकथनम् । कमण्डल्वादिस्फोटनविधिकथनञ्च ।

No. 4239. पञ्चपक्षिशकुनम् । Substance, country-made paper, 22 × 3½ inches. Folia, 3. Lines, 6 on a page. Extent, 532 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, decayed. Prose, and verse. Incorrect.

Pañchapakshi-śakuna. A short treatise on fortune-telling by the appearence of five kinds of birds.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य श्रीमहादेवं सर्व्वशास्त्रविशारदम् ।
भविष्यदर्थबोधाय पप्रच्छ मुनयो मुदा ॥
तेषां वचनमाकर्ण्य निजगाद महेश्वरः ।
त्रिकालज्ञानबोधार्थं पञ्चपक्षिप्रदर्शनम् ॥
अनेन शास्त्रसारेण लोके कालत्रयं प्रति ।
बलाबलानि दृश्यन्ते सर्व्वकार्य्येषु निश्चितम् ॥
आगतं प्रच्छकं दृष्ट्वा दैवज्ञः सावधानतः ।
यद्यत् करोति कर्म्माणि तस्मात् सर्व्वं विचारयेत् ॥

End. त्तमित्ते (?) वायुः । इत्येवं जुद्दो + + मुक्तोऽसि ।
इत्युक्तं पञ्चपक्षिणां लाभालाभं जयाजयम् ।
येन विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः ॥
तावद्गर्ज्जन्ति शास्त्राणि वागीशानमनेकशः (?) ।
यावन्न श्रूयते पक्षिशकुनं शङ्करोदितम् ॥

Colophon. इति महादेवविरचितं पञ्चपक्षिशकुनं समाप्तम् ॥

विषयः। प्रश्नकर्त्तुर्भावविशेषेण त्रैकालिकशुभाशुभचिन्तनप्रकारकीर्त्तनम्॥

No. 4240. प्राणाभरणम्, वा राजवर्णनम्। Substance, country-made paper, 12×4 inches. Folia, 4. Lines, 16 on a page. Extent, 224 ślokas Character, Nágara. Date, ? Place of deposit, Calcutta Government of India. Appearance, new. Verse. Incorrect.

Práṇábharaṇa, or Rájavarṇana. In praise of Rájá Práṇanáráyana Deva of Kámarúpa in Assam by Jagannatha Paṇḍit.

Beginning. श्रीगणेशाय नमः।

विश्वार्णव गुणज्ञता समुदितो भूभार + + भरः (?)
कालोऽयं कलिराजगाम जगतीलावण्यकुक्षिम्भरः।
एवं भावनया मदीयकविते मौनं किमालम्बसे
जागर्त्ति क्षितिमण्डले चिरमिह श्रीकामरूपेश्वरः॥
करतलविनिर्गलदविरलदानजलोल्लासितावनिवलयः।
धनदाग्रमहितमूर्त्तिर्जयतितरां सार्व्वभौमोऽयम्॥ इत्यादि।

End. रणे दीनान् देवान् दशवदनविद्राव्यवद्दति (?)
प्रभावप्रागल्भ्यं त्वयि तु मम सोऽयं परिकरः।
ललाटोद्यज्ज्वालाकवलितजगज्जालविभवो
भवो मे कोदण्डं स्तुतविशिखवेगं कलयतु॥
कियदिदमधिकं मे यद्द्विजायार्थयित्रे
कवचमरमणीयं कुण्डले चार्पयामि।

Colophon. इति पण्डितेन्द्रजगन्नाथकृतराजवर्णनम्।

विषयः। कामरूपाधिपतेः प्राणनारायणस्य यशोगुणादिवर्णनम्।

No. 4241. अनुक्रमणिकाविवरणम्। Substance, country-made paper, 10×3 inches. Folia, 89. Lines, 7 on a page. Extent, 962 ślokas. Character, Nágara, Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Anukramaṇiká-vivaraṇa. By Jagannáth. An Index to the Ṛigveda Váskala Shákhá giving the Ṛishis, Chhandas and

Devatas. From Jagannátha's statement it appears that the Váshkalas had 1028 – 1017 = 11 súktas more than the S'ákalas, while their number of ṛichs fall short by 10580 – 10552 = 28. This does not agree with Weber's statement given in foot note No. 21 in page 32 of the second edition of the History of Indian Literature "that the recension of the Báshkalas had eight hymns more than that of the S'akalas." The Bálakhilyas are here said to be 18 in number while Sáyana in his commentary on the Aitareya Brahmana says they are eight and Max Müllar and Aufrecht say they are eleven.

Beginning. श्रीगणेशाय नमः ।

प्रणम्य विष्णुं शिरसाव्ययं समं
शिवञ्च सोमं वृषभेन्द्रगामिनम् ।
गणाधिपं भक्तमनोरथप्रदं
हरिञ्च वाक्सिद्धिकरीञ्च भारतीम् ॥
अनुक्रमणिकोक्तानि सूक्तादिप्रभृतीन्यहम् ।
छन्दोऽन्तानि निबध्नामि जगन्नाथो यथामति ॥

सूक्तादीनि सूक्तप्रतीकऋक्संख्यऋषिदैवतच्छन्दांसि प्रतिसंख्यमृचां संख्याशब्दैरत्र विलिख्यते ।

अध्यायानाञ्च ऋक्संख्या सान्तेध्वङ्कैर्विलिख्यते ।
प्रायोऽत्र ऋषयः सर्व्वे लिख्यन्ते गोत्रसंयुताः ॥
प्रगाथानाञ्च सर्व्वेषां तत्तच्छन्दोऽभिधाः पुनः ।
आप्रीसूक्तेषु सर्व्वेषु समिद्धोऽग्न्यादिदेवताः ॥

इति परिभाषा । निदर्शनानि लिख्यन्ते परिभाषोदितान्यपि पदपङ्क्त्यादिभेदानां प्रगाथानाञ्च सर्व्वशः । चकारान्निवृदादीनामित्यर्थः । अथाग्निमीळे प्रभृतिसूक्तानामृक्संख्या ऋषिदैवतच्छन्दांसि विलिख्यन्ते । इत्यादि ।

End. आद्याग्नेयी । तृतीया त्रिष्टुप् । तृतीया त्रिष्टुप । ऋचः २१८ । सूक्तानि ४९ । ऋचः १२८१ । सूक्तानि १४६ (?) । इत्यष्टमाष्टके अष्टमोऽध्यायः । ऋचां संख्या १०५५२ वाष्कलशाखायां पूर्त्तिः स्यात् । सूक्तानां संख्या १०२८ । बालखिल्यरचितद्विपदानां चतुष्पदा कृत्वा ऋक्संख्या २००६ बालखिल्यवर्गः १८ । २०२४ । शिवम् ।

विषयः । ऋग्वेदवाष्कलशाखायामृचु ऋषिच्छन्दोदैवतनिरूपणं सूक्तसंख्यादिकथनं । तत्र तत्र ऋक्संख्यादिनिरूपणञ्च ।

No. 4242. अर्थप्रकाशिका। Substance, country-made paper, 12 × 3½ inches. Folia, 35. Lines, 8 on a page. Extent, 332 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old, mostly destroyed by worm. Prose. Incorrect.

Artha-prakáśiká. By Raghudeva. This a new commentary on the Kávyaprakásha unknown as yet to Aufrecht. The work is, unfortunately, incomplete. The author is an advocate of the theory that the Kárikás are by Bharata Muni and the vṛitti by Mammaṭa. The commentator explains only the Karikás which are, in his opinion, Bharatánana-sambhúta or pronounced by Bharata.

Beginning. श्रीगणेशाय नमः।

रघुदेवकृतानेककृतिनामस्तु तोषिका।
भरताननसम्भूतकारिकार्थप्रकाशिका॥

भरतमुनिः स्वकर्तृककाव्यरसास्वादनकारणकारिकात्मकालङ्कारशास्त्रसमाप्तिप्रतिबन्धकविघ्नविघाताय ग्रन्थादौ भारतीस्तुतिरूपमङ्गलमाह। नियतिकृतेति। भारती वागधिष्ठात्रीदेवता जयति उत्कर्षविशिष्टा भवति। भारत्या उत्कर्षसम्पादकत्वं हेतुगर्भविशेषणमाह। कवेर्निर्म्मितिमादधतीति। इति।

End. सङ्केतग्रहविषयीभूतार्थपरिचयं विना तद्घटितोपदर्शितलक्षणज्ञानासम्भवात्

Colophon. (अतःपरं खण्डितम्।)

विषयः। काव्यप्रकाशाभिधानालङ्कारसन्दर्भस्य द्वितीयोल्लासीयकतिपयपङ्क्तिपर्य्यन्तस्य व्याख्यानम्।

No. 4243. अनुवाकानुक्रमणी। Substance, country-made paper, 12 × 3½ inches. Folia, 3. Lines, 11 on a page. Extent, 75 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Anuvákánukramaṇí. An index of the Anuvákas of the Ṛig-Veda, S'akala Shákhá, by S'aunaka.

Beginning. श्रीगणेशाय नमः।

पितृदेवर्षिसाध्येभ्यो ब्राह्मणेभ्यश्च सर्व्वशः।
आचार्य्येभ्यो गुरुभ्यश्च प्रणम्य प्रयतः शुचिः॥
मधुच्छन्दः प्रभृतिभिऋषिभिर्हि तपोबलात्।
दृष्टानामनुवाकानाञ्च वक्ष्याम्यतन्द्रितः॥

आदौ सूक्तपरिमाणं संख्याञ्च क्रममेवच ।
मण्डले मण्डले चैव यावन्तो हि समीरिताः ॥ इत्यादि ।

End. एकञ्च शतसहस्रं दश च सहस्राणि सप्तशतानि ।
चर्चापदानि ज्ञेयानि चान्यानि चत्वारि ॥
चत्वारि शतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि ॥

Colophon. इति शौनककृतानुवाकानुक्रमणी समाप्ता ।

विषयः । ऋग्वेदशाकलशाखायान्तु अनुवाकनिरूपणम् ॥

No. 4244. पञ्चप्रकरणी वा सत्सुखानुभवः । Substance, country-made paper, 12 × 4 inches. Folia, 15. Lines, 11 on a page. Extent, 460 ślokas. Character, Nágara. Date, Sm., 1868. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and Verse. Correct.

Panchaprakaraṇí, or Satsukhánubhava. A Vedánta treatise by Ichchhārāma Svámí who wrote this work in five chapters for the edification of his pupils. It treats of the knowledge of Brahma and of Atmā, of the nature of Ātmā as consisting of existence, intelligence and pleasure, of the evanascent character of the world and other topics interesting to the students of the Vedánta system.

Beginning. श्रीगणेशाय नमः ।
श्रीरामं सीतया सार्द्धं नत्वा सर्व्वहृदि स्थितम् ।
सत्सुखानुभवं ग्रन्थं कुर्व्वे बुद्धिविशुद्धये ॥
सच्चिदानन्दरूपं तत् पूर्णं विष्णोः परं पदम् ।
यत् प्राप्तये समारब्धा वेदान्ताः सकला अपि ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
अहं बद्धोऽस्मि संसारे मम मुक्तिः कथं भवेत् ।
किञ्चिद्वैराग्यसम्पन्नः सोऽस्मिन् शास्त्रेऽधिकारवान् ॥
तत्र प्रथमं गुरुशिष्यलक्षणम् । शान्तो दान्तो जितेन्द्रियः । इहलोके परलोके च विषयसुखनिःस्पृहो योग्यः शिष्यः । इत्यादि ।

End. ब्रह्म वेद ब्रह्मैव भवति । ॐ नमो ब्रह्मविद्भ्यः ।
ब्रह्मविद्भ्यः परं नास्ति न भूतं न भविष्यति ॥

इति पञ्चप्रकरणमात्मप्रकाशनिरूपणं नाम पञ्चमं प्रकरणं समाप्तम् ॥
पञ्चप्रकरणीमेतां सत्सुखानुभवप्रदाम् ।
विचारयन्ति ये नित्यमात्मारामा भवन्ति ते ॥
श्रीमन्नारायणः स्वामी विख्यातो जगतीतले ।
सत्सुखानुभवं शास्त्रं तस्य जानन्तु योगिनः ॥
इदमात्मगुणोपेतमात्मनैव विनिर्मितम् ।
आत्मज्ञानसुखावाप्त्यावात्मन्येव समर्पितम् ॥
इदं पद्यं बह्वर्थसमन्वितम् ।

Colophon. इदं सत्सुखानुभवशास्त्रं श्रीइच्छारामस्वामिभिर्विरचितं शिष्यबोधाय ॥
संवत् १८६८ ।

विषयः । प्रथमे प्रकरणे, ब्रह्मात्मज्ञानविवेचनम् । तत्र गुरुशिष्ययोर्लक्षणादिविवेचनम् । आत्मतत्त्वनिरूपणम् । आत्मनः सच्चिदानन्दरूपव्यवस्थापनम् । विश्वस्य मिथ्यात्वकथनमुखेन आत्मनः सत्यत्वनिरूपणम् । जीवस्वरूपादिनिरूपणम् । जीवब्रह्मणोरैक्यकथनम् ।

द्वितीये प्रकरणे, अध्यारोपस्य रूपादिनिरूपणम् । तत्र पञ्चीकरणस्वरूपादिनिरूपणम् । पञ्चकोषविवेककथनम् ।

तृतीये प्रकरणे, अपवादस्वरूपादिकथनम् ।

चतुर्थे प्रकरणे, ब्रह्मात्मतत्त्वं साधनानुष्ठानं विना स्पष्टं नानुभूयते—इति तत्साधनप्रकारकथनम् । तत्र श्रवणादीनां लक्षणादिकथनम् ।

पञ्चमे प्रकरणे, महावाक्यविवेकनिरूपणम् । आत्मस्वप्रकाशत्वादिनिरूपणञ्च । इति शम् ।

No. 4245. पादविधानानुक्रमणी । Substance, country-made paper, 14 × 5 inches. Folia, 3. Lines, 11–12 on a page. Extent, 90 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and Verse. Incorrect.

Páda-vidhánánukramaṇí. By S'aunaka. An index of those *pádas* or feet of the ṛichs which are difficult to read or which have any doubt connected with their reading or meaning, &c. This work relates to the S'ākala Sákhá of the Ṛig-Veda.

Beginning. श्रीगणेशाय नमः
अथ पादविधानानुक्रमणी ।
ऋच्तु पादाः सांशयिका भवन्ति

दुराम्नातास्त्वपि भवन्ति केचित् ।
तदनुसन्दृश्यतेदं (?) निबोधता-
चार्य्येण शौनकेनेङ्गितं यत् ॥

ऋतेन मित्रावरुणौ दक्षा युवाकवः सुताः । इन्द्र इद्धर्य्योः स च । ब्रह्म च नो वसो सचा १॥ इनं मे वरुण श्रुधि । त्वं नो अग्ने पित्रोरुपस्थ आ । २ । इत्यादि ।

End. जोषासवितर्यस्यते । त्यावश्चित्तमा वो व्रतम् ।
पितुभ्रतो न नन्तुमित्सुदानवः ॥ ८ ॥ इत्यष्टमाष्टकः ।

Colophon. इति पादविधानानुक्रमणी ॥

विषयः । शाकलशाखायामृचु संग्रथितानां पादानां निरूपणम् ।

No. 4246. कौकिलसौत्रामणीविधिः । Substance, country-made paper, 9 × 3 inches. Folia, 4. Lines, 10 on a page. Extent, 85 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Kaukila-sautrámaní-vidhi. The process of celebrating a sacrifice entitled Kaukila Sautrámaṇí in the manner prescribed by Āśvaláyana.

Beginning. श्रीगणेशाय नमः ।

अथ कौकिलसौत्रामण्युच्यते । सा चाश्वलायनेन आम्नाता । अनाम्नातास्तु च द्वौत्रप्रकारस्तेनैव-दर्शितः । अनाम्नातास्तथ + + धिकारोऽध्वर्य्युर्वा यथा स्मरेदित्यादिस्त्रे + + ईर्य्युर्वेद विहितद्वौत्रस्याचार्य्येणानुज्ञातत्वात् तदुच्यते । इत्यादि ।

End. यथा भक्षितं प्राचीनावीतिनो दक्षिणतः प्राणभक्ष एके परिक्रीतो वा वैश्य राजन्ययोरन्यतरोऽगारेषु वा वह्निष्परिधि दक्षिणतो जुहोतीति ।

विषयः । आश्वलायनश्रौतसूत्रोक्तप्रकारेण कौकिलसौत्रामणीयागविधिकथनम् ।

No. 4247. वशीकरणादिविधिः । Substance, country-made paper 10 × 4 inches. Folia, 12. Lines, 9 on a page. Extent, 139 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Vaśíkaraṇádi-vidhi. The process of performing the *tántrik* ceremonies with the object of killing enemies, stupefying and fascinating men and women and so on.

Beginning. श्रीगणेशाय नमः ।

यः शान्तः परमोऽद्वयः परशिवः कङ्कालकालीतको

ध्यानातीतमनादि + + निचयः सङ्कल्प + + यकः (?) ।

स्वाभासान्तरभासकः समरसः सर्व्वात्मना बोधकः

सोऽयं सर्व्वमयो ददातु जगतां विद्यादिसिद्ध्यष्टकम् ॥

अथ सर्व्वजनवश्यम् ।

एकचित्तः स्थिरो मन्त्री मन्त्रे जप्त्वायुतद्वयम् ।

ततः क्षोभयते लोकान् दर्शनादेव साधकः ॥

भूतारवटमूलञ्च जलेन सह घर्षयेत् ।

विभूत्या संयुतं मन्त्रं तिलको लोकवश्यकृत् ॥ (?) इत्यादि ।

End. शनिवारेऽपि सन्ध्यादौ रवौ कुक्कुटको बलिः ।

देयः कृष्णसुरायुक्तः काल + + ततो चरेत् ॥

Colophon. अतःपरं खण्डितम् ।

विषयः। तन्त्रोक्तप्रकारेण वशीकरणोच्चाटनस्तम्भनादिप्रकारकीर्त्तनम् ।

No. 4248. रविरोटाव्रतम् । Substance, country-made paper, 9 × 3 inches. Folia, 5. Lines, 9 on a page. Extent, 81 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, decayed verse. Correct.

Raviroṭá-vrata. The process of performing the ceremony entitled *Raviroṭá*. The principle interlocutors are Dhaumya and Draupadí in the forest during the exile of the Páṇḍavas.

Beginning. श्रीगणेशाय नमः ।

वनवासगते भूपे कुन्तीपुत्रे युधिष्ठिरे ।

द्रौपदी परिपप्रच्छ धौम्यं धर्म्मभृतांवरम् ॥

द्रौपद्युवाच ।

प्रत्यहं भुञ्जते विप्र येऽस्माकं मुनिसत्तम ।

तानागतान् वनं विद्धि किं कार्य्यमधुना मया ॥

तच्छ्रुत्वा स मुनिर्धीमान् धौम्यो मतिमतांवरः ।

पाञ्चालीं कथयामास व्रतमेकं सुदुर्लभम् ॥

धौम्य उवाच ।

शृणु देवी प्रवक्ष्यामि सर्व्वकामफलप्रदम् ।

अन्नवृद्धिकरं सद्यो बलपुष्टियशस्करम् ॥

रविरोटाव्रतं नाम सर्व्वपापप्रणाशनम् ॥ इत्यादि ।

End. यः पठेच्छृणुयाद्वापि कथां पापप्रणाशिनीम् ।

आरोग्यधनसम्पन्ना रविसायुज्यमाप्नुयात् ॥

Colophon. इति श्रीरविरोटाव्रतं समाप्तम् ॥

विषयः । द्रौपद्या सह धौम्यस्य संवादेन अन्नप्राचुर्य्यादिकामनया रविरोटाव्रतं कर्त्तव्यमिति तद्व्रतविधानादिकथनम् ।

No. 4249. होमभक्षः । Substance, country-made paper, 8 × 4 inches. Folia, 5. Lines, 9 on a page. Extent, 67 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Homa-bhaksha. The food to be eaten by means of sacrificial ladles from dishes set apart for Indra and other deities at the three sacrifices, the morning, the noon and the evening. The work belongs to the School of Baudháyana.

Beginning. श्रीगणेशाय नमः ।

अथ बौधायनानुसारेण होमभक्षो निरूप्यते । तत्र भक्षणे त्रीणि निमित्तानि । वषट्कारो होमाभिषवः समाख्या च । तत्र होत्रादयो वषट्कर्त्तारः । अध्वर्य्वादयस्तु होमाभिषवकर्त्तारः ।

इत्यादि ।

End. तत उन्नेता तत्रैव होतारमुपहूय द्विः प्रत्यक्षं भक्षयति ॥ ततोऽध्वर्य्वाद्यस्तु उन्नेतारमुपहूय भक्षयति ॥

विषयः । बौधायनानुसारेण प्रातःसवनमाध्यन्दिनसवनतृतीयसवनेषु ऐन्द्राग्निपात्रविशेषे चमसादौ भक्षनिरूपणम् ।

No. 4250. दिग्विजयेष्टिः । Substance, country-made paper, 9 × 4 inches. Folia, 4. Lines, 12 on a page, Extent, 94 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Digvijayeshṭi. The process of performing the vedic sacrifice for the conquest of the world.

Beginning. श्रीगणेशाय नमः ।

अथ वै भवति यथा वा इन्द्रो देवानां यथा मनुर्मनुष्याणा मेवमहं भूयासमिति स एतयेष्ट्या यजेत सर्व्वासु दिक्षु पुण्यकीर्त्तिकामः सर्व्वदिग्विजयकामो वा इत्यादि ।

End. स्रुग्विमोकान्ते वाजिनयागः । यज्ञविमोकान्ते उत्कर उपवेषमुद्गूहेत् । सिद्धमिष्टिः सन्तिष्ठते ॥

Colophon. इति दिग्विजयेष्टिः समाप्ता ।

विषयः । दिग्विजयेष्टिश्रौतप्रयोगकथनम् ।

No. 4251. **अर्घ्यदानविधिः, वा अर्घ्यदानविधिसंक्षेपः ।** Substance, country-made paper, 5 × 3 inches. Folia, 8. Lines, 10 on a page. Extent, 100 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Arghya-dána-vidhi or Arghya-dána-vidhi-sańkshepa. The process of offering *argha* to the sun and, of worshipping him according to the process prescribed by Trichákalya.

Beginning. श्रीगणेशाय नमः ।

आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य श्रीसूर्य्यनारायणदेवताप्रीत्यर्थमभीप्सितकामनासिद्ध्यर्थं त्रिचाकल्योक्तविधिना अर्घ्यप्रदानं करिष्ये । शरीरशुद्ध्यर्थं शुद्ध्यादिकं करिष्ये । इत्यादि ।

End. नमः सूर्य्याय शान्ताय + गणायादिहेतवे ।
निवेदयामि चात्मानं त्वं गतिः परमेश्वर ॥

Colophon. इत्यर्घ्यदानविधिसंक्षेपः ।

विषयः । सूर्य्यार्घ्यदानविधिकथनप्रसङ्गेन तत्पूजाविधिकथनम् ।

No. 4252. **अनुवाकानुक्रमणीभाष्यम् ।** Substance, country-made paper, 13 × 5 inches. Folia, 6. Lines, 13 on a page. Extent, 244 ślokas. Character, Nágara. Date, Sм. 1863. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Correct.

Anuvákánukramaṇí-bháshya. A commentary by Shaḍguruśisya on the Anuvákánukramaṇí by S'aunaka noticed above 4243.

Beginning. श्रीगणेशाय नमः ।

सर्व्वं कर्म्मफलं यत्र तुष्टे-

तुष्टेन किञ्चित् तमहं नमामि ।

विनायकं गिरिराजेन्द्रपुत्री-

महेश्वरप्रियसूनुं घृणाब्धिम् ॥

बह्वृचानां जनानान्तु शौनकस्य प्रसादतः ।

अनुवाकानुक्रमणीरूपं किञ्चित् प्रवर्ण्यते ॥

पितृदेवर्षीति । तादर्थ्ये प्रणम्य । प्रातः जितेन्द्रियः । द्विविधं शौचम् । मृज्जलाभ्यां वाह्य-मान्तरमर्थशुद्धिः । प्रणम्य ततः किम् । इत्यादि ।

End. द्वात्रिंशत्सहस्राधिकचतुर्लक्षमक्षराणीत्यर्थः । ४३२००० । द्विरुक्तिः समाप्ति-ज्ञापनार्था । एष वा ऋक् एष वा अर्द्धर्च एष वै पादः । एष वा अक्षरमित्यादि सर्व्वेषां ब्रह्मरूप-त्वोक्तेरारण्यके । अत्रापि सर्व्वं सम्यक् संख्यातं भगवता शौनकेन बह्वृचसिंहेन वेदितव्यम् ॥

Colophon. इति श्रीषड्गुरुशिष्यविरचितानुवाकानुक्रमणीविवृतिः समाप्ता ।

संवत् १८६२ ॥

विषयः । शौनककृतानुवाकानुक्रमण्या व्याख्यानम् ॥

No. 4253. साबित्राग्निप्रयोगः । Substance, country-made paper, 9×3½ inches. Folia 13. Lines, 12 on a page. Extent, 309 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Sábitrágṇi-prayoga. The process of performing sacrifices in fire by tying the sacrificial animal to the stake.

Beginning. श्रीगणेशाय नमः ।

सावित्राग्नेः प्रयोगो वक्ष्यते । इममेव लोकं पशुबन्धेनाभिजयतीति श्रुतेः । पशुबन्धमाश्रित्य उच्यते । ह्यो वा सद्यः काले वा प्रातरग्निहोत्रं हुत्वा याः पुरस्तादित्यादि स्वर्गकामः पशुबन्धेन यक्ष्य इति संकल्प्याग्नीन् समारोप्योद्वसाय मथित्वा । —इत्यादि ।

End. दक्षिणतो हिरण्मयं पुरुषं हिरण्यगर्भमित्युक्त्वा तमुपसन्दधाति । तयादि—।

Colophon. (अतःपरं खण्डितत्वात् परिसमाप्तिसूचकवाक्यं नास्तीति ज्ञेयम् ।)

विषयः । साविचाग्निप्रयोगकथनमुखेन पशुबन्धविधिकथनम् ।

No. 4254. स्वर्गद्वारेष्टिप्रयोगः । Substance, country-made paper, 8 × 4 inches. Folia, 14. Lines, 9 on a page. Extent, 212 ślokas. Character, Nágara. Date, Sk. 1659. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Incorrect.

Svarga-dváreshṭi-prayoga. By Dhuṇḍirája, 1627 Sk. The process of performing a sacrifice for going to heaven. The work belongs to the school of Baudháyana.

Beginning. श्रीगणेशाय नमः ।

प्रणम्य रामं जमदग्निसूनुं
गुरुं गणेशं गिरिजां गिरीशम् ।
तनोति सत्रस्य विधिप्रयोगं
गुरोः प्रसादादिह ढुण्ढिराजः ॥

सूत्रबौधायनीये चातुर्होत्रीये प्राक् दीक्षणीयाया दिवः श्येनीरनुवित्तीः सप्तान्वहं निर्वपति । इत्यादि ।

End. तस्य सुत्यपञ्चामादीनि सत्यानि द्वार्षु पञ्चसु ।
स्वर्लोके कामचारोऽस्मि इत्यूचुर्ब्रह्मवादिनः ॥
अब्धि-द्वि-षट्कु-युक्शाके चित्रभान्वभिधे सिते ।
अकरोत् पद्धतिं ढुण्ढिः स्वर्गद्वारेष्टिसिद्धिदाम् ॥

Colophon. इति स्वर्गद्वारेष्टिप्रयोगः समाप्तः । शाके १६ ५९ ।

विषयः । बौधायनसूत्रानुसारेण स्वर्गद्वारेष्टिप्रयोगकथनम् ।

No. 4255. शिलान्यासविधिः । Substance, country-made paper, 9 × 4 inches. Folia, 1. Lines, 24 on a page. Extent, 36 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose, and verse. Incorrect.

S'ilányása-vidhi. The process of laying the foundation-stone of palaces and other dwelling-houses as given in the Matsya Purána.

Beginning. श्रीगजाननाय नमः ।

अथ कर्त्ता देशकालौ सङ्कीर्त्य करिष्यमाणवास्तोः शुभतासिद्ध्यर्थं निर्विघ्नतासिद्ध्यर्थं च भूमिपूजनं शिलान्यासं च करिष्ये इति सङ्कल्प्य तदङ्गत्वेन गणपतिपूजनं स्वस्तिवाचनं च कृत्वा आचार्यं तथा चतुरो ब्राह्मणान् हत्वा तान् पूजयेत् । इत्यादि ।

End. त्वष्ट्रा विनिर्म्मितं पूर्व्वं लोकानां हितकाम्यया । पूजितोऽसि खनित्र त्वं

सिद्धिदो भव मेऽधुनेति प्रार्थ्य ब्राह्मणान् सम्पूज्य आचार्य्यादिभ्यो दक्षिणां दत्वा कर्म्मेश्वरार्पणं कुर्य्यादिति मातृस्थे संक्षेपतः शिलान्यासविधिः ॥

विषयः । प्रासादादिनिर्म्मितौ वास्तुपरिशुद्ध्यर्थं तत्र शिलान्यासावश्यकताकथनम् । तत् प्रयोगकथनञ्च ।

No. **4256.** शिवामुष्टिव्रतम् । Substance, country-made paper, 9 × 2½ inches. Folia, 4. Lines, 7 on a page. Extent, 54 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Incorrect.

S'ivámushṭi-vrata. The gift of a handful of corn for the purpose of propitiating S'ivá. The story of Rájá Chandra Prabha has been related in this connection as one who obtained great fortune by making this gift. Unmarried girls would acquire great merit by this gift.

Beginning. अथ शिवामुष्टिव्रतम् ।

बाल्यावस्थायां स्त्रीणामुक्तं भविष्ये ।
देव्युवाच ।
देवदेव जगन्नाथ जगदानन्दकारक ।
कौतुकेनेप्सितं किञ्चिद्धर्म्मप्रश्नं करोम्यहम् ॥
श्रुतानि देव देवेश व्रतानि नियमास्तथा ।
तीर्थानि च महान्तीह यज्ञदानान्यनेकशः ॥
नास्ति मे निश्चयो देव + मितोहं + + पुनः ।
कथयस्व महादेव यद्गोप्यं व्रतमुत्तमम् ॥
केन त्वं हि मया प्राप्तस्तपोदानव्रतादिना ।
अनादिमध्यनिधनोभर्त्ता चैव जगत्प्रभो ॥ इत्यादि ।

End. एतत्ते कथितं देवि तवाग्रे व्रतमुत्तमम् ।
कोटियज्ञकृतपुण्य-मस्यानुष्ठानमात्रतः ॥

Colophon. इति श्रीभविष्योत्तरपुराणे गौरीशङ्करसंवादे शिवामुष्टिव्रतोद्यापनं समाप्तम् ।

विषयः । शिवाशिवयोः संवादेन बालिकानां भर्त्तृसौभाग्यसम्बृद्ध्यर्थं शिवामुष्टिव्रतविधानम् । तद्व्रतमाहात्म्यकथनप्रसङ्गात् सरस्वतीनदीतीरालङ्कारभूतस्य विमलापुरीपुरन्दरस्य चन्द्रप्रभस्य राज्ञ उपाख्यानकथनम् ।

No. 4257. सन्ध्याप्रयोगः । Substance, country-made yellow paper, 8×3 inches. Folia, 12. Lines, 7 on a page. Extent, 132 ślokas. Character, Nágara. Date, Sм. 1890. Place of deposit, Calcutta, Government of India. Appearance, new. Prose, and verse. Correct.

Sandhyá-prayaga. The performance of the three daily sandhyá ceremonies by a process in which an attempt has been made to reconcile the vedic and the tántrik modes of performance.

Beginning. श्रीगणेशाय नमः ।

आचमनम् । ॐ अच्युतानन्दगोविन्देति नीलकण्ठऋषिरनुष्टुप्छन्द आपोदेवता आचमने विनियोगः । ॐ अच्युताय नमः ॐ अनन्ताय नमः ॐ गोविन्दाय नमः । शिखाबन्धनम् । ॐ ऊर्द्धकेशीतिमन्त्रस्य विरूपाक्षऋषिश्चामुण्डादेवता शिखाबन्धने विनियोगः ।

ॐ ऊर्द्धकेशि विरूपाक्षि मांसशोणितभोजने ।
तिष्ठ देवि शिखामध्ये चामुण्डे ह्यपराजिते ॥
शिखा या ब्रह्मपुत्री च बालकन्या तपस्विनी ।
मस्तके दीयते स्थानं शिखाबन्धं करोम्यहम् ॥

End. अजरे अमरे देवि विष्णुयोनि नमोऽस्तु ते ।

इति योनिमुद्रां प्रदर्शयेत् । पूर्व्वोक्तसर्व्वविधानं कुर्य्यात् । इति सायंसन्ध्या समाप्ता ।

Colophon. इति सन्ध्याप्रयोगः ।

विषयः । श्रुतितन्त्रोभयसम्मतसन्ध्याविधिकथनम् । तत्र त्रिसन्ध्याप्रयोगकथनञ्च ।

NO. 4258. सन्न्यासदीपिका । Substance country-made paper, 12×5 inches. Folia, 103. Lines, 10 on a page. Extent, 21,041 ślokas. Character, Nágara. Date, Sĸ. 1768. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Correct.

Sannyásadípiká. By Sachchidánandáśrama the pupil of Nrisinhaśrama. It treats of the renunciation of the world and refutes the theory that such renunciation is prohibited in the Kali Yuja. It gives in detail the process of initiation to a mendicant life and enumerates the duties and obligations of the Sannyásís up to the time of their death.

Beginning. श्रीगणेशाय नमः ।

प्रणम्य परमात्मानं ब्रह्मादीन् स्वगुरूंस्तथा ।

सर्व्वेषामुपकाराय कुर्व्वे सन्न्यासदीपिकाम् ॥

तत्रादौ आरुणेयोपनिषत् । ॐ आरुणिः प्रजापतेर्लोकं जगाम । तं गत्वोवाच । केन भगवन् कर्म्माण्यशेषतो विसृजामीति । तं होवाच प्रजापतिस्तव पुत्रान् भ्रातॄन् बन्ध्वादीन् शिखां यज्ञोपवीतञ्च यागञ्च सूत्रञ्च स्वाध्यायञ्च भूर्लोकञ्च भुवर्लोकञ्च स्वर्लोकञ्च महर्लोकञ्च जनलोकञ्च तपोलोकञ्च सत्यलोकञ्च तलातलपातालानि विसर्ज्जयेत् । दण्डमाच्छादनं कौपीनं च परिग्रहेच्छेषं विसृजेदिति । इत्यादि ।

End. संवित्सुखसागरे सदा विलीयते यस्य मनः प्रचार इति ।
आश्रमः सच्चिदानन्दोऽकरोत् सन्न्यासदीपिकाम् ।
विश्वेशः प्रीयतां तेन सर्व्वसाक्षी महेश्वरः ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्य श्रीनृसिंहाश्रमशिष्यसच्चिदानन्दाश्रमविरचिता सन्न्यासदीपिका समाप्ता । शके १७६८ ।

विषयः। आरुणिना सह प्रजापतेः संवादेन कर्म्मत्यागकामस्य सन्न्यासावश्यकतानिरूपणम् । तत्र सन्न्यासस्वरूपकीर्त्तनम् । कलौ सन्न्यासस्थापनविधिकथनम् । द्विविधसन्न्यासनिरूपणम् । सन्न्यासविधिकथनम् । कृच्छ्रादिप्रायश्चित्तविधिकथनम् । सन्न्यासकालनिरूपणम् । सन्न्यासे श्राद्धविधिकथनम् । सन्न्यासाङ्गक्षौरविधिकथनम् । दारत्यागविधिकथनम् । दण्डलक्षणादिकथनम् । त्रिदण्डादिनिरूपणम् । वेदादिजपविधिकथनम् । शक्तुमुष्टिप्राशनविधिकथनम् । सावित्रीप्रवेशविधिकथनम् । होमादिविवेककथनम् । विरजाहोमविधिकथनम् । दक्षिणाविधिकथनम् । पात्रादिप्रतिपत्तिविधिकथनम् । पुत्राग्रे जपविधिकथनम् । उपवीतत्यागविधिकथनम् । अभयदानादिविधिकथनम् । गुरूपसत्तिविधिकथनम् । गुरुलक्षणकथनम् । उपदेशक्रमकथनम् । नामकरणविधिकथनम् । सन्न्यासमाहात्म्यकीर्त्तनम् । सन्न्यासग्रहणात् प्रथमादिदिवसे भिक्षाप्रशंसाकीर्त्तनम् । सन्न्यासिकर्म्मकथनम् । तस्य स्नानभिक्षादिविधिकथनम् । विरक्तप्रशंसाकथनम् । भेदवादिधिक्कारकथनम् । परमहंसधर्म्मकथनम् । जीवन्मुक्तिसाधनकथनम् । मौनविधिकथनम् । एकान्तसेवनविधिकथनम् । पाथेयभैषज्ययोर्विवेककथनम् । गुरुसमीपे वासविधिकथनम् । स्थावरादिग्रहणनिषेधकथनम् । सन्न्यासिकर्त्तव्यकथनम् । त्याज्यकथनम् । भिक्षाटनविधिकथनम् । निषिद्धकथनम् । जपप्रशंसाकथनम् । नाममाहात्म्यकथनम् । प्राणायामप्रशंसाकीर्त्तनम् । श्रवणमाहात्म्यकीर्त्तनम् । ब्रह्मजिज्ञासाप्रकारकथनम् । दिव्यशौचादिविधिकथनम् । दिव्यभिक्षाविधिकथनम् । विद्वत्सन्न्यासिकर्म्मकथनम् । नमस्कारविवेचनम् । ईश्वरस्तुतिकर्त्तव्यताकथनम् । आह्निकविधिकथनम् । तत्र शौचविधिकथनम् । आचमनविधिकथनम् । दन्तधावनविधिकथनम् । स्नानविधिकथनम् । तिलकधारणविधिकथनम् । सन्ध्याविधिकथनम् । पूजाविधिकथनम् । श्रवणादिविधिकथनम् । मध्याह्नस्नानविधिकथनम् । आचमननिमित्तकथनम् । तदनुकल्पकथनञ्च । प्राणायामादिविधिकथनम् ।

शुद्धिसाधनादिकथनम् । यतये मठादिदानप्रशंसाकथनम् । सायंसन्ध्यादिविधिकथनम् । शयन विधिकथनम् । क्षौरविधिकथनम् । व्यासपूजनविधिकथनम् । चातुर्मास्यधर्म्मकथनम् । अभ्यागता चारनिरूपणम् । पर्य्यङ्कशौचविधिकथनम् । योगपट्टविधिकथनम् । सिद्धिं गतस्य यतेः संस्कारविधि-कथनम् । यतेर्मरणे अशौचाभावादिकथनम् । तदूर्द्ध्वक्रियाविधिकीर्त्तनञ्च । इति शम् ।

No. 4259. सर्व्वानुक्रमप्रयोगः । Substance, country-made paper, 21 × 4 inches. Folia, 56. Lines, 11 on a page. Extent, 1,701 ślokas. Character, Nágara. Date Sm. 1863. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Correct.

Sarvvánukramaprayoga. An index to the Ṛig-Veda giving the Ṛishi, Chhandah and Devatá of every ṛich.

Beginning. श्रीगणेशाय नमः ।

अग्निमीळ इति नवर्चस्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः । अग्निर्देवता । गायत्रीच्छन्दः । वायविति नवर्चस्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः । प्रथमतृचस्य वायुर्देवता । द्वितीयतृचस्य इन्द्रवायू देवते । तृतीयतृचस्य मित्रावरुणौ देवते । गायत्रीच्छन्दः । अश्विनेति द्वादशर्चस्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः । प्रथमतृचस्य अश्विनौ देवते । द्वितीयतृचस्य इन्द्रो देवता । इत्यादि ।

End. सं समिति चतुर्ऋचस्य सूक्तस्य । आङ्गिरसः संवनन ऋषिः । आद्याया अग्निर्देवता । ततस्तिसृणां संज्ञानं देवता । तृतीयास्त्रिष्टुप्छन्दः । शिष्टानां तिसृणामनुष्टुप्छन्दः इत्यष्टमेऽष्टमः । ६४ । सू० ४९ । ऋ० २१८ ॥ इति दशमं मण्डलम् ॥ संवत् १८६३ ।

विषयः । ऋग्वेदीयशाकलशाखायामृचां प्रत्येकं ऋषिच्छन्दोदेवताप्रयोगकथनम् ।

No. 4260. सिंहानुवाकभाष्यम् । Substance, country-made paper, 9 × 4 inches. Folia, 4. Lines, 10 on a page. Extent, 80 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Siñhánuváka-bháshya.—A commentary on the Vedic Anuváka apparently apocryphal commencing with Simhe Me Manyuh. The Simhánuváka of the Taittiríya Bráhmaṇa does not agree with the present anuváka.

Beginning. अथ सिंहानुवाकभाष्यम् । सिंहे मे मन्युः । मे मम मन्युः क्रोधः सिंहे । हिनस्तीति सिंहः पृषोदरादित्वात् हकारसकारयोर्व्यत्यासः । हकारस्य सः । सकारस्य हः ।

सिंह इति शब्दो जातिवचनः। अस्य वाक्यस्यापरिसमाप्तत्वात् क्रियापदाध्याहारः कर्त्तव्यः। वर्त्ततामिति शेषः। मम क्रोधः प्राणिनां हिंसाकारिण्युग्रजन्तौ वर्त्ततां न मयीत्यर्थः॥ इत्यादि।

End. वैश्वानरोनर्त्तावानन्दं स इष्टोद्दिवीति च।
जातो यत्नमग्ने शोस्माकमग्ने + मस्त + तौ॥
सावित्रादौ मेत्रणेन गणहोमे चतुःशतम्।
उपहोमं व्याहृतिभिः सिंहे मे ते वरं तथा॥

Colophon. श्रीः।

विषयः। सिंहे मे मन्युर्व्याघ्रे मेऽन्तरामय इत्याद्यनुवाकस्य व्याख्यानम्।

No. 4261. सोमाङ्गपानकारिका। Substance, country-made paper, 9 × 4 inches. Folia, 26. Lines, 8 on a page. Extent, 364 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Somáṅgapána-káriká.—The process by which a family of brahmans who make default in performing the Somajága for three generations may resume the right of performing that sacrifice.

Beginning. श्रीगणेशाय नमः।
सोमेन यक्ष्यमाणस्य (यस्य) पित्रादय स्त्रयः।
नेजिरे सोमयागेन स स्याद्विच्छिन्नसोमपः॥
आलभेत स ऐन्द्राग्नमवशो + + + + +।
यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम्॥
स वै दुर्ब्राह्मणो नाम यश्चैव वृषलीपतिः।
विच्छिन्नसोमपानो वा दुर्ब्राह्मण उदाहृतः॥
आलभेताश्विने धूम्रं ललामं सत्त्वजं पशुम्। इत्यादि।

End. कुर्य्याच्चोभयतः पाशं + मयोत्त्विप्रदच्चिणः।
— — — — — ।
एष त्रिशङ्कुमार्गः स्याद्विष्णोपरवकादिषु॥

Colophon. इति सोमाङ्गपानकारिका समाप्ता।

विषयः। त्रिपुरुषं यावत् विच्छिन्नसोमयागस्य विप्रस्य पुनः सोमयागाङ्गतत्पानाधिकारादि-विधिकथनम्।

No. 4262. श्राद्धविभक्तिः। Substance, country-made paper, 9 × 3 inches. Folia, 4. Lines, 10 on a page. Extent, 75 ślokas. Character Nágara. Date, ? Place of deposit, Calcutta, Government of India, Appearance, fresh. Prose and verse. Incorrect.

S'ráddha-vibhakti.—On the case-endings in words used in the *Shráddha* ceremony.

Beginning. श्रीगणेशाय नमः।

अथ श्राद्धविभक्तिरभिधीयते।

अर्घ्यासनयोः षष्ठी द्वितीयावाहने तथा।

अन्नदाने चतुर्थी स्याच्छेषं सम्बोधनं स्मृतम्॥

+ + + पितृपितामहप्रपितामहानाम्। अमुकशर्म्मणाम्। वसुरुद्रादित्यस्वरूपाणाम्। इति षष्ठीबहुवचने। अथ षष्ठ्येकवचनम्। अस्मत्पितुरमुकदेवशर्म्मणः। अमुकगोत्रस्य वसुरूपस्य।

End. पितृपितामहप्रपितामहाः शर्म्माणः गोत्राः। व० रु० आ० पा० तत्पश्चात् (?) तृप्ताः स्थः। मातः दे० गो० व० तृप्तासि॥ तृप्तासि॥

Colophon. इति श्राद्धविभक्तिः।

विषयः। श्राद्धेषु अर्घ्यासनादिदानवाक्ये पित्रादिशब्दोत्तरं विभक्तिनिर्द्देशकथनम्।

No. 4263. शिवपूजासूत्रव्याख्यानम्। Substance, country-made paper, 9 × 4 inches. Folia, 6. Lines, 9 on a page. Extent, in ślokas, 90. Character, Nágara. Date, ? Place of Deposit, Government of India. Appearance tolerable. Prose. Correct.

By Ráma Chundra the son of Pánduranga of the *Atri gotra*. The codex treats of the worship of Síva as laid down by Baudháyana.

Beginning. श्रीगणेशाय नमः।

श्रुतिकञ्जार्थलक्ष्मीं यो विकाशयति हृद्गतः।

स पायात् सच्चिदानन्दः सूर्य्यमण्डलगो हरिः॥

बोधायनेन मुनिना शिवार्च्चोक्ता स्वसूत्रतः।

तद्व्याख्यानं विधास्येऽहं शिवभक्तसुखाप्तये॥

अथातो महादेवस्याहरहः परिचर्य्याविधिं व्याख्यास्यामः। अथ रुद्रप्रतिष्ठाप्रकारप्रवचनानन्तरं यतस्तत्पूजा प्रसक्ता अतो महादेवस्य अहरहः प्रतिदिनं परिचर्य्याविधिं पूजाप्रकारं व्याख्यास्यामः। विस्पष्टं चाभिमुख्येन कथयिष्यामः।

End. इदं पूजनं महत् प्रौढ़ं लोकोत्तरमिति यावत् ।

किञ्च । स्वस्त्ययनं कल्याणनिलयम् । इत्येवमाचक्षते ब्रुवन्ति ब्रह्मवादिन इतीदमस्माह ब्रूते भगवान् माहात्म्योपेतो बौधायनाभिधो महामुनिः ।

Colophon. श्रीमदत्रिगोत्रसमुद्भूतपाण्डुरङ्गसूरिसूनुना रामचन्द्रेण कृतं शिवपूजासूत्रव्याख्यानं समाप्तम् ।

विषयः । बौधायनीयशिवपूजासूत्रस्य व्याख्यानम् ।

No. 4264. सिंहस्थपद्धतिः । Substance, country-made paper, 10×4 inches. Folia, 16. Lines, 8–11 on a page. Extent, 390 ślokas. Character, Nágara. Date, Sk. 1735. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Siñhastha-paddhati.—A plunge in the Godávarí when the planet Vrihaspati or Jupiter is in Leo is said to confer great merit. The writer gives the process of performing this holy bathing according to Hemádri the greatest compiler of modern Smriti.

Beginning. श्रीगणेशाय नमः ।

अथ सिंहराशिस्थिते बृहस्पतौ गोदावरीयात्रा कर्त्तव्या । स्वेष्टदेवार्चनं गेहे विधायाभ्युदयं व्रजेदिति विधेस्तस्य च बृहस्पतिपूजाया अपि विधायकत्वेन मुण्डनञ्चेत्यादिवाक्येन च सिंहस्थपरत्वात् । तदुक्तं ब्राह्मे । मुण्डनञ्चोपवासश्च गौतम्यां सिंहगे गुरौ । इत्यादि ।

End. ततः श्राद्धं कृत्वा ब्राह्मणपूजनं कुर्य्यात् । कर्म्मसाद्गुण्यार्थं + + + ब्राह्मणभोजनञ्च कृत्वा कर्म्मेश्वरार्पणं कुर्य्यात् ॥

Colophon. इति हेमाद्र्यनुसारिसिंहस्थपद्धतिः ॥ शाके १७३५ ।

विषयः । हेमाद्रिनिबन्धानुसारेण सिंहस्थगुरौ गोदावरीयात्राविधानकथनम् । तत्र स्नानादिविधि-तत्प्रयोगादिकथनञ्च ।

No. 4265. निबन्धमहातन्त्रम् । Substance, country-made yellow paper, 16×6 inches. Folia, 314. Lines, 8 on a page. Extent, 7,838 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Incorrect.

Nibandha Mahátantra.—One of the 64 original *tantras*, the principal interlocutors being Hara and Párvatí. It has four *kalpas*

devoted to Síva, Ganesha, Sarasvatí and Sákti. It takes the words Brahma, Náráyana and S'akti to mean the same thing. It treats of the preservation of health. It glorifies Sarasvatí whose colour changed from white to blue owing to a plunge into poison by the treachery of Hayagríva. The Fish Incarnation saved her from the effects of the poison. She pervades the whole universe, as the universe is composed of 50 letters. The gods are mere Mantras, and the Mantras are Sarasvatí. The work goes on with the glorification of the ten Mahávidyás, the selection of sacrificial animals on the different *yugas*, the prohibition of the use of non-sacrifice flesh, the enumeration of the various schools of *tántrikas*, namely the Víráchúras, Chínácháras, Gandharvácháras and Vámácharas, the glorification of the worshippers of Durgá as superior to those of Vishṇu, S'iva, &c., the description of various mystic performances and so on.

Beginning. ॐ नमः परमदेवतायै ।

ईश्वर उवाच ।

एकधा बहुधा चैव दृश्यते भावभेदतः ।

अतो भेदाद्धि कथ्यन्ते तन्त्रे तन्त्रे महेश्वरि ॥

वस्तुभेदः क्वचिदपि न हि कुत्रापि कर्हिचित् ।

देव्युवाच ।

एकस्त्वमपि देवेश मन्त्रोऽप्येकश्च कथ्यते ।

एकाप्यहं नैव नाना कथं जल्पन्त्यनेकधा ॥

ईश्वर उवाच ।

त्वं हि चैका त्रिभुवने त्वदन्या कास्ति सुन्दरि ।

अहमेकः किल पुनर्मदन्यः कोऽस्ति भूतले ॥ इत्यादि ।

End. अन्ते निरालयं ब्रह्म जीवन्मुक्तिञ्च विन्दति ।

अष्टम्याञ्च चतुर्दश्यां नवम्याञ्च विशेषतः ॥

शनिभौमदिनोपेते नित्यां संपूज्यमादिभिः ।

पठित्वा पाठयित्वा वा नरो मुच्येत सङ्कटात् ॥

Colophon. इति निबन्धे महातन्त्रे देवीश्वरसंवादे शाक्तीयं नाम त्रयस्त्रिंशत्पटलः ॥

श्रीशिवौ जयतः ॥

विषयः । शिवाशिवयोः संवादेन निबन्धमहातन्त्रस्य सारस्वत-माहेश गाणेश-शाक्तेयभेदेन चतुःकल्पमयत्वादिकथनम् । नीलसरस्वत्या एव ब्रह्मज्योति'स्वरूपत्वादिकथनम् । शक्तिनारायण-

ब्रह्मशब्दानां तुल्यार्थवाचकत्वादिकथनम्। मानुष्यजन्मनः सुदुर्लभत्वकथनमुखेन धर्म्मार्थकाममोक्षाणां शरीरमूलकत्वनिरूपणपूर्व्वकं विशेषेण शरीररक्षणस्यावश्यकताकथनम्। जीवनस्य क्षणभङ्गुरत्वादिकथनमुखेन देहशोषणात् न मुक्तिः किन्तु ज्ञानादेवेति निरूप्य नीलसारस्वततत्त्वमाहात्म्यकीर्त्तनम्। आब्रह्मस्तम्बपर्य्यन्तं चराचरस्य पञ्चाशद्वर्णात्मकत्वादिकथनम्। नीलसरस्वत्या ध्वनिनादवर्णमन्त्रात्मकत्वकथनम्। मन्त्रादेव ब्रह्मविष्णुशिवादीनामुद्भवादिकथनम्। नीलसरस्वत्या वेदरूपत्वादिकथनमुखेन परापश्यन्तीमध्यमावैखरीरूपवाङ्मयीत्वकथनम्। तस्य गणेश-सूर्य्यशिव-विष्णु-शक्तिरूपतया पञ्चतत्त्वभेदकथनम्। शुभ्रवर्णायाः सरस्वत्या नीलरूपत्वप्राप्तिवृत्तान्तकथनमुखेन समुद्रवासिभ्यां हयग्रीवसोमकण्ठाभिधानाभ्यां दितिसुताभ्यां तपस्यया वशमानीतायास्तस्या वरेण आकृष्टविषकुम्भे निवेशिता सैव मत्स्यरूपधारिणा विष्णुना तौ निहत्य समुद्धारितापि गरलसंसर्गात् नीलभावं प्राप्तेति कथनम्। तत्र तस्याः षाट्कौषिकीतिसंज्ञाप्राप्तिविवरणकीर्त्तनञ्च। काली तारादिदशमहाविद्यानिरूपणम्। वीराचार गन्धर्व्वाचार-चीनाचार-वामाचाराचरणशीलानां रुधिरादिकं विना तारा विद्या न प्रसीदतीति कथनमुखेन सिंहशार्दूलरोहितमेषादिबलिदानेन तस्या प्रीतिसम्भवतारतम्यकथनम्। तत्र सत्यत्रेताद्वापरकलियुगेषु क्रमेण नरोष्ट्रघोटकमहिषबलीनां प्राशस्त्यकथनम्। बलियोग्यछागादिलक्षणकथनम्। बलिदानविधिकथनम्। खड्गध्यानादिकथनञ्च। शान्तिकादिकर्म्मसु मांसादिना होमविधिकथनम्। परमात्मरूपात् वर्णात्मनः शम्भोः सदाशिवरुद्रविष्णुब्रह्मादीनामुत्पत्तिकथनादिकम्। वैधहिंसायां प्रत्यवायाभावकारणकथनप्रसङ्गेन जगत्सृष्टौ अकृतार्थस्य विधातुर्देव्युपदेशादेव बलिदानादिना तत्तोषजननात् सृष्टिसामर्थ्यादिप्राप्तिकथनम्। पूर्णाभिषिक्तस्य सञ्जातकुलज्ञानस्य च देवीपूजने अधिकारादिकथनम्। यागकालं विना अन्यत्र पशुहिंसायां दोषादिकथनम्। जीवस्य उत्क्रान्त्यादिकथनम्। सुरायाः शक्तिरूपत्वं, मांसस्य शिवमूर्तित्वं, भोक्तुर्भैरवरूपत्वञ्चेतिकथनम्। मांसादिभोजनविवेकः। वैष्णवशैवादिभ्यो देवीभक्तस्य श्रेष्ठत्वकथनम्। असंस्कृतमद्यपानादौ दोषादिकथनम्। बलिदानादिलक्षणकथनम्। तारायाः पूजाविधिकथनम्। तत्र योन्यादिमुद्रालक्षणम्। अथ गुरुशिष्ययोर्लक्षणादिकथनम्। दीक्षातदङ्गविध्यादिकथनम्। तत्र वास्तुयागादिविधिकथनम्। कुण्डमण्डलादिनिर्म्माणविधिकथनम्। मण्डलनिर्म्माणविधिकथनम्। अधिवासविधिकथनम्। होमविधिकथनम्। तत्र अग्नेर्गर्भाधानादिसंस्कारविधिकथनञ्च। क्रियावतीदीक्षाकथनम्। अथ वर्णात्मिकादीक्षाकथनम्। अथ पुरश्चरणलक्षणतद्विधिकथनञ्च। अथ नित्यनैमित्तिककाम्यभेदेन त्रिविधार्चनविधानकथनम्। षट्कर्म्मविधिकथनम्। नीलसरस्वत्या वर्णतनुकथनादिकम्। अथ तस्या ध्यानभेदेन साधनादिभेदकथनम्। तर्पणादिविधिकथनञ्च। अथ मन्त्रतद्बीजादिनिरूपणम्। तत्र तत्र दोषादिनिरूपणञ्च। महाचीनक्रमकथनम्। अथ वीरसाधनविधिकथनम्। तत्र चितासाधनादिविधिकथनम्। शवारोहणादिविधिकथनम्। प्रकारान्तरेण पुरश्चरणविधानादिकथनम्। ताराया मूर्त्तिभेदेन साधनविधिकथनम्। तत्र कालीपूजनादिविधिकथनम्। क्रमेण उग्रकाली

महाकाली-सिद्धिकाली-दक्षिणाकाली-भद्रकाली-गुह्यकाली-श्मशानकाली त्रिपुरकाली-कृष्णकाली-रक्तकाली-सितकालिकादिविधिकथनम्। वीराचारविधिकथनम्। तन्माहात्म्यादिकथनञ्च। अथ दिव्यभावकथनादिकम्। तत्र कुमारीपूजनादिविधिकथनञ्च। अथ कुलयोगविधिकथनमुखेन योगविधिकथनम्। तत्र कुण्डलिन्यादिनिरूपणम्। चक्रादिनिरूपणञ्च। अथ वीरभावगान्धर्व्वादिभावलक्षणादिकथनम्। अथ सदाशिवात् जगत्सृष्टिक्रमकथनम्। जीवानामुत्पत्त्यादिक्रमचिन्तनञ्च। अथ कुण्डलिनीतत्त्वनिरूपणम्। कुलधर्म्मविज्ञानार्थं ब्रह्मण उपदेशेन वसिष्ठस्य बुद्धसमीपगमनादिविवरणकथनम्। नटीकापालिकावेश्यादिशक्तिनिरूपणम्। सुधाशोधनादिविधिकथनम्। लक्ष्मीशान्तिपुष्ट्याद्यष्टशक्तिध्यानादिकथनम्। अथ षोढ़ान्यासादिविधिकथनम्। कुलाचारविधानप्रसङ्गेन उपचारनिरूपणादिकम्। पुष्पादिविवेचनम्। दशाङ्गादिधूपविधिकथनम्। आवरणदेवताकथनादिकम्। जपक्रमविधिकथनम्। चीनक्रमकथनम्। अथ बीजादिनिरूपणम्। तदुद्धारविधिनिरूपणञ्च। ताराकवचादिकथनम्। एवं महोग्रतारादिकवचकथनम्। अथ नीलायाः स्तोत्रकवचादिकथनम्। कुलमार्गनिरूपणम्। अथ कौलिकानां भक्ष्याभक्ष्यगम्यागम्यत्वादिविवेकानावश्यकताकथनम्। अथ पूर्णाभिषेकादिविधिकथनम्। लतासाधनादिविधिकथनम्। द्रव्याभावे अनुकल्पविधिकथनम्। श्रीविद्याक्रमकथनम्। चतुःषष्ट्यागमेषु निबन्धमहातन्त्रस्य प्राधान्यकथनम्। अथ छिन्नमस्ताविधिकथनम्। कालीयन्त्रादिविधिकथनम्। श्यामास्तोत्रादिकथनम्।

अथ शैवमन्त्रकथनम्। तद्ध्यानादिकथनञ्च। मृत्युञ्जयादिविधिकथनम्। दक्षिणामूर्त्तिविधानादिकथनम्। नीलकण्ठमन्त्रादिकथनम्। अघोरमन्त्रादिविधानकथनम्। अथ गणेशमन्त्रादिविधिकथनम्। तद्ध्यानस्तोत्रादिकथनम्। गणभेदनिरूपणादिकम्। वर्णदेवताकथनम्। हारिद्रकवचादिकथनम्। अथ विष्णुमन्त्रादिकथनम्। तत्र हयग्रीवादिविधानकथनम्। श्रीराममन्त्रवराहमन्त्र-नृसिंहमन्त्र श्रीकृष्णमन्त्रकथनम्। तद्विधानकथनञ्च। अथ सौरमन्त्रकथनम्। तद्विधानकथनञ्च। अथ प्रसङ्गेन महोदया-त्रिपुटा-विद्याविधानादिकथनम्। अन्नपूर्णामन्त्रादिकथनम्। तत्कल्पकथनञ्च। अथ नित्यामन्त्रादिक्रमविधानम्। अथ वज्रप्रस्तारिणीमन्त्रादिक्रमविधानम्।

इति शम्।

CLASSIFIED INDEX.

I.—Veda S'ástra.

a. *Saṃhitá.*

b. *Brámhaṇa.*

c. *Áraṇyaka.*

d. *Upanishad.*

e. *Vaidika.*

II.—Aitihásika S'ástra.

a. Itihása.

b. Puráṇa.

III.—Kávya S'ástra.

a. Kávya.

VIII.—Jyotisha.

IX.—Smṛiti.

X.—Sañgita S'ástra.

XI.—S'ilpaśástra.

XIV.—Bhakti S'ástra.

XV. Tantra S'ástra.

XVI. Vaidyaka S'astra.

XVII.—Jaina S'ástra.

XIX.—Anirdishta.